मन्दमामेऽपि वर्णेऽस्मिन् क्वचिरे वक्तो बुधा ।
विशीना अपि मौर्वेव मानेनाऽस्वरतो मता ॥४४॥
तत्रमन्मादिमाचाचि कृतको व्याकविशारा ।
वानमाद्याचि चाचाचि रूपवाक्याविकारस्था ॥४५॥
नानाधिकार्यमवदा ऐन्द्रनारिवमीय च ।
उपदेशवदाविका वाक्यदेवकवाऽस्तथा ॥४६॥
क्रतोपमानमिवमा चलिशाममनाद्य ।
पीठतीवादिमाद्यायां सक्तिपूजा सवरम ॥४७॥
एतवाऽस्मव वसुधा मात्र वसुमनीषिभि ।
तवरीपादिमारम्भे प्रयीतं शास्त्रदिभि ॥४८॥
परस्थितवर्णं कोषो चार्म तद् वक्तुं न वैत् ।
सामाऽपि तस्माऽत्र तद्वाऽवमिवाद् विलसं मुवम् ॥४९॥
पवैनाऽपि सुधिनाऽवमनैनाऽस्वरतो भवेत् ।
भवनं बहुवैवस क्षती कीर्तीव रवति ॥ ॥
पुष्को सुवमयी चारमाविनाय भवीरव ।
सुधां कीर्तिमयी चारं राधाकान्तोऽभवतारवत् ॥५१॥
चाऽतव्यं कीर्तितं दीर्घं विमलं चाऽतुलं निजम् ।
अधातर मन्दवमनुवार्ये वर्योवमत् ॥५२॥
पत्र चाममवाभिव्याकरा चाचात् पर तप ।
च भवेद् परं पारं भवाम्बेरिव निर्मल ॥५३॥
कोऽभिवचावरावव वर्णाय क्वाविनो पर ।
अमूल्य चातरमूर्ख विना विदरो महायमा ॥५४॥

स जीवन्नेव सुकृती स्वकृतेरतुलं फलम् ।
विलोक्य सफलं मेने नरजन्म सुदुर्लभम् ॥५५॥
आमेरिकास्थयूरोपवासिनोऽशेषपण्डिता ।
शब्दकल्पद्रुमं दृष्ट्वा ययुः परमविस्मयम् ॥५६॥
धीरेन्द्राश्च नरेन्द्राश्च ये यथासन् तदा भुवि ।
तमभ्यवर्षन् सम्मानैर्मेघा शस्यमिवाऽम्बुभिः ॥५७॥
वङ्गभूर्भुवने धन्या शब्दकल्पद्रुमेण या ।
कल्पद्रुमवतीं नित्यं स्पर्द्धते ह्यमरावतीम् ॥५८॥
स शब्दकल्पद्रुमकृद् यत्र जज्ञे तमालयम् ।
शोभावाजारभूपानां सन्तस्तीर्थं प्रचक्षते ॥५९॥
साधारणोपकाराय मेलनं देशवासिनाम् ।
विदुषां सङ्गमो वाऽऽप तत्रैवाऽद्याऽपि जायते ॥६०॥
महावङ्गसमाजस्य तद्यशोऽद्यापि कीर्त्यते ।
अविसंवादितं सर्वैश्चूडामणिरिति चितौ ॥६१॥
एवं प्रतिष्ठां गमयन् स्ववंशं यशसा नृपः ।
अगण्यपुण्यैर्वन्द्योऽसौ पुण्यलोकमुपेयिवान् ॥६२॥
गते बहुतिथे कालेऽकारि कोऽपिऽत्र दुर्लभे ।
वरदाकान्तमित्राख्ये पुनर्मुद्राङ्कने ग्रहः ॥६३॥
मुद्रा नीतेऽथाऽविकलं शब्दकल्पद्रुमे च तैः ।
अचिरेणैव पुस्तानि तानि निःशेषतां ययुः ॥६४॥
पुनरेवाऽस्य दौर्लभ्यमुपलभ्याऽन्यदुर्लभान् ।
गुणाश्चाऽर्जनि नश्चित्ते पुनर्मुद्राङ्कने ग्रहः ॥६५॥
ततः स्वत्वाधिकारिभ्यः क्रीत्वा स्वत्वं यथाविधि ।
प्रवृत्ता दुष्करे कार्ये वयं सत्कार्यगौरवात् ॥६६॥
वङ्गाक्षरैरितः पूर्व्वं कोष एष प्रकाशितः ।
तेनाऽसौ सुखपाठ्योऽभूत् केवलं वङ्गवासिनाम् ॥६७॥
नागरी वर्णमाला तु संस्कृतैकोपयोगिनी ।
सर्व्वत्राद्रियते प्रायः सर्व्वैः संस्कृतपाठिभिः ॥६८॥
सर्व्वेषां बोधसौकर्यमतोऽस्माभिर्विधित्सुभिः ।
प्रशस्तैर्नागरैर्वर्णैरेष कोषः प्रकाश्यते ॥६९॥

शब्दकल्पद्रुमं कोषं प्रणिनाय यदा नृपः ।
संस्कृतं प्रचरद्रूपं नाऽधुनेव तदाऽभवत् ॥७०॥
तदा प्रयोजनाभावात् स्वकोषे तेन भूभुजा ।
सर्व्वेषामेव शब्दानां व्युत्पत्तिर्नैव दर्शिता ॥७१॥
जन्मभूमिं प्रति प्रेम्णा तेनोपादानलिप्सुना ।
अस्योपादानसामग्री स्वदेशाद् भूयसाहृता ॥७२॥
मुग्धबोधं व्याकरणं वङ्गदेशस्य गौरवम् ।
तन्मतेन ततस्तेन शब्दव्युत्पत्तयः कृता ॥७३॥
पाणिनीयं व्याकरणं प्रायः संस्कृतपाठिभिः ।
सयत्नं सेव्यते सर्व्वैश्चिरमाद्रियते च तत् ॥७४॥
दिने दिने नृणां यावत् संस्कृते भक्तिरेधते ।
पाणिनीयस्य माहात्म्यं तावदेवोपचीयते ॥७५॥
अनुसृत्य ततोऽस्माभिः पाणिनीयानुशासनम् ।
सर्व्वेषामेव शब्दानां व्युत्पत्तिः परिदृश्यते ॥७६॥
प्रव्रतीर्थाश्रमसरिद्देशारण्यमहीभृताम् ।
सिद्धदेवर्षिभूपालशास्त्रशास्त्रकृतां तथा ॥७७॥
कलादर्शनविज्ञानज्योतिषां च नवं नवम् ।
अधुनाविष्कृतं तत्त्वं धन्यैः पाश्चात्यसूरिभिः ॥७८॥
अदृष्टपूर्व्वा शब्दार्था प्रमाणानि बहूनि च ।
इदानीं ग्रन्थविस्ताराद् यान्ति दृष्टिपथं विदाम् ॥७९॥
मूलातिरिक्तं तत् सर्व्वं मूलेऽस्माभिर्निवेश्यते ।
वेष्टनाकारचिह्नान्तर्व्यवच्छेदचिकीर्षया ॥८०॥
अनुचिन्त्य द्वयोरेव पक्षयोः सुखसाध्यताम् ।
अस्माकं ग्राहकानां च खण्डशोऽयं प्रकाश्यते ॥८१॥
परिशिष्टे वक्तव्या विषयाः ।
परिशिष्टद्वयं चैव कोषस्याऽस्य विधीयते ।
एकं धात्वादिसम्बन्धि शब्दसम्बन्धि चाऽपरम् ॥८२॥
प्रथमपरिशिष्टे वक्तव्या विषयाः ।
धातु-धात्वर्थ-रूपाणि लकारार्थौ पृथक् पृथक् ।
अनुबन्धाश्च धातूनां गणवाच्यभिदाऽस्तथा ॥८३॥

जलविहङ्गमाणां विहगानां विहृतिप्रदा ।
सरसी परिमितेऽस्य पञ्चमीतविदिशमती ।८३।
द्वितीयपरिमिते यमसा विषया ।
दीर्घिका यस्य मध्या मेदिकाच विमिता ।
पञ्चप्रकारविस्ताराश्वभारस्य स्थिता ।८४।
पाषाणविद्रुमा नानापुष्पोद्यानेन वेष्टिता ।
दिने दिने प्रकाशन्ते कार्यकीर्त्तिं वितन्वती ।८५।
कार्यप्रमाणान्ते सम्यक् परिमिते द्वितीयके ।
दीयन्ते पुस्तकालयाविषयाश्चनुसारतः ।८६।
कोऽपि कश्चित् यानि भाषाणि प्रमाणानीतानि च ।
मूल्यातिरिक्ता यत्ना वै यस्य सन्ति तेष्वपि ।८७।
तेऽपि कर्मेऽस्य दीयन्ते यथाऽभावोऽस्ति यत्र च ।
यथाकालं यथास्थानं सोऽयमत्राभिनिर्मितवती ।८८।
मन्दाक्षेषु परं पारं न जानाति सरस्वती ।
यत्र व्याप्रमीयं तं को वा निर्वक्तुमीश्वरः ।८९।
समभिव्याहारमाणिक्य तथापत्राणमेवंमे ।
परिमितस्य सम्पूर्णौ यत्नोऽस्य विधीयते ।९०।
एवेन सुद्राङ्कवित् च राजा नामराजरे ।
कुमरीय यत्र कोऽपि कर्मयोगविधिज्ञया ।९१।

पश्चिमेऽहं च विस्तीर्णं वेदमन्दारमन्दिरम् ।
निर्मितं योऽस्य भावस्य महाराज बहुमानित ।९२।
दुर्भिक्षात्तु देवस्य यस्यैव सेविता ।
भीटे भगविता यस्य । मायमाप्तुरमित ।९३।
यशसि च महाभागो यथामान् परवर्त्तिनाम् ।
संस्कृतभाषाविस्तारिणाऽस्य सम्पर्क पुनः ।९४।
यतो वयं संप्रत्ता यस्मिन् संस्थारि मतौ ।
पुस्तकालय तत्रैव भूपस्यैवानुसारतः ।९६।
मन्त्रकमहुमत्साद् कुशात् तत्रैव भूयतः ।
यदि यदिदं पाठाय कार्येऽस्याभिरतामति ।९७।
देवदेव । महादेव । रक्ष रक्ष चिरं विभो ।।
यथावती तत्र राजा वार्धन्यांपीठवीनिभ ।९८।
हे विश्ववासिन सर्वे सन्तो निवासगतायिन ।।
महाराजा मा भवकश्चित् भवन्ता ज्ञानमीरवात् ।९९।
महत्पदवद्या यत्र भवन्तरति पुस्तकम् ।
सिद्धिदाता च भगवान् न पूरवतु वाञ्छितम् ।१० ।
भक्तिभावरूपाणां दीनानां पायनान्तरे ।
भवनाम्यामयो देवो वाञ्छितं प्रददातु न ।१० १।

कलिकाता ।
७१ पाथुरियाघाटा ष्ट्रीट् ।
शकाब्दाः १८ ८ ।

श्रीवरदाप्रसाद वसो
तदनुजस्य च
श्रीहरिचरण वसो ।

शब्दकल्पद्रुमः।

अ, अकारः। आद्यस्वरवर्णः। अस्योच्चारणस्थानं कण्ठः। स तु ह्रस्वो दीर्घः प्लुतश्च भवति। इति व्याकरणम्॥ अस्य लेखनप्रकारो यथा,—

"दक्षतः कुण्डली भूत्वा कुञ्चिता वामतो गता।
ततोर्द्धसङ्गता रेखा दक्षोर्द्ध्वा तासु शङ्करः॥
विधिर्नारायणश्चैव सन्तिष्ठेत् क्रमतः सदा।
अर्द्धमात्रा शक्तिरूपा ध्यानमस्य च कथ्यते॥"

इति वर्णोद्धारतन्त्रम्॥ अस्य तत्त्वं यथा,—

"शृणु तत्त्वमकारस्य अतिगोप्यं वरानने।
शरच्चन्द्रप्रतीकाशं पञ्चकोणमयं सदा॥
पञ्चदेवमयं वर्णं शक्तित्रयसमन्वितं।
निर्गुणं त्रिगुणोपेतं स्वयं कैवल्यमूर्त्तिमान्॥
विन्दुतत्त्वमयं वर्णं स्वयं प्रकृतिरूपिणी"।

इति कामधेनुतन्त्रम्॥ अस्य पर्य्यायः।

"अ श्रीकण्ठो मातृकाद्योऽनन्तो विष्णुरनुत्तरः"।

इति वीजवर्णाभिधानम्॥ अन्यच्च।

"अः श्रीकण्ठः सुरेशश्च ललाटश्चैकमात्रिकः।
पूर्णोदरी सृष्टिमेधौ सारस्वतः प्रियम्वदः॥
महातेजा वासुदेवो धनेशः केशवोऽमृतः।
कीर्त्तिर्निवृत्तिर्व्वागीशो नरकारिर्हरो मरुत्॥
ब्रह्मा वामार्धजो ह्रस्वः करसु प्रणवाद्यकः"।

प्रणवाद्यावयव इत्यर्थः।

"ब्रह्माणी कामरूपश्च कामेशी वासिनी वियत्॥
विश्वेशः श्रीविष्णुकण्ठो प्रतिपत्तिर्यिरशिनी।
धर्म्ममण्डलवर्णाद्यो ब्राह्मणः कामकर्षिणी"॥

इति वर्णाभिधानतन्त्रम्॥

अ, व्य, अभावः। अन्यः। निषेधः। अनुकम्पा। इति मेदिनी। (नञोऽयमकारः षड्विधान् नञर्थान् बोधयति। यथा,—

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः"॥

इति। सादृश्ये यथा—अब्राह्मणः ब्राह्मणसदृश इत्यर्थः। अभावे यथा—अभोजनं भोजनाभावः। अन्यत्वे यथा,—पटः अघटः, पटः घटभिन्न इत्यर्थः। अल्पत्वे यथा—अनुदरी कन्या अल्पोदरी इत्यर्थः। अप्राशस्त्ये यथा,—अधनः धर्म्मधनं, धर्म्मधनम् अप्रशस्तधनम् इत्यर्थः। विरोधे यथा—अधर्म्मः परापकारः, परापकारः धर्म्मविरोधी इत्यर्थः।)

अः, पुं, (अतति सर्व्वं व्याप्नोति इति अततेर्ड) विष्णुः। इति मेदिनी।

"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः।
मकार उच्यते ब्रह्मा प्रणवेन त्रयो मताः"॥

इति दुर्गादासधृतवचनम्। (क्ली। ब्रह्म। यथा,—
अ इ उ ए ओ ओम् कथाच्च मूलं ब्रह्म इति कीर्त्तितम्, इति अग्निपुराणम्।)

अंश्टणी, [न्], त्रि, (न ऋणी, नञ्समासः। अत्र अशब्दो न नञ्जातः, तथात्वे अनृणी इत्येव स्यात्। अपितु स्वप्रकृतिरेव ततश्च अम्मात्रनिपातनात् नात्र सन्धिरिति ज्ञेयम्।) अनृणी। अऋणयुक्तः। अधारी। यथा,—

"दिवसस्याष्टमे भागे शाकं पचति यो नरः।
अनृणी चाप्रवासी च स वारिचर मोदते"॥

इति महाभारतम्।

अंश, त् क विभाजने। अंशकरणे। इति कविकल्पद्रुमः। तालव्योपधः। विभाजनं इति भाज त् क तु पृथक्कृत्यां इत्यस्य रूपम्। अंशयति अंशापयति धनं वणिक्। इति दुर्गादासकृतधातुदीपिका॥

अंशः, पुं, (अंश विभाजने, अदन्तचुरादिः। कर्म्मणि घञ्।) विभाजनम्। तत्पर्य्यायः। भागः २। वण्टकः ३। इत्यमरः॥ विभागः ४ भक्तिः ५। इति जटाधरः॥ असशब्दो दन्त्यसान्तोऽपि। अंशास त् क त्रिभाजने इति कविकल्पद्रुमदर्शनात्। स्कन्धः। इति विद्याविनोदादयः॥ (वस्त्वेकदेशः। रिक्थविभागः। चतुर्थभागः। भाज्याङ्कः। रविमूर्त्तिविशेषः। आदित्यविशेषः, यथा,—

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च।
भगो विवस्वान् पूषा च सविता दशमस्तथा॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरेव च।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः"॥

इति महाभारतम्। वृत्तस्य षष्ट्यधिकत्रिशततमभागः। यदुवंशीयनृपविशेषः, यथा—ततः कुरुवत्सः ततश्च अनुरथः ततः पुरुहोत्रो जज्ञे ततश्च अंश इति।)

अंशक, क्ली, दिनम्। इति त्रिकाण्डशेषः॥

अंशकः, पुं, (अवश्यमंशं हरति इति अंश हारीति कन्।) ज्ञातिः। दायादः। इति त्रिकाण्डशेषः॥ (अल्पांशः। अल्पार्थे कन्।)

अंशभाक् [ज्], त्रि, (अंशं भजते इति अंश+भज्+ण्वि।) अंशी। (दायादः) यथा। बौधायनः।

"स्रवन्तीष्वनिरुद्धासु त्रयो वर्णा द्विजातयः।
प्रातरुत्थाय कर्त्तव्यं देवर्षिपितृतर्पणं"॥
निरुद्धासु न कुर्व्वीरन्नंशभाक् तत्र सेतुकृत्।

इति प्रायश्चित्ततत्त्वम्॥

अंशलः, त्रि, (अंशः प्रशस्तस्कन्धः अस्ति अस्य इति अंश+लच्।) असलः। बलवान्। इत्यमरटीकायां रमानाथः॥ (प्रशस्तस्कन्धविशिष्टः)

अंशी, [न्], त्रि, (अंशोऽस्यास्तीति अंश+इनि।) अंशयोग्यः। वण्टकविशिष्टः। भागी। यथा याज्ञवल्क्यः।

"विभागञ्चेत् पिता कुर्य्यात् स्वेच्छया विभजेत् सुतान्।
ज्येष्ठं वा श्रेष्ठभागेन सर्व्वे वा स्युः समांशिनः"॥

इति। सति तु पितरि मात्र्व्वणानधिकारात् पुत्राणां नांशिता। एवं धनिनः पौत्रस्वत्वोपरमे तदंशमात्रे प्रपौत्राणामंशिता। इति दायतत्त्वम्॥

अंशुः, पुं, (अंशयति इति अंश विभाजने। मृगय्वादित्वात् कु।) किरणः॥ प्रभा॥ इति मेदिनी॥ वेशः॥ इति धरणी॥ सूत्रादिसूक्ष्मांशः। इति हेमचन्द्रः॥ लेशः॥ सूर्य्यः॥ इति विश्वः॥ (ऋषिविशेषः। लतावयवः। सोमलतावयवः। भागः।)

अंशुक, क्ली, (अंशून् कायति। कै शब्दे। आतश्चेति कः। यद्वा अंशुभिः काशते। काश दीप्तौ। अन्येष्वपीति डः।) वस्त्रमात्रं॥ सूक्ष्मवस्त्रं॥ उत्तरीयवस्त्रं॥ इति मेदिनी॥ शुक्लवस्त्रं॥ इत्यमरटीकायां रमानाथः॥ (अधोवस्त्रं।) पत्रं। तेजपात इति भाषा। इति राजनिर्घण्टः॥

अंशुधरः, पुं, (अंशूनां धरः। धरति इति धरः॥ पचाद्यच्।) सूर्य्यः॥ इति त्रिकाण्डशेषः॥

अंशुमत्फला स्त्री, (अंशुमन्ति सूक्ष्मावयववन्ति फलानि यस्याः। अंशुमानिव फलानि अस्या इति वा। अजादित्वात् टाप्।) कदलीवृक्षः। इत्यमरः॥

अंशुमती स्त्री, (अंशवः सन्ति अस्याः। मतुप् ङीप् च। अंशुमत्याः फलं मूलञ्च अंशुमतम्। अनुदात्तादेरेति अञ्। फलपाकमूलेषु इति लुपि युक्तवद्भावः।) शालपर्णीवृक्षः॥ इत्यमरः॥ (परदेवता।)

अंशुमान् [त्] पुं, (अंशवो विद्यन्ते अस्य इति। तदस्यास्तीति मतुप्।) सूर्य्यः॥ इति त्रिकाण्डशेषः॥ असमञ्जपुत्रः सूर्य्यवंशीयराजविशेषः॥ यथा।

"सगरस्यासमञ्जस्तु असमञ्जादथांशुमान्।
दिलीपोऽंशुमतः पुत्रो दिलीपस्य भगीरथः"॥

इति रामायणे बालकाण्डे ४ सर्ग । शालमल्यादिरोमयील । यथा —

"दक्षवारानमग्रा मधुस्यन्दकारये ।
पत्रवर्षे मवत्ता समार काननोकसा ।
दिलीपस्तस्य तनयो मधुमासमवारये ।
तत्र हत्वा त्रयवर्षे वसौ गोदावार्य यथा ।
अंशुमांस्तस्य पुत्रोऽभूत् समन्त्रापरमवारये ।
तथा हत्वा चतुर्थं समार काननोकसा ।
भगीरथस्तस्य सुतो महाभागवता सुधीः ।
तथा हत्वा चतुर्थं समार काननोकसा" ।

इत्यादि ब्रह्मवैवर्ते प्रकृतिखण्डे ८ अध्यायः । (विश्वामित्रपत्नात् यस्माभ्या ।) अंशुमते त्रि । दीप्तिमता प्रकाशविशिष्टा ।)

अंशुमाली [न्] पु (अंशवो माला सन्ति अस्य इति । व्रीह्यादित्वात् इनिः ।) सूर्यः । इति त्रिकाण्डशेषः । (अस्य रश्मिमाली अकार, इति विश्वकोषम् ।)

अंशुल, पुं (अंशुः दीप्तिरिति अस्ति अस्य । इति । अंशु+लच् ।) चाणक्यमुनिः । इति त्रिकाण्डशेषः ।

अंशुहस्त पु (अंशुरेव हस्तो यस्य सः ।) सूर्यः । इति शब्दमाला ।

अंस द्, चु विभाजने । अदन्तचुरादेः । इति कविकल्पद्रुमः । अंसोपनिबन्धः । विभाजन इति मात्र द्, च तु प्रयत्नकर्त्ता इत्यस्य अर्थः । अंसयति अंसापयति धनं वणिक् । इति दुर्गादासः ।

अंस, पुं, क्ली, (अंस्यते समाहन्यते । अंस समाघाते । घञ् । यद्वा अमति गच्छति वा भारादिना । अम गतौ । अमेः सन्) स्कन्धः । इत्यमरः । विभागे पुं । इति त्रिकाण्डशेषः । (अव्ययम् अथवा अंसकाण्डे द्रष्टव्यम् ।)

अंसकूट पुं, (अंस स्कन्धे कूटमिव इति ।) ककुद् । वृषस्कन्धस्थ इति भाषा । इति हेमचन्द्रः ।

अंसल त्रि (अंसौ स्तः अस्येति । सिध्मादिभ्यश्च इति लच् ।) बलवान् । इत्यमरः ।

अंहः [स्] क्ली, (अमति गच्छति प्रायश्चित्तेन । अम गत्यादिषु । अमेः हुक् च इति असुन् हुगागमश्च । अमति गच्छति अघोऽधोभागं वा अनेनैव इति । तस्मात् सिद्धं अंहोऽर्हति अघं इति वा भूरिति अस्य अर्थ इति सूर्यः । यथा च—

"अभ्यर्थोऽप्यन्यदंहसोऽमलत्वा" ।

इति हितोपदेशः । अस्य रूपाणि निरुक्ते विस्तृत प्रकाश्य प्रायश्चित्तम्, इति सूर्यप्रकाशे धातु चतुर्भागिकायां प्रायश्चित्ते अहिं वर्तते ।) पापं । इत्यमरः । (दुःखं । विघ्नं । व्यसनम् ।)

अंहतिः, क्ली (अंहति दुरितमनया । अम गम इति अतिः ।) दानं । इत्यमरः । टीका । त्यागः । इति मेदिनी ।

अंहती स्त्री, (अंहत् । ङ इति अंहति क्वचिदादित्वात् ङीप् ।) दानं । इत्यमरटीकायां रायमुकुटः ।

अंहतिः, स्त्री, (अंहत्+ अति । अंहतेश्च इति रायमुकुटः) दानं । इत्यमरटीकायां रायमुकुटः ।

अंह्रिः, पुं, (अंहि+क्रिन् । अंहत इति इत्यादौ विवृतम् ।) पादः । इत्यमरः । इत्यमरः ।

अंह्रिपः, पुं, (अंह्रिणा पिबति इति । पा पाने । सुपीति योगविभागात् कः ।) वृक्षः । इति शब्दरत्नावली ।

अंह्रिस्कन्धः पुं, (अंह्रेः पादस्य स्कन्ध इव ।) गुल्फः । (घुटिका ।) इति हेमचन्द्रः ।

अक म वक्रगतौ । कुटिलगमने । इति कविकल्पद्रुमः । न अकति अकति सर्पः । इति दुर्गादासः ।

अक, इ न व्याप्तौ । इति कविकल्पद्रुमः । अस्य चित्रवणविधये । इ न अङ्कयति यक्ष रचना । भीमसेनपाठेऽपि चौधैरयाक्षरद्युहितादिवाग्मादिकम् अकामतो अकारी अकामे अकारी सिद्धे इति वाक्यपदादेर्नियमितत्वाभावात् । तेन अङ्गूढोऽपि स्यात् । यथाह वैयाकरणः ।

"सिद्धे निमित्तनिमित्ताधिकानुमते विधानमिदम् ।
निर्विशेषाणामर्थानामपि न दृष्टोऽनुनिर्वाच्यविधिरिति" ।

अस्यार्थः । सिद्धे धातुरूपाणां निमित्तनिमित्तानां विधानमिति वदता दृष्टिदर्शनत्वं सिद्धे इति अनुदात्तत्वं विधी चेत् विकल्पीभावतया । किन्तु धातुनिर्विशेषादनुभावः कथमपि न दृष्टा । इति दुर्गादासः ।

अक ह न गतौ । अकति । इति कविकल्पद्रुमः । इ अङ्कये । न अङ्के चकाराद्यर्थे अनुबन्धात्मक क्रिया । इति रमानाथः । इति दुर्गादासः ।

अकं क्ली (न कं सुखं । प्रतिषेधे वा । नञ्समासः । नञा न वैशा ।) पापं । दुःखं । इति मेदिनी ।

अकच, पुं, (नास्ति कचाः केशा यस्य सः ।) केतुग्रहः । इति शब्दरत्नावली । कबन्धितुल्य केशमुक्ते ।

अकच्छ त्रि न कच्छः । नञ्समासः ।) कक्ष-हीनः । बहुलकः ।

अकनिष्ठ पुं, (न कनिष्ठः नञ्समासः । बुद्धः । इति शब्दरत्नावली । (अङ्गनि बलवन्तस्तानि स्वयं वदिव्यन्ते देवाः कनिष्ठतामवाप्यन्ते इति अक-निष्ठाः ।) कनिष्ठसिद्धे वाचस्पत्यम् ।

अकनिष्ठग पुं (अकनिष्ठ+गम्+डः ।) बुद्धः । इति त्रिकाण्डशेषः ।

अकपिश पुं, (न कपिशः । नञ्समासः ।) बौद्धसाधुविशेषः । इति हेमचन्द्रः । अस्य-र्थवृत्ते वाचस्पत्यम् । (अकर्तं स्यात् करात् भुक्ता इत्यमरतानस्तत्वात् । इति व्याप्येविशेषाधिक-रणकत्वम् ।)

अकरणि स्त्री, (न+कृ अनि ।) आक्रोश-विशेषः । शापः । यथा तस्याकरणिरेवास्तु । इत्यमरः ।

अकरा, स्त्री, (न+कृ+अच् । स्त्रियां टाप् ।) आमलकी । इति शब्दचन्द्रिका । वाचस्पत्यम्

अकरदिवे ।

अकरा त्रि, (नास्ति करः यस्य इति ।) करदः ।

मूल्यं । निर्लेपं । अकृतं । यथा,—

"दण्डोऽदण्डे कुत्सितमकस्मादतिवस्ति कः" ।

इति महाभारतम् ।

अकर्कश, त्रि (न कर्कशः । नञ्समासः ।) कार्कश्यरहितः । कोमलः । इति हेमचन्द्रः । (अकठिना अपरुषा । इति अभिधानचिन्तामणिः ।)

अकर्ण, त्रि (नास्ति कर्णौ यस्य सः ।) कर्णरहितः । यथा,—

"अपादपाणिरेषो मनसो मनीषी
श्रवणमखण्डा न चक्षोरकर्णः" ।

इति श्वेताश्वतरोपनिषद्भाषिणः ।) बधिरः । इति हेमचन्द्रः ।

अकर्तन, पुं (न+कृत्+ल्युट् ।) वामनः । खर्वः । इति शब्दमाला ।

अकर्तव्य त्रि (न+कृ+तव्य । न कर्तव्यं । नञ् समासः ।) अकरणीयः । अयुक्तकार्ये । अन्याय्यम् । यथा,—

"अविरोधी सदाचारी च धर्ममग्राह्यमग्रे ।
विरोधी धार्मिकानां सर्वोपकारकारयेद् ।
अकर्तव्ये विरोधश्च सात्त्विके चाचिरेण वत्" ।

इति ब्रह्मवैवर्ते प्रकृतिखण्डे ४४ अध्यायः ।

अकर्ता [तृ] त्रि, (न कर्ता । नञ्समासः ।) अकारकः । यथा,—

"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्" ।

इति श्रीमद्भगवद्गीतायां ४ अध्याये १३ श्लोकः । (कर्मविहिता वाह्योक्त मयका । कुकर्मकारी ।)

अकर्म [न्] क्ली (न कर्म । नञ्समासः ।) कर्मणोऽभावः । यथा,—

"किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥
कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ।
कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्" ।

इति श्रीमद्भगवद्गीतायां ४ अध्याये १६ । १७ ।
१८ श्लोकाः । (अप्रशस्तं कर्म । कर्माभावः । दुष्कर्म ।)

अकर्मक, त्रि (न कर्माणि यस्य । न+कर्मन् +कप् । अकर्मकेभ्यः । कर्मशून्ये । निष्फलकर्म । धात्वादि इति भाषा । यथा —

"फलव्यापारयोरेकनिष्ठतायामकर्मकः
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः" ।

इति सिद्धान्तकौमुदी ।

अकर्मा, [न्] त्रि (नास्ति कर्म यस्य । बहु-व्रीहिः । कार्याक्षमः । निष्कर्मा । कार्मशून्यः । (क्रियारहितः । कुकर्मा । अनाचारी)

अकर्मान्वित, त्रि (कर्मणा अन्वितः न भवतीति । न+कर्मन्+अन्वित ।) कुकर्मान्वितः । अकर्मविशिष्टः । दुष्कर्मकः ।

अकल्मष, त्रि (नास्ति कल्मषं यस्य सः । न+कल्मष ।) दोषरहितः । शुचिः । शुद्ध

दम्भ ७। इति हेमचन्द्रः॥ (शाठ्यरहित। सरल।) अकल्कल इत्यपि पाठ।

अकल्का, स्त्री, (नास्ति कल्कः अन्धकारमालिन्यं यस्याम् इति।) ज्योत्स्ना। इति शब्दचन्द्रिका॥ वाच्यलिङ्गस्तु कल्करहिते॥ (शाठ्यशून्य। दम्भशून्य। सरल। निर्म्मल।)

अकल्पित, त्रि, (न कल्पित इति। नञ्समासः।) कल्पनारहित। अकाल्पनिक। अकृत्रिम। अरचित। (सत्य। प्रकृत। अवितथ।)

अकल्य, त्रि, (न कल्यः सुस्थः। नञ्समासः।) रोगी॥ (यथा,—

"अकल्यबालस्थविरविषमस्थक्रियाकुलाम्।

. . . . नाह्वाययेन्नृपः"॥

इति मिताक्षराधृतवचनम्॥ असमर्थ। यथा,—

"अकल्यः स्वाङ्गचेष्टाया शकुन्त इव पञ्जरे"।

इति भागवते।) कल्यो नीरोगस्तत्र नञ्समास॥

अकल्याण, क्ली, (न कल्याणं। नञ्समास।) अमङ्गल। अशुभ॥ (त्रि। कल्याणरहितः।)

अकस्मात्, व्य, अतर्कित। हठात् १। सत्पर्य्याय। सहसा २ सद्य ३ सपदि ४ तत्क्षणे ५ एकपदे ६। इति हेमचन्द्रः॥ नञ्समस्तकिम्शब्दस्य पञ्चम्यन्तप्रयोगोऽयं। इति केचित्॥

अकारण, त्रि, (नास्ति कारणं यस्य स। न+कारण।) कारणशून्य। निर्हेतु। अनिमित्त। यथा,—

"कुतः पुनः शश्वदभद्रमीश्वरे,

न चार्पितं कर्म्म यदप्यकारणम्"।

इति श्रीभागवते। (कारणं विना। कारणाभाव। यथा,—"कारणसामान्ये द्रव्यकर्म्मणां कर्म्माकारणमुक्तम्"। इति वैशेषिकसूत्रम्।)

अकारणगुणोत्पन्नगुणः, पु, (विना कारणगुणं उत्पन्ना जाता ये गुणाः। अकारणगुण+उत्पन्न+गुण।) स्वाभाविकगुण। न्यायमते विभुनिष्ठविशेषगुणा यथा,—बुद्धिः १ सुख २ दुःख ३ इच्छा ४ द्वेष ५ यत्न ६ धर्म्म ७ अधर्म्म ८ भावना ९ शब्द १०।

("अतीन्द्रिया विभूनान्तु ये स्युर्वैशेषिका गुणाः।

अकारणगुणोत्पन्ना एते तु परिकीर्त्तिताः"॥

इति भाषापरिच्छेदे। अकारणेति कारणगुणपूर्व्वका रूपादयो वक्ष्यन्ते। बुद्ध्यादयस्तु न तादृशाः। आत्मादेः कारणाभावात्।) इति सिद्धान्तमुक्तावली॥

अकार्पण्य, क्ली, (न कार्पण्यम्। नञ्समासः।) कृपणतारहित्य। यथा,—

"स्तोकादपि च दातव्यमदीनेनैव चात्मना।

अहन्यहनि यत्किञ्चिदकार्पण्यं हि तत् स्मृतम्"॥

इत्येकादशीतत्त्वम्॥

अकार्य्य, क्ली, (न कार्य्यम्। नञ्समासः।) कार्य्याभाव। अकृत्य। अकर्म्म। (दुष्कर्म्म। कुकार्य्यम्।) यथा,—

किमकार्य्यं कदर्य्याणां दुस्त्यजं किं धृतात्मना"।

इति श्रीभागवत॥

अकाल, पु, (न कालः, अप्रशस्तः कालो वा। नञ्समासः।) असमयः। अप्रशस्तकाल। यथायोग्यकालातिरिक्तसमय। अशुद्धकाल। यथा,—गुरोरस्तात् प्राक् वृद्धत्वे पञ्चदशाहः। तस्यास्ते द्वात्रिंशद्दिनं। तस्योदयात् परं बालत्वे पञ्चदशाहः। गुर्व्वादित्ययोगे स्थितिकालः दशत्रिंशद्दिनादिः।

सिंहे गुरौ स्थितिकालः सम्वत्सरस्थूलः। अस्य विशेषः यदि माघपौर्णमास्यां मघानक्षत्रं प्राप्यते तदैव भाव्य। वक्रिगुरौ अष्टाविंशतिदिनं। पूर्व्वराशावनागतातिचारिगुरौ एकवर्षं। अयमेव लुप्तसम्वत्सरः। पूर्व्वराशिगतातिचारिगुरौ पञ्चचत्वारिंशत् दिनं। नीचस्थगुरौ स्थितिकालः सम्वत्सरस्थूलः। राहुयुक्तगुरौ स्थितिसमयः एकाब्दः स्थूलः। भृगोर्मध्यास्तात् प्राक् वृद्धत्वे पञ्चदशाहः। तस्य मध्यास्ते त्रिसप्ततिदिनं। तस्योदयात् परं बालत्वे दशाहः। एतत्तु शौभाग्यमुच्यते॥ भृगोः पश्चादस्तात् प्राक् वृद्धत्वे दशाहः। तस्य पश्चादस्ते द्वादशाहः। तस्योदयात् परं बालत्वे दिनत्रयं। एतत्त्रयं वक्रास्तानुदितं। मलमासे मासमेकं॥ भानुलङ्घितमासे क्षयमासे च तदेव॥ भूकम्पाद्युत्पाते सप्ताहः॥ पौषादिचतुर्मासे एकदिनवर्षणाक्रान्तवर्षणे तद्दिनं। दिनद्वयवर्षणाक्रान्तवर्षणे दिनत्रयं। दिनत्रयवर्षणाक्रान्तवर्षणे सप्ताहः॥ दक्षिणायने षण्मासाः॥ श्रीहरिशयने चतुर्मासाः॥ चन्द्रसूर्य्यग्रहणे कर्म्मविशेषे एकत्रिसप्तदिनानि॥ इति ज्योतिस्तत्त्व॥

अकालज, त्रि, (अकाले जायते इति। अकाल+जन+ड।) अकालजात। असमयोत्पन्न। अपूर्णकालोद्भव। यथा,—

"अकालजन्तु विरसं न धान्यं गुणवत् स्मृतं"॥

इति राजवल्लभे॥

अकालजलदोदय, पु, कुज्झटी। इति शब्दमाला॥ अकाले मेघानामुदय॥ यथा रघुवंशे—

"यवनीमुखपद्मानां सेहे मधुमदं न सः।

बालातपमिवाब्जानामकालजलदोदयः"॥

अकालमेघोदयः, पु, (अकाले यः मेघानाम् उदयः।) कुज्झटी। इति शब्दमाला॥ अकाले मेघानामुदय॥

अकिञ्चन, त्रि, (नास्ति किञ्चन यस्य। मयूरव्यंसकादित्वात् बहुव्रीहिसमासः।) दरिद्र। नास्ति किञ्चिदपि यस्य। इति हेमचन्द्रः॥ (यथा,—'अकिञ्चनः सन् प्रभवः स सम्पदाम्' इति कुमारसम्भवे।)

अकिञ्चनता, स्त्री, (अकिञ्चनस्य भाव। अकिञ्चन+तल्।) अकिञ्चनस्य भाव। सा तु परिग्रहत्यागरूपयमविशेष। इति हेमचन्द्रः॥

अकिल्बिष, त्रि, (नास्ति किल्बिषं यस्य। बहुव्रीहि।) किल्बिषशून्य। पापरहित। यथा,—

"न मां दोषेण सुग्रीव गन्तुमर्हस्यकिल्बिष"।

इति रामायणे॥

अकीर्त्ति, स्त्री, (न कीर्त्ति। नञ्समास।) अयश। यथा,—

"अकीर्त्तिञ्चापि भूतानि कथयिष्यन्ति तेऽव्ययां।

सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते"॥

इति श्रीभगवद्गीतायाः २ अध्याये ३४ श्लोकः॥

अकीर्त्तिकर, त्रि, (अकीर्त्तिं करोति जनयति इति। यद्वा कीर्त्तिकरं न भवतीति नञ्समासः।) अयशस्कर। यथा—

"कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं।

अनार्य्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्ज्जुन"॥

इति श्रीभगवद्गीतायाः २ अध्याये २ श्लोकः॥

अकुतोभय, त्रि, (नास्ति कुतोऽपि भयं यस्य सः। मयूरव्यंसकादिगणान्तर्गत। न+कुत+भय।) नास्ति कस्माद्भयं यस्य। निर्भय। यथा। इच्छतामकुतोभयमिति भक्तिरसामृतसिन्धुः॥

अकुप्य, क्ली, (न कुप्यं, कुप्यादन्यदित्यर्थ। नञ्समास।) स्वर्णं। रूप्यं इति हलायुध॥ यथा—कृत्स्नकुप्यं वसु वासयोपमं'। इति भारवि)।

अकूपार, पु, (न कूपारः। नञ्समास। कु पृथिवीं पिपर्त्ति इति कूपार। पृ पालनपूरणयोः। कर्म्मणि अण्। अन्येषामपीति दीर्घं।) समुद्र। इत्यमरः॥ कूर्म्मराज। पाषाणादि। इति मेदिनी॥ कमठ। इति त्रिकाण्डशेषः॥

अकूर्च, पु, (नास्ति कूर्चं कैतवं यस्य। बहुव्रीहि।) बुद्ध। इति त्रिकाण्डशेषः। कैतवशून्ये त्रि। (दम्भशून्ये)।

अकृत, त्रि, (न+कृ+क्त।) न कृत। अनिष्पादित। यथा—

"कालातीतन्तु यत् कुर्य्यादकृतन्तद्विनिर्द्दिशेत्"

इति स्मृतिः॥ (नित्य। प्रमाणाविषयः। (क्ली) मोक्ष। कारण। (स्त्री) प्रकृतिविशेष। यथा—"अपां निम्नदेशगमनादिलक्षणा प्रकृतिः सा न केनचित्कृता"।)

अकृतज्ञ, त्रि, (न+कृत+ज्ञा+क। न कृतज्ञ इति नञ्समास।) कृतघ्न। हितास्मर्त्ता। उपकारामानी। उपकारहन्ता। यथा,—

"भजतोऽपि न वै केचिद्भजन्त्यभजतः कुतः।

आत्मारामा पूर्णकामा अकृतज्ञा गुरुद्रुहः"॥

इति श्रीभागवते॥

अकृतित्व, क्ली, (अ+कृतिन्+त्व।) अक्षमता। अपटुता। कर्म्माकुशलत्व। अयोग्यत्व॥

अकृती, [न्] त्रि, (न+कृती। नञ्समास।) कर्म्माक्षम। कार्य्याकुशल। क्रियानुपयुक्त।

अकृत्रिम, त्रि, (करणात् जातः कृत्रिमः। स न भवतीति नञ्समास।) अकरणज। अजन्य। सिद्ध। अकरणजात। यथा दक्ष।

"चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्।

तिलपुष्पकुशादीनि स्नानञ्चाकृत्रिमे जले"॥

इत्याह्निकाचारतत्त्व॥ ०॥ किञ्च। कात्यायन।

"पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत्।

बोधयेत् पूर्व्ववच्चानु समाधौ चरदर्शनं"।

समाधेर्ज्ञ अवधिर्म्मं। इति अमरटीकायां। (अविनीतता। निर्द्दयता। अपमानता। यथा,—

"अदक्षिणमनौत्सुक्यमाचष्ट इति न मन्यति"।

इति हितोपदेशः।)

अकृप त्रि (नास्ति कृपा यस्य वा।) कृपाशून्यः। निर्द्दयः। अदयकः। यथा,—

"अकृपौ अकृपौ क्रूरकर्म्मा अपरोऽहम"।

इत्यनुकूलार्थौ।

अकृपण, त्रि (न कृपणः। नञ्समासः।) कार्पण्यरहितः। दीनतारहितः। यथा,—

"मधुरा वचनं प्राप्तो दीना द्वयस्य अर्थते।

कुर्व्वेऽप्यक्तवे राम अकृपणा तथाभवे"।

इति रामायणं। (कृपणता। बद्धता। यथा,—

"कृपणा मनसापीरत्वमर्वेऽपि कामो यथम्"।

इति वैराग्यशतके।

अकृष्णकर्म्मा, [न्] त्रि (न कृष्णं मलिनं कर्म्म यस्य सः। न+कृष्ण+कर्म्मन्।) शुक्लकर्म्मविशिष्ट निष्पापः। शुद्धाचारः। अकर्म्म निष्पापकलाम् शुद्ध कर्म्मास्य। इत्यमरटीकायां भरतः।

अकोप, त्रि (नास्ति कोपो यस्य। अल्पः अल्पस्तो वा कोपो यस्य वा।) कोपरहितः। अल्पकोपयुक्तः अल्पक्रोधविशिष्टः।

अकैतव, क्ली, (न कैतवम्। नञ्समासः।) कपटाभावः। अवञ्चना। अकूटता। सरलता।

अकोट, पुं, (अ+कुट+णिच्+अच्।) गुवाकः। इति त्रिकाण्डशेषः।

अकोविद, त्रि (न कोविदः। नञ्समासः।) अपण्डितः। मूर्खः।

अकौटिल्य, क्ली, (न+कौटिल्य। नञ्समासः।) कौटिल्याभावः। सरलता।

अक्का, स्त्री, (अकं दुःखं कायति नाशयति इति कै शब्दे।) माता। इति शब्दरत्नावली।

अक्त, त्रि (अञ्जेर्भावे क्तः। अञ्जनविशिष्टः। अञ्जिः व्यक्तिम्रक्षणकान्तिगतिषु अस्मात् क्तः। अनक्ति अभ्यक्ते वा। अञ्ज् व्यक्तौ। अक्तिमुक्तिभ्य क्तः इति औणादिकः क्तः।) अक्तः। युक्तः। व्याप्तः। अञ्जन अक्तिविशिष्टः। इत्यमरः अर्थाम्भिः क्तः। यथा,—

"नित्यानादानाङ्गुरे मूर्त्ते निगाढे योर रक्षते"।

इति भरतः। (लिप्तः मक्षा इति अर्थे पाणिनि सामान्ये भेदे प्रसिद्धम्।)

अक्तु स्त्री, रात्रिः। अनक्ति प्रविविर्णं व्यक्ति अक्तुः। अक्तु चापि अविर्यविवक्तवे नाकव नात् क्तु अभिविविधेविति चकेनः। वेदमतुर प्रकाशोऽर्थः। (आयुधं। विस्तः। कान्तिः। अञ्जनं। घोषः। अन्धकारः। एते अर्था वैदिकमन्त्रप्रसिद्धाः)

अक्रमा, त्रि (न क्रमः। नञ्समासः।) क्रमाभावयुक्तः। यथा —

"अक्रमान्न प्रयाण यथा यथं वयान् यर्थाक्षर्षी।

इति मानवे ११ अध्याये १९९ श्लोकः।

अक्रम, त्रि (न क्रमः। नञ् समासः। नास्ति क्रमो यस्य इति वा।) क्रमरहितः। अविक्रमः। यथा,—

"अक्रमात्प्रेक्षो यदि कोऽपि विमाप्नोति मृढ्धी"।

इति माघवकरः। (क्रमाभावः। क्रमविपर्य्ययः। यथा —'इदमनुचितमक्रमश्च पुंसां यदिह जरास्वपि मान्मथा विकाराः' इति प्रसन्न प्रसन्नम्।)

अक्रान्ता स्त्री, (न+क्रम्+क्त+टाप्।) बृहती। इति वाचिकमन्त्रमाला। अनाक्रान्ते त्रि।

अक्रिय, त्रि (नास्ति क्रिया यस्य। अप्रशस्ता वा क्रिया यस्य।) अक्रियान्वितः। कुकर्म्मविशिष्टः। क्रियारहितः। यथा 'अक्रियस्य कर्म्मरः'। इति चरकः। (निश्चेष्टः। उद्यमरहितः। कर्म्मत्यागी। यथा,—

"अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः।

स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः"।

इति गीतायाम्।) (क्ली। क्रियाभावः। क्रियाभ्रमः। अकर्म्मण्यता। यथा,—

"अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः कार्य्यवादिभिः।

अक्रिया च परोक्षा च तृतीया वाक्यवादिका"।

इति व्यवहारदीपिका।)

अक्रूर, पुं, (क्रौर्य्यात् क्रूरः, स न भवति इति अक्रूरः। यद्वा क्रूर इति वाक्यप्रयोगे निषिद्धं। न विद्यते क्रौर्य्यम् इति अकरः।) श्वफल्कपुत्रः। कृष्णपितृव्यः। तस्य पिता श्वफल्कः। (तस्य माता गान्दिनी।) इति श्रीभागवतं। क्रूरताशून्ये त्रि। (सरले। यथा —

"क्षीरं दन्धोपसमक्रूरं विवक्तर्षं मनोरमम्"।

इति मनुः। पुंसि विष्णुः। यथा,—

"अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः"।

इति भारते।)

अक्रोध, पुं (न क्रोध इति नञ् समासः। नास्ति क्रोधो यस्य इति वा।) क्रोधविपर्य्ययः। क्षमा। अप्रीतिः। स तु आत्मनिष्ठा सत्यकर्म्मानुरूपकर्म्मा। इति भरतः। (यथाह मनुः—

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।

धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्"।

इति।) त्रि क्रोधशून्ये क्रोधरहितव्यक्ती।

अक्लान्त, त्रि (न+क्लम्+क्त। न क्लान्त इति नञ्समासः।) क्लान्तिरहितः। श्रमरहितः। अम्लानः।

अक्लिका, स्त्री, नीलीवृक्षः। इति शब्दचन्द्रिका।

अक्लिष्टकर्म्मा, [न्] त्रि (अक्लिष्टम् अनायासलब्धम् कर्म्म यस्य। बहुव्रीहिः।) अक्लेशेन कर्म्मकर्त्ता। यथा —

"पुत्रोऽयं कौशल्यायाः रामक्लिष्टकर्म्मणः"।

इति रामायणं।

अक्लेदं, स्त्री, (न क्लेद इति नञ् समासः।) क्लेदाभावः। यथा,—

——मप्रविश्य चो धर्म्मचिरवर्ज्जिते।

अक्लेदेन शरीरस्य कुर्व्वीत धारणम्"।

इति मानवे ६ अध्याये ६ श्लोकः। क्लेदाभाववति त्रि।

अक्लेद्य, त्रि (नास्ति क्लेदो यस्य इति बहुव्रीहिः।) क्लेदशून्यः। अनार्द्रः। अक्लेदः।

अक्ष न क्ष व्याप्तौ। संहतौ। इति कविकल्पद्रुमः। नु अक्ष्णोति धर्म्मं वेत्ता। अक्षोति राशीकरोति वा इत्यर्थः। स अक्षिष्टः। आष्टः। इति दुर्गादासः।

अक्ष क्ष व्याप्तौ। संहतौ। इति कविकल्पद्रुमः। अक्षति धर्म्मं वेत्ता। अक्षोति राशीकरोति वा इत्यर्थः। स अक्षिष्टः। आष्टः। इति दुर्गादासः।

अक्ष, क्ली (अश्नुते व्याप्नोति अक्षति वा अक्ष्यते वा अनेन अश वा अशू व्याप्तौ। बाहुलकात् सन् वा। अक्ष्यते अक्षतेः अशू व्याप्तौ। अक्षैरेव इति वा।) इन्द्रियम्। (यथा विष्णुपुराणे,—

"अव्यक्तमक्षरमाणि निरक्षणानाति योऽमरिन्।

कुर्व्वाणिमनुचारीति प्रमाणानरराक्ष"।)

सौवर्च्चलं। तुच्छं। इति मेदिनी। (ज्ञानं। यथा रामायणे —

"कर्म्म वै ऽप्रभिर्मिरे चैतमनुनयेतवा"। इति।)

अक्ष, पुं कर्षपरिमाणं। (यथा,—

"ये पोऽशमाष कर्षोऽक्षी स्यां कर्षचतुष्टयं"।)

पाशकः। (अक्षैर्दीव्यन्ति वा दीव्यति। इति सिद्धान्तकौमुदी।) (पाशक्रीडा। यथाह मनुः—

'अक्षपाशो विनाशाय क्रीडेत् कितवा मदा'।)

शकटम्। इत्यमरः। (विभीतकवृक्षः। यथा छान्दोग्ये—यथा वै द्वे आमलके द्वे वा कोले द्वौ वाऽक्षौ मुष्टिरनुभवति।) आत्मा। व्यवहारः। कर्षः। रुद्राक्षः। सर्पः। चक्रं। इति मेदिनी। (व्यवहारव्यवहारविशेषः। यथा,—

"विनयाक्षे सम्पूर्णे विर्ब्बन् अक्षिवुक्तार्थे।

अध्यक्षे न नयस्य व्यवहारे तथैव च"।)

आत्मा। रावणपुत्रः। इति हेमचन्द्रः। (यथा रामायणे—"निहत्य राजा समरे सेविमुखं

कुमारमक्षं प्रसमीक्ष्य तान्"।)

आत्मा। गरुडः। इति शब्दरत्नावली। (दिक्। यथा भारते—

"अक्षय्य स्वक्षौषी च धर्म्मीषी महायशाः"।

इति) व्यञ्जनदण्डः। यथा,—

"अक्षाभिविघ्न व्यवाधिंता च

धराणिश कारिव चक्रिणेनः"।

इति माघवी।

"यथा चरक्रा अनुरक्षिपोसा-

रक्षा यथा राहिवसिन् प्ररिक्ष"।

इति कामन्दकी—

"चक्रिणोऽस्तरेखाया वा तव निरक्षम् प्रभा।

प्राकृष्याप्ता पदे निम्ने निनुपन् कर्म्मानिधि।

अक्षाग्रमे समोच्चारे अक्षाक्षौ पदिवी करा"।

इति सूर्य्यसिद्धान्ता।

अक्षक, पुं, (अक्ष+क) तिनिशवृक्षः। इति रत्नमाला।

अक्षक्रीडा, स्त्री, (अक्षै या क्रीडा) द्यूतक्रीडा पाशककक्रीडा। यथा। अक्षक्रीडाया व्यासयुधिष्ठिरसंवादः प्रचरति। इति तिथ्यादितत्त्वम्॥ तद्विवरणं चतुरङ्गशब्दे द्रष्टव्यम्॥ * ॥ कार्त्तिकशुक्लप्रतिपदि तत्क्रीडाविधिर्यथा। ब्रह्मपुराणे,—

"शङ्करश्च पुरा द्यूतं ससर्ज सुमनोहरम्।
कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि भूपते॥
जितश्च शङ्करस्तत्र जयं लेभे च पार्व्वती।
अतोऽर्थाच्छङ्करो दुःखी गौरी नित्यं सुखोषिता॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरं शुभः॥
पराजयो विरुद्धस्तु लब्धनाशकरो भवेत्"।

द्यूतञ्चाप्राणिभिः क्रीडनम्। यथा मनुः,—

"अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते"।

इति तिथ्यादितत्त्वम्॥ * ॥ दशमीद्वादश्योस्तत्करणनिषेधो यथा। स्मृतिः,—

"शाकं माषं मसूरञ्च पुनर्भोजनमैथुने।
द्यूतमत्यम्बुपानञ्च दशम्यां वैष्णवस्त्यजेत्"॥

कूर्म्मपुराणे,—

"कांस्यं मांसं सुरां क्षौद्रं हिंसां तैलमसत्यताम्।
द्यूतक्रीडां दिवानिद्रां व्यायामं क्रोधमैथुनम्॥
द्वादश्यां द्वादशैतानि वैष्णवः परिवर्ज्जयेत्"।

इत्येकादशीतत्त्वम्॥ * ॥ अन्यत् द्यूतशब्दे द्रष्टव्यम्॥

अक्षजः पुं, (अक्ष+जन्+ड) वज्रः। इति पुरुषोत्तमः। अस्थिज इति क्वचित् पाठः। (विष्णुः। यथा भागवते,—

"जघानोत्पत्य गदया हनावसुरमक्षजः"।

अक्षत, स्त्री, (क्षणु हिंसायां। नपुंसके भावे क्तः। अनुदात्तोपदेशेत्यादिना नलोपः।) लाजा। नपुंसकम्। इति मेदिनी।

अक्षतः, त्रि, (न+क्षण्+क्त) अहिंसितः। इति मेदिनी। अखण्डितः। इति शब्दरत्नावली। (यथाह मनुः,—

"दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत्।
त्रिषु स्थानेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत्"॥)

अक्षतः, पुं, यवः। इति मेदिनी। (यथा आश्वलायनगृह्यसूत्रे,—

"अक्षतसक्तूना नव कलसं पूरयित्वा"।)

शस्यमात्रम्। इति अमरटीकायां भानुदीक्षितः॥ अक्षताः पुं भू म्नीति स्वामी॥ (न क्षताः येषां ते इति अक्षताः। मुकुटस्तु अमरव्याख्यानावसरे लाजाः पुं भूम्नितेऽक्षतमिति पठित्वा कर्म्मणि क्तः। क्षतं खण्डितम्। न क्षतमक्षतमिति विग्रहं नित्यपुंलिङ्गाः नित्यबहुवचनान्ताश्च लाजाः अक्षतमिति व्याचख्यौ॥ केचित्तु अखण्डततण्डुला अक्षतमित्याहुः॥)

अक्षता स्त्री, कर्कटशृङ्गी। काँकडाशृङ्गी इति भाषा। इति शब्दचन्द्रिका॥ पुरुषसंसर्गरहिता स्त्री। स्मृतिः॥ यथाह याज्ञवल्क्यः—

"अक्षतायां क्षतायां वा जातः पौनर्भवः पुनः"।

अक्षदर्शकः, पुं, (अक्षाणां व्यवहाराणां दर्शकः। अक्ष+दृश्+णवुल्।) व्यवहारद्रष्टा व्यवहाराणां ऋणादानादिविवादानां द्रष्टा निर्णेता। धर्म्माध्यक्ष इत्यर्थः। इत्यमरः तट्टीका च॥ जज् इति इंराजीयभाषा॥

अक्षदृक्, (श्) पुं, (अक्ष+दृश्+क्विप्।) अक्षदर्शकः। (व्यवहारस्य ज्ञाता।)

अक्षदेवी, (न्) त्रि, (अक्षैर्दीव्यति। दिवु क्रीडादौ। सुपीति णिनिः।) द्यूतक्रीडाकारकः। इत्यमरः॥

अक्षद्यू, पुं, (अक्षैर्दीव्यति। दिवु क्रीडादौ। अक्ष+दिव्+क्विप्+ऊट्।) अक्षक्रीडकः। इति व्याकरणम्॥

अक्षधरः पुं, (अक्ष+धृ+अच्।) शाखोटवृक्षः। इति भूरिप्रयोगः॥

अक्षधूर्त्तः पुं, (अक्षेषु धूर्त्तः। सप्तमी शौण्डैरिति समासः।) द्यूतक्रीडकः। तत्पर्य्यायः। धूर्त्तः २ अक्षदेवी ३ कितवः ४ द्यूतकृत् ५। इत्यमरः॥ जुयारी इति भाषा॥

अक्षधूर्त्तिलः पुं, (अक्ष+धुर्+विलच्।) वृषः। इति हारावली॥

अक्षपाटकः पुं, (अक्ष+पाट+वुन्।) धर्म्माध्यक्षः। इति जटाधरः॥ जज् इति भाषा॥

अक्षपादः पुं, (अक्ष+पाद।) तार्किकः। तत्पर्य्यायः। नैयायिकः २। इति हेमचन्द्रः॥

अक्षपीडा स्त्री, (अक्ष+पीडा।) यवतिक्ता लता। इति राजनिर्घण्टः॥

अक्षमः त्रि, (नास्ति क्षमा यस्य सः।) क्षमारहितः। क्षमाशून्यः। (असमर्थः।)

"विष्णुसेवी च श्वपचो वंशानां कोटिमुद्धरेत्।
हरेरभक्तो विप्रश्च स्वञ्च रक्षितुमक्षमः"॥

इति ब्रह्मवैवर्त्ते २३ अध्यायः॥

अक्षमा स्त्री, (न क्षमा इति नञ्समासः।) अक्षान्तिः। ईर्षा। इति शब्दरत्नावली॥ (यथा किरातार्ज्जुनीये—

"अतिपातितकालसाधना
स्वशरीरेन्द्रियवर्गतापिनी।
जनवन्न भवन्तमक्षमा
नयसिद्धेरपनेतुमर्हति"॥

अक्षमाला स्त्री, (अक्षाणां माला।) अक्षसूत्रम्। वशिष्ठपत्नी। इति मेदिनी॥ (यथाह मनुः—

"अक्षमाला वशिष्ठेन संयुक्ताधमयोनिजा"।

अक्षसूत्रेति तान्त्रिकभाषया अकारादिक्षकारान्तवर्णमाला रुद्राक्षमाला च। यथा गौतमीये,—

"पञ्चाशल्लिपिभिर्म्माला विहिता जपकर्म्मसु।
अकारादिक्षकारान्ता अक्षमाला प्रकीर्त्तिता॥
क्षार्णं मेरुमुखं तत्र कल्पयेन्मुनिसत्तम।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः"॥

इति तन्त्रसारः॥ * ॥ अन्यत् मालाशब्दे वर्णमालाशब्दे च द्रष्टव्यम्॥

अक्षय त्रि, (नास्ति क्षयो यस्य सः। बहुव्रीहिः।) क्षयरहितः। अव्ययः। कल्पान्तस्थायी। यथा—

"अक्षराणि फलान्याहुरमरास्त्रिदशानिव।
कल्पान्तस्थानसम्बन्धाद्गन्या नाशवर्ज्जिनः"॥

इति मीमांसककारिका॥ अपि च। भविष्यपुराणे।

"चतुर्द्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः।
योऽब्दमेकं न भुञ्जीत शिवार्च्चनपरो नरः॥
यत् पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनाम्।
तत् पुण्यं सफलं तस्य शिवलोकञ्च गच्छति"॥

इति तिथ्यादितत्त्वम्॥ * ॥ पापपुण्याक्षयजनकयोगविशेषः। यथा ज्योतिषे,—

"सोमवारेऽप्यमावास्या आदित्याहे तु सप्तमी।
चतुर्थ्यङ्गारवारे तु अष्टमी च बृहस्पतौ॥
अत्र यत् क्रियते पापमथवा धर्म्मसञ्चयः।
षष्टिजन्मसहस्राणि प्रति जन्म तदक्षयः"॥

इति तिथ्यादितत्त्वम्॥ (अनन्तः। अक्षयकालाभिमानी। अः वासुदेवः तस्मिन् क्षयो निवासोऽस्य इति व्युत्पत्त्या ब्रह्मणिष्ठः।)

अक्षयतृतीया स्त्री, (अक्षया या तृतीया तिथिः।) वैशाखशुक्लतृतीया। सा तु सत्ययुगाद्या। तत्र स्नानदानादावक्षयफलम्। इति। स्मृतिः। यथा,—

"वैशाखे मासि राजेन्द्र शुक्लपक्षे तृतीयिका।
अक्षया सा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता॥
तस्यां दानादिकं पुण्यमक्षयं समुदाहृतम्"।

इति तिथ्यादितत्त्वम्॥ * ॥ विवरणं तु वैशाखशब्दे द्रष्टव्यम्॥

अक्षया स्त्री, (नास्ति क्षयो यस्याः सा।) वारतिथिघटितयोगविशेषः। यथा,—

"अमा वै सोमवारेण रविवारेण सप्तमी।
चतुर्थी भौमवारेण अक्षयादपि चाक्षया"॥

इति भविष्यपुराणम्॥

अक्षरः पुं, (न क्षरति। क्षर सञ्चलने। पचाद्यच्। यद्वा। अश्नुते। अशू व्याप्तौ। अशेः सरः।) शिवः। विष्णुः। इति शब्दरत्नावली। यथा महाभारते,—

"विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च"॥

इति।) (अजः। जीवः।)

अक्षरं क्ली, (न क्षरति इति व्युत्पत्त्या।) ब्रह्म। (अविनाशि निर्व्विशेषं प्रणवाख्यं ब्रह्म। कूटस्थः नित्यः आत्मा। यथा,—

"क्षराद्विरुद्धधर्म्मत्वादक्षरं ब्रह्म भण्यते।
कार्य्यकारणरूपं तु नश्वरं क्षरमुच्यते॥
यत्किञ्चिद्दृष्टं लोकेऽस्मिन् वाचो गोचरतां गतम्।
प्रमाणस्य च तत्सर्व्वमक्षरे प्रतिषिध्यते॥
यदप्रबोधात् कार्पण्यं ब्राह्मण्यं यत्प्रबोधतः।
तदक्षरं प्रबोद्धव्यं यथोक्तेश्वरवर्त्मना"॥

अकारादिक्षकारान्तैकपञ्चाशद्वर्णाः। इति मेदिनी॥ अस्योत्पत्तिकारणम्। यथा बृहस्पतिः,—

"षाण्मासिके तु समये भ्रान्तिः सञ्जायते यतः।
धात्राक्षराणि सृष्टानि पत्रारूढाण्यतः पुरा"॥

इत्याह्निकतत्त्वम्॥ तच्च पञ्चविधम्। यथा,—

"मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा।
गुण्डिका घुणसम्भूता लिपयः पञ्चधा स्मृताः"।

इति वाराहीतन्त्रम्॥ * ॥ अन्यत् मुद्राशब्दे वर्णशब्दे च द्रष्टव्यम्॥ गगनम्। धर्म्मः। तपस्या॥

अपामार्गः । इति हैमचन्द्रः ॥ मोक्षः । इत्यमरः ॥ धर्मः । इति मेदिनीकरः ।

अक्षर त्रि (न क्षरतीति ।) अक्षरणीय । अपचय । यथा —

"अक्षरे च विद्यानुमताय वचनम्
प्रधानविताय प्रसन्निताय ।
वैमात्रं इदमं रद कर्म
योगाय तं सततो प्रणयिनः" ॥

इति वेदान्तकारकला भवति ॥

अपिच ।

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते" ॥

इति श्रीमद्भगवद्गीतायां १५ अध्याये १७ श्लोकः । क्षरश्चाक्षरश्चेति द्वाविमौ पुरुषौ लोके प्र सिद्धौ । तावेवाह । तत्र क्षरः पुरुषो नाम सर्वाणि भूतानि ब्रह्मादिस्थावरान्तानि शरी राणि अविवेकिलोकाः शरीरमेव पुरुष प्रतियन्ति । कूटो राशिः शिलाराशिः पर्वत इव देहेषु नश्यत्स्वपि निर्विकारतया तिष्ठतीति कूटस्थश्चेतनो भोक्ता स तु अक्षरः पुरुष उच्यते विवेकिभिः । इति तट्टीकायां श्रीधरस्वामी ।

अक्षरचण पुं, (अक्षरैर्वित्तः । तेन वित्त इति चणप् ।) लेखकः । इत्यमरटीकायां वाचस्पतिः ।

अक्षरचञ्चु पुं, (अक्षरैर्वित्तः । तेन वित्त इति चञ्चुप् ।) लिपिकरः । इत्यमरः । मुहुरी इति भाषा ।

अक्षरचुञ्चु पुं, (अक्षरैर्वित्तः । तेन वित्त इति चुञ्चुप् ।) अक्षरचणः । लेखकः । इत्यमरः ।

अक्षरजननी स्त्री, (अक्षराणाम् अक्षरस्य वा जननी उत्पादिका ।) लेखनी । कलमः । यथा,—

"लेखन्यक्षरजननी वर्णमाता मसिप्रसूः" ।

इति शब्दरत्नावलीति कश्चित् ।

अक्षरजीवक पुं (अक्षर+जीवक ।) लिपिकरः । इति हेमचन्द्रः ।

("जीवकोऽक्षरपूर्वो लेखकजीवकवदपि" । इति हेमचन्द्रः ।)

अक्षरजीविक पुं (अक्षरैर्जीविका यस्य सः ।) लेखकः ।

"लेखक आक्षरिकश्चापि अक्षरजीविकः" ।

इति शब्दार्णवः । अक्षरजीवीति त्रि ।

अक्षरतूलिका स्त्री, (अक्षराणां तूलिका लेखन साधनमित्यर्थः ।) लेखनी । इति जटाधरः ।

अक्षरविन्यास पुं, अक्षराणां विन्यासः । लिपिः । लिखनं । इत्यमरटीकायां भरतमल्लः ।

अक्षरमुख पुं (अक्षराणि मुखे मुखाग्रे यस्य वा ।) शिष्यः छात्रः । इति त्रिकाण्डशेषः ।

अक्षरसंस्थान क्ली, (अक्षराणां संस्थानं विन्यासः ।) लिपिः । लिखनं । इत्यमरः ।

अक्षरा स्त्री (अक्षरा वाक्यस्य ... इति महत् । मोक्षात् श्रीर्षे ।) पुण्डरीका । वाक्यादिः । इति भाषा । इत्यमरः । (यथा महाभारते —

"अक्षरैर्न सौरीविकारयवाम ।)

अक्षवाट पुं (अक्षस्य मल्लयुद्धस्य वाटः परिसरः ।) मल्लभूमिः । तत्पर्य्यायः । नियुद्धभूः २ । इति हेमचन्द्रः । कुस्तिर आखड़ा इति भाषा ।

अक्षविद् [द्] त्रि (अक्षं अक्षक्रीडां द्यूतं वा वेत्ति इति विद् क्विप् ।) द्यूतज्ञः । अक्षधूर्त्तः ।

अक्षसूत्र स्त्री, (अक्षाणां सूत्रं माला ।) अक्षमाला । जपमाला । इति जटाधरः । यथा—

"पाणौ बालकमलवलयवतं अक्षसूत्रं वैमले" । इति महावीरचरिते ।)

अक्षहृदयजीवक पुं (अक्षस्य पाशविशेषक्रीडस्य हृदये मर्म्मणि कुशलार्थं जीवकः ।) अक्षहृदयकशलविशेषित जीवकः । तत्पर्य्यायः । कितवः २ । इत्यमरः । धूर्त्तः १ । कितवः ४ । इति भरतः । जुआरिया इति भाषा ।

अक्षान्ति स्त्री, (न क्षमणम् । क्षमूषहने । तिकारि । अन्यामितात् क्तिन् । अनुनासिकस्येति दीर्घे नञ् समासः ।) परोत्कर्षासहिष्णुत्वं । आमर्षोः पर सम्पत्त्यसहिष्णुत्वं । इति भरतः । तत्पर्य्यायः । ईर्ष्या २ । इत्यमरः । ईर्षा १ असूया ४ । इति शब्दरत्नावली ।

("अक्षान्तिकारणीं दुर्गांवणमसृतम् । इति शिशुपालवधे ।)

अक्षारलवण क्ली, (न क्षारलवणम् इति नञ् समासः ।) हविष्यान्नविशेषः । अक्षारलवणमिति ख्यातं । यथा । "अक्षीरारिष्टकमशीतवोक्तं माषमुद्गतिलयवकुलत्थकलायाम्लरसम् । क्षि प्रमाद् वलान् विमलकारलवणं मतं" । इदं सतनु भोज्यं । एतादृशलवणं । यथा—

"सेन्धवं सामुद्रं चैव लवणमुद्भवादिकम् ।
पवित्रं तैलहीनमक्षारलवणं मतं" ।

इति नारायणकृतश्राद्धतत्त्वानुशिदयाचिता ।

(यथाह मनुः—

"कुर्व्वत्रपि व्रतं वेदं सर्वं क्षारानुपल्लव ।
अक्षारलवणं चैव मधुमांसं च वर्जयेत्" ।)

अक्षि क्ली, (अश्नुते व्याप्नोति । अशू व्याप्तौ संघाते च । अशोर्णित्स्यादिति क्सिः । यथा । अश्नाति । अक्ष व्याप्तौ इन् ।) चक्षुः । इत्यमरः । अक्षमालिका । इति केचित् ।

अक्षिक पुं रक्तचन्दनः । आल् इति भाषा । इति रत्नमाला ।

अक्षिकूटक पुं, (अक्षि+कूटक ।) चक्षुस्तारा ।

अक्षिगत त्रि (अक्षि गतः, अक्षिविषय इव केन कृतिकृतः ।) द्वेष्यः । इत्यमरः ।

अक्षिभेषज पुं (अक्षि+भेषज ।) पट्टिकालोध्रः । इति राजनिर्घण्टः । (क्ली, नेत्रौषधम् ।)

अक्षिव पुं (अक्षि व्याप्नोति यावति वा । वा इति व्यवपदः । अक्षोऽस्तीति वा ।) शोभाञ्जनवृक्षः । सामुद्रलवणे क्ली । इत्यमरटीकायां भरतः ।

अक्षिविकूणित क्ली, (अक्षि+वि+कूण+भावे क्त ।) कटाक्षः । अपाङ्गदृष्टिः । इति हेमचन्द्रः ।

अक्षीव पुं रक्तचन्दनः । आल् इति भाषा । इति रत्नमाला ।

अक्षीव क्ली, (न क्षीवति माद्यति वा अक्षीवति वा । क्षीव मदे । पचाद्यच् ।) सामुद्रलवणं । इत्यमरः ।

अक्षीव त्रि (न क्षीवति माद्यति इति न+क्षीव+अच् ।) अमत्तः । इति मेदिनी ।

अक्षीव पुं शोभाञ्जनवृक्षः । इत्यमरः ।

अक्षुण्ण त्रि (न क्षुण्ण इति नञ्समासः ।) अखण्डितः । अनूर्ध्वितः । इति शब्दकल्पद्रुमे ।) अभ्यस्तः । यथा । अक्षुण्ण गतिश्च । इति कुमार सम्भवे अनुमतिः ।

अक्षम त्रि योजनरहितः । अक्षोभितः । इति कुल प्रदेशे प्रयत्ने पाठः । अक्षो न क्षम अक्षुण्ण इति सम्प्रदायविशेषः ।

अक्षेम क्ली, (न क्षेमम् इति नञ्समासः) अम ङ्गलं । यथा—

"किन्नु मेघो मयि क्षेममक्षेम किन्नु वान्धवम् ।
कथमे किन्नु वपुषा दुःखतां किन्नु मे इष्टम्" ।

इति देवीभागवते १ अध्यायः ।

अक्षोट पुं (अक्ष्णोति । अक्षू व्याप्तौ संघाते च । बाहुलकादोटः । अन्नमेव कठिनं यस्मात् अस्य इति वा ।) आखरोट । स च पर्व्वतमयीक्षकः । इत्यमरटीकायां भरतः । आक्रोट इति हिन्दीभाषा । इति राजनिर्घण्टः ।

"पीलुः शैलभवोऽक्षोटः कर्परालश्च कीर्तितः ।
अक्षोटकोऽपि वातारवृक्षः कथितस्तदम्" ।

इति भावप्रकाशः ।

अक्षोड पुं (अक्ष्णोति इति अक्ष+ओडप्रत्ययः ।) पर्वतीयपीलुवृक्षः । तत्पर्य्यायः । कर्परालः २ कन्दरालः ३ आक्षोटः ४ अक्षोटः ५ आखोटः ६ । इत्यमरः भरतश्च ।

अक्षोडक पुं (अक्षोड एव इति स्वार्थे कन् ।) पर्व तेजपीलुवृक्षः । इति रत्नमाला ।

अक्षोभ पुं (न क्षोभ इति नञ्समासः । अस्मिन् क्षोभो नास्तीति वा ।) हस्तिबन्धनस्तम्भः । तत्पर्य्यायः । आलान २ बन्धः ३ । इति त्रिकाण्ड शेषः । क्षोभरहिते त्रि ।

अक्षौहिणी स्त्री, चतुरङ्गसेनाविशिष्टसैन्यं । यथा,—

"अक्षौहिणीप्रमाणस्थोरथिनो
रैमवर्णविशेषेषु भाषिमे ।
मनुजार्णं पत्र्यं निबोधत
प्रैतत्सार्थमपि शुश्रिमान् यतः ।
एकतुरिर्यसा नाति वाराणस्य विशेषतः ।
अक्षौहिण्येऽपि सर्वेषां सङ्ख्यमनोरञ्जितं" ।

इति ज्योतिस्तत्त्वं ।

अक्षौहिणी स्त्री, (अक्षाः रथाः सन्ति अस्यां इति ऊहिनी । अक्षाणाम् ऊहिनी । पूर्वपदात्संज्ञायाम् । अक्षादूहिन्यामिति वृद्धिः ।) चतुरङ्ग सैन्यसमूहः । यथा । २१८७० रथिकाः । २१८७० गजाः । ६५६१० घोटकाः । १०९३५० पदातिकाः । समुदायेन २१८७०० ।

तथा चोक्तं ।

"अक्षौहिण्याः प्रसङ्ख्याने रथानां द्विजसत्तम ।

सयुक्तानि सहस्राणि गजानामेकविंशति ।
एवमेव रथानान्तु सङ्ख्यानं कीर्त्तितं बुधैः ।
पञ्चषष्टिसहस्राणि षट्शतानि दशैव तु ।
सङ्ख्यातास्तुरगास्तज्ज्ञैर्विना रथ्यैस्तुरङ्गमैः ।
नृणां शतसहस्रन्तु सहस्राणि नवैव तु ।
शतानि त्रीणि चान्यानि पञ्चाशच्च पदातयः" ।
इत्यमरभरतौ ॥ (अक्षौहिणीपरिमाणं । यथा महाभारते आदिपर्व्वणि,—
"अक्षौहिण्य इति प्रोक्तं यत्त्वया सूतनन्दन ।
एतदिच्छामहे श्रोतुं सर्व्वमेव यथातथम् ॥
अक्षौहिण्याः परीमाणं नराश्वरथदन्तिनाम् ।
यथावच्चैव नो ब्रूहि सर्व्वं हि विदितं तव" ॥
सौतिरुवाच ।
"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥
पत्तिन्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥
त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ।
स्मृतास्त्रिस्तु वाहिन्यः पृतनेति विचक्षणैः ॥
चमूस्तु पृतनास्तिस्रस्तिस्रश्चम्वस्त्वनीकिनी ।
अनीकिनीं दशगुणां प्राहुरक्षौहिणीं बुधाः ॥
अक्षौहिण्याः प्रसङ्ख्याता रथानां द्विजसत्तमाः ।
सङ्ख्या गणिततत्त्वज्ञैः सहस्राण्येकविंशतिः ॥
शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः ।
गजानाञ्च परीमाणमेतदेव विनिर्द्दिशेत् ॥
ज्ञेयं शतसहस्रन्तु सहस्राणि नवैव तु ।
नराणामपि पञ्चाशच्छतानि त्रीणि चानघाः ॥
पञ्चषष्टिसहस्राणि तथाश्वानां शतानि च ।
दशोत्तराणि षट् प्राहुर्यथावदिह सङ्ख्यया ॥
एतामक्षौहिणीं प्राहुः सङ्ख्यातत्त्वविदो जनाः ।
यथा कथितवानस्मि विस्तरेण तपोधनाः" ॥

अक्षं स्त्री, (अश्नुते । अशू व्याप्तौ सङ्घाते च । ष्ट्रन् ।) मूर्व्वा कृष्ण । काश । इत्युणादिकोषः ॥

अखट्ट, पु, पियालवृक्ष । इति राजनिर्घण्टः ॥ पियासाल इति भाषा ॥

अखट्टिः, पु, असद्व्यवहारः । आखुटि इति ख्यातः । इति त्रिकाण्डशेषः ॥

अखण्ड, त्रि, (न खण्ड्यते इति । खडि भेदने घञ् । नास्ति खण्डो यस्य इति वा ।) खण्डरहितः । पूर्णः । इत्यमरः ॥ ("अखण्डं पुण्यानां फलमिव च तद्रूपमनघम्" इति शाकुन्तले ।)

अखण्डन, पु, (नास्ति खण्डना विच्छेदो यस्य सः ।) कालः । इति शब्दचन्द्रिका ॥

अखण्डितर्त्तु, त्रि, (न खण्डितः ऋतुरस्य इति । बहुव्रीहिः ।) सफलवृक्षादिः । इति शब्दचन्द्रिका ॥

अखात, क्ली, पुं, (न खातं नञ्समासः । खननिम्नम् इत्यर्थः ।) देवखातः । अकृत्रिमजलाशयः । इत्यमरः ॥ अखातमिति स्वामी ॥ पुंसि यथा,—अखातो देवखातक इत्यमरदत्तः ॥

अखाद्य, त्रि, (न खाद्यं । अप्रशस्तं विरुद्धं वा खाद्यम् ।) खाद्यानर्हं । अभक्ष्य ॥

अखिल, त्रि, (न खिलम् अस्य । न+खिल ।) सर्व्वं । इत्यमरः ॥ (खिलमप्रहतं स्थानं । तत् न भवति इति अप्रहतस्थानं ।)

अख्यात, त्रि, (न ख्यातं विरुद्धार्थे वा नञ् ।) अख्यातिविशिष्टः । अप्रतिष्ठितः ॥ अप्रसिद्धः ।

अग, म वक्रगतौ । कुटिलगमने । इति कविकल्पद्रुमः ॥ म अगयति अगति सर्पः । इति दुर्गादासः ॥

अग, इ गतौ । इति कविकल्पद्रुमः ॥ गत्यां इ अङ्ग्यते । इति दुर्गादासः ॥

अग, पुं, (न गच्छति । गम गतौ । अन्येभ्योऽपीति अन्येष्वपि इति वा डः । न गोऽप्राणिषु इति पाक्षिकोऽप्रकृतिभावः ।) पर्व्वतः । वृक्षः । सर्पः । सूर्य्यः । इति हेमचन्द्रः ॥ (सरीसृपः ।)

अगच्छ, पुं, (न+गच्छ ।) वृक्षः । इति त्रिकाण्डशेषः ॥

अगज, क्ली, (अग+जन्+ड ।) शिलाजतु । इति रत्नमाला ॥ पर्व्वतवृक्षजे त्रि ॥ (गिरिजाते ।)

अगण्य, त्रि, (न गण्य । नञ् समासः ।) अगणनीय । अगणेय । अगणितव्य । यथा,—
"गुणैरगण्यैरतिशीलशालिभिरिति भारविः" ।

अगद, पु, (गदविरुद्धः । न गदः अस्मात् इति वा ।) औषधं । इत्यमरः ॥ आयुर्वेदोक्ताष्टशाखान्तर्गतशाखाभेदः । यथा,—
"औषधान्यगदो विद्या दैवी च विविधा स्थितिः" ।
तपसैव प्रसिध्यन्ति" । इति मनुः ।) नीरोगे त्रि । इति रमानाथः ॥

अगदङ्कार, पु, (अगदम् अरोगं करोति इति । अगद+कृ+अण् । मुमागमः ।) वैद्यः । इत्यमरः ॥

अगम, पुं, (न गच्छतीति । न+गम+अच् । पचाद्यच् ।) वृक्षः । इत्यमरः ॥ पर्व्वतः । न गच्छतीत्यगमः ॥

अगम्य, त्रि, (न गम्यं इति । न+गम्+यत् ।) अगन्तव्य । अगमनीय । गमनायोग्य । यथा,—
"अगम्या सा मवत्तत्र यथाभूत् स सहायवान्" ।
इति देवीमाहात्म्यं ॥

अगम्या, स्त्री, अमैथुनार्हा नारी । गम्यागम्याविवरणं यथा, यम उवाच,—
"या या गम्या नृणामेव निबोध कथयामि ते ।
स्वस्त्री गम्या च सर्व्वेषामिति वेदनिरूपिता ॥
अगम्या च तदन्या या इति वेदविदो विदुः ।
सामान्यं कथितं सर्व्वं विशेषं शृणु सुन्दरि ! ॥
अगम्याश्चैव या याश्च निबोध कथयामि ताः ।
शूद्राणां विप्रपत्नी च विप्राणां शूद्रकामिनी ॥
अत्यगम्या च निन्द्या च लोके वेदे पतिव्रते ।
शूद्रश्च ब्राह्मणीं गच्छेद् ब्रह्महत्याशतं लभेत् ॥
तत्समं ब्राह्मणी चापि कुम्भीपाकं व्रजेद्ध्रुवं ।
यदि शूद्रां व्रजेद्विप्रो वृषलीपतिरेव सः ॥
स भ्रष्टो विप्रजातेश्च चाण्डालात् सोऽधमः स्मृतः ।
विष्ठासमश्च तत्पिण्डो मूत्रं तस्य च तर्पणं ॥
तत् पितॄणां सुराणाञ्च पूजने तत् समं सति ।
कोटिजन्मार्ज्जितं पुण्यं सन्ध्यार्च्चातपसार्ज्जितं ॥
द्विजस्य वृषलीभोगान्नश्यत्येव न संशयः ।
ब्राह्मणश्च सुरापीती विड्भोजी वृषलीपतिः ॥
हरिवासरभोजी च कुम्भीपाकं व्रजेद्ध्रुवं ।
गुरुपत्नीं राजपत्नीं सपत्नीमातरं प्रसूं ॥
सुतां पुत्त्रवधूं श्वश्रूं सगर्भां भगिनीं सति ।
सोदरभ्रातृजायाञ्च भगिनीं भ्रातृकन्यकां ॥
शिष्याञ्च शिष्यपत्नीञ्च भागिनेयस्य कामिनीं
भ्रातृपुत्त्रप्रियाश्चैवात्यगम्यामाह पद्मज ॥
एतास्वेकामनेकां वा यो व्रजेन्मानवाधम ।
स मातृगामी वेदेषु ब्रह्महत्याशतं लभेत् ॥
अकर्म्मार्होऽपि सोऽस्पृश्यो लोके वेदेऽतिनिन्दितः ।
स याति कुम्भीपाकञ्च महापापी सुदुष्करं" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

अगरी, स्त्री, (न+गॄ+अच्+ङीष् ।) देवताडवृक्षः । इत्यमरटीकायां भरतः ॥

अगर्हितः, त्रि, (न गर्हितः । नञ्समासः) अनिन्दितः । यथा,—
"ज्येष्ठः कुलं वर्द्धयति विनाशयति वा पुनः ।
ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः" ॥
इति मानवे ९ अध्याये १०९ श्लोकः ॥

अगरु, क्ली पु, (न गरुः दुर्भरः अस्मात् इति ।) अगुरु । इति हेमचन्द्रः ॥

अगस्तिः, पु, (विन्ध्याख्यम् अगम् अस्यति इति अगस्तिः । अस्यतेः क्तिच् । बाहुलकात् तिर्वा ।) वकवृक्षः । अगस्त्यमुनिः । इति मेदिनी ॥ यथा वैद्यके,—
"अगस्ति पित्तकफजित् चतुर्थकहरो हिमः ।
रूक्षो वातकरस्तिक्तः प्रतिश्यायनिवारणः" ॥

अगस्तिद्रु, पुं, वकपुष्पवृक्षः । इति त्रिकाण्डशेषः ॥

अगस्त्य, पु, (अगं विन्ध्यं स्त्यायति स्तम्भाति वा । ष्ट्यै सङ्घाते । आतोऽनुपसर्गे इति कः । अग+स्त्यै+क ।) वकपुष्पवृक्षः । इति राजनिर्घण्टः ॥ मित्रावरुणयोः पुत्त्रः मुनिविशेषः । तस्य पर्य्यायः । कुम्भसम्भवः २ मैत्रावरुणिः ३ । इत्यमरः ॥ अगस्तिः ४ पीताब्धिः ५ वातापिद्विट् ६ आग्नेयः ७ और्व्वशीयः ८ आग्निमारुतः ९ घटोद्भवः १० इति हेमचन्द्रः ॥ (तदुत्पत्तिर्यथा यास्कनिरुक्ते,—
"तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्व्वशीम् ।
रेतश्चस्कन्द तत्कुम्भे न्यपतत् वासतीवरे ॥
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वशिष्ठश्च तत्रर्षी सम्बभूवतुः ॥
बहुधा पतितं रेतः कलसे च जले स्थले ।
स्थले वशिष्ठस्तु मुनिः सम्भूतऋषिसत्तम ॥
कुम्भे त्वगस्त्यः सम्भूतो जले मत्स्यो महाद्युतिः ।
उदियाय ततोऽगस्त्यः शम्यामात्रो महातपाः ॥
मानेन सम्मितो यस्मात्तस्मान्मान्य इहोच्यते ।
यद्वा कुम्भादृषिर्जातः कुम्भेनापि महीयते" ॥

अगस्त्योदय, पु, (अगस्त्यस्य नक्षत्रस्य उदयः शरत्काले गगने आविर्भावः ।) आकाशे नक्षत्ररूपेण अगस्त्यमुनेरुदयः । स तु सौरभाद्रस्य सप्त-

रत्यादिने भवति। अस्तार्थेतार्थं सम्भावीतकोव दिनमते कर्त्तव्यं। यथा —
"अवमार्थेतार्थं दौरैव शिवरात्रौ विधानात्"।
यथा मत्स्यैर्ते —
"अमावे माघमासे कथा येवकृतेष्ठिनिर्दिने।
कर्वे दपरदयात् गौरवेऽभिवादिता"।
यथा भौमपराक्रमे।
"यत्र माघपरमान्ते अदिते अवस्थोद्भवे।
कर्वी दमादमस्थाव सर्वाग् भासात् भवेत ता"।
यथा भारविदे।
"यद्दे योर्य विविधिक्य वितयमात्रवैर्युर्व।
मन्नोवायेन वै दयात् दर्शिवाद्यायुक्तविता।
बायन्नमप्रतीवाद अभिमाववन्मन।
मिथावरववो युव कुम्भयोमे वमोऽन्त ते"।
मार्यमन्तु।
"आदावविभैरितो येन सातादिव महासरः।
तनुमः वोधितो येन च मेतुमस्तः प्रसीदतु"।
मन्वादिवन्तु अववाव ममा दत्तेन दैवं।
विशेमायुवरेवे बामान्तवा माग्मात् इति
बाताग्नुवाविव इति मध्यावादपि मवोबाद
कर्त्तव्यमानिति रघुमारः।*। तत्वार्थ-
मन्तव्यम्।
"बोबायुवे महामाते राजपथि पथिमवे।
मध्यस्थार्थे सर्वा यत्र मिश्रावधिवाहवे"।
इति मत्स्यपुराणम्। (अगस्त्योदये अवादि
प्रतोवन्ति इत्यागमः। यथा च स्मृतौ,—
"प्रत्यादीरवारम्भः कुम्भयोनेमहौजसः।
अगाध, त्रि (नास्ति गाधा स्थितिस्थः। यन्नो
ऽन्तर्गाधामिति मध्वीयः।) अतिगभीरः। अतल
स्पर्शः। इत्यमरः। (अतिगभीरः। दुर्गो
घाटकः।)
अगार्ड, स्त्री, चित। इति मेदिनी।
अगाधसत्त्व, पुं, (अगाधं सत्त्वं यस्मिन्। बहु
व्रीहिः।) ज्ञा। इत्यमरः। त्रि। अपरि
च्छन्नसत्त्ववान्।)
अगारं क्ली, (अगात् गच्छति। अ गतौ। कर्म
ण्यण्।) आगारं। गृहं। इत्यमरटीकायां
भरतः।
मूलानि नान्यवासादि वसन्नुपगतानि च"।
इति। 'अगारं वेश्मागारादि' इति प्रभुः।)
अगिर, पुं, (अग+इर।) अग्निः। सूर्यः।
राक्षसः। इति शब्दमाला।
अगु, पुं, (नास्ति गौः किरणो यस्य सः। बहु
व्रीहिः।) राहुग्रहः इति दीपिका। किरण
रहिते त्रि।
अगुरु, क्ली, (न गुरु दुर्गेः लघुत्वात् इति।
बहुव्रीहिः।) शिंशपावृक्षः। काकागुरु। अ-
गन्धपरिमलद्रव्यविशेषः। अगर इति
भाषा। तस्य पर्यायः। वंशिक १ राजार्ह
२ लोहं ३ क्रिमिजं ४ जोङ्गकं ५। इत्यमरः।
प्रवरं ६ वरं बेतरावं ७ वसु ८। इति
रत्नमाला। पीतक ९ वर्णप्रसारं १० अनार्यक

११ अनार्यं १२ कृमिजग्धं १३ वाहवं १४। इति
राजनिर्घण्टः। अस्य गुणाः। तिक्तत्वं। उष्णत्व।
कटुत्व। तैले श्रेष्ठत्वं। अन्तःपवनकफपित्तमुख
रोगनाशित्वम्। इति राजवल्लभः राजनिर्घण्टश्च।
अगुर्वादयूपौदि वेदाबिता। अगाम् इति वर्णा
भवः। गन्धद्रव्यविशेषः। यथा,—
"अगुरु प्रवरं योग्यं राजार्हं योषर्ण तथा।
वंशिकं क्रिमिजातिं क्रिमिजग्धमनार्यकं।
अगुरुर्वा कटुर्वः च तिक्तं तीक्ष्णञ्च तिक्तकं।
यत् सर्वाविरोधस्य शीतवातकफापहम्।
तत्रं गुणाधिकं तत्र योजवत्तरि मन्यते।
अगुणप्रभा योजा कृष्णागुरुसमा स्मृता"।
इति भावप्रकाशः।
अगुण, त्रि (न गुणः। नञ् समासः।) गुणरहितः।
खलः। इति मेदिनी।
अगुरुशिंशपा, स्त्री, शिंशपावृक्षः। इत्यमरटीकायां
स्वामी।
अगृह्यन्ते, स्त्री, (न गृहं अवकाशः यस्याः तस्याः।
बहुव्रीहिः।) भित्तिः। इति राजनिर्घण्टः।
अगोचर, त्रि (न गोचरः। नञ् समासः।) इन्द्रिय
ज्ञानप्रमाणाविषयः। अप्रत्यक्षः। यथा,—
"अगोचरत्व वाङ्मनसोरथसुपैति"।
इति रामायणम्। (ब्रह्माऽगोचरमित्यविधि
भिन्नार्थ इति अनुसरणवेदे।)
अगौकस् [स्] पुं, (अगः ओकः यस्य सः।
बहुव्रीहिः।) शरभः। सिंहः। पक्षी। इति
मेदिनी। (त्रि। पर्वतवासी।)
अग्नायी, स्त्री, (अग्नेः स्त्री इत्यर्थे वर्षे यथा
अग्नेरिपुतिवेमादिराकृतेन अग्निशब्दसैकारादेशो
ङीप् च।) अग्निभार्या। इत्यमरः। त्रेतायुगं।
इति शब्दरत्नावली। ('अग्नायी स्वाहा च हुतभुक्
प्रिया' इत्यमरः।)
अग्नि, पुं, (अङ्गन्ति अग्रं जन्म प्राप्नुवन्ति इति
कृत्वा इति यज्ञेषु अग्निपरिचरणेषु आर्षप्रमाणवती
व्यक्तिविधिप्रकारार्थावप्रदेशेषु अग्नियु।
यथा अङ्गति ऊर्ध्वं गच्छति इति। अगि गतौ।
अङ्गेर्नलोपश्चेति नि प्रत्ययः) तेजःपदार्थ
विशेषः। आगुन इति भाषा। तत्पर्याय यथा
भार्यायाम् भावाः प्रथमोऽग्निः। अथ अग्नी भावा।
मन्त्रोक्ताः भावाः १ पवमानः २ शुचिः ३। अत
सम्बन्धः सर्वेषां प्रतिवात्मकः पुत्राः।
सर्वेषां पुत्रपौत्राः त्रयस्त्रिंशत् भावाः। सर्वे त्रिविधाः
सप्तोर्णपवात्मकाः। इति पुराणं। अस्य
पर्यायाः। वैश्वानरः १ वह्निः २ वीतिहोत्रः ३
धनञ्जयः ४ कृपीटयोनिः ५ ज्वलनः ६ जातवेदाः
७ तनूनपात् ८ बर्हिः ९ शुष्मा १० कृष्णवर्त्मा
११ शोचिष्केशः १२ उषर्बुधः १३ आश्रयाशः १४ बृहद्
भानुः १५ कृशानुः १६ पावकः १७
अनलः १८ रोहिताश्वः १९ वायुसखः २० शिखावान्
२१ आशुशुक्षणिः २२ हिरण्यरेताः २३ हुतभुक् २४ दहनः

२५ हव्यवाहनः २६ सप्तार्चिः २७
दमुनाः २८ शुक्रः २९ चित्रभानुः ३०
विभावसुः ३१ शुचिः ३२ अप्पित्तं ३३। इत्यमरः।
इत्यमरटीका च। धनञ्जयः ३४ जुहुवानः ३५
अर्चिः ३६ हिरण्यः ३७ भास्करः ३८ अतिथिः ३९
शिखावान् ४० विभावसुः ४१ हव्यवाहनः ४२
प्रभाती ४३ शुक्रपावः ४४ उषर्बुधः ४५ पावकः
४६ वहः ४७ शुभः ४८ हिमारातिः ४९ कृशानुः
५० सुभिक्षः ५१ आशितः ५२ चमसारिणः
५३ धूमकेतुः ५४। इति जटाधरः। । अस्य
गुणाः। वातकफस्तम्भशीतकम्पनाशकत्वं। आमा
शयपाचकत्वं। रुचिप्रबोधकत्वं। इति
राजवल्लभः। अपि च।
"अग्नेर्दुर्मेधा व्याधिनाशः भावाः प्रभावम्।
शोषो रोगो बलक्षेमं स्तम्भपोऽमाविष्या"।
इति मोक्षधर्मः।
अथ कर्मविशेषेऽग्नेर्नामानि। यथा,—
"लौकिके पावको ह्यग्निः प्रथमः परिकीर्त्तितः" १।
लौकिके गर्भाधानेषु मारुतो।
"अमत्तु मारुतो नाम गर्भाधाने विधीयते २।
पुंसवने चन्द्रनामा ३ शुङ्गाकर्मणि शोभनः ४।
सीमन्ते मङ्गलो नाम ५ प्रगल्भो जातकर्मणि ६।
नाम्नि स्यात् पार्थिवो ह्यग्निः ७ प्राशने च शुचिस्तथा ८।
सत्यनामाथ चूडायां ९ व्रतादेशे समुद्भवः १०
व्रतादेशे समुद्भवः।
"गोदाने सूर्यनामा च ११ केशान्ते ह्यग्निरुच्यते १२।
गोदाने गोदानाख्यसंस्कारे। गोदानो यथा
दर्शने।
"वैश्वानरो विसर्गे तु १३ विवाहे योजकः स्मृतः १४"।
विसर्गे नाभिसंस्कारकोविशेषे।
"चतुर्थ्यां तु शिखीनामा १५ धृतिरग्निस्तथापरे १६"।
"ॐ प्रतिपदसि प्रतिपदे त्वा अनुपदसि अनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा । २३ ।
इति यजुर्व्वेदीयदुर्गोत्सवपद्धतिः ॥ * ॥ सामवेदिनामधिवासमन्त्रास्तत्तद्द्रव्याणि च यथा । प्रथम गन्धेन,—
"ॐ भद्रा इन्द्रस्य रातयः योऽस्य काम विधतो नरोयति मनोदानाय चोदयन्" । १ ।
"ॐ महित्रीणामवरस्तु द्युक्षमित्रस्यार्य्यम्णः दुराधर्षं वरुणस्य" । २ ।
इति मह्या ।
पुनर्गन्धेन,—
"ॐ भद्रा इन्द्रस्य रातय इत्यादि" । ३ ।
"ॐ वित्वदापो न पर्व्वतस्य पृष्ठादुक्थेभिरग्ने जनयन्त देवाः तत्वागिरः ।। सुष्टुतयो वाजयन्त्या जिन्नगिर्व्ववाहो जिग्युरश्वाः" । ४ ।
इति शिलया ।
'ॐ धानावन्त करम्भिण मपूपवन्तमुक्थिन इन्द्रप्रातर्जुषस्व न" । ५ ।
इति धान्येन ।
"ॐ भञ्जायथा मपूर्व्व्य मघवन् वृत्रहत्याय । तत्पृथिवी मप्रथयस्तदस्तभ्ना उतो दिवम्" । ६ ।
इति दूर्व्वया ।
"ॐ पवमान व्यश्नुहि रश्मिभिर्व्वाजसातम । दधत्स्तोत्रे सुवीर्य्यम्" । ७ ।
इति पुष्पेण ।
"ॐ इन्द्रमरोने मधिता हवन्ते यत्पार्य्या युञ्जते धियस्ताः शूरो नृषाता अवसश्च कामत्वा गोमति व्रजे भजात्वन्नः" । ८ ।
इति फलेन ।
"ॐ दधिक्राव्णोऽकारिष जिष्णोरश्वस्य वाजिन सुरभिणो मुखाकरोत् प्रणतायुंषि तारिषत्" । ९ ।
इति दध्ना ।
"ॐ घृतवती भुवनानामभिश्रियोर्व्वी पृथ्वी मधुदुघे सुपेशसा द्यावा पृथिवी वरुणस्य धर्म्मणा विष्कभितेऽजरे भूरिरेतसा" । १० ।
इति घृतेन ।
"ॐ अस्ति सोमोऽय सुत पिबन्त्यस्य मरुतः उतस्वराजोऽश्विना" । ११ ।
इति स्वस्तिकेन ।
"ॐ सिन्धोरुच्छ्वासे पतयन्तमुक्षण हिरण्यपावा पशुमप्सु गृभ्णते" । १२ ।
इति सिन्दूरेण ।
"ॐ वसुन्वेयो वसूनां यो राया मानेता य इडानां सोमो य सुक्षितीनां" । १३ ।
इति शङ्खेन ।
"ॐ अञ्जते व्यञ्जते समञ्जते क्रतु रिहन्ति मध्वाभ्यञ्जते" । १४ ।
इति कज्जलेन
"ॐ आयन्त इव सूर्य्यं विश्वेदिन्द्रस्य भक्षत वसूनि जातो जनिमान्योजसा प्रतिभागन्नदीधिम" । १५ ।
इति रोचनया ।
"ॐ प्रणीउषा अपूर्व्वा व्युच्छति प्रिया दिवस्तुसे वा मश्विना वृहत्" । १६ ।
इति सिद्धार्थेन ।
"ॐ सदसस्पतिमद्भुत प्रियमिन्द्रस्य काम्य । सनि मेधा मयासिष" । १७ ।
इति काञ्चनेन ।
"ॐ यद्वर्चो हिरण्यस्य यद्वा वर्चो गवामुत । सत्यस्य ब्रह्मणो वर्चस्तेन मा सहृजामसि" । १८ ।
इति रौप्येण ।
"ॐ एमहासि सूर्य्य वडादित्य महा असि महस्ते सतो महिमापनिष्ट समह्ना देवमहा असि" । १९ ॥
इति ताम्रेण ।
"ॐ मनज्योतिर्जुषतामाज्यस्य वृहस्पतिर्यज्ञमिम तनोत्वरिष्ट । यज्ञ समिम दधातु विश्वे देवा स इह मादयन्ता मों प्रतिष्ठ" । २० ।
इति दीपेन ।
"ॐ आदित्य प्रयतस्य वेत्तसो ज्योतिः पश्यन्ति वासर पावाय दिव्य तोदिवि" । २१ ।
इति दर्पणेन ।
"ॐ उद्यल्लोकानरोचय प्रभभूतमरोचय होइ इमान् लोकानरोचय होइ विश्वभूतमरोचय । होहा एवात्र धर्म्मो ज्योतीषि" । २२ ।
इति प्रशस्तपात्रेण । प्रशस्तपात्र पूर्व्वोक्तसर्व्वद्रव्यस्थापितैकपात्र । इति सामवेदीयदुर्गोत्सवपद्धतिः ॥

अधिवासन, स्त्री, (अधिवासयति स्थापयति देवता अनेन अधि+वस्+णिच्+करणे ल्युट्।) अधिवासः । गन्धमाल्यादिभिः संस्कारकरण । इत्यमरः ॥ (अनया तैलहरिद्रया अस्या शुभाधिवासनमस्तु ॥ इति दुर्गोत्सवपद्धतिः ॥)

अधिविन्ना, स्त्री, (अधिविद्यते लभ्यतेऽसौ, अधि+विद्+कर्म्मणि क्त स्त्रिया टाप्।) अध्यूढा । प्रथमविवाहिता स्त्री । कृतानेकविवाहस्वामिन आपेक्षिकप्रथमोढा भार्य्या । इत्यमरः ॥
("अधिविन्नस्त्रियै दद्यादाधिवेदनिक समम्" ॥
इति मनुः ।)

अधिश्रयणी, स्त्री, (अधि श्रियते पच्यतेऽत्र अधि+श्रि+अधिकरणे ल्युट् स्त्रियां ङीप्।) चुल्ली । इत्यमरः ॥ चुला इति भाषा ।

अधिष्ठान, क्ली, (अधिष्ठीयतेऽत्र अधि+स्था+अधिकरणे ल्युट्।) नगर । चक्र । प्रभाव । अध्यासन । अवस्थान । इत्यमरः ॥ (यथा रामायणे,—
"यद्भयात् सम्परित्यज्य स्वमधिष्ठानमृद्धिमत् ।
कैलास पर्व्वतश्रेष्ठमध्यास्ते नरवाहनः" ॥)

अधिक्षिप्त, त्रि, (अधि+क्षिप+कर्म्मणि क्तः ।) प्रतिक्षिप्त । इत्यमरः ॥ प्रेरितः । इति भरतः ॥ भर्त्सितः । स्थापितः । कुत्सित । भर्त्सित । इति मेदिनी ॥

अधीत, त्रि, (अधि+इङ्+कर्म्मणि क्त ।) कृताध्ययन । पठित । यथा,—
"अधीते शतसाहस्रमनन्त वेदपारगे" ।
इति स्मृतिः ॥ पठितशास्त्र । पाठे क्ली ॥

अधीति, स्त्री, (अधि+इङ्+भावे क्तिन्।) अध्ययन । पठन । इति जटाधरः ॥

अधीती, [न्] त्रि, (अधीतमनेन अधीत+इन्।) अध्ययनविशिष्टः । कृताध्ययन । इति व्याकरण ॥

अधीन, त्रि, (इन प्रभुमधिगत अत्यादीति समास ।) परवश । तत्पर्य्याय । निघ्न २ आयत्त ३ अस्वच्छन्द ४ गृह्यक ५ । इत्यमरः ॥ (यथा कुमारसम्भवे,—
"त्वदधीन खलु देहिना सुख" ॥)

अधीर, त्रि. (न धीर स्थिर नञ्समास ।) चञ्चल । इति हलायुध ॥ कातर । इत्यमर ॥ (यथा नागानन्दे,—
"निर्व्याज विधुरेष्वधीर इति
मां येनाभिधत्ते भवान्" ॥)

अधीरा, स्त्री, (न धीरा क्षणस्थायिनी, नञ्समास ।) विद्युत् । इति हारावली ॥ मानावस्थायां मध्याप्रगल्भनायिकयोर्भेद ॥ तस्या लक्षण । व्यङ्ग्यकोपप्रकाशकत्व । मध्याधीरायाः परुषवाक् कोपप्रकाशिका ॥ प्रौढाधीरायास्तर्ज्जनताडनादिक कोपप्रकाश । सा द्विधा । ज्येष्ठा कनिष्ठा च । इति रसमञ्जरी ॥

अधीश, त्रि, (अधिक ईश कर्म्मधारय ।) अधिपति । प्रभु । इति हलायुध ॥ (यथा पञ्चतन्त्रे,—
"चन्द्रे मण्डलसस्थे विगृह्यते राहुणा दिनाधीश" ॥)

अधीश्वर, त्रि, (अधिक ईश्वरः कर्म्मधारय ।) प्रणताशेषसामन्त । महाराज । चक्रवर्त्ती । इत्यमरः ॥

अधुत, त्रि, अकम्पित । धुञ्कम्पने इत्यस्मात् कर्म्मणि क्तः, पश्चान्नञ्समास । दीर्घमध्योऽपि ॥

अधुना, अ, (अस्मिन् काले इदम्शब्दस्य रूपमिति निपातनात् ।) अस्मिन्काले । इदानीं । सम्प्रति । इत्यमर ॥

अधुनातन, त्रि, (अधुना भवम् अधुना+ट्यु तुट् च ।) इदानीन्तन । वर्त्तमानकालवृत्ति । एतत्कालीन । इति व्याकरण ॥

अधृतः, पु, (धृ क्तः, न धृत नञ्समासः ।) विष्णु । इति तस्य सहस्रनाममध्ये पठित । अकृतधारणवस्तुनि त्रि ॥

अधृष्ट, त्रि, (धृष्+क्तः, न धृष्टः नञ्समास ।) सलज्ज । तत्पर्य्यायः । अप्रगल्भ २ । इति शब्दरत्नावली ॥ शारदः ३ अप्रतिभः ४ । इति जटाधरः ॥ शालीन ५ । इत्यमर ॥

अधृष्य, त्रि, (धृष्+कर्म्मणि क्यप् ।) प्रगल्भ । अधर्षणीयः । इति मेदिनी ॥ (यथा रघुवंशे,—
"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनां ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः" ॥)

अधृष्या, स्त्री, (न+धृष्+सञ्ज्ञायां क्यप् । यस्यां

काले दराचयो न भवति तादृशी नदी।) नदी विशेष। इति मेदिनी।

अधैर्य्य, त्रि, (नास्ति धैर्य्यं यस्य सः।) धीरताशून्यः। धैर्य्याभावे क्ली। यथा,—
"धैर्य्याधैर्य्यपरिग्रहग्रहिलयोरेवंविधो गीयते"।
इति भानुदत्तः।

अधोंऽशुकं क्ली, (अधः नीवेरधस्तनम् अंशुकं वस्त्रं कर्म्मधारयः।) परिधानवस्त्रं। इत्यमरः।

अधोक्षज, पुं, (अधः अक्षजं इन्द्रियजन्यं ज्ञानं यस्य सः।) नारायणः। इति शब्दमाला।

अधोजिह्विका, स्त्री (अल्पा जिह्वा कन् स्त्रियां टाप् अधः अधरा जिह्विका कर्म्मधारयः।) तालुमूलस्थजिह्वा। इति शब्दरत्नावली। आलजिह्व इति भाषा।

अधोंशुकं क्ली, (अधः नीवेरधस्तनम् अंशुकं चोलः कर्म्मधारयः।) नाडायं। इत्यमरः।

अधोमर्म्म, [न्] क्ली (अधः अधरं मर्म्म छिद्रं।) गुह्यद्वारं। इति शब्दचन्द्रिका।

अधोमुख, त्रि (अधोमुखं यस्य सः।) अधोवदनः। नतानन। लज्जाशीलः। अवाङ्मुखः २। इत्यमरः। अवाग्जीव २। इति जटाधरः। अधोमुखाश्चक्रमुदा यथा,—
"अधोमुखत्रिकमति विनिर्जितेषां
भूमण्डलं प्रतिविधा न सदावुवर्त्ति।
इत्यादयोऽन्यानि मुखानि विधिं
विचार्य्यैवमुनिश्चयेन च कौषिकानि"।
इति ज्योतिःसारसंग्रहः।

अधोमुखा स्त्री (अधोमुखं अस्याः सा, स्त्रियां टाप्।) गोजिह्वालता। इति राजनिर्घण्टः।

अधोवायु, पुं (अधः अधरो वायुः कर्म्मधारयः।) अपानवायुः। यथा —
"कुरुअधोवायुगमने क्रमणे जघनमेव"
इति कलाविलासे कौलिनीप्रकरणं।

अधोऽक्ष पुं, (अधः अक्षमागमनात् दीर्घम् अक्षणं प्रकाशनं यस्य सः। अधरात् इन्द्रियात् जायते अधः+अक्ष+जन् ड पञ्चमीतत्।) विष्णुः। इत्यमरः। (यथा महाभारते अधो न क्षीयते जातु यस्मात्तस्मादधोक्षजः।)

अध्यधि स्त्री, (अधि अधीने अधिकीनामा,) विवाह काले चाग्निसमीपे स्त्रियै दत्तं धनादि। यथा,—
"विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ।
तदध्यग्नि कृतं सद्भिः स्त्रीधनं परिकीर्त्तितं"।
इति दायभागे कात्यायनः।

अध्यक्ष स्त्री, (अधिगतमक्षं दीर्घं यस्याः सा स्त्रियां टाप्) अधिराजम्। इत्यमरः। आत्मज्जाटी इति भाषा। भूम्यामलकी। इति रत्नमाला।

अध्ययनं, क्ली, (अधि+इङ्+भावे ल्युट्) गुरुमुखात् आनुपूर्व्विकश्रवणं। पठनं। आप्तवाक्य वदनृक्षेत्र बहुलौन्यकथं। इति शब्दरत्नावली।

अध्यवसाय, पुं, (अधि+अव+सो+भावे घञ्।) उत्साहः। इत्यमरः। कर्म्मसु उद्यमः प्रयत्नः। इति जटा। कर्म्मसु बुद्धिनाशकारिणी माया इति शब्दमाला। कर्म्मसु एकप्रयत्नत्वे। इति वैद्यक्। उद्योगोऽवसायो नाम। इति भरतः।

अध्यात्मं क्ली, (अधिकृत्यात्मं भोजनं कर्म्मधारयः।) आत्मीयं भोजनं। यथा। आत्मीयं भुङ्क्ते यथा तदवसानसुखाने। इति भावप्रकाशः।

अध्यात्म, पुं, (आत्मानोऽधि समभावात् आत्मोधि अधि+आत्मन्+अच्।) (शब्दकारकादि अवहारि अधिकृत्य। आत्मा।) जीवविचारकः। इति शब्दरत्नावली।

अध्यापक, त्रि (अध्यात्मिविश्वमविज्ञा प्रादि समासः।) प्रधानः। इत्यमरमालायं।
(अध्यात्मविद्या बहुपादोविलासिका।
इति कुमारसम्भवे।) अधिकृताः।
अध्ययनाधिविरोधिकः। इत्यमरः।

अध्यापक, त्रि (अधि+इङ्+णिच्+ण्वुल्।) अध्यापनकर्त्ता। पाठकः। अध्यापयिता। आचार्य्यः। उपाध्यायः २। इत्यमरः।

अध्यापनं क्ली, (अधि+इङ्+णिच्+भावे ल्युट्।) पाठनं शिक्षादानं। ब्राह्मणानां षट्कर्म्मान्तर्गत कर्म्मविशेषः। इति शब्दरत्नावली। (यथा मनुः,—
"अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव षट्कर्म्माण्यग्रजन्मनः" ।)

अध्याय, पुं, (अधि+इङ्+भावे घञ् अध्ययनम्।) वेदग्रन्थादिविभागविशेषः। परिच्छेदः। सर्गोत्वर्गः। सर्गः। परिच्छेदः। अङ्कः। प्रस्तावः। उच्छ्वासः। परिवर्त्तः। पटलः। काण्डः। आसः। प्रकरणं। पर्व्व। आह्निकं। इति त्रिकाण्डशेषः। स्कन्धः। लम्बकः। उद्घातः। पादः। अधोलः। विरचनं। इत्यादि।
तद्भेदः।
("सर्गो वर्गः परिच्छेदोद्घाताध्यायाङ्कसंग्रहाः।
उच्छ्वासः परिवर्त्तश्च पटलः काण्ड एव च।
स्थानं प्रकरणं चैव पर्व्वोल्लासाह्निकानि च।
स्कन्धांशौ तु पुराणादौ प्रायशः परिकीर्त्तितौ।")

अध्यारूढ़, त्रि (अधि+आङ्+रुह्+क्त।) समारूढ़ः। अत्यारूढ़ः। अधिकः। आधिक्यं। इति मेदिनी।

अध्यारोप पुं,(अधि+आ+रुह्+णिच्+भावे घञ्) रज्जुसर्पवदारोपः। अधिष्ठानस्य धर्म्मस्यारोपणम्। अधिष्ठाने वस्तुनि अवस्तुत्वारोपः। इति वेदान्तसारः।

अध्यावाहनिकं, क्ली, (अध्यावाहनं पितृगृहात् पतिगृहगमनकाले लब्धं अध्यावाहन+ठक्। अधि+आ+वह्+णिच् ल्युट्।) स्त्रीधनविशेषः। यथा,—
"यत् पुनर्लभते नारी नीयमाना पितुर्गृहात्।
अध्यावाहनिकं नाम तत् स्त्रीधनमुदाहृतं।"
इति दायभागे कात्यायनः।

अध्याहार पुं (अधि+आ+हृ+भावे घञ्।) तर्कः। ऊहा। इत्यमरः। वाक्यार्थस्य समाप्तये आकाङ्क्षितपदप्रयोगः। आकाङ्क्षानुसारेण न्यूनपदपूरणं। इति जटाधरः।

अध्युष, त्रि (अधि+वस्+क्त, सम्प्रसारणात् ऊत्वम्।) अधिवासितः। अधिकरणे। इति जटाधरः।

अध्यूढ, त्रि (अधि+वह्+क्त।) समृद्धः। ऐश्वर्य्यवान्। इति मेदिनी। ईश्वरः। आढ्यः।

अध्यूढा स्त्री, (अधि+वह्+क्त स्त्रियां टाप्।) कृतसपत्नीका स्त्री। इत्यमरः। मेदिनीकारः।

अध्येषणा, स्त्री, (अधि+इष्+णिच्+भावे युच्, स्त्रियां टाप्।) याचना। इति हेमचन्द्रः। सत्कारपूर्व्वकं कर्म्मणि नियोजनम्। इति जटाधरः। शुश्रूषा २। इत्यमरः। भक्षी २। इति जटाधरः।

अध्रुव, त्रि, (न ध्रुवं) अनित्यम्। इत्यमरः। चलः। इति त्रिकाण्डशेषः। अस्थिरः।

अध्वगमीय, पुं (अध्वगेन पथिकेन गम्यः।) अध्वगमनसम्बन्धी। इति त्रिकाण्डशेषः।

अध्वगा, स्त्री, (अध्वन्+गम्+ड, स्त्रियां टाप्।) गङ्गा। इति त्रिकाण्डशेषः।

अध्वगा स्त्री, (अध्वनि पथिके अध्वन्+गम्+ड, उष्ट्री।) इति राजनिर्घण्टः।

अध्वनीन, त्रि (अध्वनि साधु अध्वन्+ख तस्य ईनः) पथिकः। इत्यमरः।

अध्वन्य, त्रि (अध्वनि साधुः अध्वन्+यत्।) पथिकः। इत्यमरः। (अध्वन्यैः सिद्धमार्गेभिः पथि यथा नावि। इति अध्वगमनं।)

अध्वर, पुं, (अध्वानं सत्पथं राति ददाति अध्वन्+रा+क उपपदसमासः।) यज्ञः। पथ्येषु। इति मेदिनी। ("कर्म्मणि अध्वरमिति" इति उणादि।)

अध्वरथ, पुं, (अध्वने रथो गमनसाधनं यस्य सः।) पथरथः। अध्वगमनोपयुक्तरथः। इत्यमरः। अवगाहः २। इति हेमचन्द्रः।

अध्वर्य्यु, पु, (अध्वरं यज्ञं यौति सम्पादयति अध्वर + यु + कर्त्तरि क्विप्, पृषोदरादित्वात् तुम्भाव रस्याकारलोपः, होमकारी ऋत्विक्।) यजुर्वेदवेत्ता। इत्यमरः॥ (यथा कुमारसम्भवे,—
"विवाहयज्ञे विततेऽत्र यूय-
मध्वर्य्यवः पूर्व्ववृता मयेति"।)

अध्वशल्यः, पु, (अध्वनि पथि शल्यमिव आचरति सकण्टकतया अध्वशल्य + क्विप् ततोऽच्।) अपामार्गः। इति राजनिर्घण्टः॥

अध्वा [न्] पु, (अत्ति गमनेन वलं नाशयति, अद् + बाहुल्यात् क्वनिप्, पृषोदरादित्वात् दकारस्य धः।) पन्थाः। कालः। संस्थानं। अवस्कन्दः। इति मेदिनी॥ शास्त्रं। स्कन्धः। इति च पाठान्तरं॥ अध्वगमनजन्यगुणाः। मेदःकफस्थूलतासौकुमार्य्यनाशित्वं। इति राजवल्लभः॥

अध्वान्तशात्रव, पु, (अध्वान्तस्य वर्त्मसीमायाः शात्रवः शत्रुवत्, षष्ठीतत्पुरुषः।) श्योनाकवृक्षः॥ इति शब्दचन्द्रिका॥

अन ष लु प्राणने। जीवने। इति कविकल्पद्रुमः॥ ष लु अनिति लोको जीवति इत्यर्थः। इति दुर्गादासः॥

अन ङ य प्राणने। जीवने। इति कविकल्पद्रुमः॥ य ङ अन्यते। इति दुर्गादासः॥

अनंशुमत्फला, स्त्री, (न अंशुमत् नैवान्तर्व्वर्त्तितया सूर्य्यकिरणशून्यं फलं यस्याः सा।) अनंशुमत्फला। कदली। इति जटाधरः॥

अन [स्] क्ली, (अनिति जीवत्यनेन जीविकोपायत्वात् अन् + असुन्।) शकटं। इत्यमरः॥ (यथा मनुः,—
"होता वापि हरेदश्वमुद्गाता चाप्यनः क्रये"।)
अन्नं। इत्युणादिकोषः॥ जननी। जन्म। जन्मी। इति कोषान्तरं॥

अनक, त्रि, (अन् + अच् + कुत्सायां कन्।) अधमः। अधमः। इत्यमरटीकायां भरतः॥

अनगार, पु, (नास्ति अगारं गृहं यस्य सः, गृहस्थाश्रमशून्यः।) ऋषिः। मुनिः। इति हेमचन्द्रः॥ अगारशून्ये वाच्यलिङ्गः॥

अनग्नि, पु, (नास्ति श्रौतः स्मार्त्तो वा अग्निर्यस्य सः।) श्रौतस्मार्त्तकर्म्महीनः॥ इति महाभारते दानधर्म्मः॥ (अनाहिताग्निः, यथाह मनुः,
"अग्नीनात्मनि वैतानान् समारोप्य यथाविधि।
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः"॥)

अनघ, त्रि, (नास्ति अघं पापं यस्य सः।) अपापः। निर्म्मलः। मनोज्ञः। इति मेदिनी॥ (यथा शाकुन्तले—
"अखण्डं पुण्यानां फलमिव च तद्रूपमनघं"।)

अनङ्ग, क्ली, (नास्ति अङ्गमवयवो यस्य तत्।) आकाशं। मनः। इति मेदिनी॥

अनङ्गः, पु, (नास्ति अङ्गं कायो यस्य सः।) कामदेवः। इत्यमरः॥ (यथा मेदिनी। "अनङ्गो मदनेऽनङ्गमाकाशमनसोरपि"॥) अङ्गरहिते वाच्यलिङ्गः॥

अनङ्गक, क्ली, (नास्ति अङ्गमाकारो यस्य तत्, तत स्वार्थे कः।) चित्तं। मनः। इति शब्दरत्नावली॥

अनङ्गासुहृत् [द्] पु, (अनङ्गस्य कामदेवस्य असुहृत् शत्रुः शिवललाटाग्निना तद्देहभस्मीकरणात्।) शिवः। इति हेमचन्द्रः॥

अनच्छः, त्रि, (न अच्छः निर्म्मलः।) आविलः। अनिर्म्मलः। इत्यमरः॥

अनञ्जनं, क्ली, (नास्ति अञ्जनं स्वमूर्त्तिप्रकाशो यस्य तत्, निराकारत्वात्, अनञ्ज + भावे ल्युट्।) आकाशं। इति शब्दचन्द्रिका॥ अञ्जनशून्ये त्रि॥ (यथा साहित्यदर्पणे,—
"नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः"।)

अनडुज्जिह्वा, स्त्री, (अनडुहो वृषभस्य जिह्वेव जिह्वा पत्रं यस्याः सा स्त्रियां टाप्।) गोजिह्वालता। इति राजनिर्घण्टः॥

अनडुही, स्त्री, (अनडुह् + गौरादित्वात् ङीष् पक्षे आम्।) अनड्वाही। इति हेमचन्द्रः॥ गाइ इति भाषा।

अनड्वान्, [डुह्] पुं, (अनडुह् + प्रथमैकवचनम्।) वृषः। षंडे इति भाषा। तत्पर्य्यायः। गौः २ भद्रः ३ बलीवर्द्दः ४ दम्यः ५ दान्तः ६ स्थिरः ७ वली ८ उक्षा ९ ककुद्मान् १० ऋषभः ११ वृषभः १२ वृषः १३ धुर्य्यः १४ धुरीयः १५ धौरेयः १६ शाक्वरः १७ शिववाहनः १८ रोहिणीरमणः १९ वोढा २० गोनाथः २१ सौरभेयकः २२। इति राजनिर्घण्टः॥ (यथा मनुः,—
"अजमेषावनड्वाहं खरं हस्त्यैकहायनम्"॥)

अनड्वाही, स्त्री, (अनडुह् + गौरादित्वात् ङीष्, आमागमश्च आममभावपक्षे केवलं ङीष्।) अनडुही। स्त्रीगवी। इति हेमचन्द्रः॥ गाइ इति भाषा।

अनदः, पुं, (अद् + कर्म्मणि अप्, संज्ञापूर्व्वकविधेरनित्यत्वात् घस्लाभावः, न अद्यः अप्रशस्तखाद्यः, नञ्समासः, नञत्र अप्राशस्त्ये।) गौरसर्षपः। इति राजनिर्घण्टः॥

अनधिगतः, त्रि, (अधि + गम् + कर्म्मणि क्तः, न अधिगतः ज्ञातः, नञ्समासः। गतमित्र प्राप्तमित्र।) अनवगतः। यथा,—"अये विद्वन्मन्या-अनधिगतवेदार्थविभवाः"। इति भगवद्वाक्यमिति प्रामादिका॥

अनध्यक्ष, त्रि, (अक्षमिन्द्रियमधिगतः प्रादिसमासः, प्रत्यक्षः तद्भिन्नः नञ्समासः।) अप्रत्यक्षः। इत्यमरटीकायां रमानाथः॥ अध्यक्षभिन्नः॥

अनन्त, क्ली, (नास्ति अन्तः सीमा यस्य तत्।) आकाशं। इत्यमरः॥ अभ्रकं। इति राजनिर्घण्टः॥

अनन्त, पु, (नास्ति अन्तः विनाशो यस्य सः, तथाहि भागवते "लोके नष्टे द्विपरार्द्धावसाने भवानेकः शिष्यते शेषसंज्ञः"।) विष्णुः। इति मेदिनी॥ बलदेवः। अनन्तजिन्नाम जिनः। इति हेमचन्द्रः॥ शेषनागः। इत्यमरः॥ वासुकिः। इति शब्दमाला॥ सिन्दुवारवृक्षः। इति राजनिर्घण्टः॥

अनन्त, त्रि, (नास्ति अन्तः सीमा विनाशो वा यस्य सः।) अन्तरहितः। अनवधिः। अशेषः। असीमः। इत्यमरो मेदिनी च॥ (यथा कुमारसम्भवे।—"अनन्तरत्नप्रभवस्य यस्य"।)

अनन्तजित्, पु, (जयतीति जि + कर्त्तरि क्विप् अनन्तो नाम जित् जयी बौद्धविशेषः शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च।) जिनानां चतुर्व्विंशत्यन्तर्गतचतुर्द्दशजिनः। तत्पर्य्यायः। अनन्तः २। इति हेमचन्द्रः॥

अनन्ततीर्थकृत्, पु, (अनन्तानि असङ्ख्यानि तीर्थानि शास्त्राणि कर्म्मधारयः, तानि कृतवान् अनन्ततीर्थ + कृ + क्विप्, उपपदसमासः।) अनन्तजित्। इति हेमचन्द्रः॥ (अनन्तजित् नाम जिनः॥)

अनन्तरं, त्रि, (नास्ति अन्तरमवकाशो यस्य तत्।) अनवकाशं। अन्तररहितं। तत्पर्य्यायः॥ अव्यवहितः २ संसक्तः ३ अपटान्तरः ४। इति हेमचन्द्रः॥ पश्चादर्थे क्ली॥ (पश्चात्। ततःपरं। यथा रघुवंशे,—"पितुरनन्तरमुत्तरकोशलान्"॥)

अनन्तविजय, पुं, (विजयतेऽनेन वि + जि + करणे अच्, ततोऽनन्तानामसङ्ख्यानां शत्रूणां शब्देन विजयः विजयसाधनम् षष्ठीतत्पुरुषः।) युधिष्ठिरराजस्य शङ्खः। इति श्रीभगवद्गीता॥

अनन्तवीर्य्य, पु, (अनन्तमसीमं वीर्य्यं तेजो यस्य सः।) भाविकल्पे जिनानां चतुर्व्विंशत्यन्तर्गतत्रयोविंशतीर्थकारजिनः। इति हेमचन्द्रः॥

अनन्तव्रत, त्रि, (अनन्तस्य तन्नामकदेवस्य व्रतं षष्ठीतत्पुरुषः।) भाद्रशुक्लचतुर्द्दशीकर्त्तव्यमनन्तदेवस्य व्रतं। तद्विधिर्यथा। भविष्ये,—
"अनन्तव्रतमेतद्धि सर्व्वपापहरं शुभं।
सर्व्वकामप्रदं नृणां स्त्रीणाञ्चैव युधिष्ठिर॥
तथा शुक्लचतुर्द्दश्यां मासि भाद्रपदे भवेत्।
तस्यानुष्ठानमात्रेण सर्व्वपापं प्रणश्यति"॥*॥
व्रतारम्भप्रतिष्ठयोर्व्वर्ज्ज्यकालमाह ज्योतिषे,—
"गुरोर्भृगोरस्तबाल्ये वार्द्धके सिंहगे गुरौ।
वक्रिणीवाप्यतिचारेऽङ्घ्रि गुर्व्वादित्ये दशाहिके॥
पूर्व्वं शाखावनाश्रातातिचारिगुरुवत्सरे।
प्रायश्चित्तगतृर्जीवस्य चातिचारे त्रिपक्षके॥
कन्याद्यब्दतदप्ताहे नीचस्थेऽब्दे भगिस्तुते।
नातुलङ्घितके मासि क्षये राहुयुते गुरौ॥
पौषादिकचतुर्म्मासे चरणाङ्घ्रि तदर्थगे।
एकेनाङ्गा चैकदिने द्वितीयेन दिनत्रये॥
तृतीयेन तु सप्ताहे सार्द्धन्यास शुभान्विता।
विवाहरम्भकर्णवेधौ चूडोपनयनोद्वहान्॥
तीर्थस्नानमनाद्यन्त तथानादिसुरेक्षणम्।
परीक्षामानयज्ञाख्य पुरश्चरणदीक्षणे॥
व्रतारम्भप्रतिष्ठे च गृहारम्भप्रवेशने।
प्रतिष्ठारम्भणे देवकूपादेर्व्वर्ज्जयन्ति हि॥
द्वात्रिंशद्दिवसाप्नान्ते जीवस्य भार्गवस्य च।
दासप्ततिर्म्महत्यस्ते पादान्ते द्वादशक्रमात्॥
अस्तात् प्राक् पश्चिमे पक्ष गुरोर्वार्द्धक्यमान्ते।
पक्षवृद्धौ महास्ते तु स्मर्गुर्वास्ते दशाहिके॥
पादास्ते न दशाहानि [illegible]"...

"अनन्तो मोक्षरूपेणासौ समुपोष्यं न [illegible]" ।
स्नात्वा शौचं च [illegible] समूलं [illegible] ।
चतुर्दश्यामनन्तस्य [illegible] देवं पूजयेत् प्रयत्नतः"
इति भविष्योत्तरोक्तचतुर्दशीव्रतस्य विधि
[illegible] कार्यं । पूजायां [illegible] मुष्ठा-
दिभिः पूजयेत् देवसन्निधानात् । [illegible]
[illegible] विष्णुवदेव
[illegible] तत् । [illegible] ।
[illegible] पूजाविधानं [illegible] ।
यथा,—

"कृत्वा दर्भमयानन्तं वारिपात्रे निवेश्य च ।
पूजयेद्गन्धपुष्पाद्यैर्नैवेद्यैर्विविधैरपि ।
चतुर्दशग्रन्थियुतं कुङ्कुमेनापि ।
[illegible] पूर्वोक्तेन [illegible] च ।
कृत्वा सूत्रं [illegible] ।
[illegible] सूत्रं [illegible] ।
चतुर्दशग्रन्थियुतं कुङ्कुमेन विचर्चितं ।
[illegible] विष्णुनामभिर्विन्यस्तमन्त्रितं ।
चतुर्दशसमन्वितं सूत्रं [illegible] च" ।

पूजान्ते [illegible] मन्त्रमिदं,—

"अनन्तसंसारमहासमुद्रे
मग्नान् समभ्युद्धर वासुदेव ।
अनन्तरूपे विनियोजयस्व
अनन्तरूपाय नमो नमस्ते" ।

इति मन्त्रमुक्त्वा ।
"[illegible] मोक्षं [illegible]" ।
इत्यर्थं भविष्योत्तरोक्तं [illegible] निबन्ध
मिति । * । तथा —
"[illegible] ।
[illegible] ।
[illegible] ।
[illegible] मूर्धाभिषेक [illegible]" ।
इत्यादि [illegible] । [illegible]
[illegible] । इति [illegible] । । । अथ
[illegible] कुर्यात् —
"[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] इति [illegible]
[illegible] । । [illegible]
[illegible]
[illegible]
[illegible] कृत्वा [illegible]
[illegible] —"ॐ [illegible]
[illegible]
[illegible] मूर्तिम् [illegible]
[illegible]" । एवं ध्यात्वा [illegible]
[illegible] —

"ॐ [illegible] महाभाग [illegible] ।
[illegible] नमोऽस्तु ते" ।
ततो [illegible] दत्त्वा [illegible]
मावाहयेत् —
ॐ [illegible] समुद्रं पूजयेत् । ।
ततो [illegible] कृत्वा [illegible]
ध्यायेत् —
"ॐ [illegible] देवेशं [illegible] ।
[illegible] चतुर्भुजं [illegible] ।
[illegible] पीताम्बरं विभुं ।
[illegible] किरीटादिविभूषणं ।
[illegible] ।
अनन्त [illegible]" ।
एवं ध्यात्वा [illegible] एवं [illegible]
[illegible] ।
[illegible] नमः [illegible]
[illegible] ।
"ॐ [illegible] देवेश [illegible] ।
[illegible]" ।
ततः पूजयेत् ।
पाद्यं मन्त्रेण —
"ॐ पाद्यं गृहाण देवेश [illegible] ।
तुष्टो मे भव देवेश [illegible] नमोऽस्तु ते" ।
अर्घ्यमन्त्रः,—
"अर्घ्यं गृहाण देवेश [illegible] ।
[illegible] नमस्ते विश्वमूर्त्तये" ।
आचमनीयं मन्त्रेण —
"ॐ [illegible] नमो ।
[illegible] नमस्ते [illegible]" ।
एवं मधुपर्कं [illegible] आचमनीयं [illegible]
दद्यात् । ।
स्नानं,—
"ॐ [illegible] देवेश [illegible] ।
[illegible] देवेश प्रतिगृह्यतां" ।
वस्त्रं,—
"ॐ वस्त्रं गृहाण भोऽनन्त [illegible] ।
[illegible] नमस्तेऽस्तु [illegible]" ।
धूप —
ॐ धूपोऽयं च महाभाग [illegible] च ।
[illegible] गृहाण" ।
दीप —
ॐ दीपं गृहाण भोऽनन्त [illegible] ।
[illegible] देव [illegible] मां [illegible] ।
नैवेद्यमिति —
ॐ [illegible] ।
[illegible]" ।
नैवेद्यं —
"ॐ [illegible] चतुर्विधं ।
[illegible] देव [illegible] विभो" ।
ततः [illegible] कुर्वीत —
"ॐ [illegible] ।
[illegible]" ।

तत [illegible] पूजयेत् ।
ॐ अनन्ताय नमः । [illegible] । [illegible]
[illegible] । [illegible] । [illegible]
[illegible] । [illegible] । [illegible]
[illegible] । [illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] । [illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] । [illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] । ।
तत स्तुति पठेत्,—

"ॐ अनन्तसंसारमहासमुद्रे
मग्नं समभ्युद्धर वासुदेव ।
अनन्तरूपे विनियोजयस्व
अनन्तरूपाय नमो नमस्ते ।
नमोऽस्त्वनन्ताय सहस्रमूर्त्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ।

[illegible] ।
[illegible] देवं [illegible] ।
अनन्त [illegible]
अनन्त [illegible] ।
अनन्त [illegible]
अनन्त [illegible] ।
[illegible] वासुदेवं [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] पुत्रा [illegible] मे ।
[illegible] ।
[illegible] ।
ततो [illegible]
[illegible] ।
"ॐ [illegible] ।
[illegible]" ।
ततो मोक्षमुद्धरेत् । ।
ततः कथां शृणुयात् ।
यथा,—
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] युधिष्ठिर ।
[illegible] उवाच ।
[illegible] देवेश [illegible] सर्वं ।
[illegible] ।
श्रीकृष्ण उवाच ।

अस्ति व्रतमनन्ताख्यं यत्कृत सुरसत्तम ।
इन्द्राद्यैर्लोकपालैश्च तन्मे कथयतः शृणु ॥
शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे तथा ।
तस्यानुष्ठानमात्रेण सर्व्वपापं प्रणश्यति ॥ * ॥
युधिष्ठिर उवाच ।
कृष्ण कोऽयं त्वयाख्यातो योऽनन्त इति संज्ञितः ।
कोऽयं शेषश्च नागश्च अनन्तस्तक्षकः स्मृतः ॥
परमात्मोत वापि उताहो ब्रह्म उच्यते ।
क एषोऽनन्तसंज्ञो वै तन्मे ब्रूहि जनार्द्दन ॥ * ॥
श्रीकृष्ण उवाच ।
अनन्त इत्यहं पार्थ मम रूपं निबोध तत् ।
आदित्यादिग्रहत्वेन यः काल उपपद्यते ॥
कलाकाष्ठामुहूर्त्तादिदिनरात्रिव्यवस्थया ।
पक्षो मासर्त्तुवर्षं युगकल्पव्यवस्थया ॥
सोऽहं कालोऽवतीर्णोऽस्मि भुवो भारावतारणात् ।
दानवानां विनाशाय वसुदेवकुलोद्भवः ॥
अनन्तं विद्धि मां पार्थ कृष्णं विष्णुं हरिं शिवं ।
ब्रह्माणं भास्करं शेषं सर्व्वव्यापिनमीश्वरं ॥
प्रत्ययार्थं मया पार्थ विश्वरूपं निबोध तत् ।
पूर्व्वमेव महाबाहो योगिध्येयमनुत्तमम् ॥ * ॥
युधिष्ठिर उवाच ।
अनन्तव्रतमाहात्म्यं विधिं विधिविदां वर ।
किं पुण्यं किं फलं तस्य अनुष्ठानस्य तस्य किं ॥
केन चादौ कृतं पूर्व्वं लोके केन प्रकाशितं ।
तत्सर्व्वं वद विस्तार्य्य ब्रूहि नारायण प्रभो ॥ * ॥
श्रीकृष्ण उवाच ।
आसीत्पुरा कृतयुगे सुमन्तुर्नाम वै द्विजः ।
वशिष्ठगोत्रजो विद्वान् धीमान् विजितेन्द्रियः ॥
पत्नी तस्याभवद्दीक्षा भृगोः कन्यका स्थिता ।
साध्वी शीलवती शुद्धा सुरूपा सद्वंशजा ॥
तस्याः कालेन सञ्जाता दुहिता सर्व्वलक्षणा ।
शीला नाम्ना सुशीला सा वर्द्धते पितृवेश्मनि ॥
माता तस्याश्च कालेन ज्वरदाहप्रपीडिता ।
समागम्य नदीतोये मृता स्वर्गपुरं ययौ ॥
एवं सुमन्तुना तस्याः कर्म्म यत् पारलौकिकं ।
तत सुमन्तु संतप्य दुःखशोकसमावृत पुनः ॥
गार्हस्थ्यो गृही धर्म्मे धर्म्मं नेति वै स्थितः ।
इति सञ्चिन्त्य मनसा विवाहोत्सुकमानसः ॥
देवस्य सुतां कन्यां कर्क्कशां परिणीतवान् ।
सा कर्क्कशादिदुःशीला सदा निष्ठुरभाषिणी ॥
कोपना प्रतिकूला च निर्दया कलहप्रिया ।
मन्दा स्वच्छन्देषु दक्षा नोपकर्म्मणि ॥
कलहेन तु सन्तुष्टा रुष्टा बन्धुजनान् प्रति ।
सा तु शीला पितुर्गेहे वर्द्धिता च दिने दिने ॥
करोति सर्व्वकर्म्माणि भित्तिद्वारादिकुट्टना ।
नानावर्णस्वरूपाणि देहल्यां तोरणादिषु ॥
चतुष्कवर्णैश्च नक्षत्रपीतसितासितैः ।
स्वस्तिकं पद्मशङ्खौ च नयन्ती इत्य पुनः ॥
कुर्व्वन्ती प्रत्यहं बाला देवतातिथिपूजनं ।
एवंरूपे सदा यस्याः पितुरन्नवहूलता ॥
काले किसला विप्रा दृष्ट्वा यौवनशालिनीं ।
कस्मै देया मया कन्या इति चिन्ताकुलोऽभवत् ॥

ततो देववशात्तत्र कौण्डिन्यः समुपागतः ।
मुनिश्रेष्ठो महाभागः कुलीनो धर्म्मवत्सलः ॥
मनसा चिन्तयामास सुमन्तुः सुतया सुधीः ।
अस्मै भाग्यवशाच्छ्रेष्ठा प्रतिपाद्या प्रयत्नतः ॥
इति कृत्वा मतिं विप्रो ददौ कन्यां शुभे दिने ।
कन्यालङ्कृता साध्वी शीला चन्द्रनिभानना ॥
गृह्योक्तवेदविधिना विवाहमकरोत्तदा ।
ततो होमादिकं कर्म्म समाप्य सदने मुनिः ॥
सुमन्तुः कर्क्कशां प्राह जामात्रे देहि दक्षिणां ।
वचन कुरु मे दानं प्रिये मुनिकुलोद्भवे ॥
दक्षिणारहितं कर्म्म निष्फलं जायते यतः ।
सा तु तद्वचनं श्रुत्वा कर्क्कशा कुपिताभवत् ॥
सुमन्तुं भर्त्सयामास कठोरैर्वचनैः पतिं ।
अन्तर्द्वारं समानीय स्वकीयस्यापि बन्धनं ॥
निक्षिप्य निभृते स्थाने वर्गमात्रमिदं ददौ ।
सुमन्तुश्चातिदीनात्मा स्वस्तिवाचमवत्तदा ॥
यत्किञ्चिद्दर्शयोग्यस्य इन्धनादि यौतुकं ।
जामात्रे प्रददौ विप्रः प्रणिपत्य पुनः पुनः ॥
ततो विवाहं निर्व्वर्त्य कौण्डिन्योऽपि निजाश्रमं ।
गोयाने तां समारोप्य शीलामादाय वै ययौ ॥
ततः सा पथि गच्छन्ती शीला चन्द्रनिभानना ।
मध्याह्ने भोजनेनाया समुत्तीर्य्य सरित्तटे ॥
ददर्श शीला नारीणां समूहं रक्तवाससां ।
शुभा कुर्वत्यस्तत्रैव रक्तपीताम्बरावृताः ॥
चतुर्दश्यामर्चयन्त्यो भक्त्यानन्तं पृथक् पृथक् ।
दृष्ट्वा समूहं नारीणां ततो पप्रच्छ सादरं ॥
किं नाम त्वा साध्व्यः प्रतिपद्य सुरेश्वरं ।
किमिदं क्रियते श्लाध्यं भवतीभिस्तदुच्यतां ॥ * ॥
स्त्रिय ऊचुः ।
भाद्रे मासि सिते पक्षे उदिते वासवर्क्षके ।
चारस्थिते महेन्द्रे च श्रवणाद्यारात् पश्चिमे ॥
स्नात्वा सरिति च स्नात्वा अनन्तार्च्चनमारभेत् ।
कृत्वा दर्भमयं देवं फणिसप्तसमन्वितं ॥
अनन्तं देवदेवेशं चतुर्ब्बाहुं किरीटिनं ।
अतसीपुष्पसंकाशं काञ्चनाद्यैश्च भूषितं ॥
शङ्खचक्रगदापद्मविविधायुधधारिणं ।
लक्ष्मीर्हि भवतः स्मृत्वा तत्र यत्र प्रवर्त्तते ॥
वाचिकान्या तथानन्तं भवतां निवेदयेत् ।
गन्धाद्यैः पुष्पैर्धूपैश्च धूपगन्धानुलेपनैः ॥
दत्त्वा च पूर्वेद्युरथा अनन्तं विश्वरूपिणं
पिष्टकार्यं गोधूमं यवगोधूमयोश्च वा ॥
स्वदेश प्राप्यते तु तद्द्राक्ष प्रक्षालितं ।
अर्द्धं विप्राय दातव्यमर्द्धमात्मनि योजयेत् ॥
पूजयित्वा तथा देवं गन्धपुष्पैर्यथाक्रमं ।
श्रुत्वा कथां ततस्तस्य कुङ्कुमाक्तं सडोरकं ॥
चतुर्दशग्रन्थियुक्तं नारी वामकरे न्यसेत् ।
पुमांस्तु दक्षिणे बाहौ तथानन्तं प्रबन्धयेत् ॥
निर्व्वर्त्य पूजां देवस्य पूर्णं कृत्वा यथासुखं ।
विसृज्य दक्षिणां दत्त्वा प्रदत्त च यथाबलं ॥
शीला श्रुत्वा तथाख्यातं तदा तासां तदा व्रतं ।
एवं चकार सा साध्वी बद्ध्वा डोरकमुत्तमं ॥
भुक्तशेषं सा कृत्वा भुक्त्वा चैव ययौ च ।

पुनर्गता तेनैव गोरथेन समन्विता ॥
तेनानन्तप्रभावेन गृहं गोधनसङ्कुलं ।
तदाश्रमं श्रिया युक्तं धनधान्यसमन्वितं ॥
विविधातिथिसम्पूर्णं नानारत्नैर्विभूषितं ।
वराश्वमत्तमातङ्गमकरैश्चैव गोधनान्वितं ॥
शीला च मणिकाञ्चीभिर्मुक्ताभरणभूषिता ।
दिव्याङ्गी शीलसम्पन्ना सावित्रीप्रतिमा यथा ॥
कदाचिदुपविष्टा सा पतिकुलं समागता ।
कौण्डिन्योऽपि विधेर्योगात् दृष्ट्वा डोरमनन्तकं ॥
शीलायाः करमूले च बद्धमेव प्रयत्नतः ।
पप्रच्छ क्रोधवचना भ्रुकुटीकुटिलं मुखं ॥
किमिदं डोरकं हस्ते बद्ध्वा मायेऽत्र तिष्ठसि ।
प्रमेयं कस्य देवस्य दुर्बुद्धे ब्रूहि सत्वरं ॥ * ॥
शीलोवाच ।
अनन्तं देवदेवस्य प्रभोश्च डोरकं शुभं ।
करे बद्धं विधानेन इदं मे वदतः प्रभो ॥
प्रसादात् तस्य देवस्य भुङ्क्ते सुविपुलं धनं
न जानासि कथं नाथ तदेवं प्राप्तमीश्वर ॥
शीलावाक्यं ततः श्रुत्वा कौण्डिन्यः कुपितोऽभवत्
कोऽसावनन्तको वै न ज्ञातोऽपि वनान्तरे ॥
इत्युक्त्वाऽथ कुपितो मुमोचोरसनन्तकं ।
क्षिप्तं ज्वालाकुले वह्नौ निर्भर्त्स्य बहुधा प्रियां ॥
ततः सा सम्भ्रमात् शीला हाहा कृत्वा प्रधाविता ।
वह्नेः सूत्रं समादाय क्षीरमध्ये ततोऽक्षिपत् ॥
ततस्तदा करे वामे पुनर्बद्धं सुडोरकं ।
अनन्ताक्षेपदोषेण दारिद्र्यं पतितं गृहे ॥
न कैश्चित् मन्यते लोके कोऽपि विप्रो युधिष्ठिर ।
गावो नष्टाश्च प्रासादा चक्रुर्निन्दां तथैव च ॥
शून्यानि गृहरूपाणि स्थानानि दक्षिणा क्वचित् ।
निरीक्ष्य सुखं विप्रश्चिन्तयामास चेतसा ॥
अथ शीला विवर्णा सा दुःखिता पतिदोषतः ।
निश्चयात् पुरे वन्द्या गुणागारसमन्विता ॥
अथ कौण्डिन्यविप्रस्य संजाता बुद्धिरुत्तमा
ममापि दुष्कृतं कर्म्म कृतं वा के विगर्हितं ॥
अनन्ताक्षेपदोषेण ममापि गतिरीदृशी ।
अनन्तं यत्र पश्यामि तत्र यास्यामि दुर्म्मतिः ॥
ततो जगाम कौण्डिन्यो वनं याम्रादिसङ्कुलं ।
अनन्तान्वेषणं कर्त्तुं यतो यत्र तदा हरेः ॥
विचरन् स वने मार्गे अरण्ये तु विलक्षिते ।
तत्राम्रवृक्षं तं दृष्ट्वा फलपुष्पसमन्वितं ॥
वर्जितं पक्षिसङ्घैश्च कीटैश्चैव विशेषतः ।
तमपृच्छत् त्वयानन्तः क्वचिद्दृष्टो महाद्रुम ॥
स चोवाच महाब्रह्मन् नानन्तं वेद्मि भो द्विज ।
ततो गच्छन् ददर्शाग्रे वनमध्ये सवत्सिकां ॥
वत्सनष्टे प्रधावन्ती न खादति न तिष्ठति ।
हे महाधेनुके ब्रूहि किमनन्तस्त्वयेक्षितः ॥
सा वत्सा चेदमाचाह नानन्तं वेद्मि हे द्विज ।
ततो गच्छन् ददर्शाग्रे वृषभेकं वने स्थितं ॥
तमपृच्छदयं विप्र अनन्तो वीक्षितस्त्वया ।
वृषभस्तमुवाचेदं निष्फलं न मया प्रति ॥
गच्छन्नथ गते तत्र के गतिर्वेद भूमिपे ।
ततो गच्छन् ददर्शाग्रे गर्दभं कुञ्जरं तथा ॥

ज्वालामालाप्रकरालं मरकर्ण्णकरर्द्धितं ।
स तं दृष्ट्वा द्विजोऽत्यर्थमनन्त इत्यभाद् विभु ।
अमुकमुकसीर मायन्तं वेत्ति मे द्विज ।
ततो मम सरभस्मे एवं पुरूचिरौसिदं ।
पश्चोत्तमस्य तत्कोर्भेर्भिरविमिषञ्ञोभित ।
गुभे कुसुमकारे वमचोत्सवञ्जोमितं ।
अमरैर्भ्रमणायेन संचारक्षरैर्युतं ।
तमपश्यत् द्विजोऽनन्तो नवतीत्वाय चक्रिता ।
तम्मादिश्यपृच्छत् न भाषीतो हरिं क्वचित् ।
विपपात ततो विप्रो धरायां स्मृत् भुवि ।
किं करोमि क्व गच्छामि क्व पश्यामि तं विभुं ।
तदा कृपाकुरुयो देवो देवभूमिना ।
वपुषयाकृयवान् विप्रविमवत्समात्रन् ।
वज्रायामकल्पेन योगाय मम विभ ।
उत्तिष्ठोत्तिष्ठ विप्रेन्द्र पुण्यं सखी भव ।
मयत्नं दर्शयिष्यामि यत्तं विष्णुं हरिं त्रिवं ।
गाढार्थं तं समारोप गाचानलकृता पुरीं ।
तां पुरीं दर्शयामास नरनाशन्दुचे द्विजा ।
स ता नरम कौण्डिन्य पुरीं शोभोत्पुचैर्भृतां ।
दिव्यनारीनरैर्युक्तां मणिरत्नविभूषितां ।
सुवर्णनिर्मितां चणीं शेषितां नभचारिणि ।
समायातान् स कौण्डिन्यो देवदिव्यमनुत्तमं ।
विन्ध्याय भवानं मनुष्यैः किरीटिनं ।
ब्रह्मरुद्रसमापमादिरैमंग्रकृष्णं ।
दक्षिणे विनतापुत्रं वामे कौस्तुभरत्नं ।
ततश्चात्तमायन्तं दिव्यदिव्यावैरितं ।
एवं कृत्वं भगवन्तं दृष्ट्वा भक्ता नृपति तदा ।
प्रणाम भूमौ शिरसा चानन्तस्य समीपतः ।

नमोऽस्त्वनन्ताय सहस्रमूर्त्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ।

ममापराध मया देव मस् सर्वं पापकर्मणा ।
तस्मात् क्षमस्व तत् नमस्त महत्तरम् ।
क्षम कार्त्तिकर्त्तिक्षमस्व कर्त्ति कृत्वा कृतार्थका ।
प्रजन्मो महपापैरपनयोऽनन्तसम्भवम् ।
क्षम मे त्रिदशाध्यक्षमितिहासबोधित भूधर ॥ ।
अनन्त उवाच ।
तुष्टोऽस्म भाक्षत्रैव भक्त्या तव द्विजसत्तम
वरं महाप्त विप्रेन्द्र तुष्टोऽस्मि अस्य विप्रकर्य ।
कौण्डिन्य उवाच ।
मानसिकनमोऽनेन मां कोर्षि प्रभात्वहं ।
तस्मां तस्मां दर्शनेन परितिर्वितस्तु मे ।
अविप्रमात्योमोत्वार्य ज्ञानया पुत्रशत्रं ।
नरकात् सन्तरी नाथ प्रयसादित् मुनः इवा ।
भवानसाम दरिद्र्यं वद मम वरद्यं ।
दारिद्र्याञ्च सर्वे विष्णोर्व नयाधव ॥ ।
कौण्डिन्य उवाच ।
दृष्टा मयोत्पवा तव यम नाथ विशिष्टा ।
किंचित् पृच्छामि देवेश तन्मे ब्रूहि जगत्पते ।
वरस्न यो दृश्यत् कोऽविमान् दृष्टादिभीदृषं ।
का सरा कुञ्जरा को वा को वा कर्दमोत्पत्तः ।

कथया क्षमस्वाय मयि दृष्टो मया विभो ।
श्रीभगवानुवाच ।
तस्यापहृतो वृक्षो हि विप्रो विप्राय मर्हिता
चन्द्रविद्यायां विद्याय विद्यां नमाय दत्तवान् ।
तेन कर्म्मविपाकेन स्थाणुत्वं प्राप्य तिष्ठति ।
तस्मात् वनसा वृक्षो बोधयन्तीहृता इयं ।
एवं पशुमिव मर्त्त्य वायु सूत्रं वाव मत ।
उपमत्तं समायात त्वत्प्रिचरति दिग्भरे ।
विप्राय महती दत्ता विष्णुवर्त्ता सरसमर्पिता ।
तैवर्ते गोत्रमायाथ दशमसे प्रजावति ।
धर्माधर्मौ विपापीतावस्यत् पुष्करिणीदृशं ।
गर्दभोऽकामकन्पता कुञ्जरो मदमर्द्दिता ।
प्राप्नोऽन्याजनन्तोऽहं वनसा दर्शितो मुने ।
स्वचे करिष्य तथो गच्छ विप्र निजाश्रमं ।
पुनः वर्षाजिते विप्र नरिष्यति न संशयः ।
तथा योगं च विदधाम् ध्रुवमासवति मयद् नर ।
इति दत्त्वा वरं तस्मै तत्रैवान्तरधीयत ।
कौण्डिन्योऽपि ययौ तथा चचरति ततश्चरम ।
अनन्तानं महापुण्यं कर्त्तनाय चतुर्दशे ।
श्रीभवा नव धर्म्मज्ञ तव सुता मनोरथान् ।
विष्णुलोकं समासाद्य एतान् दीव्यसा नव ।
अनन्तानन्तयेनेह समासेन पार्थिव ।
सर्व्वपापविनिर्म्मुक्ता याकल्प परमां गति ।
एवमेवं हि विष्णोर्वात् किन्नोऽनन्तव्रतमुत्तम ।
इह लोके महत्पुण्यं भुक्त्वा भोगान् मनोरथान् ।
विष्णुलोकमाप्नुवन्ति यावच्चन्द्रदिवाकरौ” ।
इति भविष्योत्तरे अनन्तव्रतं समाप्तं ।

अनन्तशीर्षा, स्त्री, (अनन्तानि बहूनि शीर्षाणि शिरांसि यस्याः सा ।) वासुकिपत्नी । इति शब्दमाला ।

अनन्ता स्त्री, (नास्ति अन्तो यस्याः सा ।) पार्व्वती । पृथिवी । अग्निशिखावृक्षः । श्यामालता । दूर्वा । शिवली । दुरालभा । हरीतकी । आमलकी । गुडूची । इति मेदिनी । भरणी । जेतदर्भा । पीतदूर्वा । अग्निमन्थवृक्षः । इति राजनिर्घण्टः । अनन्तमूलं । तत्पर्य्यायः । गोपवल्ली २ सारिवा ३ उत्पला ४ अमरवल्लिका ५ नागा ६ नागजिह्वा ७ । इति रत्नमाला । गोपी ८ श्यामा ९ शारिवा १० उत्पलशारिवा ११ । इत्यमरः । गोपादि चतुष्टयामनन्तायाः नागजिह्वायाः इति केचित् । गोपादिपर्य्यायाः श्यामलतायाः अनन्तोत्पलशारिवेति द्वयं अनन्तमूले इति केचित् । इति भरतीकायां भरतः । अस्या गुणाः । स्वादुत्वं । मधुरकारित्वं । रक्तपित्तनाशित्वं । शीतलत्वं । इति राजवल्लभः ।

अनन्तशक्तिक, त्रि, (नास्ति अन्ता शक्तिः यस्य समासान्तः कप् ।) अनन्तशक्तिकः । इत्यमरः ।
“अनन्तशक्तिको यो विश्वकर्त्ती सर्व्वतो
सर्व्वत्र सत्ता द्युत भिन्न तथापि मात्र भवेत्” ।
इत्यमरः ।

अनन्त्यज, पुं, (नास्ति अन्त्यात् प्रकाशात् जातः अनन्तो
निज्ञः तस्मात् जात इति अनन्त+जन्+ड ।)
कामदेवः । इत्यमरः ।

अनन्यवृत्ति, त्रि (न अन्या वृत्तिरस्य इति ।)
एकमात्रवृत्तिः । एकाग्रः । एकतानः १ एकाग्रः २
एकाग्रमनाः ३ एकचित्तः ४ एकायनः ५ एकायन
गतः ६ । इत्यमरः ।

अनपायी, [न्] त्रि (नास्ति अपायः विनाशोऽस्य
इति, न+अपाय+इनि ।) स्थिरः । अपाय
शून्यः । अनश्वरः । यथा,—
“अनपायिभिरस्माभिर्मुक्तास्य सखी मतो” ।
इति श्रीभागवतम् ।
(“अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी” ।
इति कुमारे ।)

अनभिज्ञ, त्रि (अभि जानाति इति अभिज्ञः,
अभि+ज्ञा+क, न अभिज्ञः इति नञ्समासः ।)
मूर्खः । अज्ञानी । बुद्धिहीनः । यथा,—
“विभ्रमं भूयसी परापरपरिज्ञानानभिज्ञो भवान्”
इति अमरशतकम् ।

अनभिध्यान, पुं, (न अभिध्यानं इति नञ्समासः ।)
अप्रीतिः । इति राजनिर्घण्टः । अनिच्छा । (त्रि
नास्ति अभिध्यानं यस्य इति समासे अभिध्यान
शून्यः ।)

अनम, पुं, (नमति प्रणमति इति नमः नम्+
पचाद्यच् न नमः अनम इति नञ्समासः ।)
ब्राह्मणः । इति त्रिकाण्डशेषः ।

अनभिव्यक्त त्रि (व्यक्त परिस्फुटं भवति इति,
वि+अञ्ज्+क्त, न व्यक्त इति अभिव्यक्त
मात्र, न अभिव्यक्त इति अनभिव्यक्त नञ्-
समासः ।) निःशब्दः । अस्पष्टः । इत्यमरटीकायां
रमानाथः ।

अनम्बर, पुं, ((नास्ति अम्बरं परिधेयं यस्य सः ।)
बौद्धविशेषः । इति त्रिकाण्डशेषोक्ते मो
नाग्नकः ।

अनय पुं (अयः शुभावहो विधिस्तद्भिन्नः नञ्
समासः ।) दैवं । अशुभं । व्यसनं । विपद् । इति
मेदिनी ।
(“अनयो महत्युत्थाने यश से विपुलं मतिः” ।
इति रामायणे ।)

अनर्घ्य, त्रि (नास्ति अर्घं प्रतिबन्धो यस्य नञ् ।)
निरर्घं । प्रतिबन्धरहितं । कलाकेशः । अपार्थः
उत्सुकवत्यं १ अङ्गात ७ निरर्थकं ८ निरर्थं ९ ।
इति हेमचन्द्रः ।
(“सका वर्त्तं तेन महान् अनर्घ्या
गुणप्रकुत्पुष्कलमूल्येव एका ।
इति रघुवंशे ।)

अनर्घ्य, क्ली, (नास्ति अर्घः यस्य सप् समासान्ता
का ।) निरर्थं । अर्थशून्यवाक्यं । अनर्थकं ।
अपार्थं २ । इत्यमरः । अपार्थं ३ । इति शब्दरत्ना ।

अनल पुं, (नास्ति अलं पर्य्याप्तिर्यस्य अनेकेऽपि
हविर्भिः सः, अथवा अलमधे पर्य्याप्ते नञ्समासः
वासुदेवे ।) अग्निः । वसुभेदः । इति मेदिनी ।
चित्रकः । रक्तचित्रकः । भल्लातकः । पित्तं । इति
राजनिर्घण्टः ।

अनलप्रभा स्त्री, (अनलस्य प्रभा इव प्रभा यस्याः

सा ।) ज्योतिष्मतीलता । इति राजनिर्घण्ट ॥

अनलप्रिया, स्त्री, (अनलस्य अग्नेः प्रिया षष्ठीतत् ।) अग्निभार्य्या । आग्नेयी । इति जटाधर ॥

अनलि, पु, (अनिति अन्+पचाद्यच् अन तन्मधुपानेन जीवनधारयिता अलि भ्रमरो यत्र स ।) वकवृक्ष । इति त्रिकाण्डशेष ॥

अनवधान, क्ली, (न अवधान मनोयोग नञ्समास ।) चित्तस्याविक्षेप । अमनोयोग । अप्रणिधान । इति हलायुध ॥ तद्विशिष्टे त्रि ॥

अनवधानता, स्त्री, (नास्ति अवधान मनोयोगो यस्य स, तस्य भाव तवस्तल् स्त्रियां टाप् ।) मनोयोगशून्यता । चित्तस्यानन्यविषयाभावत्व । कार्य्ये अनवहितत्व । तत्पर्य्याय । प्रमाद २ । इत्यमर ॥

"कर्त्तव्याकरण यत्र समर्थस्य क्वचिद्भवेत् ।
उच्यते वितथ तत्र प्रमादोऽनवधानता"॥
इति शब्दरत्नावली ॥

अनवर, त्रि, (न अवर, नञ्समास ।) अकनिष्ठ । अन्यून । श्रेष्ठ । प्रधान । यथा,—
"सोऽयमिन्द्रादनवरो वासुदेवाश्च भारत" ।
इति विराटपर्व्व ॥

अनवरत, क्ली, (अव+रम्+भावे क्त, नास्ति अवरत विरतिर्यत्र तत् ।) निरन्तर । तत्पर्य्याय । सतत २ अनारत ३ अश्रान्त ४ सन्तत ५ अविरत ६ अनिश ७ नित्य ८ अजस्र ९ प्रसक्त १० आसक्त ११ अनद्ध १२ । इति जटाधर ॥ तद्विशिष्टे वाच्यलिङ्ग । इत्यमरः ॥
("अनवरतधनुर्ज्यास्फालनक्रूरकर्म्मा" ।
इति शाकुन्तले ।)

अनवरार्द्ध्य, त्रि, (अवरमर्द्ध, कर्म्मधारय, तत्र भव, अवरार्द्ध+यत्, ततो नञ्समास ।) उत्तम । प्रधान । इत्यमर ॥

अनवलम्ब, त्रि, (नास्ति अवलम्ब आश्रयो यस्य स ।) अवलम्बनशून्य । निराश्रय । यथा,—
"न पर पथि पक्षपातिता-
नवलम्बे किमु मादृशेऽपि सा" ।
इति नैषध ॥

अनवसर, त्रि, (नास्ति अवसर अवकाशो यस्य स ।) निरवकाश । अवसराभावे पु । यथा,—
"अतर्क्यैश्वर्य्ये त्वय्यनवसरदु स्था हतधिय" ।
इति महिम्न स्तोत्र ॥

अनवस्कर, त्रि, (अव अधोवर्त्मना कीर्य्यते क्षिप्यते अव+कृ+अप्, "वर्चस्कोऽवस्कर इति मडागम" नास्ति अवस्करो मल यस्य तत् ।) निर्म्मल । शोधित । इत्यमर ॥

अनवस्था, स्त्री, (अव+स्था भावे अङ्, न अवस्था अवस्थान नञ्समास ।) तर्कविशेषः । तस्य लक्षण । अप्रामाणिकानन्तप्रवाहमूलकप्रसङ्गस्य । यथा,—
"घटत्व यदि यावद्घटहेतुवृत्ति स्यात् घटान्यवृत्ति स्यात्" । इति तार्किका ॥ उपपाद्योपपादकयोरविश्रान्ति । इति मीमांसका । दशाभाव । स्थित्यभाव ॥
("एवमप्यनवस्था स्याद् या मूलक्षतिकारिणी" ।
इति काव्यप्रकाशे ।)

अनवस्थान, पु, (न अवस्थानमवस्थितिर्यस्य स ।) वायु । इति राजनिर्घण्ट ॥ अवस्थितिशून्ये त्रि ॥ (चञ्चल । अव्यवस्थित ।)

अनवस्थिति, स्त्री, (न अवस्थिति अवस्थान नञ्समास ।) चापल्य । चाञ्चल्य । अस्थिरता । अधैर्य्य । इति हेमचन्द्र ॥

अनशनं, क्ली, (अश् भावे ल्युट्, न अशन भोजन, नञ्समास ।) भोजनाभाव । उपवास । इति हलायुध ॥ तद्वति त्रि ॥ (प्रायोपवेशन । "तदहमनशन कृत्वा प्रात प्राणानुत्सृजामि" । इति पञ्चतन्त्रे ।)

अनश्वर, त्रि, (नश्+कर्त्तरि वरच् न नश्वर, नञ्समास ।) सनातन । नित्य । ध्रुव । शाश्वत । इति हेमचन्द्र ॥
("मत्वा विश्वमनश्वर निविशते ससारकारागृहे" ।
इति वैराग्यशतके ।)

अनसूया, स्त्री, (असु कण्ड्वादित्वात् यक्+भावे अ, स्त्रियां टाप्, न असूया नञ्समास ।) असूयाभाव । तस्या लक्षण यथा वृहस्पति ।
"न गुणान् गुणिनो हन्ति स्तौति मन्दगुणानपि ।
नान्यदोषेषु रमते सानसूया प्रकीर्त्तिता" ॥
इत्येकादशीतत्त्व ॥ अत्रिमुनिपत्नी । इति गारुडे २९ अध्याय ॥ कर्दममुनिकन्या । इति श्रीभागवत ॥ असूयाशून्ये त्रि ॥

अनहवादी, [न्] त्रि, (अहमिति गर्व्व वदति य, अह+वद्+णिनि, उपपदसमास, ततो नञ्समास । अहमित्यव्यय ।) गर्व्वरहित ।
"मुक्तसङ्गोऽनहवादी धृत्युत्साहसमन्वित ।
सिद्ध्यसिद्ध्योर्निर्व्विकार कर्त्ता सात्त्विक उच्यते" ।
इति श्रीभगवद्गीता । अनहवादी गर्व्वरहित । इत्याह्निकतत्त्व ॥

अनहङ्कृति, स्त्री, (न अहङ्कृति अहङ्कारः नञ्समास ।) अहङ्काराभाव । तत्पर्य्याय । अशौच २ । इति त्रिकाण्डशेष ॥ (त्रि नास्ति अहङ्कृति यस्य इति समासे अहङ्कारशून्य ।)

अनक्ष, त्रि, अक्षिहीन । अन्ध । न विद्येते अक्षिणी यस्य इत्यर्थे ष प्रत्यय । अक्षभिन्न ॥

अनक्षरं, क्ली, (न सन्ति प्रशस्तानि अक्षराणि यत्र तत् ।) दुर्व्वचन । इति भरत ॥ अवचनार्हे । इति मधु ॥ गालिप्रभृति । गुणाक्षेपकदोषाविष्कारिवाक्य । इति केचित् ॥ तत्पर्य्याय । अवाच्य २ । इत्यमर ॥

अनक्षि, क्ली, (अप्रशस्तमक्षि नेत्र, नञ्समास ।) कुत्सितचक्षु । तत्पर्य्याय । असौम्याक्षि २ । इति हेमचन्द्र ॥

अनाकुलः, त्रि, (न आकुल नञ्समास ।) स्थिर । एकाग्र । अव्याकुल । अव्यग्र । इति जटाधर ।
("अनाकुलाऽविक्लवा च सुसम्भ्रान्ता च मे सति" ।
इति रामायणे ।)

अनाक्रान्ता, स्त्री, (कैरपि न आक्रान्ता आक्रमितुमयोग्या कण्टकव्याप्तत्वात्. नञ्समास ।) कण्टकारीवृक्ष । इति रत्नमाला ॥ अनाक्रमणविशिष्टे त्रि ॥

अनागत, त्रि, (आङ्+गम्+कर्त्तरि क्त, न आगत नञ्समास ।) भविष्यत् । इति राजनिर्घण्ट ॥ अनायात । अनुपस्थित । अज्ञात । यथा—
("तावद्भयस्य भेतव्य यावद्भयमनागत" ।
इति पञ्चतन्त्रे ।)
"अनागतादिलिङ्गेन न स्यादनुमितिस्तदा" ।
इति भाषापरिच्छेद ॥

अनागतार्त्तवा, स्त्री, (न आगतमप्राप्तमार्त्तव स्त्रीपुष्पविकाशन यस्या सा, स्त्रियां टाप् । ऋतु+अण् ।) अप्राप्तऋतुका । अरजस्का । तत्पर्य्याय । गौरी २ नग्निका ३ । इत्यमर ॥

अनाचार, पु, (न कुत्सित आचार नञ्समास । नञत्र अप्राशस्त्ये अभावार्थे तु आचाराभाव ।) कदाचार । अशुद्धाचार । श्रुतिस्मृतिविरुद्धकर्म्मकरण । यथा,—
"सर्व्वदेशेष्वनाचार पथि ताम्बूलचर्व्वण" ॥
इति स्मृतिः ॥ तद्विशिष्टे त्रि ॥

अनातप, पु, (आङ्+तप्+अच्, आतपस्य रौद्रस्याभाव नञ्समास ।) रौद्राभाव । छाया । इति राजनिर्घण्ट ॥ (त्रि छायाविशिष्टे ।
"खल्वाटो दिवसेश्वरस्य किरणै सन्तापिते मस्तके ।
वाञ्छन् देशमनातप विधिवशात् बिल्वस्य मूल गत" ॥ इति नीतिशतके ।)

अनातुर, त्रि, (न आतुर रोगी नञ्समास ।) अरोगी । यथा,—
"तेषामनातुरा पूर्व्व वातलाद्या सदातुरा" ।
इति चरक । ("भेजे धर्म्ममनातुर" । इति रघुवंशे ।)

अनाथ, त्रि, (नास्ति नाथ आश्रयो यस्य स ।) प्रभुहीन । नाथशून्य । यथा,—
"वना वना वनाथवत् सजीवना वनामवत्" ।
इति नलोदय ।
("नाथवन्तस्त्वया लोकास्त्वमनाथा विपद्यसे" ।
इति उत्तरचरिते ।)

अनादर, पु, (आ+दृ+भावे अप्, न आदरः नञ्समास ।) निरादर । तत्पर्य्याय । परिभव २ परिभावः ३ तिरस्क्रिया ४ रीढा ५ अवमानना ६ अवज्ञा ७ अवहेलन ८ असूक्षण ९ । इत्यमर ॥ असुक्षण १० असुर्क्षण ११ असूर्क्षण १२ । इति भरत ॥ ("गुणेषु रागो व्यसनेष्वनादर" । इति पञ्चतन्त्र ।)

अनादि, त्रि, (नास्ति आदि कारण यस्य स ।) आदिरहित । उत्पत्तिशून्य । स्वयम्भू । यथा,—
"अनादिरादिर्गोविन्द सर्व्वकारणकारण" ।
इति ब्रह्मसंहिता ॥

अनादृत, त्रि, (आ+दृ+कर्म्मणि क्त, न आदृत नञ्समास ।) निरादर । अवज्ञात । अवमानित । इति हेमचन्द्र ॥

("तस्य अनावृता धर्मेण यस्मिन्देशे धवः चावृता।
अनावृताम्तयत्नेन समाचरणावमवा स्थिताः"।
इति मनुः।)

अनामयं क्ली, (अमयम् अम्+कर्मणि घ, अर्थ रोगः अस्ति यस्मिन् रोगमयम् अमोति अम्+णिच्+अच् नास्ति आमयं यस्मिन्तत्।) आरोग्यं। रोगाभावः। इति शब्दरत्नावली। मध्यमार्थे पुं। इति शब्दकल्पतरुः। कुशलम्। निरामये त्रि।

अनामर्षं, क्ली, (आ+मृष्+भावे घञ्, आमर्षः यत्र नास्ति प्राचीनरूपेण आमर्ष+अण् च, आमर्षः यस्य नास्ति तत् वा।) रोगाभावः आरोग्यं। इत्यमरः।
("आमयं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्"।
इति मनुः।) स्वस्थचित्ते त्रि।

अनामा, [न्] पुं (नास्ति प्रशस्तिरस्मिन्येनयोगायन तथा अप्रयुक्तं नाम यस्य सः। अथवा अङ्गुष्ठा द्वितीयः प्रशस्तिरस्मिन्। इति पुराणे।) अनामिका। इति शब्दरत्नावली।

अनामिका स्त्री (नास्ति प्रशस्तिरस्मिन्येनयोगायनतया प्रशस्तं नाम यस्याः सा। शिवो वा यस्याः ताप्... कर्मे कप् टाप् च।) कनिष्ठामध्यमयोर्मध्याङ्गुली। इत्यमरः। ("कनिष्ठानामिकाभ्यां ... शस्तोऽमराणामुचितः"। इति रघुवंशे।)

अनायत्त, त्रि (आ+यत्+क्त न आयत्तः नञ्समासः।) अनधीनः। स्वाधीनः। यथा,—
"कलाकलमनायत्तं सुराणामवसीदिता।"
इति किरातटीका।

अनायास, पुं, (आ+यस+घञ् ततो नञ्समासः) अक्लेशः। तत्र पर्यायो यथा। हलायुधः।
"शरीरं पीड्यते येन सुशुभनापि कर्मणा।
अत्यन्तं तत्र कुर्वीत अनायासः स उच्यते।"
इत्युपात्तोत्तिस्थं। अक्लेशस्तितिका। प्रयासः।
यथा,—
"अनायासेन मरणं विना दैन्येन जीवनं।
अनायासकितमोऽभ्यन्तरस्य कर्णे भवेत्"।
इति भामिनिका।

अनायासकृतं त्रि (अनायासेन अक्लेशेन कृतं प्रतिपादकम्।) अनायासेन यत् क्रियते तत्। क्रिया करणेन कर्म। हस्तकृता। बालकेः। इत्यमरः।

अनारतं क्ली, (आ+रम्+क्त नञो नञ्समासः।) अनवरतं। सततं। नित्यं। इत्यमरः।
("अनारतं तेन पदेषु लम्भिता।
विभज्य सम्यग्विनियोगसत्क्रियाः"।
इति किरातार्जुनीये।)

अनारम्भ, पुं (आ+रभ्+भावे घञ् ततो नञ्समासः।) आरम्भाभावः। यथा —
"न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते"।
इति भगवद्गीता।

अनार्जवं क्ली (ऋजोर्भावः आर्जव+भावे अण ततो नञ्समासः।) रोगः। इति शब्दचन्द्रिका। कुटिलभावः।

अनार्य, त्रि (अ+ऋ+ण्यत् न आर्यः श्रेष्ठः नञ्समासः।) अश्रेष्ठः। यथा,—
"अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन"।
इति श्रीभगवद्गीता।

अनार्यकं, क्ली, (नास्ति आर्यो यत्र देशे तादृशार्यां स्वस्मिन्देशे भवं अनार्य+कन्।) अगुरुकाष्ठं। इति राजनिर्घण्टः।

अनार्यजं, क्ली (नास्ति आर्यो यत्र देशे तादृशार्या म्लेच्छदेशे जायते यत् अनार्य+जन्+ड उपपदसमासः।) अगुरु। इति हेमचन्द्रः।

अनार्यतिक्त, पुं (अनार्यम्लेच्छाणां तिक्तमिति प्राचयामधिकारे।) भूनिम्बः। इत्यमरः। चिरायता इति भाषा।

अनालोचित, त्रि (न आलोचितः सम्यक्तया यत् चारितः।) अविचारितः। अविमृश्यकारी। अविवेचितः। यथा,—
"किं करोमि मतिर्मा मे त्वनालोचिता हता"।
इति देवीमाहात्म्य।

अनाविल, त्रि (न आविलः नञ्समासः।) आविलताशून्यः। निर्मलः। इति धनञ्जयः। (स्वच्छ जलाशयः।)
("अवगाहितुमिच्छति वारि सुखं शीतलमनाविलम्"।
इति रामायणे।
"आपूर्यमाणमचलप्रतिष्ठमनाविलम्"।
इति मनुः।)

अनावृत, त्रि (आ+वृ+कर्मणि क्त न आवृतः नञ्समासः।) आवरणशून्यः। अनाच्छादितः। यथा। "अनावृतमवलोकितभुजं न तेऽ"। इति श्रीभागवते।

अनावृष्टि, स्त्री, (न आवृष्टिर्वर्षणं नञ्समासः।) ईतिविशेषः। वर्षाभावः। इति स्मृतिः। सुखा इति भाषा।
("अतिवृष्टिरनावृष्टिः शलभा मूषिकाः शुकाः।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः"।
इति कृषिसंग्रहः।)

अनाश्य, त्रि, (नाशयितुं शक्यः नश्+णिच् कर्मणि यत् ततो नञ्समासः।) नाशयितुमशक्यः। अनश्वरः। इति शब्दरत्नावली।

अनाथित त्रि (नास्ति नाथिता यस्य सः।) नाथिताशून्यः। असम्बन्धः। पित्रा च पित्रा च ... इति हेमचन्द्रः।

अनाहतं क्ली, (आ+हन्+क्त नास्ति आहतं क्षेतो यस्य तत्।) तन्त्रोक्तहृत्पद्मस्थद्वादशदलपद्मम्। तत्तु बन्धूकवर्णदलसमन्वितं ... इति तन्त्रम्।

अनाहतं त्रि (आ+हन्+कर्मणि क्त न आहतं नास्ति आहतं देहसम्बन्धो यस्य तत्।) नूतनवस्त्रं। धौतवस्त्रं। अपरिहितवस्त्रं। इत्यमरः। अतादितं। इत्यमरटीका। ... (अताडितं। अहतं। अन्योन्यसम्बन्धसंयोगवर्जितम्। अनाहतनादे ... तत्तु बन्धूकवर्णदलपद्मं सिद्धादिकानामपि यत्र ध्वनिः ... पद्मस्य मध्ये दशदलाम्बुजनिलयमति।
"शब्दब्रह्ममयः शब्दोऽनाहतो यत्र दृश्यते।
अनाहताख्यं तत्पद्मं मुनिभिः परिकीर्तितं"।

अनाहार, पुं, (आ+हृ+भावे घञ् ततो नञ्समासः।) भोजनाभावः। यथा —
"अनाहारादवशिष्टानां"... चरकः।

अनाहूत, त्रि (आ+ह्वे+कर्मणि क्त ततो नञ्समासः।) आह्वानशून्यः। अनिमन्त्रितः। यथा —
"अनाहूतोऽपि मध्यस्थबलेन भवता"।
इत्युद्धटः। अयाचितोऽपि यथा—
"अनाहूता अपि भविष्यन्ति सौहृदे"।
इति श्रीभागवत।

अनिगीर्ण, त्रि (नि+गॄ+क्त ततो नञ्समासः।) अग्रस्तः। यथा —
"निगदिताभिगीर्णप्रधानार्थमनिगीर्णमुक्तम्"।
इति साहित्यदर्पणे।

अनिच्छ, त्रि (इष्+भावे च भिदादित्वात् ... इच्छा विद्यते यस्य।) अनिच्छायुक्तः। अनाकाङ्क्षी। अस्पृहः। इच्छानास्ति इति ततो नञ्समासः।

अनित्य, त्रि (नि+त्यप् ततो नञ्समासः।) अस्थिरः। क्षणभङ्गुरः। अशाश्वतः। यथा —
"अनित्या पितरः सर्वे नित्यं प्रति ...
नीतो पिता वै ...।"
इति महाभारते शान्तिपर्वणि।

अनिन्दित, त्रि (निन्द्+कर्मणि क्त ततो नञ्समासः।) निन्दारहितः। प्रशंसितः। प्रशस्तः। उत्तमः इत्यर्थः। इति शिवादाशिका।
("अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा।
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्जयेत्"।
इति मनुः।)

अनियत, त्रि (न नियतः यतः नञ्समासः।) असंयतः। अनियमः। चपलः। यथा —
"का श्रद्धानिच्छया ... न तु मनसः।
इति श्रीदेवीमाहात्म्य।

अनिमिष, पुं, स्त्री (नास्ति निमिषः निमेषः यस्य सः।) देवता। मत्स्यः। इत्यमरः। (निमेषरहितः। विस्फारितः। सावधानः। यथा —
"पुरैव नापरे राजन्तो
... निमेषं निमिषन्ति भवि"
इति ... वचने।)

अनिमिषाचार्य पुं (अनिमिषाणां देवानां आचार्यः गुरुः बृहस्पतिः।) बृहस्पतिः। देवगुरुः। इति शब्दरत्नावली।

अनिमेष पुं, (नास्ति निमेषः चक्षुःस्पन्दनं यस्य सः।) देवता। मत्स्यः। इति हेमचन्द्रः।

अनियत त्रि (नि+यम्+क्त, न नियतः नञ्समासः।) अनियमः। अनिर्दिष्टः। यथा,—
"एकाकी नियते स्थित्वा कुर्वीत नियतः"।

ति साहित्यदर्पणः ॥ "रिष्ट त्रिविध मुनयो नियमनियत योगजस्य" । इति ज्योतिष ॥

…यम, पु, (न नियम, नञ्समास ।) नियमाव । अनिश्चय । अनिर्द्धार । यथा,—
'गुरवलघ मादाना ग्रेमेस्वनियमो मत "।
'ति छन्दोमञ्जरी ॥ तद्विशिष्टे त्रि ॥

…राकृत, त्रि, (निर्+आ+कृ कर्म्मणि क्त, ततो नञ्समास ।) अनिवारित । यथा,—
"अनिराकृततापसम्पद
फलहीना सुमनोभिरुज्झिता" ।
इति माघ ॥

…रुद्ध, स्त्री, (नि+रुध्+भावे क्त, नास्ति निरुद्ध यस्मात् तत् ।) सन्दान । पश्वादिबन्धनरज्जुः ।
'ति त्रिकाण्डशेषः ॥

…रुद्धः, पु, (न निरुध्यतेऽसौ नि+रुध्+कर्म्मणि क्त, ततो नञ्समास ।) कामदेवपुत्त्र । तत्पर्याय । उषापति २ ब्रह्मसू ३ विश्वकेतु ४ । इत्यमर ॥ स तु भगवतश्चतुर्थ्यूहान्तर्गतादिव्यूह । तस्मात् सृष्टिर्भवति यथा,—
"तमसो ब्रह्मसम्भूत तमोमूलामृतात्मक ।
तद्विश्वभावसङ्क्रान्त पौरुषी तनुमाश्रित ॥
सोऽनिरुद्ध इति प्रोक्तस्तत् प्रधान प्रचक्षते ।
तदव्यक्तमिति ज्ञेय त्रिगुण न्टपसत्तम ॥
विद्यासहायतान् देवो विश्वक्सेनो हरि प्रभु ।
अप्स्वेव शयनञ्चक्रे निद्रायोगमुपागत ॥
जगतश्चिन्तयन् सृष्टि महानात्मगुण स्मृत" ।
इति महाभारते मोक्षधर्म्म ॥

…निरुद्ध, त्रि, (नि+रुध्+कर्म्मणि क्त, ततो नञ्समास ।) रोधशून्य । अप्रतिबद्ध । चर । इति विश्वः ॥

…निरुद्धपथ, क्ली, (अनिरुद्धः प्रतिबन्धरहित पन्था यत्र स ।) आकाश । इति शब्दचन्द्रिका ॥ अरुद्धवर्त्म ॥

…निरुद्धभाविनी, स्त्री, (अनिरुद्धस्य कामपुत्त्रस्य भाविनी पत्नी, षष्ठीतत् ।) उषा । सा च कामपुत्त्रपत्नी । बाणराजकन्या । इति शब्दरत्नावली ॥

…निर्णय, पु, (निर्+नी+भावे अच्, ततो नञ्समास ।) अनिर्द्धार । अनिश्चय । निर्पूर्व्वकनीधातोर्णिजि नञ्समास ॥

अनिर्धारित त्रि, (निर्+धृ+णिच् कर्म्मणि क्त, ततो नञ्समास ।) अकृतनिर्धारण । अनिश्चित । यथा । "अनिर्धारितैकतानेकतविशेषस्य पूर्व्वरूपमात्रस्य व्यक्तस्य व्याधिलिङ्गत्व" । इति रोगपूर्व्वरूपलक्षणे रक्षित ॥

अनिर्म्मल, त्रि, (न निर्म्मल परिष्कृत नञ्समास ।) मलिन । आविल । अपरिष्कृत । निर्म्मलाभावे क्ली ॥

अनिर्म्माल्या, स्त्री, (निर्+मल्+ण्यत् स्त्रियां टाप्, ततो नञ्समास ।) स्पृक्कानामकौषधि । इति शब्दरत्नावली ॥

अनिर्व्वचनीय, त्रि, (निर्+वच्+कर्म्मणि अनीय, ततो नञ्समास ।) निर्व्वचनायोग्य । अनिर्व्वाच्य । वाक्यागम्य । यथा, "सदसद्भ्यामनिर्व्वचनीय त्रिगुणात्मकं भावरूप ज्ञानविरोधि यत्किञ्चिदिति वदन्ति" । इत्यज्ञानलक्षणे वेदान्तसार ॥

अनिर्व्वाह, पु, (निर्+वह्+भावे घञ्, ततो नञ्समास ।) निर्व्वाहाभाव । अनिष्पत्ति । असङ्गतिः । यथा । मुख्यार्थबाधे तद्योगे इति कारिकायां मुख्यार्थस्यान्वयबाधोऽपि तात्पर्यविषयस्यान्वयस्य मुख्यार्थतावच्छेदकरूपेणानिर्व्वाह एव । इति काव्यप्रकाशटीकायां महेश्वर ॥

अनिर्व्विण्ण, त्रि, (निर्+विद्+क्त, ततो नञ्समास ।) निर्व्वेदशून्य । बङ्गे निर्व्विण्णमानस इत्यत्र निर्व्विण्ण विरक्त इति देवीमाहात्म्यटीका तद्भिन्न अविरक्त विषयासक्त इति यावत् ॥ निर्व्विण्णोऽतिममत्वेन इत्यत्र निर्व्विण्णो दुःखितः इति देवीमाहात्म्यटीका तद्भिन्न अदुःखित ॥ बङ्गीयैस्तु अतिदुःखितः ॥

अनिर्वृति, स्त्री, (नि निर्वृति, स्वाच्छन्द्य, नञ्समास ।) निर्वृत्यभाव । दरिद्रता । यथा ।
"अनिर्वृतिनिशाचरी मम गृहान्तराल गता" ।
इत्युद्भट ॥

अनिल, पु, (अनिति जीवत्यनेन अन्+इलच् ।) वायुः । इत्यमर ॥ वसुविशेष । इति मेदिनी ॥ (शरीरस्थप्राणादिवायु । वातरोग । स्वातिनक्षत्र ।)

अनिलघ्नक, पुं, (अनिल वातरोग हन्ति इति, अनिल+हन्+टक्+स्वार्थे कन् ।) विभीतकवृक्ष । इति राजनिर्घण्ट ॥

अनिलसख, पुं, (अनिलस्य सखा इति राजाहःसखिभ्यष्टच् इति समासान्त टच् ।) अग्नि । इति हेमचन्द्र ॥

अनिलान्तक, पु, (अनिलस्य अन्तक ।) इङ्गुदीवृक्ष । इति राजनिर्घण्ट ॥,

अनिलामय, पु, (अनिल वात एव आमय रोग, रूपकसमास ।) वातरोग । इति राजनिर्घण्ट ॥

अनिर्लोचित, त्रि, (न निर्लोचित इति नञ्समास, निर्+लोचि+क्त ।) अनालोचित । अविवेचित । यथा,—
"अनिर्लोचितकार्य्यस्य वाग्जाल वाग्मिनो वृथा" ।
इति माघ ॥

अनिश, क्ली, (निशा रात्रि, उपचारात् व्यापाररहितत्वम्, नास्ति निशा यस्मिन् तत्, क्रियाविशेषणत्वे अस्य क्लीवत्व, द्रव्यविशेषणत्वे तु त्रिलिङ्गत्व ।) अनवरत । सतत । इत्यमर ॥ ('निजमैक्षि मन्दमनिश निश्वसे क्वशित शरीरमशरीरशरैः"। इति माघे ।)

अनिश्चित, त्रि, (निर्+चि+कर्म्मणि क्त, न निश्चित इति नञ्समासः ।) निश्चयरहित । अनिरूपित । अनिर्णीत । यथा, "कवय आत्मतत्त्वमरचित्ता कथमवययुरनिश्चितत्त्वा" । इति श्रीभागवत ॥

अनिष्ट, त्रि, (इष्+कर्म्मणि क्त, न इष्ट इति नञ्समास ।) अनभिलषित । अवाञ्छितः । यथा, "इष्टनाशादनिष्टाप्ते करुणाख्यो रसो भवेत्" । इति साहित्यदर्पण ॥

अनिष्टा, स्त्री, (इष्+क्त,+टाप्, नञ्समासः ।) नागबला । इति रत्ननिर्घण्ट ॥

अनिष्णात, त्रि, (नि+स्ना+कर्त्तरि क्त, न निष्णात इति नञ्समासः ।) अकुशल । अप्रवीण । अनभिज्ञ । अदक्ष । निपूर्व्वात् स्नाल शौचने इत्यस्मात् कर्त्तरि क्ते नञ्समास ॥

अनिष्पन्नः, त्रि, (पाणिनिमते तु नि+स्ना+कर्त्तरि क्त, निनदीभ्या स्नाते कौशले इति षत्व, ततो नञ्समास ।) निष्पत्तिरहित । असमाप्त । असम्पूर्ण । निर्पूर्व्वकपदधातो कर्म्मणि क्ते निष्पन्न पश्चान्नञ्समास ॥

अनिक्षु, पुं, (इक्षुसदृश नञ्समास, नञत्र सादृश्ये ।
"तत्सादृश्यमभावश्च तदन्यत्व तदल्पता ।
अप्राशस्त्य विरोधश्च नञर्था षट् प्रकीर्त्तिता" ॥
इति कारिकायां ।)
इक्षुविशेष । आनाखु । खाकडा इति ख्यात । तत्पर्याय । इक्षुतुल्या २ इक्षुवालिका ३ इक्षालिका ४ । इति रत्नमाला ॥

अनीक, पु, क्ली, (नास्ति नी स्वर्गप्रापको यस्मात्। कप्, अर्द्धर्चादित्वात् पुस्त्व क्लीवत्वञ्च ।) युद्ध, सैन्यं । इति मेदिनी ॥

अनीकस्थ, पु, (अनीके युद्धे तिष्ठति, अनीक+स्था+कर्त्तरि क, उपपदसमास ।) रणगत । संग्रामस्थ । हस्तिशिक्षाविचक्षण । राजरक्षक । चिह्न । वीरमर्द्दलक । इति मेदिनी ॥ जयढाक इति भाषा ।

अनीकिनी, स्त्री, (अनीको रणोऽस्ति प्रयोजनत्वेन अस्या इति, अनीक+इनि+स्त्रियाम् ।) सैन्यसंख्याविशेष । तद्यथा । ६५६१ अश्वाः । २१८७ हस्तिन । १०९३५ पदातय । २१८७ रथाः । समुदायेन सप्तत्यधिकाष्टशताधिकसहस्राधिकायुतद्वय । २१८७० अक्षौहिणीदशमांशेय । भरतमरभरतौ ॥

अनीचदर्शी, [न्] पु, (नीचात् नीचकार्य्यात् अन्यत्, नञ्समास, तदेव विद्यतेऽस्य अनीच+इन्, तादृशसत्कर्म्मशालिजनवत् पश्यति अनीची+दृश्+णिनि, उपपदसमास ।) बुद्धभेद । इति त्रिकाण्डशेष ॥

अनीति, स्त्री, (न नीति, नञ्समासः ।) दुर्नीति । अन्याय । अत्याचार । यथा —
"विघ्नो व्यतिपाताश्च ये चान्येऽनीतिसम्भवा" ।
इति वामनपुराण ॥

अनीश, पु, (नास्ति ईश नियन्ता यस्य स ।) विष्णु । इति तस्य सहस्रनाममध्ये पठित ॥ ईश्वरभिन्ने त्रि । यथा,—
"अनीशो वा कुर्य्याद्भुवनजनने क परिकर" ।
इति पुष्पदन्त ॥

अनु, व्य, उपसर्गविशेष । अस्यार्था । पश्चात् । सादृश्य । लक्षण । वीप्सा । इत्थम्भाव । भाग ।

चौकः। क्रमार्थः। आयामः। समीपं। परिपाटी। इति मेदिनी। पुनरर्थः। इति मुग्धबोधटीकायां दुर्गादासः।

अनुकः, त्रि (अनु कामयते अनु+कन्। वा) मुकः। कामी। इत्यमरः।

अनुकम्पा स्त्री (अनु+कम्प्+भावे अ, स्त्रियां टाप्।) दया। कृपा। इत्यमरः। ("भूतानुकम्पा तव चेदियं गौरेका भवेत् स्वस्तिमती त्वदन्ते"। इति रघुवंशे।)

अनुकम्प्यः त्रि (अनुकम्पामर्हतीति अनुकम्पा+यदार्थे यत्। अथवा अनु+कम्प् णिच्+कर्मणि यत्।) तपस्वी। वेगवान्। इति शब्दावली। दयायोग्यः। दयापात्रं।
"अनुकम्प्योऽनुकम्प्यश्च न माता न च मीयते"।
इति वाक्यप्रकाशः।
("पुरीमवस्कन्दविहारकामां दोर्भ्यां"।)
इति कुमारसम्भवे।)

अम्लूक, पुं, (अम्लु+स्वार्थे कन् पृषोदरादित्वात् ककारे दीर्घः इति प्रचामार। भारवैवरमता ममविवो सिमवपमारविमामम्ति इति हेतु नमवा अम्लुका इति ख्यात्।) अम्लू। इत्यमर टीकायां भरती। अमस्तु च वृक्षमे। इति शब्दरत्नावली। (शब्दचन्द्रिकायां तु अम्लूकादि

विघाते चुरादि सेट्।) दृक्क्षयो दृष्टिरहितीभाव। तेनाकर्म्मकोऽयं। सत्ताजीवनदर्पभीनिश्चयनक्रीडानिवासक्षयाध्यक्षध्यानगभोगतिस्थितिजरालज्जाप्रमादोदये। मोहे खोटनवेगयुद्धदहनख्यातिज्वरोन्मादके शुद्धिखेदपलायनभ्रमणाके शान्तौ श्रुतौ मज्जने॥ दृप्तौ जागरशोषवक्रगमनोत्साहे मृतौ सम्भ्रये स्नानौ मन्दगतौ च नृत्यपतने चेष्टाक्रुधौ रोदने। वृद्धौ हावक्षतौ च सिद्धिविरतौ हर्षोमवेगे बले कम्पोद्वेगनिमेषभङ्गयतनाद्ये धातवोऽकर्म्मकाः॥ दौर्बल्यादिषु चार्थेषु वर्त्तमानास्तु धातव। वाचका भावमात्रस्य यतस्तस्मादकर्म्मका॥ कौटिल्यादिषु चार्थेषु प्रोक्ता ये ते तु धातव। तद्भावेऽकर्म्मका स्युस्तद्वत्क्रत्या सकर्म्मका॥ इति। अन्धयति अन्धापयति वृद्ध। इति दुर्गादास॥

अन्ध, क्ली, (अन्ध+अच्।) अन्धकार।
("सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा"। इति उत्तरचरिते।) जल। इति मेदिनी।

अन्ध, त्रि, (अन्ध+अच्।) चक्षुर्द्वयहीनः। आन्धा आँधला इति हिन्दी भाषा। तत्पर्य्यायः। अदृक् २। इत्यमर। ("वृद्धोऽन्ध पतिरेष मञ्चकगत"। इति साहित्यदर्पणे।
"अन्धो मत्स्यानिवाश्नाति स नर कण्टकै सह।
यो भाषतेऽर्थवैकल्यमप्रत्यक्ष समाकुल"।
इति मनु।)

अन्ध, [स्] क्ली, (अन्ध+असुन्।) अन्न। इत्यमरः॥

अन्धक, पु, (अन्ध+ण्वुल्।) देशभेद। इति शब्दरत्नावली॥ नृपभेदः।
("सुदंष्ट्र च सुचारु च कृष्णमित्यन्धकास्त्रय"। इति हरिवंशे।) असुरभेद। इति महाभारत॥
("स व्रजत्यन्धवद्यस्मादनन्धोऽपि हि भारत।
तमन्धकोऽय नाम्नेति प्रोचुस्तत्र निवासिनः"।
इति हरिवंशे।) मुनिविशेष। इति याज्ञवल्क्य॥ (दृष्टिहीन। चक्षुर्द्वयहीन।
"अन्धक कुब्जकश्चैव राजकन्या च त्रिस्तनी।
त्रयोऽप्यन्यायत सिद्धाः सम्मुखे कर्म्मणि स्थिते"॥
इति पञ्चतन्त्रे।)

अन्धकरिपुः, पु, (अन्धकस्य असुरस्य रिपुः नाशकतया शत्रु, षष्ठीतत्पुरुष।) शिवः। इत्यमरः॥ श्लेषकाव्यादौ अन्धकारनाशकत्वात् सूर्य्याग्नि चन्द्रेषु च वर्त्तते॥

अन्धकार, पुं, क्ली, (अन्धमन्धकवत् करोति, अन्ध+कृ+अण्।) तेज सामान्याभाव। आँधार इति भाषा। तत्पर्य्यायः। ध्वान्त २ तमिस्र ३ तिमिर ४ तम ५। इत्यमरः॥ ("अथान्धकार गिरिगह्वराणां"। इति रघुवंशे।) भूच्छाय ६। इति राजनिर्घण्ट॥ महान्धकारे अन्धतमस। ७ सर्व्वव्यापकान्धकारे सन्तमस। ८ अल्पान्धकारे अवतमस ९। इत्यमर॥ अस्य गुणा। भयदृष्टितेजोऽवरोधकारित्व। तिक्तत्व। सर्व्वाधिकारत्वञ्च। इति राजवल्लभ॥

अन्धकासुहृद, पुं, (अन्धकस्य असुरस्य असुहृत्, नाशकतया शत्रु, षष्ठीतत्पुरुष।) शिव। इति हेमचन्द्र॥

अन्धकूप, पुं, (अन्धमन्धकार करोति, अन्ध+करोत्यर्थे णिच्+पचाद्यच्, तादृश कूप।) सान्धकारकूप। इति त्रिकाण्डशेष॥ आँधुया पात्कुया इति भाषा।
("मज्जत्यात्मा भक्तिहीनो महामोहमये भवे।
अन्धकूपे निरालम्बश्छिन्नरज्जुर्यथा घट"॥
इति सद्भावे।)

अन्धतमस, क्ली, (अन्धयति, अन्ध+अच्, अन्ध तम कर्म्मधारयः, समासान्त अच्।) निविडान्धकार। इत्यमर॥
("प्रध्वसितान्धतमसस्तत्रोदाहरण रवि"।
इति शिशुपालवधे।)

अन्धतामस, क्ली, (तम एव तामस प्रज्ञादित्वात् स्वार्थे अण्।) निविडान्धकार। महान्धकार। इत्यमरटीकायां स्वामी॥

अन्धतामिस्र, क्ली, (तमिस्रैव तामिस्र, स्वार्थे अण्, अन्ध निविड तामिस्र कर्म्मधारय।) निविडान्धकारमयनरकविशेष। पञ्चप्रकाराज्ञानान्तर्गताज्ञानविशेष। देहनाशे अहमेव मृतोऽस्मीति बुद्धि। इति भारतभागवते,—
("एकविंशतिविधनरकान्तर्गतद्वितीयनरकविशेषः" स च निविडान्धकारमय। "तस्या धर्म्मपत्नीमन्धतामिस्रमभ्यध्यायत्"। इति महावीरचरिते।)

अन्धमूषिका, स्त्री, (अन्ध दृष्टिविघाते, अन्ध+भावे घञ्, अन्ध दृष्टिविघात मुष्णाति तत्सेवनेन नाशयति, मुष्+ण्वुल् पृषोदरादित्वात् दीर्घ स्त्रियां टाप्।) देवताडवृक्ष। इति शब्दचन्द्रिका॥

अन्धाहि, पु, स्त्री, (अन्ध अहि सर्पइव।) मत्स्यभेदः। इति त्रिकाण्डशेष॥ कुँचिया इति ख्यात।

अन्धिका, स्त्री, (अन्ध+ण्वुल् स्त्रियां टाप्।) द्यूतविशेष। रात्रि। इति मेदिनी॥ सर्षपी। इति हेमचन्द्र॥ स्त्रीविशेष। चक्षूरोगविशेष। इति शब्दरत्नावली॥

अन्धु, पुं, (अन्ध+उण्।) कूप। इत्यमरः॥

अन्धुल, पु, (अन्ध+उलच्।) शिरीषवृक्षः इति शब्दचन्द्रिका॥

अन्ध्र, पु, (अन्धयति गीतेन मृगान् अन्धवत् करोति, अन्ध+कर्त्तरि रः।) व्याध। मृगयाजीवी। इति कश्चित् सग्रहकार। (वैदेहिकात् कारावरस्त्रियां जातो जातिविशेष, स तु सतत ग्रामवहिर्वासी मृगयाजीवी च।
"कारावरनिषादात् तु चर्म्मकारः प्रसूयते।
वैदेहिकादन्ध्रमेदौ वहिर्ग्रामप्रतिश्रयौ"॥
इति मनु।)

अन्न, क्ली, (अद्+कर्म्मणि क्त।) स्विन्नतण्डुल। यथा,—
"शस्य क्षेत्रगत प्राहुः सतुष धान्यमुच्यते।
आम वितुषमित्युक्त स्विन्नमन्नमुदाहृत"॥
इति श्राद्धतत्त्वधृतवशिष्ठवचन॥ तत्पर्य्याय। भक्त २ अन्ध ३ भिस्सा ४ ओदन ५ दीदिवि ६। इत्यमर॥ भिस्सा ७। इति तट्टीका॥ कूर ८। इति राजनिर्घण्ट॥ अट्ट ९ कशिपु १० जीवातु ११। इति जटाधरः॥ कूर १२ आपूपिक १३ जीवन्तिः १४ प्रसादन १५। इति शब्दरत्नावली॥ * ॥ अस्य गुणा। बुद्धिशुक्रप्रीतिपुष्टिधात्विन्द्रियबलकारित्व। गुरुत्वं। क्षुधाक्षयरोगश्रमकार्श्यनाशित्वञ्च॥ * ॥ नवान्नगुणा। श्लेष्मकारित्व। स्वादुत्व। सुस्निग्धत्व। हृद्यत्व। गुरुत्वञ्च॥ * ॥ पुराणान्नगुणा। विरसत्वं। रूक्षत्वं। पथ्यत्वं। अग्निकारित्वञ्च॥ * ॥ उष्णान्नगुणा। प्रशमनीयत्व। हृद्यत्व। अग्निकारित्वं। वायुश्लेष्मनाशित्व। रक्तपित्तप्रकोपकारित्वञ्च॥ * ॥ अत्युष्णान्नगुण। बलनाशित्व॥ * ॥ शीतशुष्कान्नयोर्गुण। दुर्ज्जरत्व॥ * ॥ अतिक्लिन्नान्नगुणाः। ग्लानिकारित्व॥ * ॥ तण्डुलान्वितान्नगुण। दुर्जरत्वं॥ * ॥ जलधौतसद्योऽन्नगुणाः। शीघ्रपाकित्व। हिमत्व। लघुत्वञ्च॥ * ॥ रात्रिस्थितजलयुक्तान्नगुणौ। त्रिदोषकोपकारित्व। रूक्षत्वञ्च॥ * ॥ भृष्टतण्डुलान्नगुणौ। लघुत्व। अग्निप्रदीपनत्वञ्च। इति राजवल्लभ॥ * ॥ धान्य। इति राजनिर्घण्ट॥ विष्णु। इति तस्य सहस्रनाममध्ये पठित॥ अदनीयद्रव्यमात्र॥ अन्नसाधन यथा,—
"सुधौतास्तण्डुलान् स्फीतास्तोये पञ्चगुणे पचेत्।
तद्भक्त प्रहत चोष्ण विशद गुणवन्मत"॥
तद्गुणाः।
"भक्त वह्निकर पथ्य तर्पण रोचन लघु।
अधौतमसुत शीत गुर्व्वरुच्य कफप्रद"॥
इति भावप्रकाश॥ * ॥ तद्दानफल यथा,—
"वारिदस्तृप्तिमायाति सुखमक्षय्यमन्नद"॥
अन्नस्य प्रजापतिर्द्देवता। अक्षयसुखप्राप्तिः फलं। प्रतिग्रहे सुष्टियहृयं। इति शुद्धितत्त्व॥ अपि च,
"ब्रह्महत्याकृत पाप अन्नदानात् प्रणश्यति।
अन्नद पापकर्म्मापि पूत स्वर्गे महीयते"॥
इति प्रायश्चित्ततत्त्व॥ * ॥ अथ प्रजापतिदैवतान्नदानावर्त्तः। तत्र अन्नदानस्तुतिः। ब्रह्मपुराणे।
"अन्ने प्रतिष्ठिता लोका अन्नमाश्चक्षय पर।
तस्मादन्न प्रशसन्ति सदैव पितृमानवा॥
अन्नस्य हि प्रदानेन नरो याति परा गति।
सर्व्वकामसमायुक्तः प्रेत्य चेहाधिक शुभ"॥
तथा,—
"अन्नमूर्ज्जस्कर लोके दत्त्वोर्ज्जस्वी भवेन्नरः।
सतां पन्थानमाश्रित्य सर्व्वपापै प्रमुच्यते"॥
महाभारते।
"अन्नद पशुमान् पुत्री धनवान् भोगवानपि।
प्राणवांश्चापि भवति रूपवांश्च तथा नृप"॥
तथा,—
"अन्नदस्य मनुष्यस्य बलमोजो यशांसि च।
कीर्त्तिश्च वर्द्धते शश्वत्त्रिषु लोकेषु पाण्डव"॥
आग्नेयपुराणे। अन्नस्तुत्यनन्तर।
"तस्मादन्न सदा देहि श्रद्धया नृपसत्तम।

अन्नदानादिदं दानं नाधिकं प्रवदन्ति" ।
तथा —
"अन्नदानात् परं दानं न भूतं न भविष्यति ।
इत्थं सर्वकामाप्नुयं सर्वार्थसिद्धिदर्शनं ।
धर्मसारज्ञ दानेन सदसीति विनिश्चय ।
महादानमविमानैः देवितामयतोऽस्ति ।
अन्नदोऽक्षयलोकेषु विमानानि सुराचते ।
सम्भोगमतः देवा विनयनमायान्ति ।
सुरसन्नमा विमानस्थितिष्वपि चायता ।
इत्थमन्नदानेन शीघ्रमायान्ति ते नराः" ।
पद्मपुराणे ।
"अन्नस्वदा मासी पश्चिमी धर्मकामदा ।
विविधा येन वा दत्ता सोऽपि ददाति धर्मदा ।
सुभिक्षे वा मनश्चैव सर्वे मङ्गलमन्विता ।
मासको मसने च वै मासका च सोऽयं ।
मानदानमथोवाच माया सीतेश्वकामया ।
लोकोको मन्नोचच धर्मे मत्तो प्रतिष्ठिता ।
एतत् समानमतुल्य दानमेव महाभयं ।
अन्नदानस्य वैशाखे वर्षा पार्वतीस्ति लोकश्री" ।
विष्णुधर्मोत्तरे ।
"मासको मनते प्राणान् विदाम् विना सुवर्णपुरा ।
अन्नमदक्ष मामता महता परिकीर्तितां" ।
अन्नदानमहिमा । यथा ।
"आरोग्य च मामा च परमसुखरोपते ।
तत् प्रीतयति धानादि माखर्व मानवर्जितं ।
दुर्लभस्य पुरा दाता पुरा लोका च दुर्लभा ।
पुरा दाता च लोका च धायनो धर्मगामिनी ।
योऽत्र यज्ञस्य पुष्टे यथार्हं मानमन्यते ।
यथार्हं प्रीतिवो दद्यात् सम्यक्समुपतिष्ठते ।
प्रीतितोऽन्न यो दद्यात् मनोविषयोऽपि पूज्य वा
प्रीतितोऽप्यतथापि सन्निधा धर्ममन्यते ।
यो दद्यादविशेषाद्यं मन्नस्य नाभिमन्यते ।
सात्त्वी मत्ये मतो यस्य प्रदत्त सर्वं" ।
अन्नदानविधिवर्णविशेषमाहात्म्या ।
कूर्मपुराणे ।
"अन्नस्य दानपात्रेण सर्वं नाप्नोति मानवः ।
धर्मदेशाय दानं च मानमोति परा गतिं" ।
अन्नदानेन महादानेन सर्वं नाप्नोति ।
इति अन्नदानमहादानस्य फलं सर्वं मासं
सर्वदानेन नाप्नोति यत् । अन्नदानमहादाने
फलि तस्य फलमसिष्यते ।

अथ अन्नदानफलं नन्दिपुराणे ।
"अन्नादनानि भवन्ति देवा दयापरायणा ।
न तस्य दानादिविषयिका सर्वं सर्वदिक्षा ।
तथा,—
"अपि सर्वसत्त्वानां सुखं प्राप्नोतीति ।
दत्त्वा सोऽन्नमाप्नोति धर्मार्थं समाधानं ।
सात्त्विकोऽपि विद्वान् इत्यस्मिन् मत्स्यनः ।
देवाश्च तथा सर्वे भासमानाश्च ।
सात्त्विकान् नरो दत्त्वा कल्पमानं शतं ।
स्वर्गे वसेत् कल्पान् तत्र भोगैश्चापि ।
तत्र प्राप्य सर्वं स्वर्गादिकम् परिकीर्तितं ।

स्वर्गेषु वसेत्तत्र मोदं दिव्य सम्मोदितं ।
सर्वं दिव्य सहस्राणि वर्षाणि देववत्सवा ।
सर्व सम्पूर्ण मोदं धर्मनारायणमिति" ।
धर्मनारायणमिति इति सम्बोधनं । अन्न अन्न
माना पावित्रमात्रेभ्यो मर्त्येलोकपूर्वेभ्यपान्न
परस्मात् अन्नस्य सर्वेषामपि सर्वं दद्यात् ।
तद्यथा । ✤ नन्दिपुराणोक्तपावित्रमात्रदान
फलमिदमाप्नोऽयं प्रातिभ्योऽन्नं दत्ते । तदपि
सर्वाभ्यः पावित्रमात्रेभ्यः सर्वेभ्यः अन्नस्य वा
महादानं दत्ता परिमितमस देयं । तदन्न
धार्मिकान् यथाप्रकृतिविधिवत् नृभिः अन्नस्य
आत्मार्थमाविनी महादानं ददाति । * ।
वायुपुराणे ।
"विप्रमन्नसम्भिर्दं दद्यात्तु सुरभिये ।
सम्पूर्णं सदा विप्रं सर्वं सत्त्वस्य सम्मता" ।
विप्रमतिविधायकमात्रेण । अधिकमनुसरणं ।
महाभारते ।
"सर्वधान्येभ्योऽन्नदानं विमानं दत्त्वा सर्वं ।
अन्नदो लभते नित्यं सर्वलोकीयमेव च ।
अन्नदानात् परं दानं न भूतं न भविष्यति ।
अन्नमुष्णादि मानवे प्रीयन्ति च च सम्यक् ।
प्रीतदानात् परं दानं न विद्यतेऽपि विद्यते ।
अन्नात्मीयति देवोऽयं देवोत्तमेव तत्त्वतः" ।
सत्त्वविशेषोऽन्नं पूर्ववत् तस्य दद्यात् ।
✤ वायुपुराणोक्तअन्नदानफलमिदमाप्नोऽयं सुर
विशेषा सम्पूर्णं विप्रमन्नं दत्ते । सर्वं तस्य
सुसमितसन्निभ देयो यथोक्तमन्नं दद्यात् । ।
महाभारते ।
"आत्मानं ब्राह्मणानां वा समस्ति धर्मिणे ।
सर्वधर्मं महत् स्थान न गच्छति यदीप्सितं" ।
आत्मानं ब्राह्मणानां पूर्ववत् अन्नस्य दद्यात् ।
✤ तत्रभारतप्रमाणिकामोऽयं आत्मानं ब्राह्मणं
यावन्तं दत्ते । इति अन्नस्य सर्वादीन् आत्म
सुविदमनुमानार्थं सर्वे दद्यात् । । यथा,—
"अन्नो ददाति सर्वार्थं सर्वेषामसमा नरः ।
न च दुर्लभमाप्नोति देवमाय परात्परः" ।
अपि दत्तमन्ने अन्नदानमर्जितं सर्वेषामन्नेभ्योऽन्नं
पूर्ववत् अन्नस्य दद्यात् । ✤ महाभारतोक्त
द्रोपवादनफलप्राप्तिकामोऽयं अन्नोऽन्नं दत्ते ।
तत्र सर्वादि अधिकपदादि अन्नो ब्राह्मणादि
भोऽन्नं दद्यात् । । यथा,—
'यो दद्यात् परिविधिमन्नमपि सर्वेषु ।
आत्मानप्रत्युत्पत्य तस्य इत्यवनं भवत्" ।
अधरिदिक्षमनुसरणं । यथोक्तपात्रेऽन्नं पूर्व
वत् अन्नस्येत् । ✤ महापुण्यफलप्राप्तिकामोऽयं
आत्मानामनाय अपूर्वपूर्णापात्रं दत्ते । इति
अन्नस्य सर्वोत्तममध्यमभिन्न यथोक्तमन्नं सर्वे
दद्यात् । अन्नाभावे अन्ने इति प्रकारान्तरात्
यदि अन्नदो भविता सर्वेऽपि पुत्रो दत्ता अन्न-
मन्ने पात्रं दद्यात् । । विष्णुधर्मोत्तरे ।
"सर्वार्थं मानवो दत्त्वा सर्वाण्यपि सर्वदिष्टं ।
सर्वार्थं समवाप्नोति सर्वलोकेषु गच्छति" ।

अन्नं संयुक्तं । अन्नदानमर्था पूर्ववत् अन्नस्य सर
विभ्यो दद्यात् । विष्णुधर्मोत्तरोक्तसर्वकामावाप्ति-
लोकप्राप्तिफलप्राप्तिकामोऽयं यथाशक्ति
ब्राह्मणेभ्यो सर्वमन्नं दत्ते । इति अन्नस्य
ब्राह्मणेभ्योऽनुसरणाय देयो यथाशक्ति यथार्हं
दद्यात् । । भविष्यपुराणे ।
"अन्नमतिदेयम् अन्नाय च गच्छति ।
विमानैर्बाह्यकोटीनां सर्वदैव महीयते" ।
अन्नमतिदेयं अन्नदानमनुबन्धोऽन्नतः । यथा-
शक्त्या अन्नदानं मनुष्येभ्यो विप्रेभ्यो पूर्ववत्
अन्नस्य दद्यात् । ✤ विष्णुधर्मोत्तरोक्तसर्व
परिपोषणफलप्राप्तिकामोऽयं यथाशक्ति अन्नदान
मनुष्येभ्यो ब्राह्मणादिभ्योऽन्नं दत्ते । इति
अन्नस्य यथाशक्ति ब्राह्मणेभ्यः पात्रं मनुष्यान्
भोजयेत् । देवल ।
"अन्नादि यावत् सर्वं यो दद्यात्तद्धीप्सितं ।
सात्त्विकानां विधिनैव च विप्रेभ्यामथाप्नुयात्" ।
विधिनैव दानविधानात् ब्राह्मणेभ्योऽपि यथैव
अन्नमेव । तत्र सामान्येनाद्दत्तमिदं । ईप्सित
मिश्रितं सुवर्ण यथासमभिमतमनुसरणात्
विप्रः पूर्ववत् अन्नस्य दद्यात् । ✤ नारदपुराण-
नामतर्पणेन सामीप्यमन्नदानमोऽयं यथाशक्ति
ईप्सितमन्नं दत्ते । तत्र प्रभृति यथाशक्तिपुर
स्थितेभ्य ईप्सितमन्नं दद्यात् । इत्यादि महाभारते
अन्नदानमाहात्म्ये आहारमालायाम् ।

अन्नः, पुं, (अधिकरणे अन्+नन् अनने इति
अद्+क्त वा ।) सूर्यः । इति सिद्धान्तकौ-
मुदी ।

अन्नं, त्रि (अधिकरणे अन्+नक् ।) भुक्तं ।
भक्षितं । इति मेदिनी ।

अन्नकोष्ठकः, पुं, (कोष्ठति कोष्ठ+अच् अन्नस्य
तत्पूरणे कोष्ठकः धान्यागारं ।) तत्पूर्णादि
धान्यागारं । इति हेमचन्द्रः ।कोठा धान
इत्यादि भाषा ।

अन्नगन्धिः, पुं (अन्नस्येव अन्नस्यास्य गन्धोऽस्य
वा । अन्नगन्धाय इति शार्ङ्गधरोक्त इत्
समासान्तः ।) अतिसाररोगः । इति त्रिकाण्ड-
शेषः ।

अन्नपूर्णा स्त्री, (अन्नैः पूर्णा यया सा तन्त्रसारा-
दिकम् अधिष्ठात्री ।) भगवत्याः देवीविशेषः ।
तन्त्रसारे यथा,—
'मातः शङ्करवल्लभे भगवति परिदेहि भिक्षां ।
अन्नपूर्णे सदा पूर्णे शङ्करप्राणवल्लभे" ।
काश्यां च ।
"स्वर्णाख्या भवेद् देवी भवेत् काशीश्वरी ।
अन्नपूर्णा च भवेत् विश्वपालिनी ।
मायाख्या च भवेत् देवी भवेत् सा मोहिनी ।
भीमाख्या देवी भवेत् सर्वविनाशिनी ।
कामाख्या भवेद् विद्या कामीश्वरप्रदायिनी ।
कामाख्या च भवेद् विद्या धर्मकामप्रदायिनी ।
तारकाख्यिका विद्या मोक्षमोक्षप्रदायिनी ।
माया भीमाख्योमाख्या भवेत् विश्वपालिनी ।

श्रीमाया युग्मबीजाद्या सर्व्वसम्पत्तिपूरणी” ॥ * ॥ एषां पूजा प्रातःकृत्यादिपीठन्यासान्तं विधाय हृत्पद्मस्य केशरेषु मध्ये च भुवनेश्वरीपीठमन्त्रान्त पीठशक्तीन्र्यस्य ऋष्यादिन्यासं कुर्य्यात्। यथा शिरसि ब्रह्मणे ऋषये नमः । मुखे पङ्क्तिश्छन्दसे नमः । हृदि अन्नपूर्णायै देवतायै नमः । तन्त्रैव ।
“एतेषां मन्त्रराशीनां ऋषिर्ब्रह्मा उदाहृतः ।
पङ्क्तिः छन्दः समाख्यातं देवता चान्नपूर्णिका” ॥
ततः कराङ्गन्यासौ । क्रीँ अङ्गुष्ठाभ्यां नमः । क्रीँ हृदयाय नमः । इत्यादि सर्व्वत्र मायाबीजेन कुर्य्यात् । तथा च निबन्धे ।
अङ्गानि मायया कुर्य्यात् ततो देवीं विचिन्तयेत्।
कल्पे च ।
“यद्बीजाद्या भवेद्विद्या तद्बीजेनाङ्गकल्पना” ॥ * ॥
ततो ध्यानं ।
“रक्तां विचित्रवसनां नवचन्द्रचूडा-
मन्नप्रदाननिरतां स्तनभारनम्राम् ।
नृत्यन्तमिन्दुसकलाभरणं विलोक्य
हृष्टां भजे भगवतीं भवदुःखहर्त्रीम्” ॥
एवं ध्यात्वा मानसैः सम्पूज्य शङ्खस्थापनं कुर्य्यात् । तत सामान्योक्तपीठपूजां विधाय भुवनेश्वरीमन्त्रोक्तजयादिपीठमन्त्रान्तां पीठपूजां विधाय पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत । यथा केशरेष्वग्निकोणे क्रीँ हृदयाय नमः । नैर्ऋते क्रीँ शिरसे स्वाहा । वायव्ये क्रीँ शिखायै वषट् । ऐशान्यां क्रीँ कवचाय हुँ । मध्ये नेत्रत्रयाय वौषट् । चतुर्दिक्षु क्रीँ अस्त्राय फट् । अष्टदलेषु पूर्व्वादिषु ब्राह्म्यै माहेश्वर्य्यै कौमार्य्यै वैष्णव्यै वाराह्यै इन्द्राण्यै चामुण्डायै महालक्ष्म्यै प्रणवादिनमोऽन्तेन पूजयेत् । तन्त्रैव ।
“दलेषु पूजयेदेता ब्राह्म्याद्याः क्रमशः सुधीः” ।
भूतस्य प्रणवश्चतुर्द्दशस्वरो विन्दुयुक्तः ॥ कालिकापुराणे मन्त्रस्य सेतुकरणे उक्तत्वात् । तत इन्द्रादीन् वज्रादींश्च पूजयित्वा धूपादि विसर्ज्जनान्तं कर्म्म समापयेत् ॥ * ॥ अस्य पुरश्चरणजपः षोड़शसहस्रसंख्यः । तथा च ।
“यथाविधि जपेन्मन्त्रं वसुयुग्मसहस्रकम् ।
आज्येनान्नेन जुहुयात्तद्दशांशमनन्तरम्” ॥
अथ मन्त्रः प्रणवादिरष्टादशाक्षरः । मायादिः श्रीबीजादिश्च । तथा मायां विना प्रणवादिः कामादिः श्रीबीजादिः वाग्भवादिश्च सप्तदशाक्षरः । कवचे तथा प्रतिपादनात् । विशेषस्तु यद्यद्बीजादिको मन्त्रस्तेनैवाङ्गप्रकल्पना ॥ * ॥

अथान्नपूर्णास्तोत्रं ।

“नमः कल्याणदे देवि नमः शङ्करवल्लभे ।
नमो भक्तिप्रिये देवि अन्नपूर्णे नमोऽस्तु ते ॥
नमो मायागृहीताङ्गि नमः शङ्करवल्लभे ।
माहेश्वरि नमस्तुभ्यमन्नपूर्णे नमोऽस्तु ते ॥
महामाये शिवधर्म्मपत्नीरूपे हरप्रिये ।
वाञ्छादात्रि सुरेशानि अन्नपूर्णे नमोऽस्तु ते ॥
उद्यद्भानुसहस्राभे नयनत्रयभूषिते ।
चन्द्रचूडे महादेवि अन्नपूर्णे नमोऽस्तु ते ॥
विचित्रवसने देवि अन्नदानरतेऽनघे ।
शिवनृत्यकृतामोदे अन्नपूर्णे नमोऽस्तु ते ॥
साधकाभीष्टदे देवि भवदुःखविनाशिनि ।
कुचभारनते देवि अन्नपूर्णे नमोऽस्तु ते ॥
षट्कोणपद्ममध्यस्थे षड़ङ्गयुवतीमये ।
ब्रह्माण्यादिस्वरूपे च अन्नपूर्णे नमोऽस्तु ते ॥
देवि चन्द्रकृतापीडे सर्व्वसाम्राज्यदायिनि ।
सर्व्वानन्दकरे देवि अन्नपूर्णे नमोऽस्तु ते ॥
इन्द्राद्यर्चितपादाब्जे रुद्रादिरूपधारिणि ।
सर्व्वसम्पत्प्रदे देवि अन्नपूर्णे नमोऽस्तु ते ॥
पूजाकाले पठेद्यस्तु स्तोत्रमेतत् समाहितः ।
तस्य गेहे स्थिरा लक्ष्मीर्जायते नात्र संशयः ॥
प्रातःकाले पठेद्यस्तु मन्त्रजापपुरःसरं ।
तस्य चान्नसमृद्धिः स्याद्वर्द्धमाना दिने दिने ॥
यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन ।
प्रकाशात् कार्य्यहानिः स्यात्तस्माद्यत्नेन गोपयेत्” ॥
इत्यन्नपूर्णास्तोत्रं समाप्तं । * ।

अथ अन्नपूर्णाकवचं ॥

“कथितास्त्वन्नपूर्णाया या या विद्याः सुदुर्ल्लभाः ।
कृपया कथिताः सर्व्वाः श्रुताश्चाधिगता मया ॥
साम्प्रतं श्रोतुमिच्छामि कवचं यत् पुरोदितं ।
त्रैलोक्यरक्षणं नाम कवचं मन्त्रविग्रहम्” ॥

ईश्वर उवाच ।

“शृणु पार्व्वति वक्ष्यामि सावधानावधारय ।
त्रैलोक्यरक्षणं नाम कवचं ब्रह्मरूपकं ॥
ब्रह्मविद्यास्वरूपञ्च महदैश्वर्य्यदायकं ।
पठनाद्धारणान्मर्त्त्यस्त्रैलोक्यैश्वर्य्यभाग्भवेत् ॥
त्रैलोक्यरक्षणस्यास्य कवचस्य ऋषिः शिवः ।
छन्दो विराडन्नपूर्णा देवता सर्व्वसिद्धिदा ॥
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ।
क्रीँ नमो भगवत्यन्ते माहेश्वरिपदं ततः ।
अन्नपूर्णे ततः स्वाहा चैषा सप्तदशाक्षरी ॥
पातु मामन्नपूर्णा सा या ख्याता भुवनत्रये ।
विमाया प्रणवाद्यैषा तथा सप्तदशाक्षरी ॥
पात्वन्नपूर्णा सर्व्वाङ्गं रत्नकुम्भान्नपात्रदा ।
श्रीबीजाद्या तथा चैषा द्विरन्ध्रार्णा तथा मुखं ॥
प्रणवाद्या भ्रुवौ पातु कण्ठं वाग्बीजपूर्व्विका ।
कामबीजादिका चैषा हृदयन्तु महेश्वरी ॥
तारं श्रीँ क्रीँ नमोऽन्ते च भगवति पदं ततः ।
माहेश्वरि पदं चान्नपूर्णे स्वाहेति पातु मे ॥
नाभिमेकोनविंशार्णा पायान्माहेश्वरी सदा ।
तारं माया रमा कामः षोड़शार्णास्ततःपरं ॥
शिरःस्था सर्व्वदा पातु विंशत्यर्णात्मिका च या ।
करौ पादौ सदा पातु रमा कामोद्भवस्तथा ॥
अन्नञ्च सर्व्वदा पातु विंशत्यर्णात्मिका च या ।
अन्नपूर्णा महाविद्या क्रीँ पातु भुवनेश्वरी ॥
शिरः श्रीँ क्रीँ तथा क्लीञ्च त्रिपुटा पातु मे गुदं ।
षड्दीर्घभाजा बीजेन षड़ङ्गानि पुनन्तु मां ॥
इन्द्रो मां पातु पूर्व्वे च वह्निकोणेऽनलोऽवतु ।
यमो मां दक्षिणे पातु नैर्ऋत्यां निर्ऋतिश्च मां ॥
पश्चिमे वरुणः पातु वायव्यां पवनोऽवतु ।
कुवेरश्चोत्तरे पातु मामैशान्यां शिवोऽवतु ॥
ऊर्द्ध्वाधः सततं पातु ब्रह्मानन्तो यथाक्रमात् ।
वज्राद्यायुधाः पान्तु दशदिक्षु यथाक्रमात् ॥
इति ते कथितं पुण्यं त्रैलोक्यरक्षणं परं ।
यद्धृत्वा पठनाद्देवाः सर्व्वैश्वर्य्यमवाप्नुयुः ॥
ब्रह्मा विष्णुश्च रुद्रश्च कवचं धारणादयत ।
कल्पायुतं कल्पे कल्पे पृथक् पृथक् ॥
पुष्पाञ्जल्यष्टकं देव्यै मूलेनैव पठेत्ततः ।
युगायुतकृतायास्तु पूजायाः फलमाप्नुयात् ॥
प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे ।
वाणी वक्त्रे वसेत्तस्य सत्यं सत्यं न संशयः ॥
अष्टोत्तरशतं चास्य पुरश्चर्य्याविधिः स्मृतः ।
भूर्ज्जे विलिख्य गुलिकां स्वर्णस्थां धारयेद्यदि ॥
कण्ठे वा दक्षिणे बाहौ सोऽपि सर्व्वतपोमयः ।
ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रं प्राप्य पार्व्वति ।
माल्यानि कुसुमान्येव भवन्त्येव न संशयः” ॥
इति भैरवतन्त्रे भैरवभैरवीसंवादे अन्नपूर्णाकवचं समाप्तं । इति तन्त्रसारः ॥ * ॥ तस्याः स्तुत्यन्तरं यथा । ॐ नमोऽन्नपूर्णायै ।
“ॐ नित्यानन्दकरी वराभयकरी सौन्दर्य्यरत्नाकरी
निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ १ ॥
नानारत्नविचित्रभूषणकरी हेमाम्बराडम्बरी
मुक्ताहारविलम्बमानविलसद्वक्षोजकुम्भान्तरी ।
काश्मीरागुरुवासिताङ्गरुचिरा काशीपुराधीश्वरी ।
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ २ ॥
योगानन्दकरी रिपुक्षयकरी धर्म्मैकनिष्ठाकरी
चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी ।
सर्व्वैश्वर्य्यकरी तपःफलकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ३ ॥
कैलासाचलकन्दरालयकरी गौरी उमा शङ्करी
कौमारी निगमार्थगोचरकरी ॐकारबीजाक्षरी ।
मोक्षद्वारकवाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ४ ॥
दृश्यादृश्यविभूतिभावनकरी ब्रह्माण्डभाण्डोदरी
लीलानाटकसूत्रभेदनकरी विज्ञानदीपाङ्कुरी ।
विश्वाधीशमनःप्रमोदनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ५ ॥
उर्व्वी सर्व्वजनेश्वरी जयकरी मातान्नपूर्णेश्वरी
नारीनीलसमानकुन्तलधरी नित्यान्नदानेश्वरी ।
सर्व्वानन्दकरी सदा शिवकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ६ ॥
आदिक्षान्तसमस्तवर्णनकरी शम्भुप्रिया भास्करी
काश्मीरा त्रिपुरेश्वरी त्रिलहरी नित्याङ्कुरी शर्व्वरी ।
कामाकाङ्क्षकरी महोत्सवकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ७ ॥
चन्द्रार्कानलकोटिपूर्णवदना चन्द्रार्कवर्णेश्वरी
चन्द्रार्काग्निसमानकुण्डलधरी चन्द्रार्कबिम्बाधरी ।
मालापुस्तकपाशकाङ्कुशधरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ८ ॥

र्णीपाकसुवर्णरत्नखचिता दर्वी करे वामके वामे भाजनपात्रिका, रत्नकरी सौभाग्यमाहेश्वरी । भक्ताभीष्टकरी कटाक्षलहरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥४॥ चन्द्रार्कानलकोटिकोटिसदृशा चन्द्रांशुबिम्बाधरी चन्द्रार्काग्निसमानकुण्डलधरी चन्द्रार्कवर्णेश्वरी । मालापुस्तकपाशसाङ्कुशधरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ अन्नपूर्णे सदा पूर्णे शङ्करप्राणवल्लभे । ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ॥८॥ इति श्रीमच्छङ्कराचार्यविरचितमन्नपूर्णास्तोत्रं समाप्तम् । क्वचित् पुस्तके शङ्कराचार्यस्यापि वैदव्यास इति पाठः ।

अन्नप्राशन, क्ली, (अन्नस्य प्राशनं भोजनं यस्मिन् तत् । अन्न+प्र+अश+भावे ल्युट् ।) षष्ठे मासि बालके वा बालिकायाः पञ्चमे मासि सप्तमे वा बालिकायाः प्रथमान्नभोजनरूपसंस्कारः । इति स्मृतिः । तस्य क्रमः । शोभनदिने कृतस्नानः कृतनित्यक्रियः पिता सुविधानमनुष्ठाय पञ्चामृतं ... कुशण्डिकां समाप्य ... पृथ्वीमयी ... कुर्यात् । ... मधुघृताक्तौदनं ... प्राशयेत् । इति भवदेवभट्टः । अस्य विधिविशेषो यथा,—

"षष्ठेऽन्नप्राशनं मासे मासि मासे यथाविधि । अष्टमे मासि कर्त्तव्यं यद्वेष्टं मङ्गलं कुले" ।

मनु इति कृत्वा कथा प्राशयेत् । ज्योतिस्तत्त्वे

"षष्ठे मासि प्राशनं मासे मासि मासे यथाविधि । सौम्यायां ... " ।

मुहूर्त्तचिन्तामणौ

"षड्मासि निशाकरे सुमदिने रिक्ताविरीते ... " ।

"दन्तजन्मनुसारिभ्यो ..." ।

मार्कण्डेयः ।

"देवता हरिताश्च पितृनुद्धरतस्तथा । कलमन्नं ... " ।

अनन्तरं ... श्राद्धं ... वर्जयेत् । ...

"रैवत्यामथ विष्णुश्च ..." इति ज्योतिस्तत्त्वम् ।

अन्नमयकोष, पुं, (अन्नस्य विकारः अन्न+विकारार्थे मयट् । "अन्नमयोऽन्नपानादिभिः" इत्यादि इत्युक्ते मायावादिवेदान्तम् ।) स्थूलशरीरं । इति वेदान्तसारः ।

अन्नमर्द, स्त्री, (अन्नस्य मल अर्थात् विष्ठा ।) मद्यं । यथा,—

"सुरा वै मलमन्नानां पाप्मा च मलमुच्यते । तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्" ।

इति प्रायश्चित्तविवेकः ।

अन्नविकार, पुं, (अन्नस्य विकारः वर्णाश्रमस्य ।) शुक्रं । इति राजनिर्घण्टः । (अन्नजात्मनोऽपि ...) ।

अन्नाद, पुं, (अन्नमत्ति अदि अन्न+अद+अण् ।) विष्णुः ... "अहमन्नमहमन्नमहमन्नम् । अहमन्नादोऽहमन्नादोऽहमन्नादः" इत्यादि श्रुतिः ।

विष्णुः । इति तस्य सहस्रनामसु पठितम् । अन्नभोक्तरि त्रि । (अन्नभोजनकारी ।)

अन्य, त्रि, (अन्+यत् बाहुलकात् वा ।) अपरः । इति मेदिनी । यथा ।

("नान्यसम्बन्धवयस्को न...") इति नीतिमाला ।

"योऽन्यथा ... "

इति अमरकोषे ।) इतरः । भिन्नः । २ अपरः । ३ इतरः । ४ अन्यः । ५ इतरः ६ । इत्यमरः । विलक्षणः । ७ । इति जटाधरः । इतरः । सीमा ८ । इति शब्दरत्नावली ।

अन्यत्, अ, (अन्+बाहुलकात् अद् ।) इतर । भिन्नं । यथा वैदिकस्य ... ।

"अन्यदेवाहुः ..." ।

इत्यादौ तु ... बोध्यम् ।

अन्यतः, [स्] अ, (अन्य+"पञ्चम्यास्तसिल्" इति तसिल् ।) अन्यस्मात् । अन्यस्मिन् । यथा,—

"इतश्चैव हि निवर्त्तयतः ... " । इति नैषधं ।

अन्यतम, त्रि, (अन्य+डतमच् ।) मिलितः । बहूनां मध्ये निर्द्धारितैकः । इति व्याकरणं । अनेकेषु मध्ये एक इति भाषा ।

("... मातृबन्धनं यदि च । ... ") इति मनुः ।) व्याकरणे अनेकेभ्य एकस्य निर्द्धारणम् ।

अन्यतर, त्रि, (अन्य+डतरच् ।) अन्यः । द्वयोर्मध्ये निर्द्धारितैकः । इति व्याकरणं । दुयेर मध्ये एक इति भाषा ।

("अन्यतरेण च ... प्रयाति । तयोरन्यतरः ... ") इति मनुः ।) व्याकरणे द्वयोरेकस्य निर्द्धारणमेव ।

अन्यतरेद्युः, [स्] अ, (अन्यतरस्मिन् दिवसे निपातनात् एद्युस्प्रत्ययः ।) अन्यतरस्मिन् दिने । द्वयोरन्यतरस्मिन् दिने । इत्यमरः ।

अन्यत्र, अ, (अन्यस्मिन्+अन्य+त्रल् ।) अन्यस्मिन् । विना । यथा,—

"अन्यत्र ब्राह्मणात् ... " ।

इति मार्कण्डेयः । ... यथा ।

"अन्यत्र पूर्वं ... कृत्वेति वक्ता" ।

इति कामन्दकः । (अन्यस्मिन्, अन्यस्मिन् ।

"... " इति मनुः ।

"... " इति मनुः ।)

अन्यथा, अ, (अन्येन प्रकारेण अन्य+प्रकारार्थे थाल् ।) प्रकारान्तरं । मिथ्या । इति मेदिनी । दुष्टं । इति शब्दरत्नावली । अन्यप्रकारे । इति व्याकरणं ।

("अन्यथा ... ") इति महाभारतं । अन्यतरेण । प्रकारान्तरेण । यथा ।

"... " इति मनुः ।)

अन्यथासिद्धि, स्त्री, (अन्यथा अन्यप्रकारेण सिद्धिः ।) कार्यकारणसम्बन्धं विना कार्योत्पत्तिः । सा पञ्चविधा । यथा । ... घटं प्रति दण्डत्वं ॥१॥ ... ॥२॥ ... ॥३॥ ... ॥४॥ ... ॥५॥ इति सिद्धान्तमुक्तावली

अन्यदा, व्य, (अन्यस्मिन् काले अन्य + दा ।) कालान्तरे । अन्यसमये । यथा,—
"अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव" ॥
इति माघः ॥

अन्यपुष्टः, पु, (अन्यया स्वमातृभिन्नया पुष्टः ।) कोकिलः । यथा,—
"अप्यन्यपुष्टा प्रतिकूलशब्दा
श्रोतुर्वितन्त्रीरिव ताड्यमाना" ।
इति कुमारसम्भवे ॥

अन्यपूर्व्वा, स्त्री, (अन्यः पूर्व्वो यस्याः सा ।) पौनर्भवा कन्या । एकस्मै वागादिना दत्ता पुनरन्येन विवाहिता कन्या । सा सप्तधा यथा,—
"सप्त पौनर्भवाः कन्या वर्ज्जनीयाः कुलाधमाः" ।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकस्पर्शिता या च या च पाणिगृहीतिका ।
अग्निं परिगता या तु पुनर्भूप्रसवा च या ॥
इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्" ।
इत्युद्वाहतत्त्वं ॥

अन्यभृत्, पुं, (अन्यान् कोकिलान् बिभर्त्ति पालयति अन्य + भृ + क्विप् ।) काकः । इति हेमचन्द्रः ॥ (कोकिलः ।)

अन्यभृतः, पु, (अन्यया स्वमातृभिन्नया भृतः पालितः तृतीयातत्पुरुषः ।) कोकिलः । इति हलायुधः ॥
("कलमन्यभृतासु भाषितं
कलहंसीषु मदालसं गतं" । इति रघुः ।)

अन्यमनस्कः, त्रि, भिन्नचित्तः । अन्यमनाः । अन्यस्मिन् मनो यस्य सः इति बहुव्रीहौ कप्रत्ययेन सिद्धः ॥ (विषयान्तरासक्तचित्ततया उपस्थितकार्य्येऽनवहितहृदयः । अस्थिरः । चञ्चलचित्तः ।)

अन्यवर्द्धितः, त्रि, (अन्यया योषिता वर्द्धितः पुष्टः ।) अन्यपुष्टः । परैधितः । अन्येन प्रतिपालितः । इति जटाधरः ॥

अन्यवादी, [न्] त्रि, (अन्यत् पूर्व्वस्वीकृतवाक्यात् भिन्नं वदति, अन्य + वद् + णिनि उपपदसमासः ।) इतरवादी । अस्थिरवादी । अन्यथावादी । यथा,—
"अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः" ॥
इति व्यवहारतत्त्वे नारदः ॥

अन्यशाखकः, पु, (अन्या स्वशाखेतरा शाखा यस्य सः, समासान्तः कः ।) स्ववेदशाखामुत्सृज्यापरशाखाश्रयकर्म्म कुर्व्वाणः । तत्पर्य्यायः । शाखारण्डः २ । इति हेमचन्द्रः ॥

अन्यादृक्, [श्] त्रि, (अन्यमिव पश्यति अन्य +, दृश् + क्विन्, उपपदसमासः । "दृक् दृशवतुषु" इति आकारः ।) अन्यप्रकारः । इति मुग्धबोधव्याकरणं ॥

अन्यादृशः, त्रि, (अन्य इव पश्यति अन्य + दृश् + कञ् आत्वञ्च ।) अन्यप्रकारः । इति मुग्धबोधव्याकरणं ॥

अन्यायः, पु, (न्यायः । सङ्गतिः । युक्तिः । औचित्यं, तस्मादन्यः नञ्समासः ।) न्यायभिन्नः । अनौचित्यं । अयुक्तिः । यथा,—
"अन्यायेनापि यद्भुक्तं पित्रा पूर्व्वतरैस्त्रिभिः ।
न तच्छक्यमपाकर्त्तुं क्रमात्त्रिपुरुषागतं" ॥
इति व्यवहारतत्त्वे नारदः ॥

अन्याय्यः, त्रि, (न्यायादनपेतः, न्याय + अनपेतार्थे यत्, ततो नञ्समासः ।) अनुचितः । अयोग्यः । यथा,—दृष्टार्थसत्त्वे अदृष्टकल्पनाया अन्याय्यत्वादित्यधिकरणमालायां माधवाचार्य्यः ॥ (असङ्गतः । गर्हितः । धर्म्मविरुद्धः । युक्तिविरोधी । "न्याय्यं सम्नेच्छते कर्त्तुमन्याय्यं वा करोति यः" । इति कात्यायनसंहिता ।)

अन्यूनः, त्रि, (न न्यूनः, नञ्समासः ।) न्यूनतारहितः । सम्पूर्णः । इति जटाधरः ॥

अन्येद्युः, [स्] व्य, (अन्यस्मिन् दिवसे निपातनात् सिद्धम् ।) अन्यस्मिन्नहनि । दिवसान्तरे । अन्यदिने । इत्यमरः ॥
("अन्येद्युरात्मानुचरस्य भावं
जिज्ञासमाना मुनिहोमधेनुः" ।
इति रघुवंशे ।)

अन्योदर्य्यः, पु स्त्री, (अन्यस्याः स्वमातृभिन्नविमातुरुदरे जातः अन्योदर + यत् एकपितृकः भिन्नमातृको भ्राता ।) वैमात्रेयः । यथा,—
"अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्" ।
इति याज्ञवल्क्यः ॥ (अन्यमातृजः ।)

अन्योन्यं, त्रि, (अन्य + व्यतिहारार्थे द्वित्वं, ततः पूर्व्वपदात्परः सुश्च ।) उभयतः । तत्पर्य्यायः । इतरेतरं । २ परस्परं । ३ । इति हेमचन्द्रः ॥
("अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलैः"
इति उत्तरचरिते ।)

अन्योन्याश्रयः, त्रि, (अन्योन्यमाश्रयति, अन्योन्य + आ + श्रि + पचाद्यच् ।) परस्परज्ञानसापेक्षज्ञानाश्रयः । इति स्मार्त्ताः ॥ स्वग्रहसापेक्षग्रहसापेक्षग्रहकः । इति तार्किकाः ॥ तर्कविशेषः । तस्य लक्षणं । स्वापेक्षापेक्षितत्वनिबन्धनप्रसङ्गत्वं । अपेक्षा च ज्ञप्तौ उत्पत्तौ स्थितौ च ग्राह्या । तत्राद्या यथा । घटोऽयं यद्येतद्घटज्ञानजन्यज्ञानविषयः स्यात् तदैतद्घटभिन्नः स्यात् । द्वितीया यथा । घटोऽयं यद्येतद्घटजन्यजन्यः स्यात् तदैतद्घटजन्यभिन्नः स्यात् । तृतीया यथा । घटोऽयं यद्येतद्घटवृत्तिवृत्तिः स्यात् तथात्वेनोपलभ्येत । इति जगदीशः ॥

अन्वक्, [च्] त्रि, (अनु पश्चात् अञ्चति गच्छति अनु + अञ्च + क्विन्) पश्चाद्गामी । इत्यमरः ॥ (अनुपदं । पश्चात् । "तां देवतापित्रतिथिक्रियार्थामन्वक् ययौ मध्यमलोकपालः" । इति रघुवंशे ।)

अन्वयः, पु, (अनु + इण् + भावे अच् ।) वंशः । कुलं । इत्यमरः ॥
("तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः" ।
इति रघुवंशे । वंशपरम्परा ।
"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्" ।
इति रघुवंशे ।
"काव्यदेव्यभिधा शूरवधूः शुद्धान्वया" ॥
इति राजतरङ्गिणी । वंशजाताः पुत्रपौत्रादयः ।
"मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः" ।
इति नारदः ।
"स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" ।
इति मनुः ।) पदानां परस्पराकाङ्क्षा योग्यता च । इति दुर्गादासः ॥ परस्परसम्बन्धः । इति रामतर्कवागीशः ॥

अन्ववायः, पु, (अनु + अव + इण् + भावे अच् ।) वंशः । कुलं । इत्यमरः ॥ ("कथमेकान्ववायोऽयमस्माकं" । इति शाकुन्तले ।)

अन्वष्टका, स्त्री, (अष्टौ परिमाणान्यस्याः, अष्टन् + कन्, इत्वाभावः, अष्टकामनुगता प्रादिसमासः ।) अष्टकापश्चात्तिथिः । सा तु गौणचान्द्रपौषमाघफाल्गुनाश्विनमासानां कृष्णनवमी । तत्र साग्निका मातृकश्राद्धं । इति श्राद्धविवेकः ॥ तत्र साग्निकर्त्तव्यमातृपक्षश्राद्धं । यथा शङ्खः ।
"पित्रादित्रिकपत्नीषु भोज्या मातृ प्रतिद्विजाः ।
स्त्रीणामेव तु तद्यस्मान्मातृश्राद्धमिहोच्यते" ॥
एतच्चान्वष्टकाश्राद्धं साग्निमात्रेण कर्त्तव्यं ।
तथा च विष्णुः । अन्वष्टकास्वष्टकावदग्नौ हुत्वा मात्रे पितामह्यै प्रपितामह्यै पूर्व्ववद्ब्राह्मणान् भोजयित्वा इति । अत्र होमत्वादेवाग्निप्राप्तेरग्निग्रहणं तन्नियमार्थं । न चाग्नौ करणहोमे विप्रपाण्यादेर्व्विधानादत्रापि तथेति वाच्यं । प्रकृतीभूतश्राद्धविध्युक्तस्याधारान्तरस्य विकृतीभूतश्राद्धे विशेषविहिताधारेण बाधात् । शरमयबर्हिषा कुशमयबर्हिर्बाधवत् । न वा लौकिकाग्नौ होमः । "न पैत्रयज्ञियो होमो लौकिकाग्नौ विधीयते" । इति मनुवचनेन निषेधात् । श्राद्धचिन्तामणावप्येवं । इति श्राद्धतत्त्वं ॥

अन्वक्षं, त्रि, (अनु + अक्ष + पचाद्यच् । अक्षमिन्द्रियमनुगतम्, प्रादिसमासः, प्रत्यक्षे, अनुगते अनुपदे ।) पश्चाद्गामी । इत्यमरः ॥

अन्वाधिः, पु, (अनु पश्चात् आधीयते न्यस्यते, अनु + आ + धा + कि ।) एकस्मिन् यदर्पितं वस्तु तेन पुरुषान्तरे अमुष्मिन् स्वामिनि त्वं दास्यसीति निक्षिप्तं तत् । इति विवादार्णवसेतुः ॥ कार्य्येषु वाचनेन अमुष्मिन् पुरुषे त्वं दद्या इति परिभाष्य यत् समर्पितं तत् । इति हलायुधः ॥ यथा,—
"अर्थमार्गणकार्य्येषु अन्यस्मिन् वचनान्मम ।
दद्यास्त्वमिति यो दत्तः स इहान्वाधिरुच्यते" ॥
इति कात्यायनः ॥ पुनर्बन्धकः । पश्चान्मानसी व्यथा । अनुपूर्व्वकस्य आधिशब्दस्य इत्यर्थद्वयमपि सम्भवति ॥

अन्वाधेयं, स्त्री, (अनु विवाहानन्तरमाधेयं समर्पणीयं, अनु + आ + धा + कर्म्मणि यत् ।) विवाहानन्तरपितृमातृभर्तृकुललब्धस्त्रीधनं । यथा,—
"विवाहात् परतो यत्तु लब्धं भर्तृकुलात् स्त्रिया ।
अन्वाधेयं तदुक्तन्तु लब्धं बन्धुकुलात्तथा" ॥
इति कात्यायनः,—

अन्वासनं, स्त्री, (अनु + आस् + ल्युट्) सेवकस्थानं । अनुशोचनं । उपासना । इति विश्वमेदिन्यौ । शिल्पादिगृहं । इति हलायुधः ॥ (अनुवासनं ॥

स्यात् भाषा ।)

अन्वाहार्य्यं, क्ली, (प्रतिमासममावास्यायामिदं, अनु+आ+हृ+ण्यत् ।) मासिकश्राद्धम् । इत्यमरः ॥ अनु पश्चात् आह्रियते पिण्डपितृयज्ञानन्तरं अमावास्यायां मासि मासि क्रियते यत् श्राद्धं तदिति केचित् । इति भरतः ॥ ऋत्विग्दक्षिणा दक्षिणाग्निश्च । यथा,—
"यत् श्राद्धं कृष्णपक्षाम्बुद्युरुपस्थिते इच्छया भवेत् ।
अमावास्यां विशेषं तदन्वाहार्य्यं विदुर्बुधाः" ।
इति गोभिलस्मृतिः ॥

अन्वाहार्य्यक क्ली, (प्रतिमासममावास्यायामिदं, अनु+आ+हृ+ण्यत् ततः स्वार्थे कन् ।) अन्वाहार्य्यम् । यथा,—
"पितॄणां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः" ।
इति मनुः ।

अन्वाहित त्रि (अनु+आ+धा+कर्म्मणि क्त ।) परस्य हस्ते निहितं द्रव्यं तेनापि स्वस्वामिनो हस्ते अर्पणीयमिति निहितं धनम् । इति मिताक्षरा ।
("अन्वाहितयाचितकाधिनिक्षेपादिभिर्व्वविधिः" ।
इति याज्ञवल्क्यः —
"यत्र यत्र निहितैर्धनैः अन्वाहितयाचितादिषु" ।
इति भारतः ।) अन्यस्य हस्ते अर्पितं स्वामिने देयं तदन्वाहितं कथ्यते इति भाषा ।

अन्वित, त्रि, (अनु+इण्+क्त ।) युक्तः । मिलितः । इत्यमरः । समन्वयवत्प्रभृति । यथा,—
"गुणैरन्वितमिममाला कर्षति मत्प्रभो" ।
इति वाल्मीकिः ।
(प्राप्तः । सौभाग्यादिसम्पत्तिसम्पन्नान्वितः । अन्वयार्थं लक्षणा ।
"स्त्रीणां पत्रं यतोऽनुगतार्थमभिधेयार्थेऽपि" ।
इति सावित्रीचरिते ।)

अन्वित, त्रि (अनु+इण्+क्त ।) अन्वेषितः । मृग्यमाणः । इत्यमरः । ("अनुगच्छ वयस्यामन्विते विद्वद्भिर्निर्णीतम्" । इति कुमार सम्भवे ।)

अन्वीत, त्रि, (अनु+ईङ् गतौ+कर्म्मणि क्त ।) अन्वितः । युक्तः । इति शब्दमाला ।

अन्वेषण क्ली, (अनु+इष्+ल्युट्) अन्वेषणा । अनुसन्धानम् । यथा, "सम्प्रीतो रामनिर्दं न मनसापराधेषु नेतुमिच्छति" इति महानाटकम् । ("सीतान्वेषणमेव सुग्रीवाद्युत्पन्नम्" । रघुवंशः ।)

अन्वेषणा, स्त्री, (अनु+इष्+णिच्+भावे युच् ततः टाप् ।) अन्विष्टिः अन्वेषणम् । अन्वेषणमात्रं । तत्पर्य्यायः गवेषणा २ मृगणा ३ । इत्यमरः ।

अन्वेषित, त्रि, (अनु+इष्+णिच्+कर्म्मणि क्त ।) मृगयमाणः । तत्पर्य्यायः । मृगितः । २ अन्वितः ३ गवेषितः ४ इत्यमरः । ५ मार्गितः । ६ परीक्षितः ७ विचितः । इति अन्वेषणपर्य्यायेषु परीक्षितेऽन्वेषणादर्शनम् ।

अन्वेष्टा (र) त्रि (अनु+इष्+तृच् ।) अन्वेषक । मार्गकर्ता । अनुसरणः २ । इति हेम चन्द्रः । ("अन्वेष्टारो माधवस्य भ्रमन्ति स्म त्रिलोकीम्" । इति मनोमाधवम् ।)

अप अ, (न आप्नोति न+आप+ड "पादयोश्चेति" इति नियमाद्वर्णलोपे अनावृतिनियमस्य नलोपः ।) उपसर्गविशेषः । वर्ज्जनम् । अपायः । बाहुल्यम् । वैकृत्यम् । चौर्य्यम् । आनन्दः । इति दुर्गादासः । आसङ्गावधारणम् । अल्पार्थः । निवेदनम् । विपर्य्ययः । विसर्ज्जनम् । विकृतिः । चौर्य्यम् । निर्देशः । इति मेदिनी ।

अपः, [स्] क्ली, (आप्+असुन् हस्वोपधात्वात् उन्नयनं ।) कर्म्म । इत्यादिकोषः ।

अपकर्म्म क्ली, (अपकृष्टं कर्म्म ।) दुष्कृतम् । अपकर्म्म । कर्म्मणामर्पणं तदपकर्म्म अपकर्षणमेव स्मार्त्तविदां मतम् ।

अपकार, पुं, (अप+कृ+भावे घञ् ।) द्रोहः । अनुपकारः । अपकारः । इति हलायुधः । (अ-विरुद्धाचरणम् । अपराधकारः । अपचारः । द्वेषः ।
"अपकर्त्तुरपि यत्ने हितमेव तपस्विनः ।
अपकारकारी हि नर्म्म करोत्यवज्ञया" ।
इति माघः ।)

अपकारगीः, [र्] स्त्री, (अपकारिणी गीः वाक् ।) अपकारशब्दम् । अपशब्दम् । इत्यमरः ।

अपकारी, [न्] त्रि, (अपकरोति अप+कृ+णिनि ।) अपकारकः । द्रोहकः । यथा,—
"अपकारिणि कोपश्चेत् कोपे कोपः कथं न ते ।
धर्म्मार्थकाममोक्षाणां चतुर्णां परिपन्थिनि" ।
इत्युद्भटः । (अहितकारी । अनिष्टकारकः । पीडकः । दुर्जनः । कुकर्म्मकारी ।
"किं सत्त्वेष्वपकारिणि किं सत्त्वेनापकारिणः" ।
इति रघुवंशम् ।)

अपकृष्ट, त्रि, (अप+कृष्+क्त ।) अधमः अवरः निकृष्टः । अपकृतम् । १ निकृष्टः । २ अधमः । ३ अपकृष्टः । ४ अवरः । ५ कुत्सितः । ६ खेटः । ७ याप्यः । ८ क्षुल्लकः । ९ रेफः । १० अर्वा । ११ ऊनः । १२ बर्वः । १३ हीनः । १४ अणुः । १५ निहीनः । १६ क्षुद्रः । १७ बालः । १८ । इति हेमचन्द्रः ।

अपक्रम, पुं, (अप+क्रम+भावे घञ् "नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति वृद्ध्यभावः ।) पलायनम् । इत्यमरः ।

अपक्रिया स्त्री, (अप्+कृ+भावे श ।) द्रोहः । अपकारः । इति हेमचन्द्रः । (विपरीतिक्रिया ।
"अनुपेक्षणीयास्तु रिपवः शत्रवोऽपक्रियाः" ।
इति माघः ।)

अपक्रोश, पुं, (अप+क्रुश्+भावे घञ् ।) निन्दा । दुर्वाक्यम् । आक्रोशः । इति शब्दरत्नावली ।

अपक्व त्रि, (न पक्वः पच्+कर्म्मणि क्त, नञ् समासः ।) अपरिपक्वः । आमः इति भाषा । यथा,—
"नैव पिबन्ति पिपासितो भवन्ति फलं भव वा" ।
इति वैद्यकपरिभाषा । अपरिणतः । २ अशिक्षितः

१ प्रापि । ३ अप्रौढः । इति शब्दमाला ।
("अपक्वे अन्नं दद्यात् पक्वे दद्यात् ज्वरीतकम्" ।
इति भावप्रकाशे ।)

अपगत, त्रि, (अप+गम्+कर्तरि क्त, अपगमे उपसर्गे च ।) मृतः । इति हेमचन्द्रः । गतः । दूरीभूतः । यथा,—"अपगतपरितापौ च च शक्ता पूर्वी न चौरा भवेत्" इत्यादि महाभारतम् ।

अपगा, स्त्री, (अपगोतुं गच्छति, अप+गम्+कर्तरि ड, स्त्रियां टाप् ।) आपगा । नदी । इत्यमरटीकायां भरतः । (पोतवती दोषवती अपगा निम्नगामिनी इत्यमरः ।)

अपघन, पुं, (अपहन्यते निहन्यते विक्षिप्यते, अप+हन्+"अपघनोऽङ्गम्" इति पाणिनिसूत्रेण अप् घनादेशश्च ।) अवयवः । अङ्गम् । इत्यमरः । ("शिशिरमासमपास्य गुणोऽस्य नः" । इति शब्दकल्पद्रुमे ।)

अपघात, पुं, अपमृत्युः । अस्वाभाविकमृत्युर्यथा उपघातादिना हत्यया वा घातः । अपघातः । आत्मघातः । विषभक्षणादिना अपमृत्युः इत्यादिना अन्यप्रकारेण विषाक्तः ।

अपचय, पुं, (अप+चि+भावे अच् । अपकर्षः ।) क्षतिः । हानिः । अपकर्षः । क्षयः । ह्रासः २ । इत्यमरः । (पुष्पादिसञ्चयनम् । यथा, "दिव्यान्वयसुरसखीपरभागान्यपचयेषु सुराः" । इति शाकुन्तले ।) [शुक्ति । इत्यमरः ।]

अपचायित, त्रि (अप+चाय+कर्म्मणि क्त ।)

अपचार, पुं, (अप+चर्+भावे घञ् अपकृष्टः आचारः ।) अविचारकर्म । यथा, "योगिनामप्यपचार सम्भवति किमु मन्दचेतसां विभिन्नाचारः" ।
इति माघवचनम् ।
("अपचारपदे बाधते तरसैर्वहि विरक्तिमेव प्राप्य ।
अपचारं कुरुते कोपं प्राप्ते भावे कथं भवेत्" ।
इति माघः ।)

अपचित, त्रि (अप+चाय+पूजार्थे कर्म्मणि क्त ।) अपचितमिति पाणिनिसूत्रेण पदे चायस्थाने चिभावः । (अप+चि+क्त ।) क्षीणः । दुर्बलः । अपचयोपचयवशात् क्षीणः कृशः । "अपचित मपि गात्रं व्यायताङ्ग्यात्" । इति शाकुन्तले ।

अपचिति, स्त्री, (अप+चि+भावे क्तिन् । पूजितिः ।) व्ययः । पूजा । निष्कृतिः । इति मेदिनी । (नाशः । क्षयः । अपचयः ।
"नार्हस्यपचितिं कर्त्तुं विशुद्धस्य नरनाथिनाम्" ।
इति रामायणे ।)

अपच्छाय, त्रि, (अपगता छाया यस्मात् सः ।) देवः । अमरः । निष्प्रभः । अपगता छाया यस्मात् इति बहुव्रीहिः समासः । (अपच्छायः निष्प्रभः । विच्छायादि ।
"अपच्छायं करोत्येवं मतिर्जीवितस्याप्युपायान्तैः ।
रविवच्छायापायेनैव कान्तो विवर्णतास्" ।)

अपच्छेदः स्त्री, (अपच्छेदनं छेदनं अप+छिद्+भावे घञ् । आचारादौ च्छ+छ+श तस्य अन्यत्वात् ।) अपच्छेदः । अपवृत्तिविनाशप्रतिषेधः । इति शब्दरत्नावली ।

("पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितं ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनं" ॥
इति पञ्चदश्यां ।)

अपटान्तर, त्रि, (पटेन वस्त्रेण तिरस्करिण्या इति यावत् अन्तरं व्यवधानं यत्र तत्, ततो नञ्-समासः ।) आसन्न । संसक्त । अपदान्तर । अव्यवहित । इत्यमरटीकायां स्वामी ॥

अपटी, स्त्री, (अल्पः पटः अल्पार्थे नञ्समासः, गौरादित्वात् ङीष् ।) वस्त्रप्रावरणं । इति हेमचन्द्रः । कानात् । इति भाषा । (यवनिका । पर्दा । इत्यादि भाषा ।)

अपटु, त्रि, (न पटुः, नञ्समासः ।) व्याधित । रोगी । इत्यमरः । पटुतारहितः । कार्य्याक्षमः । यथा,—
"सा क्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं दोषैरन्यजनाश्रयैरपटवो जाता स्म इत्यद्भुतं" ।
इत्यमरुकविः ॥

अपतर्पण, क्ली, (अप + तृप् + भावे ल्युट् ।) लङ्घन । रोगादौ भोजनाभावः । इति हेमचन्द्रः । (अपगतं तर्पणं तृप्त्यभावो यस्य तत् । गतक्षोभ । तृप्तिशून्यः ।)

अपत्य, क्ली, (न पतति वंशो यस्मात्, पत + बाहुल्यात् यत्, ततो नञ्समासः ।) पुत्रः । कन्या । तत्पर्य्यायः । २ सन्तानः । ३ तोकं । ४ सन्ततिः । ५ प्रसूतिः । इति जटाधरः ।
("अस्मिंस्तु निर्गुणं गोत्रे नापत्यमुपजायते") ।
इति हितोपदेशे ।
"महीभृतः पुत्रवतोऽपि दृष्टि-
स्तस्मिन्नपत्ये न जगाम तृप्तिं" ।
इति कुमारसम्भवे ।)

अपत्यदा, स्त्री, (अपत्यं गर्भं तद्सेवनेन ददाति, अपत्य + दा + कर्त्तरि कः, उपपदसमासः ।) गर्भदात्रीवृक्षः । इति राजनिर्घण्टः ।

अपत्यपथ, पु, (अपत्यस्य गर्भाम्भिसारणस्य पन्था मार्गः, षष्ठीतत्पुरुषः, समासान्तः अच् ।) भग । योनि । इति हेमचन्द्रः ।

अपत्यशत्रु, पु, (अपत्यस्य शत्रुः, षष्ठीतत्पुरुषः ।) कर्कट । इति शब्दचन्द्रिका । काँकडा । इति भाषा ।

अपत्रप, त्रि, (अप + त्रप् + भावे घञ् ।) त्रपारहित । निर्लज्ज । अपगता त्रपा यस्येति बहुव्रीहौ आकारस्य ह्रस्वः ॥ ("सापत्रपः कुलगुरुर्विहितस्त्वया न" । इति धनञ्जयविजयव्यायोगे ।)

अपत्रपा, स्त्री, (अपगता त्रपा अन्यतो लज्जा यस्याः सा, स्त्रियां टाप् लज्जाहीना । लज्जाशून्या ।) अन्यतो लज्जा । परस्मात् लज्जा । इत्यमरः । लज्जामात्र । इति रत्नकोषः ।

अपत्रपिष्णु, त्रि, (अप + त्रप् + शीलार्थे कर्त्तरि इष्णुच् ।) समावत्रपः । लज्जाशील । इत्यमरः । लाजुक इति भाषा ।

अपथ, क्ली, त्र्य, (न प्रशस्तः पन्था मार्गः, नञ्समासः । नास्ति पन्थाः प्रशस्तः मार्गो यत्र तत् । प्रशस्तवर्त्मशून्ये नगरादौ ।) अपन्था । मार्ग एव यो न भवति तत् । इत्यमरः । योनिः । इति शब्दरत्नावली । (विमार्ग । कुपथः । असन्मार्गः । साधुविगर्हितः पन्थाः । "अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः" । इति रघुवंशे ।
"न कश्चित् वर्णानामपथमपकृष्टोऽपि भजते" ।
इति शाकुन्तले ।)

अपथ्य, त्रि, (पथ्ये वैद्योक्तभोजनादिनियमाय शास्त्रोक्ताचाराय वा हितं यत् ततो नञ्समासः ।) पथ्यभिन्न । अहित । यथा,—
"यत्पथ्यं यदपथ्यञ्च वक्ष्यते रक्तपित्तिना" ।
इति पथ्यापथ्यग्रन्थः ।

अपदान, क्ली, (अप + दैप शोधने भावे ल्युट्, विद्यमानार्थे अर्श आद्यच् । अथवा अपदायति परिशुध्यत्वेन कर्म्मणा, अप + दैप् + शोधने करणे ल्युट् ।) अवदान । वृत्तं कर्म्म । वृत्तिः प्रवर्त्तनं सा प्रशस्ता विद्यते यत्र तत् । यत्र कर्म्मणि वृत्तिः सर्व्वैः प्रशस्यते तत् इत्यर्थः । इत्यमरटीकायां स्वामी ॥
("गणयत्यपदानसम्मितां
भवतः सोऽपि न सत्क्रियामिमां" ।
इति शाकुन्तले ।)

अपदान्तरः, त्रि, (नास्ति पदान्तरं व्यवधानं यत्र सः ।) अव्यवहित । संयुक्तः । इत्यमरः । अभिन्नपदे क्ली । (सन्निकर्षः । सान्निध्य । सामीप्य । नैकट्य ।)

अपदिश, क्ली, व्य, (दिशोर्मध्ये, अव्ययीभावः, समासान्तः अच् ।) दिक्कोण । दिशोर्मध्यं । तत्पर्य्यायः । विदिक् २ । इत्यमरः ।
("क्लीवाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियां" ।
इत्यमरः ।)

अपदेश, पु, (अप + दिश् + घञ् । स्थान ।) निमित्त । शरण्य । स्वरूपाच्छादन । तत्पर्य्यायः । २ व्याज । ३ लक्ष्य । इत्यमरः । परानिष्टकारिभिन्नशठता । इति महाभारतटीका । (ख्याति । कीर्त्तिः । छल ।
"रक्षापदेशान्मुनिहोमधेनो-
र्वन्यान् विनेष्यन्निव दुष्टसत्त्वान्" ।
इति रघुवंशे ।)

अपध्वसज, पुं, (अपध्वस्यतेऽनेन, अपध्वन्स + करणे घञ्, अपध्वसो जातीनां भिन्नतासम्पादकः सङ्करस्तस्माज्जायते, अपध्वस + जन् + ड, उपपदसमासः ।) वर्णसङ्कर । यथा,—
"शूद्रायान्तु सधर्म्माणः सर्व्वेऽपध्वसजाः स्मृताः" ।
इति मनुः । (प्रतिलोमजात । भिन्नवर्णसङ्गमजात । कारणादिसङ्कीर्णवर्णः ।)

अपध्वस्त, त्रि (अप + ध्वन्स + क्त ।) परित्यक्त । निन्दित । चूर्णीकृत । इति मेदिनी । (अतिदुराचार ।) परित्यक्त । "अपध्वस्तः परित्यक्ते निन्दिते ऽप्यवचूर्णिते" । इति मेदिनी ।

अपनयन, क्ली, (अप + नी + भावे ल्युट् ।) खण्डन । दूरीकरणं । यथा,—"इति श्रीशाम्बपुराणे रोगापनयने श्रीसूर्य्यवक्त्रविनिर्गतस्तवराजः समाप्तः" इति ।
("नातिश्रमापनयनाय यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रं" ।
इति शाकुन्तले ।)

अपनोदन, क्ली, (अप + नुद् + भावे ल्युट् ।) खण्डनं । दूरीकरणं । यथा,—"मानापनोदनविनोदनतो गिरीशे" । इति श्रीहर्षः । (अपनुदति दूरीकरोति, अप + नुद् + कर्त्तरि बाहुल्यात् ल्युटि ।) खण्डक । दूरीकारक ।
"यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः ।
तथाघमर्षणं जप्यं सर्व्वपापापनोदनं" ।
इति मनुः ।)

अपन्था, [थिन्] पु, (न पन्थाः, नञ्समासः, समासान्तविधेरनित्यत्वात् अत्र अजभाव ।) अपथ । इत्यमरः ।

अपपात्रित, त्रि, (अपकृष्टं पात्रं भोजनपात्रं यस्य सः, येन जनेन भुक्तं भोजनपात्रमस्पृश्यं भवतीति यावत् चण्डालादि, अपपात्रं कृतं, अपपात्र + करोत्यर्थे णिच् + क्त ।) उत्कटदोषैर्ज्ञातिभिर्भिन्नोदकीकृत । यथा,—अपपात्रितस्य रिक्थपिण्डोदकानि निवर्त्तन्ते" । इति शुद्धितत्त्वे शङ्खापस्तम्बौ ।

अपभ्रंश, पु, (अप + भ्रन्स + घञ् ।) ग्राम्यभाषा । अपभाषा । तत्पर्य्यायः । अपशब्दः २ । इत्यमरः ॥ पतन । यथा,—
"अत्यारूढ़िर्भवति महतामप्यपभ्रंशनिष्ठा" ।
इत्यभिज्ञानशकुन्तल ॥ (अधः पतन । ध्वंस । अधोगति ।)

अपम, पु, (अपकृष्टतया मीयते, अप + मा + घञर्थे कः ।) क्रान्तिः । इति सिद्धान्तशिरोमणौ गोलाध्याय ॥

अपमान, क्ली, (अप + मा + भावे ल्युट् ।) अनादरः अमर्य्यादा । इति शब्दरत्नावली ॥ तत्पर्य्यायः ।
"स्यादवज्ञा परीहारः परिहारः पराभवः ।
अपमानं परिभवस्तिरस्कारस्तिरस्क्रिया ।
अवहेला च हेला स्यादवहेलनहेलने ।
क्षेपो निकारधिक्कारौ पर्य्यायाः स्यादनादरे" ॥
इति शब्दरत्नावली ॥ • ॥ तस्य अप्रकाश्यत्वं यथा,—
"अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनञ्चापमानञ्च मतिमान्न प्रकाशयेत्" ॥
इति चाणक्यः ॥
("अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः ।
स्वकार्य्यमुद्धरेत् प्राज्ञः कार्य्यध्वंसे हि मूढता") ॥

अपमित्यक, क्ली, (अपमित्य अपमानं स्वीकृत्य गृह्यते, अप + मेङ् प्रणिमाने + क्त्वा तस्य ल्यप्, "मयतेरिदन्यतरस्यामिति व्याख्याने इत्वं, ततः कन् ।) ऋण । इति हलायुधः ॥

[illegible]

[illegible]।) [illegible]। [illegible]
[illegible]। यथा —
"[illegible]"।
इति [illegible]। [illegible]
[illegible]
[illegible]
[illegible]।

अपस्नान क्ली, (अप + स्ना + भावे ल्युट्) [illegible]। [illegible]। [illegible]। "[illegible]"। इति [illegible]।)
"[illegible]"।
इति रामायणे।

अपर स्त्री, (न पूर्यते पृ + अप् ततो नञ् समासः।) [illegible]। [illegible] इति मेदिनी।

अपर, त्रि (न परमस्ति [illegible] पृ + अच् ततो नञ्समासः।) [illegible]। [illegible] इति मेदिनी।

अपरार्द्ध, क्ली, ([illegible]।) [illegible]। [illegible]। इति सिद्धान्तमुक्तावली।

अपराति स्त्री, (अप + रम् + भावे क्तिन्।) निवृत्तिः। विरतिः। इति हेमचन्द्रः। [illegible]।)

अपरपक्ष पुं, ([illegible]।) कृष्णपक्षः। [illegible]। इति [illegible]।

अपरान्त पुं (देश [illegible]) [illegible]। इति [illegible]।

अपरस्पर त्रि [illegible]। इति [illegible]।

अपर स्त्री ([illegible]) [illegible]।

अपरा स्त्री ([illegible]) [illegible]।

[illegible] इत्यादि [illegible]। इति [illegible]। [illegible]। "[illegible]"। इति [illegible]।

अपराजित पुं, (परा + जि + क्त ततो नञ् समासः।) विष्णुः। शिवः। [illegible]। इति मेदिनी।

अपराजिता स्त्री, दुर्गा। [illegible]। इति मेदिनी। [illegible]। इति राजनिर्घण्टः। [illegible]। इति [illegible]। [illegible]। इति रत्नमाला। [illegible]। इति रामायणम्।
("[illegible]।
[illegible]।
[illegible]।
[illegible]"।
इति [illegible]।)

अपराद्धपृषत्क त्रि (अपराद्धः [illegible]।) [illegible]।

अपराध पुं, (अप + राध् + भावे घञ्।) [illegible]। [illegible]। इति [illegible]।
"[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]"।

[illegible]
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]"। इति [illegible]।
"[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]"।
[illegible]।
"[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।
[illegible]।"

ह्येया परेऽपि बहवोऽपराधा मदसमते ।
आचारे शास्त्रविहितनिषिद्धातिक्रमादिभिः" ॥
अथापराधशमनं ।
"संवत्सरस्य मध्ये च तीर्थे शौकरके मम ।
कृतोपवासः स्नानेन गङ्गायां शुद्धिमाप्नुयात् ॥
मथुरायां तथाप्येवं सापराधः शुचिर्भवेत् ।
अनयोस्तीर्थयोरेवं यः सेवेत् सुकृती नरः ॥
सहस्रजन्मजनितानपराधान् जहाति सः" ।
स्कान्दे ।
"अहन्यहनि यो मर्त्त्यो गीताध्यायन्तु संपठेत् ।
द्वात्रिंशदपराधैस्तु अहन्यहनि मुच्यते" ॥
अथ कार्त्तिकमाहात्म्ये ।
"तुलस्या कुरुते यस्तु शालग्रामशिलार्चनं ।
द्वात्रिंशदपराधांश्च क्षमते तस्य केशवः" ॥
तत्रैवान्यच्च ।
"द्वादश्यां जागरे विष्णोर्यः पठेत्तुलसीस्तवं ।
द्वात्रिंशदपराधानि क्षमते तस्य केशवः ॥
यः करोति हरेः पूजां कृष्णशस्त्राङ्कितो नरः ।
अपराधसहस्राणि नित्यं हरति केशवः" ॥
इति श्रीहरिभक्तिविलासे ८ विलासः ॥

अपराह्ण, पुं, (अह्नः अपरः एकदेशिसमासः, समासान्तः टच्, अहःस्थाने अह्नादेशः ।) शेषाहः । दिनशेषभागः । इत्यमरः ।
("रामाणां रमणीयतां विदधति ग्रीष्मापराह्णागमे" इति अमरुशतके ।
"तथा श्राद्धस्य पूर्व्वाह्णादपराह्णो विशिष्यते" । इति मनुः ।) विकाल इति भाषा । तस्य भेदाः । द्विधा विभक्तदिनस्य शेषभागः ॥ त्रिधा विभक्तदिनस्य तृतीयभागः ॥ स तु त्रिंशद्दण्डदिनमाने विंशतिदण्डात् परं दशदण्ड यावत् । पञ्चधा विभक्तदिनस्य चतुर्थभागः । स तु अष्टादशदण्डात् परं षड्दण्ड यावत् । इति श्रुतिस्मृती ॥

अपराह्णतन, त्रि, (अपराह्णे भवम् सप्तम्येकवचनान्त अपराह्ण+ट्यु तुट् च, "घकालतनेषु कालनाम्न इति" पक्षे अलुक् ।) अपराह्णभववस्तु । अपराह्णजात । इति सिद्धान्तकौमुदी ॥

अपराह्णेतन, त्रि, (अह्नोऽपरः एकदेशिसमासः, तत्र भवम् अपराह्णे+ट्यु तुट् च, "घकालतनेषु कालनाम्नः" इति पक्षे अलुक् ।) अपराह्णतन । इति सिद्धान्तकौमुदी ॥

अपरिकलित, त्रि, (परि+कल्+कर्म्मणि क्त, ततो नञ्समासः ।) अज्ञातः । अदृष्टः । यथा,—
"अपरिकलितपूर्व्वः कश्चमत्कारकारी
स्फुरति मम गरीयानेष माधुर्य्यपूरः ।
अयमहमपि हन्त प्रेक्ष्य यं लुब्धचेताः
सरभसमुपभोक्तुं कामये राधिकेव" ॥
इति ललितमाधवः ॥

अपरिच्छन्न, त्रि, परिच्छदशून्य । परिपूर्व्वछदधातोः कर्त्तरि क्ते नञ्समासः ॥

अपरिच्छिन्न, त्रि, (परि+छिद्+क्त ततो नञ्समासः ।) परिच्छेदरहित । असीम । बहिरन्तरशून्य । यथा,—"किञ्च परिच्छिन्नस्य नीडे पक्ष्यादेरिव प्रवेशो भवेत् तव त्वनावृतत्वात् अपरिच्छिन्नत्वेन बहिरन्तर्भेदो नास्ति कुतः प्रवेशः" ।
इति श्रीधरस्वामी ॥

अपरिपक्व, त्रि, परिपाकरहित । किञ्चित्पक्व । परिपूर्व्वपचधातोः कर्त्तरि क्ते तस्य वत्वे चस्य च कत्वे परिपक्व ततो नञ्समासः ॥

अपरिमित, त्रि, (परि+मा+क्त, ततो नञ्समासः ।) परिमाणरहित । मानतुलासंख्याशून्य । यथा,—"अपरिमिता ध्रुवास्तनुभृतो यदि सर्व्वगतास्तर्हि न शास्यतेति नियमो ध्रुवनेतरथा" ।
इति श्रुत्यध्यायः ।

अपरिम्लान, पुं, (परि+म्लै+क्त तस्य नत्व, ततो नञ्समासः ।) महाम्लानवृक्षः । इति राजनिर्घण्टः ॥ म्लानिरहिते वाच्यलिङ्गः ॥ (नूतन । अपरिशुष्क । निर्म्मल ।)

अपरिष्कार, पुं, ("सम्पर्य्युपेभ्यः करोतौ भूषणे इति" सुडागमः ।) परिष्काराभावः । अनिर्म्मलत्व । तद्वति त्रि । परिपूर्व्वकृधातोर्भावे घञि नञ्समासः ।

अपरिष्कृत, त्रि, अमार्जित । अनिर्म्मल । अभूषित । अनलङ्कृत । परिपूर्व्वकृधातोः कर्म्मणि क्ते नञ्समासः । यथा,—
"मलपूतिसमायुक्तमभ्रविण्मूत्रपिच्छिलं ।
रेतोनिष्ठीवमानाभिः स्रवद्भिरपरिष्कृतं" ॥
इति कालिकापुराणे ५६ अध्यायः ॥

अपरिहार्य्य, त्रि, (परि+हृ+कर्म्मणि ण्यत्, ततो नञ्समासः ।) अपरिहरणीय । अत्याज्य । यथा,
"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि" ॥
इति श्रीभगवद्गीता ॥

अपरूप, त्रि, (अपकृष्टं रूपं कर्म्मधारयसमासः ।) अपकृष्टरूप । विकृतरूप । अपोपसर्गेण रूपशब्दस्य बहुव्रीहिसमासः ॥ कर्म्मधारयसमासे क्ली ॥ लोके तु आश्चर्य्यमिति प्रसिद्धं ॥

अपरेद्युः, [स्] अ, (अपरस्मिन् दिवसे दिवसस्य एद्युसादेशः)। अपरेऽह्नि । अपरदिने । इत्यमरः ॥ ("पूर्व्वेद्युरपरेद्युर्व्वा श्राद्धकर्म्मण्युपस्थिते निमन्त्रयेत विप्रान् वै" इति स्मृतिः ।)

अपर्णा, स्त्री, (नास्ति पर्णं तपस्यायां पर्णभक्षणवृत्तिर्व्वा यस्याः सा, टाप् ।) दुर्गा । इत्यमरः ॥
("स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
वदन्त्यपर्णेति च तां पुराविदः" । इति कुमारसम्भवे ।)
पत्रशून्ये त्रि ॥

अपर्य्याप्त, त्रि, (परि+आप्+क्त, नञ्समासः ।) पर्य्याप्तिशून्य । असीम । असमर्थ । यथा,—
"अपर्य्याप्तं तदस्माकं बलं भीष्माभिरक्षितं ।
पर्य्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितं" ॥
इति श्रीभगवद्गीता ॥

अपर्य्युषित, त्री, (परि+वस्+क्त नञ्समासः ।) अव्युष्ट । सद्योभव । यथा नारसिंहे,—
"अपर्य्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः ।
स्वीयारामोद्भवैर्वापि पुष्पैः सम्पूजयेद्धरिं" ॥
इत्याह्निकाचारतत्त्वम् ॥

अपर्व्वदण्ड, पुं, (अपर्व्वं पर्व्वरहितं ग्रन्थिशून्यं इति यावत् दण्डः कर्म्मधारयः ।) रामशरवृक्ष । इति राजनिर्घण्टः ॥

अपल, क्ली, (अपलाति अपराक्रमेण गृह्णाति येन, अप+ला+करणे क । नास्ति पलं मांसं यस्य सः, मांसशून्य ।) कीलक । इति शब्दमाला ॥ पलशून्ये त्रि ॥

अपलपन, क्ली, अपलाप । अपोपसर्गात् लपधातोर्भावे अनट् प्रत्ययः ॥ (पाणिनिमते तु, अप+लप+भावे ल्युट् ।)

अपलाप, पुं, (अप+लप्+भावे घञ् ।) सतोऽप्यसत्त्वेन कथनं । ज्ञातस्य गोपनं । तत्पर्य्यायः । २ निह्नुतिः । ३ अपह्नुतिः । ४ अपह्नवः । ५ निह्नवः । इति शब्दरत्नावली ॥ प्रेम । इति । मेदिनी ॥

अपलापिका, स्त्री, (अप+लप्+भावे ण्वुल् ।) तृष्णा । इति हेमचन्द्रः ॥

अपवन, क्ली, (अपकृष्टं कृत्रिमत्वात् अल्पत्वाच्च वनं कर्म्मधारयः ।) उपवनं । कृत्रिमवनं । इति हेमचन्द्रः ॥

अपवरक, पुं, (अपव्रियन्ते लोकाः संभज्यन्तेऽत्र, अप+वृ+"ग्रहवृदृनिश्चिगमश्च" इति अप्, ततः स्वार्थे कन्, अथवा अप+वृ+क्वादिभ्यः संज्ञायां वुन् तस्य अकः ।) अन्तर्गृहं । तत्पर्य्यायः । २ गर्भागारं ३ वासौकः ४ शयनास्पदं । इति हेमचन्द्रः ॥ ("दीपोऽपवरकस्यान्तर्वर्त्तते तत्प्रभा बहिः" ।)

अपवर्ग, पुं, (अपवृज्यते संसारः मुच्यतेऽनेन, अप+वृज्+घञ् कुत्व ।) मोक्षः । त्यागः । क्रियावसानसफलं कर्म्मफलं । इति विश्वमेदिन्यौ ॥ क्रियान्तः प्रमाणं । इति जटाधरो रत्नावली च । पूर्णता । इति धरणी ॥ (निर्व्वाणं । मुक्तिः । "अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्म्मयोर्गतौ" इति रघुवंशे । समाप्तिः । शेषः । अवसानं । "क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः" । इति भारविः ।)

अपवर्ज्जन, पुं, (अप+वृज्+भावे ल्युट् ।) दानं । मोक्षः । त्यागः । इति मेदिनी ॥

अपवाद, पुं, (अप+वद्+भावे घञ् ।) आज्ञा । निन्दा । तत्पर्य्यायः । अवर्णः २ आक्षेपः ३ निर्व्वादः ४ परीवादः ५ उपक्रोशः ६ जुगुप्सा ७ कुत्सा ८ गर्हणा ९ इत्यमरः ॥ (वचनीयं । "लोकापवादाद्भयं" इति नीतिशतके । "देव्यामपि हि वैदेह्यां सापवादो यतो जनः" । "हा कथं सीतादेव्या ईदृशमचिन्तनीयं जनापवादं देवस्य कथयिष्यामि" । इति उत्तरचरिते । आज्ञा । अनुमतिः । आदेशः । "ततोऽपवादेन पताकिनीपतेश्चचाल निर्ह्रादवती महाचमूः" । इति भार

णि ।) निन्दा । इति मेदिनी । निदेशः । आज्ञा । यथा —
"हविरपवादविघ्नेऽप्युपसर्गोऽभिधीयते" ।
इति कात्यायनपरिशिष्टं । उत्सर्गविधस्य बाधक-
वचनमात्रम् उत्सर्गबाधकवचनेऽपवादो
ऽपवादः अपवादमात्रं । यथा ।
"अपवादोऽन्यथा यथा विहार इवाश्रिता ।
अनपवादोऽन्यथा यथा विवर्त्त इवानुस्मृतः" ।
अस्य अर्थः । यत्र अध्यारोपापवादाभ्यां निष्प्र-
पञ्चं प्रपञ्च्यते इति वेदान्त-
सारः ।

अपवारणं क्ली (अप+वृ+णिच् भावे ल्युट् ।) व्यवधानं । अन्तर्धानं । इत्यमरः ।

अपवारितं त्रि (अप+वृ+णिच्, कर्मणि क्त ।) अन्तर्हितं । इति हेमचन्द्रः ।

अपवित्रं त्रि (पू+इत्र, ततो नञ्समासः ।) पवित्रतारहितं । अशुद्धं । यथा,—
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः" ।
इति स्मृतिः । (अपवित्रा । अपविद्धा । दूषिता । मलिना ।
"अपवित्रमिदं सर्व्वं मौर्व्यावन्धा यथा" ।
इति रामायणे । "यदैव वारिवेगोऽपविद्धा जाया यद्वे नीयते" । इति महाभारते ।)

अपविद्धः, त्रि (अप+व्यध्+क्त ।) प्रत्याख्यातः । निराकृतः । इति हेमचन्द्रः । (क्षिप्तः । प्रतिक्षिप्तः ।
"कुवेरस्य मनःशल्यं शंसतीव पराभवम् ।
अपविद्धगदो बाहुर्भग्नपक्ष इव द्रुमः" ।
इति कुमारसम्भवे । चूर्णीकृतः । दलितः ।
"अविद्यावद्विद्याव चूर्णते धमन्यथ" ।
इति रामायणे ।)

अपविद्धपुत्रः, पुं (अपविद्धः पुत्रः, कर्मधारयः ।) द्वादशविधपुत्रमध्ये पुत्रविशेषः । स तु येनचित् पालनासमर्थमातापितृभ्यां तयोरन्यतरेण त्यक्तोऽन्येन वा यत्नपूर्वं स्वीकृत्य पुत्रत्वेन परिकल्पितः । यथा,—
"मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते" ।
इति मनुः ।

अपविद्या, स्त्री, (अप अपकृष्टा विद्या यस्याः सा, स्त्रियां टाप् ।) [illegible] । इति राजनिर्घण्टः ।

अमर्ष, स्त्री, (नास्ति मर्षं यस्य बहु ।) अस्थावृक्ष ।
निर्मले त्रि । इति मेदिनी ।

अमला, स्त्री, (नास्ति मलं यस्याः सा, अथवा अम् + कलच् स्त्रियां टाप् ।) सातला । इति मेदिनी ।
भूम्यामलकी । इति राजनिर्घण्टः । भूम्यामलकी ।

अमस, पु, (अम गतिरोगादौ असच्।) कालः। निर्बोधः। रोगः। इत्युणादिकोषः॥ ("अमसो बालिशे काले रोगभेदे पुमानयं"। इति अमरः।)

अमा, व्य,, (न मा + का स्वरादित्वादव्यय।) सहार्थः। निकटः। इत्यमरः॥

अमा, स्त्री, (न माति क्षयोदयविशेषं परिच्छिनत्ति, मा + क, नञ्समासः।) अमावस्या। इति त्रिकाण्डशेषः॥ चन्द्रमण्डलस्य षोडशकला। तथा च स्कन्दपुराणीयप्रभासखण्डे।

"अमा षोडशभागेन देवि प्रोक्ता महाकला।
संस्थिता परमा माया देहिनां देहधारिणी"॥

अस्यार्थः। चन्द्रमण्डलस्य षोडशभागेन परिमिता आधारशक्तिरूपा क्षयोदयरहितत्वात् नित्या स्रक्सूत्रवत् सर्व्वानुस्यूता अमा नाम्नी महाकला प्रोक्ता। इति रघुनन्दनः॥ (सह। सार्द्धं। समीपं। निकटं। अन्तिकं।)

अमांस, त्रि, (नास्ति मांसं यस्य सः।) दुर्ब्बलः। इत्यमरः॥ अल्पमांसयुक्तः। मांसरहितश्च॥ (कृशः। क्षीणकायः। निरामिषभक्ष्यवस्तु।)

अमात्य, पु, (अमा सह विद्यते, अमा + त्यप्।) मन्त्री। इत्यमरः॥ तत्परीक्षा। यथा,—

"प्राज्ञो विनीतः कुशलः सत्कुलीनः शुभान्वितः।
शास्त्रार्थतत्त्वगोऽमात्यो भवेद्भूमिभुजामिह"॥ इति युक्तिकल्पतरुः॥

("भृता हि पाण्डुनामात्या बलञ्च सततं भृतं।
मान्यानन्यानमात्यांश्च ब्राह्मणांश्च तपोधनान्"॥ इति महाभारते।)

अमानन, क्ली, (मन् + णिच् + भावे ल्युट्, नञ् समासः।) अनादरः। न्यक्कारः। इति शब्दरत्नावली॥

("अतुष्टिदानं कृतपूर्व्वनाशनं
अमाननं दुश्चरितानुकीर्त्तनं।
कथाप्रसङ्गेन च नामविस्मृति-
र्विरक्तभावस्य जनस्य लक्षणं"॥
इति हितोपदेशे।)

अमानस्य, क्ली, (मानसाय मनसे हितं मानस + यत्, नञ्समासः।) दुःखं। पीडा। व्यथा। तद्युक्ते त्रि। इत्यमरः॥ आमनस्यं आमानस्यमपि पाठः॥

अमान्य, त्रि, (मन् + कर्म्मणि ण्यत्, नञ्समासः।) अमाननीयः। अनादृत्यः। मान्यशब्दस्य नञा समासः॥

अमामसी, स्त्री, (अमा सह सूर्य्येण मासो यस्याः, गौरादित्वात् ङीष्। पृषोदरादित्वात् ह्रस्वः।) अमावस्या। इत्यमरटीकायां रमानाथः॥

अमामासी स्त्री, (अमा सह सूर्य्येण मासो यस्याः, गौरादित्वात् ङीष्।) अमावस्या। इत्यमरटीकायां रमानाथः॥

अमायिक, त्रि, (न + माया + ठन्, तस्य इकः।) मायारहितः। माया विद्यते यस्य स मायिकः ततो नञा समासः॥

अमावसी, स्त्री, (अमा साहित्येन वसतश्चन्द्रार्कौ यस्यां, अमा + वस + अधिकरणे गौरादित्वात् ङीष्।) अमावास्या। इति शब्दरत्नावली॥

अमावस्या, स्त्री, (अमा साहित्येन वसतश्चन्द्रार्कौ यस्यां, अमा + वस + आधारे ण्यत् स्त्रियां टाप्।) कृष्णपक्षान्ततिथिः। सा तु चन्द्रमण्डलस्य पञ्चदशकलाक्रियारूपा तत्क्रियोपलक्षितः कालो वा। इति तिथ्यादितत्त्वं॥ सूर्य्याचन्द्रमसोर्यः परः सन्निकर्षः सामावस्या। इति गोभिलः॥ परः सन्निकर्षश्च उपर्य्यधोभावापन्नसमसूत्रपातन्यायेन एकावयवच्छेदेन सहावस्थानरूपः। इति रघुनन्दनः॥ तत्पर्य्यायः। अमावास्या २। दर्शः ३। सूर्य्येन्दुसङ्गमः ४। इत्यमरः॥ पञ्चदशी ५। इति स्मृतिः॥ अमावसी ६। अमावासी ७। इति शब्दरत्नावली॥ अमामसी ८। अमामासी ९। इत्यमरटीकायां रमानाथः॥ सा दृष्टेन्दुकला सिनीवाली १०। नष्टेन्दुकला च कुहूः ११। इत्यमरः॥ तद्व्यवस्थादि यथा। अथामावस्या। सा च प्रतिपद्युता ग्राह्या युग्मात्। वराहपुराणे चाण्डालप्रश्ने।

"पञ्चदश्यप्यमावास्या उभे पक्षे चतुर्द्दशी।
अस्नातानां गतिं यास्ये यद्यहं नागमे पुनः"॥

अतोऽत्र स्नानमावश्यकं। अतोऽत्र जीवत्पितृकेणापि स्नातव्यम्।

"अमास्नानं गयाश्राद्धं दक्षिणामुखभोजनं।
न जीवत्पितृकः कुर्य्यात् कृते च पितृहा भवेत्"॥

इति वचनं रागप्राप्तस्नाननिषेधकं।

"भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः।
तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु"॥

इति त्रयोदशीप्रकरणोक्तवचनाच्च॥ *॥ पैठिनसिः। "न पर्व्वसु तैलं क्षौरं मांसमभ्युपेयात् नामावास्यायां हरितमपि छिन्द्यात्"। इति॥ *॥

"पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृतौ।
अमायाञ्च नदीस्नानं पुनात्यासप्तमं कुलं"॥

अत्र दहत्यासप्तमं कुलमिति ज्योतिषे पाठः॥ *॥ व्यासः।

"अमावास्या भवेद्वारे यदि भूमिसुतस्य च।
गोसहस्रफलं दद्यात् स्नानमात्रेण जाह्नवी"॥
"सिनीवाली कुहूर्व्वापि यदि सोमदिने भवेत्
गोसहस्रफलं दद्यात् स्नानं यन्मौनिना कृतम्"॥

सिनीवाली चतुर्द्दशीयुक्तामावास्या अस्तापि प्रशस्ता एवमन्यत्रापि वारविशिष्टविधौ न युग्मादरः निरवकाशत्वेन सम्प्रयायोगात्। एतच्च मौनमरुणोदयकालमारभ्य स्नानपर्य्यन्तं। न तु स्नानकालमात्रे। तत्र,

"उच्चारे मैथुने चैव प्रस्रावे दन्तधावने।
स्नाने भोजनकाले च षट्सु मौनं समाचरेत्"॥

इति स्कान्देन तस्य सामान्यतः प्राप्तत्वात्। उच्चारे पुरीषोत्सर्गे॥ *॥ स्मृतिः।

"करतोयाजलं प्राप्य यदि सोमयुता कुहूः।
अरुणोदयवेलायां सूर्य्यग्रहशतैः समा"॥

स्नानमन्त्रः।

"करतोये सदानीरे सरिच्छ्रेष्ठे सुविश्रुते।
पौण्ड्रान् प्लावयसे नित्यं पापं हर करोद्भवे"॥

पौण्ड्रान् देशविशेषान्॥ *॥ मरीचिः।

"मासे नभस्यमावास्या तस्यां दर्भचयो मतः।
अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः"॥

यत्र।

"दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः।
अयातयामान्येतानि नियोज्यानि पुनः पुनः"॥

इति गृह्यपरिशिष्टवचनेनैव सिद्धौ अमावास्याया उपादानं।

"वार्षिकांश्चतुरो मासान्नाहरेत् कुशमृत्तिकाः।
आददीत नभस्येऽपि सद्यो यस्योपयोजनं"॥

इति संवत्सरप्रदीपधृतशिवरहस्यीयस्यापवादकमिति॥ विद्याकरधृतं।

"सद्यः शावत्सरं यावत् शुद्धिः स्याद्विप्रवर्षिणां।
ततः परं न गृह्णीयात् अपादौ यज्ञकर्म्मणि"॥ *॥

संवत्सरप्रदीपे।

"अमावास्यान्तु कन्यार्के तीर्थप्राप्तौ तथा नृप।
कृत्वा श्राद्धं विधानेन दद्यात् षोडशपिण्डकं"॥

तत्प्रमाणप्रयोगौ षोडशीशब्दे द्रष्टव्यौ॥ *॥ अमावास्यायामपि मलमासे श्राद्धाभावमाह कौथुमिः।

"संवत्सरातिरेको वै मासो यः स्यात्त्रयोदशः।
तस्मिंस्त्रयोदशे श्राद्धं न कुर्य्यादिन्दुसंक्षये"॥

सम्वत्सरप्रदीपे।

"एकराशिस्थिते सूर्य्ये यदि दर्शद्वयं भवेत्।
दर्शश्राद्धं तदाद्ये स्यान्न परत्र मलिम्लुचे"॥

यत्तु।

"जातकर्म्मणि यत् श्राद्धं दर्शश्राद्धं तथैव च।
मलमासेऽपि तत्कार्य्यं व्यासस्य वचनं यथा"॥

इति व्यासवचनं तत्पिण्डपितृयज्ञाख्यश्राद्धपरं॥ *॥ अमावास्याश्राद्धकालमाह छन्दोगपरिशिष्टं।

"पिण्डान्वाहार्य्यकं श्राद्धं क्षीणे राजनि शस्यते।
वासरस्य तृतीयांशे नातिसन्ध्यासमीपतः"॥

पिण्डानां पितृणां अन्वाहार्य्यं श्राद्धं मासैकतृप्तिजनकं यत्तत्तथा। तथा च मनुः।

"पिण्डानां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः"।

राजनि चन्द्रे। शस्यते इत्यनेन क्वचिच्चन्द्रक्षयाभावेऽपि अमावास्याश्राद्धं सूचितं। एतादृग्व्युत्पत्तेः सामिनिरसिमाधारत्वात् वक्ष्यमाणकात्यायनोक्तरीत्या क्षीणक्षन्निवावर्द्धमानामेदं साधारणं॥ *॥ यत्तु,—

"पितृयज्ञन्तु निर्व्वर्त्त्य विप्रश्चन्द्रक्षयेऽग्निमान्।
पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकं"॥

इति मनुवचनं तत्साग्निः पिण्डपितृयज्ञं निर्व्वर्त्त्य मासानुमासिकं प्रतिमासिकं श्राद्धं कुर्व्वीतेतिक्रमविधायकं। अमानुशब्दस्य वीप्सार्थकत्वं। तथा च।

"नक्षत्रवीथ्यामधुनोर्य्यमिर्भागे परिप्लुती।
अनुरेषु सप्तर्षिं च क्षीणे उपस्य कथ्यते"॥

चन्द्रक्षयेऽमावास्यायां न तु कात्यायनोक्तक्षये

समाप्ते पर्व्वमावास्ये प्रतिमासानुवर्त्तने । तदेव मासविशेषा । अथवा सर्व्वेषाममावास्याव्यतिरिक्त तत्तत्तिथिविवक्षया एकत्वमिति वक्तव्यम् । अत्र काम्यवर्षेषु शाकविधिविना अमावास्याव्यतिरिक्ताभिधानात् श्रीकादिभेदेन कत्वा काम्यमित्यमावास्याश्रीकत्वमन्ते । तत्तमावास्यायां प्रत्यायनिमित्तक श्रीरवर्णेनमयाकवचनार्थे श्रीकमासादिना न तत्तथा किन्तु स्वार्थाभिमतेन । एवमिति मघमासमन्ते । । अत्र एकमुहूर्त्तस्य मध्यमदराधोक्ताचरात्रिमेऽपि आर्द्धं तत्र आगः । विधायिकवाचं यदेति मासमध्ये नीलाभिधाय आदिपत्येपेति यदि विवमकारपोत वा युक्त । पूर्वाह्णे वै देवानां मध्यन्दिने मनुष्याणां अपराह्णे पितॄणां इति मध्या मनुष्येभ्य मनुष्यदर्शनेन पीतमादिव आर्द्धे परिणाम । एतत्प्रतिमुक्तमेव आपराह्णे प्रवीणोयं एतद् । तत्परस्य प्रवीणीयं पिता विवाहस्य दिवस प्रवीणताये नातिदृष्ट्यास्यामीतव इति अभ्यन्तरमीयमुहूर्त्ते आपराह्णे सर्व्वमीत इत्यर्थ । तेन ।

"मातामहस्य पुत्राणाम् कुर्य्यात्पादेन तु ।
मध्याह्नस्मिन्मुहूर्त्ते स्यादपराह्णस्ततः परं ।
सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत् ।
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु" ।

इति सप्तदशाभे मिविमुहूर्त्तवचने आपदि मुहूर्त्त दयमभ्युपगत वाविशभ्यकत्वात् । "चिन्नुक्तायि कर्त्तव्या पूर्वा दर्शो च सङ्गवे" । इति कालीय वचनात् । तेन पूर्व्वदिने मुहूर्त्तत्रयमावस्याले पर दिने सायाह्ने प्रवीणत्वाभावे पूर्व्वदिने तत्र श्राद्ध । एवेन नातिदृष्ट्यास्यामीतव एतनेन राक्षसीवेलायां विधिवत इति मैथिलमतमपास्तं । सर्व्वमेतद् आपराह्णाधिकमपि अमावास्यायां । इति श्राद्धविवेका । वैवाहदृष्ट्या अमावास्यापि अस्य एवं । अथवा परा हरा ।

"दिवाकरकरै पूर्वं दिवार्थं प्रवदन्ते ।
अमावस्या तिथि कार्य्या राक्षोदयात् रमनात्" ।

इति । । एवमेव पुन आद्धविषाद क्लोम परिशिष्टे आपादव ।

"यदा चतुर्दशीयामं तुरीयमनुपूरयेत् ।
अमावास्या क्षीयमाना तदैव श्राद्धमिष्यते" ।

चतुर्दशीयामं चतुर्दशीशेषभागविविधयाममिति च दिवसमामावास्याकल्पेऽपि चतुर्दशीचिन्हो प्रविवि तदैका कल्पनीति भावात् । तेन यदा अमावास्यायां चतुर्दशीयामभिविविधा चतुर्थ प्रहरं सर्व्वं विविधमूर्त्त वा व्यनुपूरयेत् अथवानुपूरयेदित्यर्थ । तुरीयमासात् सरीयमासस्य कृष्णपक्षमुहूर्त्ते सत्कालमे प्रवीयते । एवेन मध्यरत्नभाकारे विविधदैवसमाचरथे वा चतुर्दशी प्रवीयते । तस्यामेवसाधारणमवारभितात् अन्यविधवधायिकाकरणपराधनेयर्थे मूर्त्त शुभानामे देव न मेवविषमाने श्राद्धं । अत्र पूर्व्वोक्तेन सायाह्ने प्रवीयते एतदेव देवा तुरदात् । यतो यदिन सायाह्नेरीयापि तारुक सर्व्वासमकरैव भावं । मुहूर्त्तासविशेषे कर्म्मनिर्णयात् देवाताका । यथा च भविष्ये ।

यत्रैतावाविषये यदिवेता यदा भवेत् ।
सा तिथि सकला यथा विशेषे सायकालिकी" ।

इति । अत्र च मासुहूर्त्तमाराविचनोक्ता मुहूर्त्ता त्रिविधा पडिका यास्या वेयमवात् न मेवचन्यान्तिका यस्यमातरौतिकादिमिक्तके तथा यद्र भाव । तत्र पूर्व्वाह्णदैवे अत्रियदीयचतुर्दशपैयदा यदरिदे अमावास्या श्रीयमाना अनुकादिकामिनी न तु मुख्यादरिवतीतमावचतुर्दश वैयवा अनुवर्त्तिता । दर अमित्रवत्तर्व्वमात्मवेन दवि । तदैव पूर्व्वदर्शे यद भाव । श्रीयत्य यावानुदैयात् । तत्र यिबद्रधायामदिवस यद देवभिवचतुर्दशीभामयूमे नुकापराक्षीर्व्वविधिसूरमयुक्तस्य अपराधि अदेवेनैव चन्द्रमनात् दीयात् पूर्व्वदिने भाव न तु मुख्यापराह्णव्यात् मुख्यापराह्णेऽपि परदिने । अत एवत्र चतुर्दश्या अमावास्याभावात् अमावास्यात्मकसमायर्व्वन्त सिद्धि रमन्ते । तदैवैतत् मध्याह्नविशेषे क्या विविधो विवक्षते कम्यापि सामावास्यारात्राव । एवच अत्र पूर्व्वापरदिने सायाह्नव्यापीतिस्यमावसाथाने मुहूर्त्तादेरप्रयावसन्तापि पूर्व्वदिने दत्त भाव सायाह्नवीयायनन्तरपदविशेषान्यवत्वात् । विमुहूर्त्तायीयानुदैयाय । अत तु पूर्व्वदिने विमुहूर्त्तकामाविकमावास्या परदिने प्रवीयते मुहूर्त्तव्यापिनी अतो श्रीयमाना अत परदिने अपराह्णव्यापिमावेऽपि मुख्यापराह्णाभावात् आद्धम् । अन्यथा,—

"यदा चतुर्दशीयामं तुरीयमनुपूरयेत्" ।

इति विधिवाविधायं भवेत् स्यात् । ।

अथ "यत्र पूर्व्वाह्णे श्राद्धं तत्र अपराह्णेन चन्द्रमा न दृश्येत अमावास्यायां कुर्व्वीत" इति गोभिल विरोध । तथाचिचतुर्दशीयुक्तामावास्याया विनीवाल्येन प्राथम्यवत्त्वात् । तथाह तत्र ।

"अपूर्वं तपरात्रेन एकेन नेति चन्द्रमाः ।
अनुपश्यपेक्षया येन क्षीणे राजनि सेव्यति" ।
"अपराह्णेन चन्द्रमा न दृश्येत अमावास्यायां कुर्व्वीत" इति चतुर्दशीयुक्तं तत्तत्सवाभिधानम् । अथवा गोभिलीयसत्यापुरुषस्यान्वितेव तत्र योगवासात्परे । अथवा प्रथमदरं तुष्टवरं तत्र पर्व्वमासावधि विधये । श्रीवाक्यविषयेषु तत्तदैवमानुगत्वनीयम् । तथा "अपराह्णेन चन्द्रमा न दृश्येत अमावास्यायां कुर्व्वीत" इति श्रुतिरिदमपि मानार्थं चन्द्रदर्शं वा भवति दर्शं आदादिवदं न तु अमावस्यवत्यात्वं अपवक्तव्या आमवस्यप्रति विधिमानाधिकरणानुसारात् ।

"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी" ।

इति विरोधात् । श्रीण इति अमावास्येन यदा यत् श्रीमे राजनीयार्द्धं यदति यतातिथिमावचनम् । सर्व्वमेव पुनराद्धैवमेव तदा इति बद्धोभिलस्य वचनार्थ समर्थनम् । "अपराह्णेन" इत्यादि विशेषसूत्रसाविनिमो विनीवाल्यभेदेन अन्यपरत्वमेवति । यदि एव आह च तत्र ।

"पर्व्वोक्तं पूर्णमासेऽपि तथा दर्शेयरूपता ।
अमावास्या प्रवीतव तदन्त यादि विशोधयेत् । पूर्णमास्यपीत्येव यदुक्तं तदनुपराह्णमाह पूर्णसमासं मासान्तरीयामाप्यवन्तद्य सासमवस्याविषयं । एवं पूर्णमास्यमपूर्णमानवतुर्दशीर्गव यदिति आद्धविवक्षा । तद् विवमावास्यानुयुक्तमावास्यावस्था प्रवीणेत उपार्जितमात्रे आद्धमामावास्या प्रवीतित्वादिना । तत्र पूर्व्वदिने दिवा आर्द्धमुहूर्त्तमात्रे अमावास्या पर दिने च आर्द्धमहूर्त्तमात्रे तत्र योगयदिने आद्धमप्यमावास्या न प्राप्यते तत्र तत्र चतुर्दशमने विर्णयेत् दयात् । । अपीह विवाके नवनिदानोर्वैदिकमाह आश्वलायने नाशिता ।

अपराह्णव्यापी यदि दर्शविधिवाक्ये । पादिवार्ये विवक्षितो विनयतो युक्तमेवा । पारिवन्दनामुखमोक्षणवर्षं । । तदाहाह सामादाना ।

"अपयेदु दे चतुर्दशी पर्व्वो भवति चन्द्रमा ।
अमावास्यायामपि च सा दिवा भवेच्चा" ।

चतुर्दशीयामे यामे चन्द्रमा श्रीण चतुर्दशीवत् अमावास्यावत् भवति । "अपेक्षुयाम" इत्यादिवचनात् । अमावास्याविवि सावे सामावास्या दृश्यवते विशेषामत्रयायीवते । अमावास्यायाः सामे सावे अनुपवन दर्शव भवते । "दर्शस्य विवस्वमात्राविवमिवेदव यदा वा न तु सूर्यमामी चित्तवाद्विरयति" भाद्रविवेका । उत्तदिशायत्तमविभक्त । तेन विवाह्यावस्यावतिशेऽपि नाविवरूणि । । अथ विशेषमाह तत्र ।

"आयतास्थमामवास्या यदा मोदक वा भवेत् ।
विशेषमात्रे प्रवते यज्ञवादिविरो यथा" ।

आत्मामिति आदवोवेते मघमी इति प्रायेणार्थं । अपापादिविरो योविविरोध । अत्र दोषवाचा कालकल्प इति परिशिष्टप्रकाशः । अत्र योग प्रयुक्तरात्रीविविधार्थं । यथा च मासमित्युक्त प्रयुक्तार्थं ।

"यदोमूत्रपदि सातो प्रमाद्ये न कर्म्मता" ।

अत्र प्रमाद्ये चतुर्दशीविविक्तायां यदा कदाचित् विधि सामरियामावास्यादापि अव्यव इति । । यो विशेषमाह च तत्र ।

"अपेक्षुतायां तत्र देवप्रविक्षे
अनुपर्व्वमोलकामयिता ।
करणम् तत्र यदवेति प्रयुक्-
मिव व्योविशकरिनो करणं" ।

अत्र मावते अमावास्यायां चतुर्दशीयोगकल्प परिष्ठा चतुर्दशीयोगा वा यथा प्रवाचित्र अथायवदयनाक यातो भद्रप्रविवक्ते । यथात् चतुर्दशमाध्यात अपराह्णे इति । तस्य एव अमावास्यावाम तत्र सर्व्वं आनुधीति । अव्य

मानावास्या सम्मताम इति विशेष । तेन नार्त्तीयेऽस्यैकदोषमयदिने चन्द्रक्षयभावे यद्यपि यदा चतुर्द्दशीगामिनिति वचनात् पूर्व्वदिने एव श्राद्ध प्राप्नोति तथापि तद्वचन चन्द्रक्षयानुरोधमूलमिति । तत्चन्द्रक्षयानुरोधात् द्वितीयायामपि परभागस्थाने श्राद्ध चन्द्रयेतद्विशेषाभिधान व्यर्थं स्यात् । * । अत्रापि विशेषान्तरमाह स एव । वर्द्धिष्णौ दादशैकस्य यथाक्लिष्टद्वितीयया परिदृश्यो नोपपादित । यथो माघ । द्वितीयया नाम्या चतुर्यामाद्यानक्रया परिदृश्यश्चन्द्रो न भवति किन्तु तदधिकन्यूनकलयेति । तेन मलमासयुताब्दे चन्द्रनाशदृश्ययोरपि चतुर्द्दशगन्तयानादि दर्शसमयानपर्य्यन्त एव इति । मलमासयुताब्दात् एकक्षामलमासादब्दद्वयानन्तराब्दे-त्तीयेऽब्दे मलमासस्यासम्भवादिति । * । चन्द्रक्षयानुरुद्ध द्वितीयादत्तनुरक्षरति स एव ।

"एव चार्द्धं चन्द्रनसो विदित्वा
श्रीरे तस्मिन्नपराह्णे च दद्यात्" ।

एव चार्द्धं तविविशेष । * । स्तिमितायां अपराह्णमाह स एव ।

"स्तिमिता या चतुर्द्दश्या अमावास्या भवेत् क्वचित् ।
उन्मिता ता विदु केचिद्गतेष्यमिति चापरे" ।

द्वितीयाया पूर्व्वमुक्तत्वात् । वर्द्धमानायाश्च वक्ष्यमाणत्वात् अन्य वचनस्य स्तिमितापरत्वं । उन्मिता नीया दिवन्नोकमानयानर्धा केचित् चतुर्व्वेदिन । अपरे श्वोदिन वानेव उदेष्यन्नुपयच्छत श्राद्धादेति शेष । उदेष्यमित्यत्र मताध्वानितिपाठे तव प्राप्त द्विश्वोकमापयाय अध्वा अनर्दति तवाध्वा प्रश्नेयर्थं । "वक्राच्छन्दोगा उभयानुरोधादिच्छत उभदादर कुर्व्वन्ति" इति कात्यायनस्तरस । * । वर्द्धनाय लघुधारीत ।

"त्रिमुहूर्त्तादि कर्त्तव्या पूर्व्वा दर्श च बहूचे ।
कुहरन्ययुंनि कार्य्या यथेष्ट सामवीतिनि" ।

अत्र त्रिमुहूर्त्तत्वपादानात् स्तिमिताया पूर्व्वदिने त्रिमुहूर्त्तनास्तलाभेऽपि बहूचाना श्राद्ध । न तु मुख्यापराह्णलाभादपि परदिने । सामगाना तत्राप्यनियम । एवादृस्तिवय एव उभयत्रापराह्णकालेऽपीय व्यवस्थेति श्राद्धविवेक । मुख्यापराह्णस्य एकदिनमात्रलाभेऽप्युभयदिनालाभात् । * । वर्द्धमानाया व्यवस्थामाह कात्यायन ।

"वर्द्धमानाममावास्या लक्षयेदपरेऽहनि ।
यामांस्त्रीनधिकान् वापि पितृयज्ञस्ततो भवेत्" ।

यामांस्त्रीनिति पूर्व्वदिवसीययामत्रयन्यूनचतुर्द्दश्यपेक्षया । अथैव वासरस्य तीयायानुरोधेन श्राद्धविधानात् क्षयनमावास्यायाश्च चतुर्द्दश्यायादीवस्थायपरिग्रह । तथ । विधिद्वैधे द्वौयादिभेदेन खण्डविशेषपरिग्रहाय वासरस्य तीयायापेक्षा अन्ययोनयदिने वासरस्य तीयायाप्राप्तौ श्राद्धलोपापत्ते । प्रागुक्तनिरमादेः कृष्णन्नवेलस्य निर्णयत्वापत्तेश्च यत पर्य्युदस्तेतरकालस्यापि परिग्रह । यदा तु पूर्व्वापरदिनयोरन्यतरस्यैव परिग्रहस्तदा यथायोग्य तत्रैव श्राद्धानुष्ठानदयपर्य्युदस्तेतरकालकृतमादिमुहूर्त्तपञ्चकरौहिणादिमुहूर्त्तचतुष्टयवासरस्य तीयायाशेषापराह्णमुहूर्त्तदयकाल । तथाक्रममाहात्म्यमाग्न्यमध्यप्रहरान्तर-प्रहरान्तवनन्वेन ज्ञेया । एवमष्टदशतिथावपि नाति सन्ध्यासमीपत इति पूर्व्वोक्तत्वात् ।

"सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्ध तत्र न कारयेत्" ।

इति मत्स्यपुराणात् ।

'रात्रौ श्राद्धं न कुर्व्वीत राक्षसी कीर्त्तिता हि सा ।
सन्ध्ययोरुभयोश्चैव सूर्य्ये चैवाचिरोदिते" ।

इति मनुवचनाच्च ।

"ऊर्द्ध मुहूर्त्तात् कुतपात् यन्मुहूर्त्तचतुष्टय ।
मुहूर्त्तपञ्चक वापि स्वधाभवनमिष्यते" ।

इति मत्स्यपुराणान्मुहूर्त्तपञ्चकनियम कुतपादिति ल्यब्लोपे पञ्चमी कुतपमारभ्येत्यर्थं । तत्रैव ।

"अपराह्णे तु सम्प्राप्ते अभिजिद्रौहिणोदये ।
यदत्र दीयते जन्तोस्तदक्षयमुदाहृत" ।

इत्युक्त । 'पूर्व्वाह्णो वै देवाना मध्यन्दिन मनुष्याणा अपराह्ण पितृणा" । इति श्रुति । वासरस्य तृतीयाश इति कात्यायनवचन ।

"सायाह्नस्त्रिमुहूर्त्त स्यात् श्राद्ध तत्र न कारयेत्"

इत्येकविंशत्यादत्वात् वासरतृतीयाशीयापराह्णमुहूर्त्तदयस्य लाभ । इति तिथ्यादितत्त्व ।

अमावासी, स्त्री, (अमा साहित्येन चन्द्रार्कयोर्वासो यत्र, गौरादित्वात् ङीष् ।) अमावस्या । इति शब्दरत्नावली ।

अमावास्या, स्त्री, (अमा सह चन्द्रार्कौ वसतो यत्र तिथौ सा, अमा + वस + आधारे ण्यत्, स्त्रिया टाप् । वृत्त्वात् वृद्धि ।) अमावस्यातिथि । इत्यमर ।

अमित्र, पु, (अमरोगे इत्रच् ।) शत्रु । इत्यमर । (रिपु । विपक्ष । प्रत्यनीक । प्रतिद्वन्द्व ।

"नाद्यरूपे नमामित्रे नमस्ते शत्रुकामुके ।
अमित्रो मित्ररूपेण भ्रातुस्त्वमसि सम्प्रत" ।

इति रामायणे ।)

अमित्र, स्त्री, (अम् रोगे कर्म्मणि इत्रन्) श्रौचिकदुःख । इत्यादिकोष । क्षमाभाव । (न लिपन्धस पश्चात्तास, छन्नाभाव । नास्ति लिपन्धस यस्य तत् छन्दोना ।)

अमी, [न्] त्रि, (अम् रोगे + भावे घञ्, मान्तत्वात् वृद्ध्यभाव, अमो रोगो विद्यतेऽस्य, इन् ।) रोगी । यथा । अमार्थ । इति वोपदेव ।

अमीव, स्त्री, (अम + वन्, ईड़ागम ।) पाप । दुःख । यथा,—

"व त्वाह भवभीताना प्रपन्नाना भयापह ।
आपन्नेऽस्मि पापनिर्मुक्त पादपद्मोदशनीवम्" ।

इति श्रीभागवत ।

("न हि तमीदृश हता वत्सामीव दयानन ।
जीवितु प्रक्षव चिर विष पीलेव दुर्म्मति" ।

इति रामायणे ।)

अमुक, त्रि, बुद्धिस्थतोपसंस्थितवत्तत्धर्म्मावच्छिन्न । सकलदविविशेषधर्म्मपुरस्कारेण तत्तदनुवाचक । अमुका इति भाषा । अदस्शब्दस्य अधि इति योगोऽत्वाभावे अकोऽश्चरन्त उकि भवति अमुक इत्यापनिश । इति यथा,—

"अमुकामुकयोश्चैव तुच्छमय स्वं

इति श्राद्धतत्त्व। (अनिवार्ये इति नक्तर अमुकनामाधमजीवि स्व चयेत् । इति कुल्लूकभट्ट ।

"सन्निवेश्य प्रमादश्च लाभेनैव लिखे तत्र मेऽमुकपुत्रस्य अमुकस्य नर्द्धते

इति नारद ।)

अमुक्ता, स्त्री, (मुच् + क्त, न मुक्ता समास ।) छुरिकाविशेष । इति छालकुरी इति भाषा । मुक्तिरहित । (अप्राप्तमोचन । अबद्ध ।

"अमुक्ता भवता नाथ मुहूर्त्तमपि न

इति साहित्यदर्पणे ।

"अमुक्ता नानसैर्दु खैरिच्छाद्वेषभयान्

इति महाभारते । उत्तुङ्गादिक ।

"उत्तुङ्गाद्धिकमनुत्तव निवृद्धं तिनवा

इति ।)

अमुत्र, अ, (अमुष्मिन् अदस् + त्रल् प्रभान्तर । परलोक । इत्यमर इत्यर्थस्य वाचक ।

"अवनेवालका सर्व्वे नगरेऽमुत्र भा

इति कथासरित्सागरे । भरतान्तरे ।

"तथैव च समाख्याते तन्त्रियो लोक अप्रिय सर्व्वभूताना सोऽमुत्रेह च

"इच्छन्ति सतत लोक इह चामुत्र च

इति महाभारते ।)

अमुष्यपुत्र, पु, स्त्री, (अमुष्य पुत्र निपातनात् ।) प्रख्यातवंशोद्भव । कुलीन । जटाधर ।

("न्यादानुष्यायदुष्मार्योऽमुष्यपुत्रो

इति जटाधर ।)

अमूर्त्त, त्रि, (मूर्च्छ + क्त, नञ्तत्पुरुष भिन्न । मूर्त्तिरहित । यथा । शून्यत्वादिति वोपदेव । न्यायमते । काल । दिक् । आत्मा । यथा स संख्या १ परिमिति २ पृथक्त्व ३ विभाग ५ । आकाशस्य विशेषगुण कालदिशोर्विशेषगुणो नास्ति आत्मगुणा । बुद्धि १ सुख २ दुःख ३ द्वेष ५ यत्न ६ भावनाख्यसंस्कार अधर्म्म ८ । इति भाषापरिच्छेद । अदृष्टविरहित । वायु । अन्तरीक्षञ्च

"सन्निवेशो नेत्रदृष्टो यस्तु तन्मूर्त्तमु निजत्वमभिन्नत्वं मूर्त्तमन्तं निवत्तदय

"त्रिविधत्वं वया तेन प्रवतो मन र मशपरत्वमूर्त्तत्वक्रियायोगाश्रया अमी

इति भाषापरिच्छेद ।)

अमूदृश, त्रि, (पाणिनिमते तु, अमुरि अदस् + दृश् + कञ्, दस्थाने आत्वे

उत्तमस ।) एकमकार । कलटूक । इति मुग्ध बोध । यथा — अमृतूमी तत् अतिरति रचितैः । इति नैषधं ।
अमृतनर्म त्रि मृतवर्जितं । प्रमाणममर्म । नास्ति मृत यस्मात् तन्त्रीपूर्वं कमपस्य ।
अमृता, स्त्री (नास्ति मृतं क्रिया यस्याः सा स्त्रियां टाप् ।) वापिभिन्नावस्था । इति शब्दचन्द्रिका । मृतरहित त्रि इति मुग्धबोधः ।
अमृतान क्लो (अमृतातृस्तं नास्ति यस्य अमृतमानं, अस्य अमृतानपृथक्रोमकत्वात् तथात्वं ।) वीरक मूलं । इत्यमरः ।
अमृतं क्ली (म+भावे क्त नास्ति मृत मरणं यस्मात् तत् तत्पायिनां मरणाभावात् तस्य तथात्वं ।) समुद्रोत्थदेवभक्ष्यामरत्वजनकद्रव्यविशेषः । यथा समुद्रमथनेन लक्ष्मी प्रादुर्भूता तदा देवा इन्द्रं रक्षा कृत्वा क्षिरसमुद्रमथने अमृतकलशं समुद्धृत्य तत् दुर्वासस आनयत् तमुद्रमथनं मन्दं पश्चात् समुद्रमथने अमृतपूर्णकलशं धृत्वा धन्वन्तरिरुत्थितः । इति भारतमात्स्ये । तत् पर्यायः । पीयूषं २ सुधा ३ । इत्यमरः । पेयूष ४ । इति शब्दरत्नावली ।
निर्जरं ५ । समुद्रनवनीतं ६ । इति शब्दरत्ना वली । यज्ञं । हतं । यज्ञशेषद्रव्यं । अयाचित द्रव्यं । मुक्तिः । इति मेदिनी । दुग्धं । औषधं । विषनाशार्थं । जलमात्रं । पारदः । इति राज निर्घण्टः । धनं । घृतं । स्वर्णं अमृतगीतदर्दं । पर्वं । स्वादुद्रव्यं । इति हेमचन्द्रः ।
अमृत पुं (न+मृ+क्तः इ अमृतमारकः ।) धन्व न्तरिः । देवता । इति मेदिनी । वाराहीकन्द । यमपुत्रः । इति राजनिर्घण्टः । चन्द्रः । अग्निः सूर्यः । इति भरतद्वयाद्ि ।(अमृता यथा महाभारते —
इन्निवेश्य पुनः प्राप्तौ यदपेय पदं मम ।
मतवत्य पुनः वृद्धिर्भ्रातामा भ्रातृत् यः ।
मत्वा परमब्रह्मसम्बन्धरमत यः ।
अमृतायर्पं किंचित् तां च यद्वा यात्रा शक्ति ।
यत्नं । सुरपतिलिङ्गं । विद्यो यदम्यामममथे परिग्रहितो नामधेयः ।) मरणरहिते त्रि । यथा । 'अमृते मारवे कृष्णः । इत्यमरः ।
अमृतकरा स्त्री (अमृतवत् गुणाद्भुतेरा यस्याः सा ।) महामारी । इति राजनिर्घण्टः ।
अमृतकरतिका स्त्री, (अमृतस्य पीयूषस्य करतिका भरीव) ज्योत्स्ना । इति राजनिर्घण्टः ।
अमृतदीधिति, पुं (अम् तत् अतोऽमृताविक दीधितयो यस्य सः ।) चन्द्रः । इति शब्दरत्नावली ।
("अमृतदीधितिरिव निर्मल न हि नाम मुख । इति नैषधे ।)
अमृतगर्भ, स्त्री पुं (अमृतमिव स्वादु फलं ।) नारा यणः । फलोला । इति राजनिर्घण्टः । नार याती । इति भावप्रकाशः । यथा । यथामलकर्वं धत्तलताकाविषमसृतिरीवि नामाली इति पठितं ।

"अमृतवर्गस्तु यथं सुधाद् चीन् घृतेद्यात् ।
देवषु मुहूर्तानां सत्त्वं सम्पद्यते मात्रे ।
इति भावप्रकाशः ।
अमृतफला, स्त्री (अमृतवत् स्वादु फलं यस्याः सा स्त्रियां टाप् ।) द्राक्षा । आमलकी । इति राज निर्घण्टः । (बहुमूर्तिरोचिता । सर्वविशिका । नामपाती । इति भावप्रकाशः ।
अमृतरसी स्त्री (अमृतवत् रसो यस्याः रोग नाशकत्वात् तथात्वं । मुद्गपर्णी । इति रत्नमाला ।
अमृतलता स्त्री (अमृतवत् स्वादु रसो यस्याः सा, स्त्रियां टाप् ।) वापिप्रसाधा । इति राज निर्घण्टः । (लताविशेषा । सा च
"प्रतीचयामक्लेश सिञ्चित मणिपिष्टकं ।
गुग्गुलीघृतधितुर्य महेन्द्रपद्मलिनी ।
ततः समुद्भूतं ज्ञात्वा स्नायन्तेऽमन्यीमित ।
ततोऽन्वर्थिताबनि तु विधितं विश्वचेष्टिते ।
विपाकपूर्वकं येन बलिकायां पुटे पचेत् ।
सतोऽमृतरसा नाम ताबद्दन्तरशायिनी ।
इति भावप्रकाशे ।)
अमृतसम्भवा स्त्री (सम्+भू+भावे अप् अमृत तस्य मरणाभावस्य रोगाभावस्य इति यावत् सम्भव उत्पत्तिर्यस्याः सा स्त्रियां टाप् ।) गुडूची । इति राजनिर्घण्टः ।
अमृतसारज, पुं (अमृतस्य सार तस्मात् जायते अमृतसार+जन्+ड, उपपदसमासः ।) गुडः । शर्कराभेदश्च । इति राजनिर्घण्टः ।
अमृतसू, पुं (अमृतं सुधारं सूते अमृत+सू+ क्विप् उपपदसमासः ।) (अमृतान् देवान् सूते अमृत+सू+क्विप उपपदसमासः ।) चन्द्रः । इति हेमचन्द्रः । देवमातरि स्त्री । अमृतानां देवानां सूः प्रसूतिः ।
अमृतसोदर, पुं, (अमृतस्य सोदर सोदर्यं यस्य एकस्मात् समुत्पन्नत्वात् तथात्वं ।) घोटकः । इति राजनिर्घण्टः । (उच्चैःश्रवा यथा ।
"सुरादेवी समुत्पन्ना तुरगः पाण्डुरस्तथा" ।
इति भारते ।)
अमृतस्रवा, स्त्री, (स्रवति इति स्रु+अच् । स्त्रियां टाप् । अमृतस्य रसः स्रवति यस्याः सा ।) रुदन्ती वृक्षः । लताविशेषः । अमृतलता । रुद्रवन्ती २ जम्बुकिका ३ संजीवनी ४ जितलता ५ । अस्याः गुणाः । कटुत्वं । ईषत्तिक्तत्वं । रसायनत्वं । रक्तपित्तं । विस्फोटकामवातकफशुकवातादि नाश । इति राजनिर्घण्टः ।
("स्रवाम्रुतकला यथा ईषत्तिक्ता रसायनी ।
स्नायी विस्फुटनं वामता भक्तं भवेत् ।
इति राजनिघण्टः ।)
अमृता स्त्री (नास्ति मृतं मरणं यस्याः सा ।) गुडूची । मदिरा । इन्द्रवारुणी । ज्योतिष्मती । गोरक्षदुग्धा । हरितकी । तुलसी । दूर्वा । आमलकी । हरीतकी । इति राजनिर्घण्टः । गुलञ्चो । इति शब्दमाला । पिप्पली । इति मेदिनी । अन्यादेवकलशकृता यदीयो । आ

विरेचने प्रशस्ता । इति राजवल्लभः । (सक पीठिकाविशेषः ।
("गौरीभिरिव गान्धैरिवामृताख्यादिरम्यक" ।
इति रघुवंशे ।)
अमृतात्मा [न्] पुं (अमृतवत् आत्मा इव स्वर्वर्ग यस्य सः ।) देवता । इत्यमरः । (अमृतं रूपं आत्मा स्वर्गं यस्य सः ।)
अमृताशन पुं, (अमृतमिव भक्ष्यं यस्य रसोत्पादि त्वात् देवैः ।) घटोत्कच । इति शब्दानिघण्टः ।
अमृतान्धस, पुं, (अमृतं भक्षति सूते अव+ आश्रयात् अदति भुङ्क्ते । अमृतस्य भक्षणं, शचीपतिस्तथा ।) देवता । इति शब्दानुचः ।
अमृतावर्त्त स्त्री, (अमृतामभवति मरणं यस्य सः ।) हरिवंशोपाख्यानं । यथा,—
"अमृता चतुर्भुजामृतचोक्षधारणं ।
नारदेन्द्रवरेवरम्भाशनमीरिवं ।
अशिवं लक्षणाधृत्य त्रिभदैकाल्परायणे ।
सत्याकारोचनाहरणास्पात्रमिकाश्य" ।
इति भावप्रकाशः ।
अमृताङ्गी, स्त्री (अमृतस्येव आह्लादो यस्याः सा ।) गुल्मविशेषः । सतपर्णीका । कषायिकामूलं २ अमृतं ३ । इति हेमचन्द्रः ।
अमृताहरण पुं (अमृतमाहरति स्वर्गलोकात् भवनायं अर्थात् भूलोकं नयति आ+हृ+ कर्त्तरि ल्युट् यद्वा गरुडरूपेण ।) गरुडः । इति शब्दरत्नावली । ("पुरा किल गरुडो मातु र्विनतया कद्रूदासीत्वनिस्तारार्थी सर्पेभ्यः निमित्तं सोमरक्षकैर्देवगन्धर्वादिभिः सह संग्रामं कृत्वा अमृतमाहृतवान्" । इति पौराणिकी कथा । महाभारतस्यादिपर्वणि ।
"सुपर्ण समभूतं यद्वा स्वर्गमागतमेव च ।
यतो दास्यान्निमोक्षो भविता तव खेचर ।
इत्युक्तो गरुडः सर्पैस्ततो मातरमब्रवीत् ।
गच्छाम्यमृतमाहर्तुं भक्ष्यमिच्छामि वेदितुं ।

न चार्थं सुरगर्भेणाममृतमानिवे ।
परिभ्रमन्तममितं तीक्ष्णधारमयस्मयं ।
ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणाम् ।

चक्रमुत्तमया मध्ये सोममथावदत्तदा ।
तमुत्थायामृतं तत्र वेगवेगवती बली ।
उत्पपात महावेग अमृतमुत्तमं शोभनाम् ।

एवं तदमृतं तेन हृतमाहृतमेव च ।
विनिष्टाय तथा यथा गरुडेन महात्मना" ।)
अमृताह्व, स्त्री, (अमृतमाह्वयते स्पर्द्धते वा +ह्वे+क यस्य गुणवत्त्वात् तथात्वं ।) चतुर्विधनानाविधरोगनाशकवलवर्द्धना- मलकं । अमृतफला । वचिवक २ । अस्य गुणाः । दुष्टं । मलपाचितं । लघुत्वं । धारणं । पथ्यं । बलाजनकादिमलं । मधुरकटुकषाया । रुच्यं । स्वादुत्वं । शिरोरोगाविलत्व । तत् मधुररसैः

अम्ब

वङ्गल सम्भवे । इति भावप्रकाशः ॥

अमृतोत्पन्नं, क्ली, (अमृतं विषमिव उत्पन्नं गौरवर्णत्वात् ।) खर्परीतुत्थं । इति राजनिर्घण्टः ॥

अमृतोत्पन्ना, स्त्री, (अमृतं सद्य उत्पन्नं यस्या सा, 'आहिताग्न्यादिभ्यो निष्ठायाः परत्रवचनमिति निष्ठाया परनिपात" ।) मक्षिका । इति राजनिर्घण्टः ॥

अमृतोद्भवं, क्ली, (अमृतं विषमिव उद्भवति श्यामवर्णत्वात्, उद्+भू+अच् ।) तुत्थं । खर्परीतुत्थं । इति राजनिर्घण्टः ॥

अमेधाः, [स्] पुं, (नास्ति मेधा यस्य सः, समासान्त असिच् ।) मूढः । मूर्खः । इति हेमचन्द्रः ॥ ("नत्र वनकात् पूर्वका यन्तरका अमेधसाम् । सुमेधसामन्तरके सदा सक्के सदन्तुवे" । इति वोपदेवः ।)

अमेध्यं, क्ली, (न मेध्यं पवित्रं विरोधे नञ्समासः ।) पुरीषं । इति शब्दरत्नावली ॥ अपवित्रे त्रि ॥ (अपवित्रं । मलमूत्रादिकं यथा ।

"नाग्निं मुखेनोपधमेत् नग्नां नेक्षेत च स्त्रियम् ।
नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्" ।

इति मनुः ।)

अमोघ, त्रि, (न मोघो निष्फलः, नञ्समासः ।) सफलः । अव्यर्थः । इति मेदिनी ॥ सर्वविशेषे पुं । इति शब्दरत्नावली ॥ (इष्टसम्पद । अवन्ध्यः । अविफलः ।

"दत्तेनेव सामन्तपतं वीक्ष्य तथा ।
इति कुमारसम्भवे ।
"अमोघा प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः" ।
इति रघुवंशे ।)

अमोघा, स्त्री, (न मोघा निष्फला, नञ्समासः ।) पाटलिवृक्षः । विडङ्गः । इत्यमरः ॥ हरीतकी । इति मेदिनी ॥

अम्ब गतौ । (इति कविकल्पद्रुमः ।) भ्वादि-पर-सक-सेट् । अम्बति । इति दुर्गादासः ॥

अम्बकं, क्ली, (अम्बति गच्छति दर्शनं यदनेन, अम्ब+ण्वुल् वा अम्बते शब्दं करोति, अम्ब+कर्मणि इप् स्वार्थे कन् ।) नेत्रं । इति हेमचन्द्रः ॥

"...वित्रस्तनयनस्य...
...अम्बकं ददर्श" ।

इति कुमारसम्भवे ।) ताम्रं । इति राजनिर्घण्टः ॥

अम्बरं, क्ली, (अवति रक्षति शब्दे+भावे घञ्, अम्बं शब्दं राति आदत्ते अम्ब+रा+क ।) वस्त्रं । ("रवन्नुल्ला दुलिना या विरजा नवितान्वरा" । इति रामायणे ।) आकाशं । ("दर्शयामि तवाम्बरे" इति वाङ्गि-पर्वणि ।) कार्पासं । सुगन्धद्रव्यविशेषः । इति विश्वः ॥ अभ्रधातुः । इति राजनिर्घण्टः ॥

अम्बरीषं, क्ली, (अम्बते शब्दायते अत्र, अबि+अरिष वा दीर्घं निपातनात् ।) भर्जनपात्रं । भाजनखोला । इति भाषा । इत्यमरटीकायां रमानाथः ॥

अम्बरीष, क्ली, (अबि+वर्ण+कन्माय इन्, अम्बा न्ता ईर्ष्या यस्मात् तत्, पिङ्गवत् पृषोदरादित्वात् स्वर्णविपर्ययेण साधु ।) भ्राष्ट्रः । भर्जनपात्रं । इत्यमरः ॥ युद्धं । इति मेदिनी ॥

अम्बरीष, पुं, (अम्बते पच्यते अत्र, निपातनात् साधु ।) विष्णुः । शिवः । इति त्रिकाण्डशेषः ॥ किशोरः । भास्करः । नृपभेदः । स तु सूर्यवंशीयनाभागराजपुत्रः ।

("नभोरथसुतो राजा भुत इत्यभिविश्रुतः ।
नाभागस्तु श्रुतस्याभूत् पुत्रः परमधार्मिकः ।
अम्बरीषस्तु नाभागिः सिन्धुद्वीपपिताऽभवत्" ।

इति हरिवंशे ।) नरकभेदः । आम्रातकवृक्षः । अनुतापः । इति मेदिनी ॥

अम्बष्ठ, पुं, (अम्बायां मातरि तिष्ठति, अम्बा+स्था+क, "अम्बाम्बेति" षत्व, "आपो संज्ञाछन्दसोर्बहुलमिति ह्रस्व, अब्रह्मजातत्वात् तस्य तथात्व ।) देशविशेषः । विप्राद्वैश्यायामुत्पन्नः । इति मेदिनी ॥ अयं चिकित्सावृत्तिः वैद्य इति ख्यातः । इत्यमरटीकायां भरतः ॥ हस्तिपकः । यथा,—

"अम्बष्ठाम्बष्ठ ताव नौ देह्यवकाशं मा चिरं" ।

इति श्रीभागवतं ॥ क्षत्रियजातिविशेषः । इति पश्चिमदेशे प्रसिद्धः ॥

अम्बष्ठकी, स्त्री, (अम्बष्ठ कायति स्वगन्धप्रकाशेनाह्वयति, अम्बष्ठ+कै+क, गौरादित्वात् ङीष् ।) लताविशेषः । आकनादि शिलुखी इति च भाषा । तत्पर्यायः । पाठा २ अम्बष्ठा ३ कुचेली ३ पापचेलिका ५ एकाष्ठीला ६ वरा ७ तिक्ता ८ प्राचीना ९ एकोषिका १० रसा ११ । इति रत्नमाला ॥ विद्धकर्णी १२ स्थापनी १३ श्रेयसी १४ रसा १५ पापचेली १६ वनतिक्तिका १७ । इत्यमरः ॥ अविद्धकर्णी १८ अविद्धकर्णा १९ । इति तट्टीका ॥ अम्बष्ठिका २० वृकी २१ विद्धकर्णिका २२ दीपनी २३ तिक्तपुष्पा २४ बृहत्तिक्ता २५ शिशिरा २६ वृकी २७ मालती २८ देवी २९ वनपर्णी ३० । इति राजनिर्घण्टः ॥ अस्या गुणाः । कषायत्वं । कफघ्नत्वं । त्रिदोषनाशित्वं । इति राजवल्लभः ॥ तिक्तत्वं । गुरुत्वं । उष्णत्वं । वातपित्तज्वरपित्तदाहशूलनाशित्वं । भग्नसन्धानकारित्वं । इति राजनिर्घण्टः ॥

अम्बष्ठा, स्त्री, (अम्बायां मातरि स्वोत्पत्तिस्थाने इव तिष्ठति, अम्बा+स्था+क, "अम्बाम्बेति" षत्वं, ह्रस्वश्च, स्त्रियां टाप् ।) क्षुपविशेषः । अम्बाड़ा इति भाषा । अस्याः पर्यायः । वालिका २ अम्ला ३ शठाम्ला ४ अम्बाष्ठिका ५ अम्बिका ६ अम्बा ७ मागधी ८ दृढवल्का ९ नदरिका १० गन्धपत्री ११ विषघ्नी १२ श्रेयसी १३ मुखवाचिका १४ छिन्नपत्री १५ हरिमली १६ । अस्या गुणाः । कषायत्वं । अम्लत्वं । कफकण्ठरोगवातवमनदाहनाशित्वं । रुचिकारित्वं । इति राजनिर्घण्टः ॥ पाठा । चाङ्गेरी । यूथिका । इत्यमरमेदिनीकरौ ॥

अम्बष्ठिका, स्त्री, (अम्बष्ठा+स्वार्थे कन्, स्त्रियां टाप् ।) अम्बष्ठा राजनिर्घण्टः ॥ १ प्रसिद्धा । इति र...

अम्बा, स्त्री, (अम्बते इञ्, स्त्रियां टाप् ।) अम्ब । इत्यमरः ॥ "बाल्ये ... इति विष्णुपुराणे ।) नाट्योक्तौ मैव । इत्य... इति जटाधरः ॥ दुर्गा । इति केचित् ॥

अम्बालिका, स्त्री, (अम्बा+ला+क, स्वार्थे कन्, स्त्रियां ...) रत्नावली ॥ अम्बष्ठा ... राजमाता । इति म... ज्ञा दुहिता या च । "अम्बालिका च ... अम्बिकाम्बालिके ... ...विचित्रवीर... इति महाभारते ।)

अम्बिका, स्त्री (अम्बा- ...) दुर्गा । "... इति कुमारसम्भवे । ... इति ... इति महाभारते ।)

अम्बिकेय, पुं, (पाणिनि... ढगात्, अम्बिका+ढ ...) गणेशः । कार्त्तिकेय ... यस्य अपत्यमिति ढ...

अम्बिकेयक, पुं, (अम्बिके... इति जटाधरः ॥

अम्बु, क्ली, (अम्बते ... इत्यमरः ॥ भाषा इति ... निर्मितानि" । इति म... ...)

अम्बुकण्टक, पुं, (अम्बुनि ... स्वार्थे कन् ।) कुम्भीर...

अम्बुकिरात पुं, (अम्बुनि ...) कुम्भीरः । इति त्रिकाण्ड...

अम्बुकीश पुं, (अम्बुनि की...

मारम्भश्च। इति हेमचन्द्रः। गुगुल इति भाषा।

अम्बुकूर्म्मः, पुं, (अम्बुनः कूर्म्म इव)। शिशुमारः। इति हेमचन्द्रः।

अम्बुकेशरः, पुं (अम्बुमध्ये केशरोऽस्य।) छोलङ्गवृक्षः। इति रत्नमाला।

अम्बुचामरं, क्ली, (अम्बुनः चामरमिव।) शैवालं। इति शब्दचन्द्रिका। शेयाला इति भाषा।

अम्बुजं क्ली, (अम्बुनि जायते अम्बु+जन्+ड।) पद्मं। इति मेदिनी। "हस्तीरिव पद्मं मुखमम्बुजेन"। इति शकुन्तलायां "अम्बुजमम्बुनि जातं क्वचिदपि न जायतेऽम्बुजादम्बु"। इत्युद्भटः।) वज्रं। इति त्रिकाण्डशेषः।

अम्बुजः पुं, (अम्बुजमिव जायते यस्मात्।) हिज्जलवृक्षः। इत्यमरः। (चिन्तुवृक्षः।
"अम्बुजं कमले क्लीबं हिज्जले तु पुमानयम्"।
इति शब्दरत्नावली।
"अम्बुजो निचुले हिज्जले तु सारसे"।
इति मेदिनी।)

अम्बुजन्म, [न्] क्ली (अम्बुनो जन्मास्य।) पद्मं। इति राजनिर्घण्टः। (सारसविहगः। शङ्खः। त्रि, जलजातः। जलोद्भवः।)

अम्बुजस्थः, पुं, (अम्बुनि जले जायते यस्मिन् तिष्ठति अम्बु+जन+ड।) वेतसः। इति शिकात्त्वदीपिका।

अम्बुदः, पुं, (अम्बु जलं ददाति, दा दाने+क।) मेघः। इति रत्नमाला। ("यदा प्रयोगमम्बुदा प्रयोगम्बुदम्"। इति ऋतुसंहारे। "प्रयाण निर्बन्धविधिं न यावदा यावदम्बुदं कतिविधापि पूर" इति रघुवंशे।) मुस्तकं। यथा। "अम्बु परिणामशुलं कदाम्बुदं"। इति वैद्यकं।

अम्बुधिः, पुं, (अम्बूनि धीयन्तेऽत्र, अम्बु+धा+अधिकरणे कि।) समुद्रः। इति शब्दरत्नावली। ("दे तापसतम्मा मत्ता विबक्षित वाहोऽम्भोधिकुम्भसंभवमम्बुधिमभितिर्यो वारिधिं वह्निधिं वा यतम्"। इति महिम्नःस्तोत्रे। "सुराहराय मनस्वीप चोदयामास्वम्बुधिम्"। इति रामायणे।)

अम्बुधिस्रवा, स्त्री, (अम्बुधि+स्रु+अच् क्रियां दाप्।) घृतकुमारी। रसकुमारी इति ख्याता। इति राजनिर्घण्टः।

अम्बुपः, पुं, (अम्बूनि पाति रक्षति पिबति वा, अम्बु+पा+क।) चक्रमर्द्दवृक्षः। इति शब्दचन्द्रिका। (वरुणः। समुद्रः।) हस्तिनाशक नक्षत्रं। त्रि जलपानकारी।)

अम्बुपत्रा, स्त्री, (अम्बुनि पत्रे यस्याः सा।) उच्चटावृक्षः। इति रत्नमाला।

अम्बुप्रसादः, पुं, (अम्बुनि प्रसादयति स्वच्छं करोति अम्बु+प्र+सद्+णिच्+अण्, उपपदसमासः।) कतकवृक्षः। त्रि राजनिर्घण्टः। निर्मली इति ख्याता।

अम्बुप्रसादनं, क्ली (अम्बूनि प्रसादयति प्र+सद्+णिच्+ल्युट्।) कतकफलम्। इति शिक्षाशरोपि।

अम्बुभृत् पुं (अम्बु बिभर्ति, अम्बु+भृ+क्विप्।) मेघः। मुस्तकं। इत्यमरः। अभ्रकः। इति वैद्यक।

अम्बुमात्रजः, पुं, (अम्बुमात्रे जलमात्रे जायते, अम्बु+जन्+ड।) शम्बूकः। शामुक इति हेमचन्द्रः। इति भाषा।

अम्बुरः, पुं, (अम्बु+लाति।) द्वाराधःस्थकाष्ठं। इति हेमचन्द्रः। गोबराट् इति भाषा।

अम्बुरुहा, स्त्री (अम्बुनि रोहति, अम्बु+रुह+क, टाप्।) स्थलपद्मिनी। इति राजनिर्घण्टः।

अम्बुवाची, स्त्री, (अम्बु वर्षणं वाचयति सूचयति वच्+णिच्+अण् उपपदसमासः, ङीप्।) वर्षाकालावधि मती पृथ्वी। यथा —
"आषाढ़े प्रथमे मिथुनगतमते पूर्वं पदारम्भे
सम्याम्बुवाचि विप्रर्बर्णादिरजसाविप्रावरिष्टे
सम्य। यथासमयं दीक्षायां न कार्य्ये। वर्ज
मनोपवासानाय पुष्पं पेयं"। इति कृत्यतत्त्वं। ।
भरित। ज्योतिषे।
"रजोयुक् सम्भवाची च दीक्षाचारे रवौ।
अस्यां यशो दीक्षावो नार्थवीर्यां मिथुनमः।
मथितिरपि निर्धौ रौद्रादिरम्भवो
चतुर्थाति अव पृथ्वी वर्षर्तुद्धीकषाति।
यदि भवति ग्रहाकरशेषमात्राय दीर्घ
न भवति नयमासो ग्रहणाङ्गामवाचः"।
रजोयुक् सा चाम्बुमती पृथ्वी। मलमासे।
"आयामसङ्गमनाव भूमिदाने तथैव च।
वस्त्रपतमने चैव विद्या चैव पठेत्सुधः।
ज्योतिषे।
"पश्चिम् वारे चम्बवाचुबेताये विवादं मर्जेत्।
अम्बुवाची भवेदिव इत्यकन्माद्यावरवो"।
इत्यच्युत्ताविधि। इति तिथ्यादितत्त्वं। । अन्यच।
"अम्बुवाची समायाते भागोर्मकरपथाङ्मितः।
इच्छापूर्वकमात्रार्य नयन विदिदं भवेत्।
कार्य्यैर्निमित्तैरेव यावत् समतिकान्तवान्।
अम्बुमती च पृथ्वीत्वं पूर्वेषु विवापुषे।
न कुर्य्यात् कर्म मूके सूक्ष्मेवापि क्वचित्।
दीक्षायां यमनेव चतुर्थीत्रवियममयं।
मयातायसं कृत्वा यावत्कल पचारवेत्।
कर्म कुर्य्यात् तदूर्ध्वाय कर्मादिरमवयं"।
इति ब्रह्मवैवर्ते मलमासे १० अध्यायः। अन्यच।
"रवौ मायाद्यारत्ने भूमौ अनाचे रजः।
ब्रह्मादिसप्तकं यावत् दीक्षाय परित्यजेत्।
यावादिकानिदिवस्मूत्रकमो रजिवेता भवति।
ततोऽम्बुवाची चैवा त्रिपक्षेदात्रिविनो यावत्।
ऐदिनवसूत्रविदो मकिवेन भवति रजिवता मात्र।
न भवति निभकापो निरीक्षणारजबतोदिरे"।
"न यासामे यमवार्तं न वैदिककर्मं।
तुम्बनो यावदैव दीक्षायां यमनं यथा"।
इति रामनारायणः। । अन्य वालविधेवो यथा,—
"वलिनो वर्णनचैव विधवा च द्विजाया।
अम्बुवाचीदिने चैव वापं कृत्वा न मत्रयेत्।
बपासं पादान या अम्बुवाचीदिन यथा।
अस्यवं चैव अपर्णं वायावाक्यव्रतं चरेत्"।
इति अक्षसारप्रदीपे तिथ्युदतत्त्वं।

अम्बुवासिनी, स्त्री, (अम्बुमध्ये देवी वसति+णिनि ङीप्।) पाटलावृक्षः। इति शब्द-

अम्बुवासी, स्त्री, (अम्बुप्रधाने देशे वासो यस्याः गौरादित्वात् ङीष्।) पाटलावृक्षः। इति राजनिर्घण्टः।

अम्बुवाहः पुं, (अम्बूनि वहति अम्बु+वह्+अण्, उपपदसमासः।) मेघः। इति रत्नमाला। ("विभाविसिस्त्यवसायिवत्मीरवितोऽयं माय विमु नयी भवताम्बुवाहः"। इति मालवि-विकाग्निमित्रे। "विमानमासीयवदर्शि विरुद्रीवरोन मन्दमिवाम्बुवाहं"। इति भट्टिः।) मुस्तकं। मेघनामा इत्यमरटीकाया।

अम्बुवाहिनी, स्त्री (अम्बूनि वहति अला वहति अम्बु+वह्+णिनि, उपपदसमासः, ङीप्।) काष्ठाम्बुवाहिनी। काष्ठनिर्मितजलसेचनपात्रविशेषः। इत्यमरटीकायां रायमुकुटः।

अम्बुवेतसः, पुं (अम्बुमध्ये वेतसः, शाकपार्थिवादिवत् समासः।) जलवेतसः। जलजातः। साधारे २ निकुञ्ज ३ वानीरः ४। इत्यमरः।

अम्बुशिरीषिका स्त्री (अम्बुनि जाता शिरीषिका अल्पार्थे कन् टाप्।) अम्बुशिरीषवृक्ष शतमूलिका। शिरीषिका २ शिशिरिका दुर्गन्धा ३ शारीरिशीतिका ५। जलजातशिरोमणिजातिक्षुद्रविशेषः। इति भावप्रकाशः।

अम्बुसर्पिणी, स्त्री, (अम्बुनि सर्पति अम्बु+सृप+णिनि उपपदसमासः।) जलौका। जलौका इति शिकात्त्वदीपिका। जोंक इति भाषा।

अम्बुसेचनी, स्त्री, (अम्बूनि सिच्यन्ते अनया, अम्बु सिच्+करणे ल्युट्, ङीप्।) अम्बुसेचनपात्रविशेषः। इत्यमरटीकायां भरतः।

अम्बूकृतं त्रि, (अनम्बु अम्बु सम्पद्यमानं कृतं, अम्बु+कृ+क्त अभूततद्भावे च्वि।) सनिष्ठीवनवचनं। हलायुधः। अम्बूकृतं २ त्रि। इति हेमचन्द्रः। (शीकरयुक्तकथा। "दधति कुहरभाजामत्र भल्लूकयूनामनुरसितगुरूणि स्त्यानमम्बूकृतानि"। इति मालतीमाधवे।)

अम्भः, पुं, (आपि भम्बे डः।) अम्बष्ठः। इ आदिष्कोणः। जलम्। उप इति च भाषा।

अम्भस्, [स्] क्ली, (आप्यते आप्+असुन्।) जलं। वासलामीषदं। इत्यमरः। लग्नाच्चतुर्थस्थानं इति ज्योतिषं। (सप्तसाधे वर्ष्यमानं देवताजलोथिन।)

अम्भःसारं, क्ली, (अम्भसां सारं।) मुक्ता। इति राजनिर्घण्टः। जलमुक्तास्यपि ख्यातः।

अम्भसः पुं, (अम्भांसि सूते सु+क्विप्।) धूम इति हेमचन्द्रः। जलमुक्तेरपि च भाषा।

अम्भोज, क्ली, (अम्भसि जायते, अम्भस् + जन् + ड।) पद्म। इति शब्दरत्नावली॥ सारसपक्षी। पुष्कराह्व इत्यमरेणोक्तत्वात्। चन्द्रे पु। यथा। "पिबन्त त्वन्मुखाम्भोजच्युत हरिकथामृत"। इति श्रीभागवत॥ जलजाते त्रि॥

अम्भोजजन्मजनि, पुं, (अम्भोजन्मनि विष्णुनाभिपद्मे जनि जन्म यस्य स।) ब्रह्मा। यथा,—
"अम्भोजन्मजनिस्तदन्तरगतो वत्सानितो वत्सपान्"। इति श्रीभागवत॥

अम्भोजयोनि पु, (अम्भोज नारायणनाभिपद्म योनिरुत्पत्तिस्थान यस्य स।) ब्रह्मा। यथा,—
"सदनमुपगतोऽह पूर्व्वमम्भोजयोने"॥
इति प्रबोधचन्द्रोदय॥

अम्भोजिनी, स्त्री, (अम्भोज + समूहार्थे इनि तत ङीप्।) पद्मलता। पद्मसमूह। पद्मयुक्तदेश। इति शब्दरत्नावली। (पद्मिनी। नलिनी। "अम्भोजिनीवननिवासविलासहेतु हन्त हन्तुमपरामपि ता विधाता"। इति नीतिशतके।)

अम्भोद, पु, (अम्भो जल ददाति, अम्भस् + दा + क।) मेघ। मुस्तक। इति शब्दरत्नावली॥ (जलदानकर्त्तरि, त्रि।)

अम्भोधर, पुं, (अम्भ जल धरति, धृ + अच्।) मेघ। ("सशीकराम्भोधरमत्तकुञ्जर"। इति ऋतुसंहारे।) मुस्तक। इति शब्दरत्नावली॥

अम्भोधि, पु, (अम्भासि धीयन्ते अत्र, धा + आधारे कि।) समुद्र। इति शब्दरत्नावली॥
("अय रत्नाकरोऽम्भोधिरित्यसेवि धनाशया। धन दूरेऽस्तु वदनमपूरि क्षारवारिभि"॥
इति साहित्यदर्पणे।
"सम्भूयाम्भोधिमभ्येति महानद्यो नगापगा"।
इति माघ।)

अम्भोधिवल्लभ, पु, (अम्भोधे वल्लभ, षष्ठीतत्पुरुष।) प्रवाल। इति राजनिर्घण्ट॥

अम्भोनिधि, पु, (अम्भासि निधीयन्तेऽत्र, अम्भस् + नि + धा + कि।) समुद्र। इति शब्दरत्नावली॥
("अभूत सा नागवधूपभोग्य
मैनाकमम्भोनिधिबद्धसख्य"।
इति कुमारसम्भवे। विष्णोः सहस्रनाममध्ये परिगणितो नामभेद, अम्भासि देवमनुष्यादयो निधीयन्ते अस्मिन् इति व्युत्पत्त्या, नारायणस्य सर्व्वाश्रयत्वात्। "अम्भोनिधिरनन्तात्मा"। इति महाभारते।)

अम्भोराशि, पु, (अम्भसा राशिरिव एकत्रोपचितत्वात्।) समुद्र। इति राजनिर्घण्ट॥

अम्भोरुह, क्ली, (अम्भसि रोहति, अम्भस् + रुह + क।) पद्म। ("आस्ये पूर्णशशाङ्कता नयनयोस्तादात्म्यमम्भोरुहा"। इति भामिनीविलासे।) सारसपक्षी। इत्यमर॥

अम्मय, त्रि, (अपा विकारादि, अप् + मयट्।) जलविकार। फेनादि। इत्यमरः॥ जलमये त्रि। यथा,—
"न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामया।

ते पुनन्त्युरुकालेन दर्शनादेव साधव"॥
इति श्रीभागवत॥
("सौरीभिरिव नाडीभिरमृताख्याभिरम्मय"।
इति रघुवंशे।)

अम्र, पु, (अमति सौरभेण दूर गच्छति, अम + रन्।) आम्रवृक्ष। फले क्लीव। इति शब्दरत्नावली॥

अम्रात, पु, (अम्ल रस सर्व्वत्र पत्रपुष्पादौ अतति व्याप्नोति, अम्ल + अत + अण् वा लस्य रत्व, पक्षे अम्लात।) आम्रातकवृक्ष॥ इति शब्दमाला॥

अम्रातक, पु, (अम्ल रस सर्व्वत्र पत्रपुष्पादौ अतति व्याप्नोति अम्ल + अत + अण् + स्वार्थे कन्।) आम्रातकवृक्ष। इति त्रिकाण्डशेष॥
("आम्रााम्रातकजम्बूत्वक् कषाये विपचेद्बुध। यवागू शालिभिर्युक्ता ता भुक्त्वा ग्रहणीं जयेत्"॥
इति शार्ङ्गधर॥)

अम्ल, क्ली, (अम + क्त।) तक्र। इति राजनिर्घण्ट॥

अम्ल, पु, (अम + क्त।) षड्रसमध्ये रसविशेष। टक इति भाषा। तोयाग्निगुणबाहुल्यादम्ल। इति सुश्रुतः। अस्य गुणा। शाकवद्दोषकारित्व। हृद्यत्व। रुच्यग्निरक्तमासकारित्व। शीतलत्व। वायुनाशित्व। स्निग्धोष्णत्व। कटुरसतोऽधिकोष्णवीर्य्यत्व। जिह्वोद्वेगकारित्वञ्च। इति राजवल्लभ॥ अस्य दन्तोद्वेगकारित्वगुणोऽप्यस्ति। अपि च। शीत्यग्निपटुताकारित्व। प्रपाचनत्व। इति राजनिर्घण्ट॥ * ॥ तदतिशयभक्षणगुणाः। पाचकत्व। पित्तश्लेष्मवान्तिक्लेदकारित्व। लघुत्व। उष्णत्व। बहिःशीतत्व। वायुनाशित्वञ्च। इति राजवल्लभ॥ भ्रान्तितृष्णाकफपाण्डुदोषकार्श्यकासकारित्व। इति राजनिर्घण्ट॥ तद्वति त्रि। इत्यमर॥ * ॥ अम्लवेतस। इति राजनिर्घण्ट॥ (यदाह वाभट॥ "अम्ल स्रावयते मुखम्।
हर्षणो रोमदन्तानामक्षिभ्रुवनिकोचन।
अम्लोऽग्निदीप्तिकृत् स्निग्धो हृद्य पाचनरोचन॥
उष्णवीर्य्यो हिमस्पर्श प्रीणन क्लेदनो लघु।
करोति कफपित्तास्र मूढवातानुलोमनम्॥
सोऽत्यभ्यस्तस्तनो कुर्य्याच्छैथिल्य तिमिर भ्रम।
कण्डुपाण्डुत्ववीसर्पशोफविस्फोटतृड्ज्वरान्"॥
हारीतेन यदुक्त वदया,—
"जिह्वाक्लेद जनयति तथा नेत्रनैर्म्मल्यकारी,
बीभत्स वा जनयति तथा वातरोगापहारी।
कण्डूकुष्ठक्षतजकरै शोणित शोषिने स्यादम्ल प्रोक्त पवनशमनोऽसृक्प्रकोप तनोति"॥
सुश्रुतश्चाह॥ "अम्लो जरणः पाचन पवननिग्रहणोऽनुलोमन कोष्ठ-विदाही बहिःशीत क्लेदन प्रायशो हृद्यश्चेति। सएवगुणोऽप्येक एवात्यर्थमुपसेव्यमानो दन्तहर्ष-नयन-सम्मीलन-रोमसंवेजनकफविलयन शरीरशैथिल्यान्यापादयति तथा क्षताभिहत-दग्ध-दष्ट-भग्न-रुग्ण-शून-प्रच्युतावमूत्रित-विसर्पित छिन्न भिन्न विद्धोत्पिष्टादीनि पाचयत्याग्नेयस्वभावात् परिदहति कण्ठमुरो हृदयञ्चेति"॥०॥
"अम्लोरसो भक्त रोचयति, अग्नि दीपयति, देहं

बृंहयति, ऊर्ज्जयति, मनो बोधयति, इन्द्रियाणि दृढीकरोति, बल वर्द्धयति, वातमनुलोमयति, हृदय तर्पयति, आस्य संस्रावयति, भुक्तमपकर्षयति, क्लेद जनयति, प्रीणयति। लघुरुष्ण स्निग्धश्च॥ सएवगुणोऽप्येकएवात्यर्थमुपयुज्यमानो दन्तान् हर्षयति, तर्पयति, सम्मीलयति अक्षिणी, संवेजयति लोमानि, कफ विलापयति, पित्तमभिवर्द्धयति, रक्त दूषयति, मास विदहति, काय शिथिलीकरोति, क्षीण क्षत-कृश-दुर्ब्बलानां श्वयथुमापादयति। अपि च क्षताभिहत-दग्ध-भग्न शून-प्रच्युतावमूत्रित-परिसर्पित-मर्द्दित-च्छिन्न-विद्धोत्पिष्टादीनि पाचयत्याग्नेयत्वात् परिदहति कण्ठमुरो हृदयञ्च"॥ इति चरके।)

अम्लक, पु, (अल्पोऽम्ल अल्पार्थे कन्।) वृक्ष। इति शब्दरत्नावली॥ (लकुच गुणादयो ज्ञातव्या॥)

अम्लकाण्ड, क्ली, (अम्ल काण्ड यस्य।) लव इति राजनिर्घण्ट॥

अम्लकेशर, पु, (अम्ल केशरो यस्य।) मा वीजपूर। इति रत्नमाला॥ (टाबालेबु इति

अम्लचूड, पु, (अम्ला चूडा शिखा यस्य। शाक। इति राजनिर्घण्ट॥

अम्लजम्बीर, पु, (अम्लो जम्बीर।) अम्लनि इति राजनिर्घण्ट॥

अम्लनायक, पु, (अम्ल रस नयति, नी + अम्लवेतस। इति राजनिर्घण्ट॥

अम्लनिशा, स्त्री, (अम्लरसे नि शेषेण शेते, नि + शी + ड + स्त्रियां टाप्।) शटी। इ जनिर्घण्ट॥

अम्लपञ्चफल, क्ली। अम्लरसयुक्तपञ्चप्रका तद्यथा। कोल १ दाडिम २ वृक्ष चुक्रिका ४ अम्लवेतस ५॥ मतान्तरे। जम नारङ्ग २ अम्लवेतस ३ तिन्तिडीक ४ वीज इति राजनिर्घण्ट॥
("कोलञ्च दाडिमञ्चैव वृक्षाम्ल चुक्रिका त अम्लवेतसमित्येतदम्लपञ्चफल स्मृतम्"॥
"जम्बीर नागरङ्गञ्च तथाम्लवेतस पुन।
तिन्तिडीक वीजपूरमम्लपञ्चफल स्मृतम्"।

अम्लपत्र, पु, (अम्ल पत्र यस्य।) अश्मन्तक इति राजनिर्घण्ट॥

अम्लपत्री, स्त्री, (अम्ल पत्र यस्या सा, ङी पलाशीलता। चुक्राम्लिका। इति राजनिघ

अम्लपूर, क्ली, (अम्लेन अम्लरसेन पूर्य्यते, कर्म्मणि घञ्।) वृक्षाम्ल। इति राजनिर्घ

अम्लफल, क्ली, (अम्ल फल यस्य।) वृक्षाम्ल। राजनिर्घण्टः॥ तेंतुल इति भाषा।

अम्लफल, पु, (अम्ल फल यस्य स।) आम्रव इति राजनिर्घण्ट॥

अम्लभेदन, पु, (अम्लार्थ भिद्यतेऽसौ, अम्ल + + कर्म्मणि ल्युट्।) अम्लवेतस। इति निर्घण्ट॥

अम्लरुहा, स्त्री, (अम्लाय रोहति, अम्ल + रु

च ।) मांसरोचनकारकदोषभेदः । अस्या गुणाः । अम्लोष्णत्वं । मधुरत्वं । रुचिकारित्वं । हिमत्वं । रक्तपित्तकफहारित्वं । पित्तोद्रेककरत्वं । अग्निदीपकत्वं । मोदकादौ भाव्यत्वं । मलवारित्वं । मुखप्रसादकारित्वं । इति राजनिर्घण्टः ।
("चाङ्गेरी मधुराम्ला रुचिकरी उष्णा च पित्तावहा वातश्लेष्मविकारनाशनकरी ग्राहिणी मोदिनी । गौल्मार्शोविनिहन्ति दीपनकरी रक्ता च कफनाशिनी वातघ्नी कुष्ठातिसारविनाशिनी च कथिता भावप्रकाशे तु सूता" ।)

अम्ललोणिका, स्त्री, (अम्लं रसं लुनाति स्वादेन अम्ल + लुन + ण्वुल्, टापि अत इत्वम् ।) क्षुद्रक्षुपविशेषः । आमरुल इति भाषा । तत्पर्य्यायः । चाङ्गेरी २ चुक्रिका ३ दन्तशठा ४ अम्बष्ठा ५ । इत्यमरः । अस्या गुणाः । कफवातनाशित्वम् । अग्निदीपकत्वम् । ग्रहणीदोषे हितकारित्वम् । इति राजवल्लभः । भावप्रकाशे तु चाङ्गेरीचुक्रिकयोर्भेदः । राजनिर्घण्टोक्तागुणपर्य्यायौ अम्लिका शब्दे द्रष्टव्यौ । तत्पर्य्यायगुणाः ।
"चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका । अश्मन्तक प्रभृती क्षुद्रा चाम्लपत्रका" ।
क्वचित् पुस्तके क्षुद्रलोणिकाख्ये अम्लकी इति च पाठः ।
"चाङ्गेरी दीपनी रुच्या मधुरा कफवातनुत् । पित्तला ग्रहणीकुष्ठातिसारार्शोहरी" ।
इति भावप्रकाशः ।
("दीपनी चैवाम्लवीर्य्या च ग्राहिणी कफवातहा । ग्रहण्यर्शोहरा चाङ्गेरी प्रवरारोचिता च सा" ।
इति चरके ।
"चाङ्गेरी कफवातघ्नी वक्तिदत् ग्रहणी हिता" ।
इति वैद्यकचक्रपाणि ।
"चाङ्गेर्य्याम्लदीपनी" ।
"उष्णाम्लाग्निवद्धनविशोधनी ग्राहिणी च सा" ।
इति च वाग्भटः ।
"उष्णा दीपनिका लघ्वी चाम्ला वातकफे हिता । तथा कफानिलहरा चाङ्गेरी चाग्निदीपनी" ।
इति सुश्रुतः ।)

अम्ललोणी, स्त्री, अम्ललोणिका । चाङ्गेरी । इति भरतटीका ।

अम्लवती, स्त्री, (अम्लो रसो विद्यतेऽस्याम्, अम्ल + मतुप् मस्य वत्वम् ।) पुत्रदात्रिका । इति राजनिर्घण्टः । आमरुल । इति भाषा ।

अम्लवर्ग, पुं, (अम्लानां अम्लरसप्रधानद्रव्याणां वर्गः ।) अम्लवेतसः । जम्बीरं । चाङ्गेरी अम्लकः । अम्लवेतसं । नारङ्गः । बीजपूरः । नागरङ्गं । दाडिमं । चिञ्चा । वृक्षाम्लं । करमर्दकं । तिन्तिडीकं । इति राजनिर्घण्टः । (अस्य प्रकारे यथा,—
"अम्लं कपित्थको चाङ्गेरी चुक्रं च कपित्थकं । नारङ्गं तिन्तिडी चाम्लं करमर्दं प्रियालकं । दाडिमं चाम्लकी माता दिवा च करमर्दकं ।
बीजपूरं च जम्बीरं तिन्तिडीकाम्लवेतसं । चुक्राम्लं वृक्षाम्लं च चाङ्गेरीकाम्लवर्गकः" ।)
"अम्लवेतसजम्बीरलवङ्ग चुक्रवत्ता । नागरङ्गं तिन्तिडी च वृक्षाम्लक चिञ्चकं । चाङ्गेरी दाडिमं चैव करमर्दकमेव च । एष चाम्लगणः प्रोक्तो वेतसाम्लं करोत्यलम्" ।
इति वैद्यकरत्नमालाकृतः ।
"दाडिमाम्लकमातुलुङ्गाम्लातक-कपित्थ-करमर्द-बदरीक-प्राचीनामलक-तिन्तिडीक-कोशाम्र-भव्य-पारावत-वेत्रफल-लकुचाम्ल वेतस-दन्तशठ दधि तक्र-सुरा-शुक्त-सौवीरक-तुषोदक-धान्याम्ल-प्रभृतीनि समस्तेनाम्लवर्गः । इति सुश्रुतः ।)

अम्लवल्ली, स्त्री, (अम्लरसवती वल्ली ।) त्रिपर्णिकाख्यकन्दविशेषः । इति राजनिर्घण्टः ।

अम्लवाटिका स्त्री, (अम्ला वाटिका आलमिव ।) नागवल्लीभेदः । अस्या गुणाः । कटुत्वं । अम्लत्वं । तिक्तत्वं । रुच्यत्वं । उष्णत्वं । मुखजाड्यहारित्वं । विदाहविष्टम्भप्रकोपकारित्वं । विबन्धकरत्वं । वातकारित्वं । इति राजनिर्घण्टः । (अत्र च —
"आम्लवाटी कटुकाम्लतिक्ता रुच्या तथोष्णा मुखजाड्यहर्त्री । विदाहविष्टम्भविबन्धिनी च विबन्धदा वातविकारकर्त्री च" ।)

अम्लसारं क्ली, (अम्लरसोऽस्ति सारत्वं यस्य तेन ।) चुक्रं । इति राजनिर्घण्टः ।

अम्लशाक, क्ली, (अम्लस्य शाकं कारकं ।) चुक्राम्लं । इति राजनिर्घण्टः ।

अम्लसारक, क्ली, (अम्लरसो सारे यस्य ।) चुक्राम्लं । इति राजनिर्घण्टः । कांजिक इति भाषा ।

अम्लवेतस, पुं, अम्लरसप्रधान अम्लरसदवृक्षविशेषः । चुकापालङ इति ख्यात इति केचित् । चक्रचुकार इति ख्यात इति केचित् । इत्यमरटीकायां भरतः । तत्पर्य्यायः । चुक्र २ वेतसः ३ शतवेधी ४ अम्लवेतसः ५ भेदनः ६ चुक्राम्लः ७ शतवेधी च वेधकः ८ भीमः ९ भेदनः १० वेधी ११ रसाम्लः १२ अम्लवेतसः १३ अम्लः रक्तसारः १५ रक्तसारः १६ प्रभावः १७ अम्लनायकः १८ सहस्रवेधी १९ वीराम्लः २० द्रव्याम्लः २१ वराम्लिका २२ शङ्खद्रावी २३ मांसद्रावी २४ । इति राजनिर्घण्टः । सहस्री २५ । इति रत्नमाला । चुक्रः २६ । इत्यमरः । अस्य गुणाः । अत्यम्लत्वं । उष्णत्वं । वातश्लेष्मनाशित्वं । वायु कफार्शोऽश्मरीगुल्मनाशित्वं । मलभेदकारित्वं । इति राजनिर्घण्टः । ह्रद्रोगशूलगुल्मप्लीहदोषनाशित्वं । इति भावप्रकाशः । आनाहदोषनाशित्वं । शलाकशूलघ्नत्वं । शोषविनाशित्वं । शूलघ्नं । वातघ्नत्वं । इति राजवल्लभः । तत्पर्य्यायगुणाः ।
"चुक्रवेतसवल्लभः अम्लवेतसः शतवेधिम् । अम्लवेतसमत्यम्लं भेदनं लघु दीपनं । हृत्शूलगुल्मजित् वेतसो विद्वत्तोयम्लेत ज्वरम्लेदी । जन्तु विनाशनम् रोचनम् सर्वपथ्यकारी वाग्भटः ।

निकाशाद्ग्रहणीविकारवातातीसारविषयम् । अम्लवाताप्लीहार्शोऽनिलशामकम् । अम्लवातगुल्मं श्लेष्मरोगं नाशयेत्" ।
इति भावप्रकाशः ।
("अम्लिकावाता परं सर्वं तथाप्युष्णमम्लं गुरुम् । गुल्मविनाशं संशर्म भेदनमवेचम्" ।
इति च चरकः ।)

अम्लसारं क्ली, (अम्लः सारो यस्य तत् ।) अम्लसारं मूलं । इति राजनिर्घण्टः । (अम्लसारश्चेत्तु विशेषो द्रष्टव्यः ।)

अम्लसारः, पुं (अम्लः सारो यस्य सः ।) अम्लवेतसविशेषः । तत्पर्य्यायः । हिन्ताल २ गुवाकं ३ अम्लचुक्रिका ४ विद्रावी ५ अम्लपुष्पः ६ निम्बसारः ७ । अस्य गुणाः । मधिकपाचन । दाह-शामित्व । अम्लशोधकारित्व । अम्लदवदाहनिवारकत्वमुखं । रक्तपित्तकफाग्निवारित्व । इति राजनिर्घण्टः । (वस्तुतः,—
"अम्लसारकशीतलोत्साहो वात कफवातगुद् । वातघ्न सर्वरोगिणो रागविषमारिणिपुत्" ।)

अम्लसारं क्ली, (अम्लस्य इव सारः यस्य तत् ।) काञ्जिकं । इति राजनिर्घण्टः ।

अम्लसार, पुं, (अम्लरस इव सारः यस्य सः ।) अम्लवेतसः । निम्बकः । हिन्तालः । इति राजनिर्घण्टः ।

अम्लहरिद्रा, स्त्री, (अम्लरसयुक्ता हरिद्रा ।) कचूरी । इति राजनिर्घण्टः ।

अम्लाङ्कुश पुं, (अर्थं अम्लाकारं यस्य सः ।) अम्लवेतसः । इति राजनिर्घण्टः ।

अम्लातक, पुं, (न म्लायति, म्लै + क्त् कर्त्रि क्त, नञ्समासः ।) अम्लानवृक्षः । इति राजनिर्घण्टः । अस्य कुसुमस्य रामायणादौ लोके बर्णे ।

अम्लान, पुं, (म्लै + क्त कर्त्रौ नञ्समासः ।) महासहावृक्षः । इत्यमरटीका । अमिला इति भाषा ।

अम्लान, त्रि (म्लै + क्त, न म्लानः नञ्समासः ।) म्लानिरहितः । यथा,—
"अम्लानपङ्कजां मालां शिरस्तुषाय ससर्ज्ज" ।
इति रैदिनाखण्ड । (अम्लानः । हरितफलः । निर्म्मलः । उज्ज्वलः । प्रसन्नः । प्रफुल्लः । अपर्य्युषितः । अनुत्सुकः ।)

अम्लानिनी, स्त्री, (अम्लानानां समूहः कमलम् । इति ।) पद्मसमूहः । पद्मिनी । इति शिवस्वामी ।

अम्लिका, स्त्री, (अम्लैव, स्वार्थे कन् ।) तिन्तिडी । इत्यमरः । अम्लचिञ्चा । चिञ्चाम्लिका । चुक्रिका । इति राजनिर्घण्टः । अम्लोद्गारः । इति हेमचन्द्रः । [इति शब्दार्थः ।]
("पीतमम्लरसं मुखमधिकाम्लिकारोचकरोधकं वदन्" ।
"अम्लिकायाः फलं सर्वं तथाप्यम्लकारकं गुरुः" ।
इति चरकः ।
"अम्लिकायाः फलं सर्वं वदन्ति तु विदाहि" ।
इति सुश्रुतः ।)

अम्लिकावटक, पु, (अम्लिकाया वटक ।) अम्लिकां स्वेदयित्वा जलेन सह मर्दयित्वा तत्संस्कृतजले मग्नवटक । अम्लवडा इति भाषा । अस्य गुणा । रुच्यग्निकारित्वं । वटकगुणतुल्यगुणत्वञ्च । इति भावप्रकाश ॥

(“अम्लिका स्वेदयित्वा तु जलेन सह मर्दयेत् ।
तन्नीरे कृतसंस्कारे वटकान् मज्जयेज्जन ।
अम्लिकावटकास्ते तु रुच्या वह्निप्रदीपना ।
वटकस्य गुणै पूर्व्वैरेतेऽपि च समन्विता ” ॥)

अम्लीका, स्त्री, अम्लिका । इत्यमरटीकायां रायमुकुट ॥

अम्लोटक, पु, (अम्ल उट पत्र यस्य स ।) अश्मन्तकवृक्ष । अम्लकुचार इति ख्यात । इति रत्नमाला ॥

अय ङ गतौ । (इति कविकल्पद्रुम ।) ङ अयते । इति दुर्गादास ॥

अय, पु, (एति सुखमनेन, इण + करणे घञ् ।) शुभावहविधि । मङ्गलानुष्ठान । इत्यमर ॥ (कल्याणदायक दैव ।
“स गुप्तमूलप्रत्यन्त शुद्धपार्ष्णिरयान्वित ” ।
इति रघुवंशे । नरकभेद । अय पानमप्यत्र । इति वैद्यकरत्नेन्द्रसारसङ्ग्रह ॥)

अय, [स्] क्ली, (इण गतौ, असुन् ।) लौह । इत्यमर ॥ (गुडूच्यादिलौह ॥
“अयः प्रदाता बलवीर्य्यधाता,
रोगापहर्त्ता मदनस्य कर्त्ता ।
अयःसमान न हि किञ्चिदस्ति,
रसायन श्रेष्ठतम नराणा” ॥ * ॥
“गुडूचीसारसंयुक्त त्रिकत्रयसमन्वय ।
वातरक्त निहन्त्याशु सर्व्ववातहर पर” ॥)

अयन, क्ली, (अय + भावे ल्युट् ।) शास्त्र । यथा,—
“ज्योतिषामयन नेत्र निरुक्त श्रोत्रमुच्यते” ।
इति तिथ्यादितत्त्व ॥ पन्थाः । सूर्य्यस्य उत्तरदक्षिणदिग्गमन । तद्यथा । माघादिषण्मासा उत्तरायण । श्रावणादिषण्मासा दक्षिणायन । इत्यमर ॥ गमन । गत्यर्थायधातोर्भावेऽनट् ॥ रविसंक्रान्तिविशेष । यथा भविष्यमात्स्यज्योतिषेषु ।
“मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने ।
विषुवती तुलामेषे गोलमध्ये तथापरा” ॥
मृगो मकर । गोलो राशिचक्र । देवीपुराणे,
“यावद्विंशत्कला सूक्ष्मा तत्पुण्य चोत्तरायणे ।
निरंशे भास्करे दृष्टे दिनान्त दक्षिणायने” ॥
तत्र स्नानदानादौ कोटिगुणफल भवति । यथा मात्स्ये ।
“अयने कोटिगुणित लक्ष विष्णुपदीषु च ।”
इत्यादि ।
“अयने विषुवे चैव शयने बोधने हरे ।
अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु” ॥
इति तिथ्यादितत्त्व ॥ * ॥ सूर्य्यगतिविशेष । यथा,—
“मृगसंक्रान्तित पूर्व्व पञ्चाशत्तारादिनान्तरे ।
एकावर्ष चतु पञ्चपलमानक्रमेण तु ॥
षट्षष्टिवत्सरानेकदिन स्यादयन रवे ।
एव चतु पञ्चदिनमयनारम्भण क्रमात् ॥
व्युत्क्रमेण च तद्वत् स्यादुदगयान रवेर्ध्रुव ।
कर्क्किसंक्रमणे तद्वदभितो दक्षिणायन” ॥
इति ज्योतिस्तत्त्व ॥

अयनांश, पु, (अयनस्य अंश भाग ।) सूर्य्यगतिविशेषस्य भाग । अयायनांशलग्नसाधन ।
“लग्न लग्नान्तर कृत्वा अयनांशै प्रपूरयेत् ।
खानलैर्हरते भाग मिश्रयित्वा दिने दिने” ॥
अस्यार्थं । लग्न रामोगवेदैरित्याद्युक्त लग्नान्तर कृत्वा यथा मेषलग्न ३ । ४७ लग्नान्तर वृषलग्न ४ । १७ अग्रान्तरेण द्वयोराधिक्येन ३० त्रिंशत्पल तच्चायनांशै पूरयेत् ॥ अयनांशस्तु जातकार्णवोक्ता । यथा,—
“शाकमेकाब्धिवेदोन हि कृत्वा दशभिर्हरेत् ।
लब्ध हीनञ्च तत्रैव षष्ट्यांशाश्चायनांशका” ॥
इति । लब्धस्थाने लब्धेन इति पाठ सिद्धान्तरहस्ये ॥ ते च इदानीं चैत्रस्यैकादशाहे सम्भवात् ऊनविंशतिसंख्यका । ते च पुन खानलै ३० त्रिंशता हरेत् । भागलब्धिस्तु ऊनत्रिंशति २९ । तच्च मेषलग्ने मिश्रयित्वा ४ । ६ षट्पलाधिकदण्डचतुष्टयात्मक मेषलग्न भवति । एव वृषादिक मूह्य । किन्तु लग्नान्तरेण यत्राधिक लभ्यते तत्राधिक लग्न भवति । एव यत्र लग्नान्तरेण हानिस्तत्र लग्नेऽपि हानिरिति निष्कर्षं ॥ * ॥ इदानीं सुखबोधार्थं पद्येन लिख्यते । बाणवेदौ ४ । ५-ऽथवेदे श्रुति ४ । ४८-रिभनयनैरिन्द्रिय ५ । २८-खाम्बुनेषु ५ । ४० बाणौ वेदानले ५ । ३४-खाग्निभिरिषु ५ । ३०-रिषुरङ्गाग्निने ५ । ३६-षु कुवेदे ५ । ४१-बाणोनागेन्दुभिस्तु ५ । १८ श्रुतिरपि रसरामै ४ । ३६-गुणा सप्तबाणै ३।५७ रामोऽष्टाब्धिस्तु ३।४७ सिद्धान्तजमलमयनांशादिद लग्नमान ॥ एतच्च तमोलिप्तादिदेशीय प्रागुक्तायनांशसाधित ॥ * ॥ अङ्केन वेदौ ४ । ६ मेष स्यात् वसुवेदे सुख ४।४८ वृष । मुनियुग्मे शरौ ५।२७ द्वन्द्वः व्योमाब्धिबाणे ५ । ४० कर्कट ॥ वेदरामै शर ५ । ३४ सिंह कन्याङ्गयुग्मपञ्चक ५ । २९ । तुला ऋषिरामपञ्च ५ । ३७-वृश्चिक खाब्धिपञ्चक ५ । ४० ॥ नवचन्द्रबाणे ५ । १९— धनुर्वेदरामै सुख ४ । ३४ मृग । वसुपञ्चत्रय ३ । ५८ कुम्भ ऋषिवेदत्रयो ३ । ४७ झष ॥ * ॥ शक्तुर्वेदश्च ४ । ६ मेषो नवसुखसुख ४-४९ । -गौर्म्मुनियुग्मै शिवाक्षौ ५ । २८ द्वन्द्वोऽङ्गाब्धित्तबाणौ ५।२९ हिमकरभवनो रामरामै कलाब्ध ५ । ३३ । सिंह कन्याजरामैरिषु ५ । ३१-रिपुजसुखाभीषु ५ । ३४ युक्कोटजिष्ठ्वी ५ । ४१ वेदेशास्योऽष्टष्ठ्वीश्वरहरमुख ५ । १८ -कोदण्डमाऊर्वराघा ॥ चन्द्र रामश्च वेदौ ४ । ३४ रविसुतभवन पर्य्यन्त पञ्चराम ३ । ५७ कुम्भो मीनश्च सुहृत्ते गिरिसुखदहन ३ । ४७ प्रत्यह प्रक्रमेण । अस्त यामिनराशावनुदिनमवसायश्च राजीवनाथो यद्यातिसम द्रुत स्यादुदयराश्रमाऊर्वराघा ॥ * ॥ लग्न लग्नान्तर प्रकारान्तरेण यदुक्त तदपि पद्येन लिख वेदोऽङ्गै ४ । ६-रिभवेदे श्रुति ४ । ४८-पक्षै ५ । २८ कुनेदैश्च बाणो ५ । ४ रामानलै ५ । ३३-रिन्द्रियमपि नवाक्षै रिषु सप्तरामै ५ । ३७ बाणा शून्याब्धि-युक्तैरिभि ५ । १९-रिषुगुणैरब्धि ४ । ३ बाणै ३ । ५८ रामोऽष्टाब्धिस्तु ३ । ४७ । जमलमयनांशादिद लग्नमान ॥
“चैत्रस्यैकादशाहे तु विषुवारम्भण यदा
तदैतल्लग्नमान हि ज्ञेयमन्यत्र साधनात्”
इति ज्योतिषसंग्रह ॥ (गति । गमन ।
“अगस्त्यचिह्नादयनात् समीप
दिगुत्तरा भास्वति सन्निवृत्ते” ।
इति रघुवंशे । स्थान । भूमि । समरभ्रकाले योधाना यथाप्रधान युद्धभूमौ रादिदिग्विभागेनावस्थितिस्थान । सेनाया विशेषरूपव्यूहप्रवेशमार्ग ।
“अयनेषु च सर्व्वेषु यथाभागमवस्थिता
भीष्ममेवाभिरक्षन्तु भवन्त सर्व्व एव हि
इति भगवद्गीता । आश्रय । विश्रामस्थान
‘ आपो नारा इति प्रोक्ता आपो वै नरसूता यदस्यायन पूर्व्व तेन नारायण स्मृत”
इति मनु । गृह । वसति । वासस्थान । भावसाधनो यथा ।
“शिक्षा कल्पो व्याकरण निरुक्त छन्दसा
ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु ॥
छन्द पादौ तु वेदस्य हस्तौ कल्पोऽथ कथ्य
ज्योतिषामयन नेत्र निरुक्त श्रोत्रमुच्यते” ॥
इति कूर्म्मपुराणे ।)

अयानयीन, पु, शार । यथा । अनुपदसर्व्वान्ना बद्धा भक्षयति नेयेषु । अयानय स्थलवि तन्नैव । अयानयीन शार । इति सिद्धान्तकौमुदी ॥

अयन्त्रित, त्रि (न यन्त्रित, नञ्समास ।) अत्र अनर्गल । इति हेमचन्द्र ॥ (अनियन्त्रि अनियमित । स्वाधीन ।
“सावित्रीमात्रसारोऽपि वर विप्र सुयन्त्रि नायन्त्रितस्त्रिवेदोऽपि सर्व्वाशी सर्व्वविक्रयी”
इति मनु ।)

अयस्कान्त, पु, (अयस कान्त रमणीय ।) ल विशेष । कान्तलौह इति ख्यात । त र्य्याय । कान्तलोह २ कान्त ३ लौहकान्त ४ कान्तायस ५ कृष्णलौह ६ महालौह अस्य गुणा । तीक्ष्णत्व । उष्णत्व । रूक्ष पाण्डुशोथकफपित्तहरत्व । रसायनत्व । उ त्तमत्वञ्च । स चतुर्व्विध । भ्रामक १ चुम्बक २ रोमक ३ स्वेदक ४ । एते रसायने उत्तरोत्तरगुणिन ।
“क्रमेण दार्ढ्याङ्गकान्तिकार्ष्ण्यनीरोगदायिन”
इति राजनिर्घण्ट ॥ चुम्बकप्रस्तरोऽप्यय । (चुम्ब

इति ख्याता मध्यदेशः। कुमायावार इति भाषा।
"उमापतिम च मम संयमविधिर्न मया।
अप्सोपमप्रमादमपयाप्तेन चौरवत्"।
इति कुमारसम्भवे।)
("तत्र याज्ञिकवर्यैर्या कामतोर्थं महात्मनं।
इति देवस्वत्पुराणेऽप्युक्ता।)

अयस्कार पुं (अयोविकारं करोति कृ+अण् उपपदसमासः।) लौहकारः। कर्मकारः। इति त्रिकाण्डशेषः। लोहकार। कामारः। कामाकारोऽपि कृष्णकः।

अयाः [स्] पुं (इण्+असुन्।) वह्निः। इत्युणादिकोषः।

अयाचक त्रि (याच+ण्वुल् ततो नञ्समासः।) याच्ञारहितः। यथा। "यदि भवति न दाता याचकायाचकेषु"। इत्युद्भटः। (भिक्षापरिशून्यः। मार्गणानिस्पृहः।)

अयाचित त्रि (याच्+क्त, नञ्समासः।) याच्ञां विना प्राप्तम्। अप्रार्थितं। इत्यमरटीकायां भरतः। (अयाचितं। "अयाचितोपस्थितमम्बु केवलं"। इति कुमारसम्भवे। "अयाचितं सदा नाश्नीयात्"। इति मनुः। "अयाचितश्च यत्किञ्चित् प्राप्तमपि दुष्प्रापणं। इति स्मृतिः।)

अयाचितव्रत, पुं (याच्+क्त, ततो नञ्समासः।) मुनिविशेषः। सत्यव्रतः। उपवास २ सत्यव्रत २ व्रतकोष्ठ ४। इति त्रिकाण्डशेषः।

अयाने क्ली, स्वभावः। इति शब्दरत्नावली। अयनमं। अयनंवायायातामायत्पन्नद् ततो नञ्समासः।

अयि अ, अव्य। (इण्+इन्।) अनुनयः। सम्बोधनं। इति मदि १। अनुगति। ("अयि कठोर यशः किल ते प्रियं"। इति उत्तरचरिते। अयि वनाय वयामि इसे प्रभो। इति रत्नावल्याम्। "अयि जीवितनाथ जीवसि"। इति कुमारसम्भवे।)

अयुक्छद, पु (अयुक्षा अस मार छदा यस्य।) सप्तच्छदः। इति हेमचन्द्रः।

अयुक्त, त्रि (युज्+क्त, नञ्समासः।) असंयुक्तं। अनुचितं। यथा —
"अयुक्तं बहिर्मौर्वी प्रमादेन भवेद् वा।
इति दुर्गादासः। (अयोग्यः। असंयोगितः। अविवाहितः। यथा
"अयुक्तस्य नास्ति बुद्धिर्न चायुक्तस्य भावना"।
इति रामायणे। अथवा विपत्तावविचलिता धर्म्मपरायणा।
"न रमन्ते विषयेषु महात्मानो
न देवकार्य्यविषयानुवर्त्तिनः।
अयुक्तबुद्धिं यदीशविचारे
विकारार्थोऽपि न ते विचरेत्।
इति रामायणे।)

अयुग्मच्छद, पुं, (अयुग्मा अस मार छदा यस्य।) सप्तच्छदः। सप्तपर्णः। इति हेमचन्द्रः।

भाषा। (पातिम इति ख्याता नदीविशेषः।
"अयस्कारमवलोक्य
अतिमानमनिन्द्यमार्गं।
मनसा गुरुमयत्नमतिरोदना
भर्त्रे यथाशक्ति मया।
इति किराताकर्णीये।)

अयत्न क्ली, (न यत्नं, नञ्समासः।) यत्नाभावः। इति हेमचन्द्रः। १ यत्नाभाव इति भाषा। ("अवसानमवर्त्तं गुरुर्विहितं भावे दयालो भव"। इति रामायणे।)

अयुत त्रि (न युतः, नञ्समासः।) असम्मिलितः। अयुक्तः। यथा। अयुक्तमनारोऽप्रवर्त्तितः। इति भगवद्गीता। (अयोग्यता। अयोग्यता। संयोगरहिता। पुंसि अयुतसंख्या दशसहस्र इदं न च कोटयस्तु प्रिया।)

अये, अ (इण्+एच्।) क्रोधे। विषादे। सम्भ्रमे। स्मरणे। इति मेदिनी। आश्चर्य्ये। इति शब्दरत्नावली। (कोमलामन्त्रणे। "अये यान्ते पुरुषे परदमयम् अन्तरं"। इत्युद्भटः। "अये अये वाचनार्थविचारकः"। इति वेणीसंहारे।)

अयोग पुं (युज्+घञ्, नञ्समासः।) विधुरः। विश्लेषः। कूटः। उद्योगः। इति मेदिनी। अमरविशेषणादीनां प्रतियोगसम्बन्धरहित क्रिया। यथा —
"योग समनयति स्थाननियोगोऽविप्रयुक्तं।
अयोगः प्रतियोगः न चान्य वा सम्पदम्"।
इति वैद्यके। ("तन्त्रान्तरेऽप्यर्थसंयोगो ऽयोगातियोगमिथ्यायोगा विकृता जायन्ते"।
इति आयुर्वेदशास्त्रविविधायामे विषय रक्षिता।
"आहारवतामीति कर्मणां कर्मणा कायस्य साधितानामयोगमिथ्यायोगा तथातिमात्रता
दृश्यते अतिमात्रा सर्वकर्मविशेषा। कर्मणो ऽयोगमयोगो वाविकृत्याविषुव्याधिविधायक
योग" इत्यादुर्वेदवैद्यैर्विधिरतिक्रमः।
मिथ्यायोगः"। इति चरकः।) योगो ध्यानं तत्त्वाक। योगो भवनं तदभाव। (विच्छेद।
विरह संयोगापगमनात्तयोर्विरहावस्थायोगोऽपि
स्मरशरोपनता देहता वा विषयोपद्रवाकार
संकल्पवशादिविधा, यथा रत्नावल्याम्।
"समागमोऽनुरागश्च यत्रोऽदैवविचारी।
कारणतश्च देवात् विमलैर्दत्तयुतः।
अयम् पूर्व्वाराग इत्युक्तः। यथा रघुकारे।
"अवस्था दशमासादि मिथा अवश्य्यामयो।
तथाविविधा योऽन्यत्रो पूर्व्वरागः स उच्यते"॥)

अयोगव, त्रि, (अयस इव कठिना ओषधौ यस्य सः, अप्। अयोगं दृढयोगं गाति गा+क।) शूद्रजातीय क्षत्रियकन्यायाम् उत्पन्नः। इति धराधरः। (शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः।
इति मनुः।
सुतात् वैश्यायां जाता प्रतिलोमकवर्णसंकरः।

"प्रजापतेश्च योगेऽप्यमरार्थं राजनीयं।
वैदेहं सा पञ्चपि पुत्र सम्भवोऽयं"।
इति मनुः।)

अयोगुड, पुं, अयसा निर्मितो गुडः पिण्डः।) लौहगुटिका। यथा —
"अदृश्यीकृतविद्धं क्षिपेत तामेव वा।
पीडनमतिवेगेन भवेत् शत्रोऽपहृत"।
इति चरकः।

अयोग्र, क्ली, (अयोऽग्रे मुखे यस्य तत्।) मुषलं। इत्यमरः।

अयोघन, पुं, (अयांसि हन्यन्ते अस्मिन्, हन + अप् + घनादेशश्च।) लौहमुद्गरः। हातुड़ी इति भाषा। मल्लर्जनं। लौहकूटं १। इति हेमचन्द्रः।
("अयोघनेन इवाभितं
देवदितमिदम्भूत्वं विदुः"।
इति रघुवंशे।
"कृत कटे कनकमयोघनं
सहितो युद्धस कृतं च।
इति नैषधं।)

अयोध्या, स्त्री (योद्धुमशक्या युध+ण्यत्, नञ्समासः।) श्रीरामनगरी। पर्य्यायः। अयोध्या इति प्रसिद्धा। साकेत। कोशला २ कोशला ३। इति हेमचन्द्रः। उत्तरकोशलः। इति त्रिकाण्डशेषः। सा तु मोक्षदा पुरी। यथा,—
"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः।
स्थानं प्रविष्टमात्रं च मथुरा मत्स्यदेश।
कोशलमपुरस्यक्ष अयोध्या वा महापुरी"॥
इति ब्रह्माण्डपुराणम्। । तद्वर्णनं यथा,—
"कोशलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्॥
अयोध्या नाम नगरी तत्रासील्लोकविश्रुता।
मनुना मानवेन्द्रेण या पुरी निर्म्मिता स्वयम्॥
आयता दश च द्वे च योजनानि महापुरी।
श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा॥
राजमार्गेण महता सुविभक्तेन शोभिता।
मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः॥
तां तु राजा दशरथो महाराष्ट्रविवर्द्धनः।
पुरीमावासयामास दिवि देवपतिर्यथा॥
कपाटतोरणवतीं सुविभक्तान्तरापणां।
सर्व्वयन्त्रायुधवतीमुपेतां सर्व्वशिल्पिभिः॥
सूतमागधसम्बाधां श्रीमतीमतुलप्रभां।
उच्चाट्टालध्वजवतीं शतघ्नीशतसङ्कुलां॥
वधूनाटकसङ्घैश्च संयुक्तां सर्व्वतः पुरीं।
उद्यानाम्रवणोपेतां महतीं सालमेखलां॥
दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदां।
वाजिवारणसम्पूर्णां गोभिरुष्ट्रैः खरैस्तथा॥
सामन्तराजसङ्घैश्च बलिकर्म्मभिरावृतां।
नानादेशनिवासैश्च वणिग्भिरुपशोभितां॥
प्रासादै रत्नविकृतैः पर्व्वतैरिव शोभितां।
कूटागारैश्च सम्पूर्णामिन्द्रस्येवामरावतीं॥

चित्रामष्टापदाकारां वरनारीगणैर्युताम् ।
सर्व्वरत्नसमाकीर्णां विमानगृहशोभिताम् ॥
गृहगाढामविच्छिन्नां समभूमौ निवेशिताम् ।
शालितण्डुलसम्पूर्णामिक्षुकाण्डरसोदकाम् ॥
दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा ।
नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमाम् ॥
विमानमिव सिद्धानां तपसाधिगतं दिवि ।
सुनिर्वेशितवेश्मान्तां नरोत्तमसमावृताम् ॥
ये च वाणैर्न विध्यन्ति विविक्तमपरापरम् ।
शब्दवेध्यञ्च विततं लघुहस्ता विशारदाः ॥
सिंहव्याघ्रवराहाणां मत्तानां नदतां वने ।
हन्तारो निशितैः शस्त्रैर्बलाद्बाहुबलैरपि ॥
तादृशानां सहस्रैस्तामभिपूर्णां महारथैः ।
पुरीमावासयामास राजा दशरथस्तदा ॥
तामग्निमद्भिर्गुणवद्भिरावृताम्
द्विजोत्तमैर्व्वेदषडङ्गपारगैः ।
सहस्रदैः सत्यरतैर्महात्मभि-
र्महर्षिकल्पैरृषिभिश्च केवलैः" ॥
इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे पञ्चमः सर्गः ॥ * ॥
"तस्यां पुर्य्यामयोध्यायां वेदवित् सर्व्वसंग्रहः ।
दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥
इक्ष्वाकूणामतिरथो यज्वा धर्म्मपरो वशी ।
महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः ॥
बलवान्निहतामित्रो मित्रवान् विजितेन्द्रियः ।
धनैश्च सञ्चयैश्चान्यैः शक्रवैश्रवणोपमः ॥
यथा मनुर्महातेजा लोकस्य परिरक्षिता ।
तथा दशरथो राजा लोकस्य परिरक्षिता ॥
तेन सत्याभिसन्धेन त्रिवर्गमनुतिष्ठता ।
पालिता सा पुरी श्रेष्ठा इन्द्रेणेवामरावती ॥
तस्मिन् पुरवरे हृष्टा धर्म्मात्मानो बहुश्रुताः ।
नरास्तुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः ॥
नाल्पसन्निचयः कश्चिदासीत्तस्मिन् पुरोत्तमे ।
कुटुम्बी यो ह्यसिद्धार्थोऽगवाश्वधनधान्यवान् ॥
कामी वा न कदर्य्यो वा नृशंसः पुरुषः क्वचित् ।
द्रष्टुं शक्यमयोध्यायां नाविद्वान्न च नास्तिकः ॥
सर्व्वे नराश्च नार्य्यश्च धर्म्मशीलाः सुसंयताः ।
मुदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥
नाकुण्डली नामुकुटी नास्रग्वी नाल्पभोगवान् ।
नामृष्टो न न लिप्ताङ्गो नासुगन्धश्च विद्यते ॥
नामृष्टभोजी नादाता नाप्यनङ्गदनिष्कधृक् ।
नाहस्ताभरणो वापि दृश्यते नाप्यनात्मवान् ॥
नानाहिताग्निर्नायज्वा न क्षुद्रो वा न तस्करः ।
कश्चिदासीदयोध्यायां न चावृत्तो न सङ्करः ॥
स्वकर्म्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः ।
दानाध्ययनशीलाश्च संयताश्च प्रतिग्रहे ॥
नास्तिको नानृती वापि न कश्चिदबहुश्रुतः ।
नासूयको न चाशक्तो नाविद्वान् विद्यते क्वचित् ॥
नाषडङ्गविदत्रास्ति नाव्रतो नासहस्रदः ।
न दीनः क्षिप्तचित्तो वा व्यथितो वापि कश्चन ॥
कश्चिन्नरो वा नारी वा नाश्रीमान्नाप्यरूपवान् ।
द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान् ॥
वर्णेष्वग्र्याचतुर्थेषु देवतातिथिपूजकाः ।
कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः ॥
दीर्घायुषो नराः सर्व्वे धर्म्मं सत्यञ्च संश्रिताः ।
सहिताः पुत्त्रपौत्त्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ॥
क्षत्त्रं ब्रह्ममुखं चासीद्वैश्याः क्षत्त्रमनुव्रताः ।
शूद्राः स्वकर्म्मनिरतास्त्रीन् वर्णानुपचारिणः ॥
सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता ।
यथा पुरस्तान्मनुना मानवेन्द्रेण धीमता ॥
योधानामग्निकल्पानां पेशलानाममर्षिणाम् ।
सम्पूर्णा कृतविद्यानां गुहा केशरिणामिव ॥
काम्बोजविषये जातैर्बाह्लीकैश्च हयोत्तमैः ।
वनायुजैर्नदीजैश्च पूर्णा हरिहयोत्तमैः ॥
विन्ध्यपर्व्वतजैर्मत्तैः पूर्णा हैमवतैरपि ।
मदान्वितैरतिबलैर्मातङ्गैः पर्व्वतोपमैः ॥
ऐरावतकुलीनैश्च महापद्मकुलैस्तथा ।
अञ्जनादपि निष्क्रान्तैर्वामनादपि च द्विपैः ॥
भद्रैर्मन्द्रैर्मृगैश्चैव भद्रमन्द्रमृगैस्तथा ।
भद्रमन्द्रैर्भद्रमृगैर्मृगमन्द्रैश्च सा पुरी ॥
नित्यमत्तैः सदा पूर्णा नागैरचलसन्निभैः ।
सा योजने द्वे च भूयः सत्यनामा प्रकाशते ॥
तां पुरीं स महातेजा राजा दशरथो महान् ।
शशास शमितामित्रो नक्षत्राणीव चन्द्रमाः ॥
तां सत्यनाम्नां दृढतोरणार्गलां
गृहैर्व्विचित्रैरुपशोभितां शिवाम् ।
पुरीमयोध्यां नृसहस्रसङ्कुलां
शशास वै शक्रसमो महीपतिः" ॥
इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे षष्ठः सर्गः ॥ युद्धायोग्ये त्रि ॥

अयोमल, क्ली, (अयसो मलमिव ।) लौहमल । इति राजनिर्घण्टः ॥ लोहार गु इति भाषा । तत्पर्य्यायः । मण्डूरं २ लौहकिट्टं ३ । तस्य गुणाः ।
"शतोर्द्ध्वमुत्तमं किट्टं मध्यञ्चाशीतिवर्षकम् ।
अधमं षष्टिवर्षीयं ततो हीनं विषोपमम् ॥
यल्लौहं यद्गुणं प्रोक्तं तत्किट्टञ्चापि तद्गुणम्" ।
इति वैद्यकम् ॥
(अस्य शोधनमारणं यथा,—
"दग्ध्वाक्षकाष्ठैर्मलमायसन्तु,
गोमूत्रनिर्व्वापितमष्टवारान् ।
विचूर्ण्य लीढं मधुना चिरेण,
कुम्भाह्वयं पाण्डुगदं निहन्ति" ॥
इति वैद्यकरसेन्द्रसारसंग्रहः ॥)

अर, क्ली, (इयर्त्ति गच्छत्यनेन, ऋ + अच् ।) शीघ्रम् । चक्राङ्ग । चाकार पाकि इति भाषा । शीघ्रगे त्रि । इति मेदिनी ॥

अर, पु, (ऋ + अच् ।) जिनानां कालचक्रस्य द्वादशांशः । स तु अवसर्पिण्याः षष्ठभागः । जिनानामष्टादशतीर्थङ्करः । इति हेमचन्द्रः ॥

अरक, पु, (अ + ऋ + कन् ।) शैवाल । इति धारावली । पर्पट । इति राजनिर्घण्टः ॥

अरग्वधः, पु, आरग्वधवृक्षः । सोंदाल इति ख्यातः । इत्यमरटीकायां भरतः ॥ (अस्य गुणादय आरग्वधशब्दे ज्ञेयाः ।)

अरघट्ट, पु, (अरं शीघ्रं घट्यते चाल्यतेऽसौ, अर घट्ट + अच् ।) महाकूपः । इत्यमरजटाधरौ ॥ (कूपाज्जलनिःसारणार्थं घटीयन्त्रभेदः । कूपोपरिनिवद्धजलोत्तोलककाष्ठभेदः । "स कदाचिद्दायादैर्जितोऽरघट्टघाटिकामारुह्य कूपात् क्रमेण निष्क्रान्तः" । इति पञ्चतन्त्रे ।)

अरघट्टक, पु, (अरघट्ट + स्वार्थे कन् ।) महाकूपः तत्पर्य्यायः । मालावर्त्तः २ । इति हेमचन्द्रः ॥

अरजा, [स्] स्त्री, (रन्ज + असुन्, नलोपः नञ्समासः ।) कन्या । कुमारी । इति हेमचन्द्रः रजोगुणरहिते त्रि ॥ (निर्म्मल । धौत । परिष्कृत ।)

अरटु, पु, (अरं शीघ्रं अटति, अट् + उन् ।) श्योनाकवृक्षः । इत्यमरटीकायां रायमुकुटः ॥

अरणि, पु, (ऋ + अनि ।) गणिकारिकावृक्ष इति मेदिनी । सूर्य्यः । इति काशीखण्डः ॥

अरणि, पु, स्त्री, (ऋ + अनि ।) निर्म्मन्थ्यदारु अग्निसाधनीभूतकाष्ठं । यज्ञार्थाग्निजनककाष्ठ इत्यमरः ॥ (अग्निमन्थनकाष्ठं । अग्न्युत्पादनाय यत्काष्ठं काष्ठान्तरेण घृष्यते तदरणिनामकं काष्ठं
"विपक्षवक्षोऽरणिमन्थनोत्थ-
प्रतापवह्नेरिव धूमलेखा" ।
इति धनञ्जयविजयव्यायोगे ।)

अरणी, स्त्री, अरणि । इत्यमरटीकायां भरतः ॥
("विधिना मन्त्रयुक्तेन रूक्षाऽपि मथिताऽपि च
प्रयच्छति फलं भूमिररणीव हुताशनम्" ॥
इति पञ्चतन्त्रे ।)

अरणीकेतु, पुं, (अरणी केतुरस्य सः ।) अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥

अरण्यं, क्ली, (अर्य्यते गम्यते, ऋ गतौ, अर्त्तेर्निच्चेति अन्य ।) वनं । इत्यमरः ॥ (मोक्षप्रदं दण्डकादिकं नवारण्यं । यदुक्तं,—
"दण्डकं सैन्धवारण्यं जम्बुमार्गञ्च पुष्करं ।
उत्पलावर्त्तकारण्यं नैमिषं कुरुजाङ्गलम् ॥
हिमवानर्व्वुदश्चैव नवारण्यं विमुक्तिदं" ।)

अरण्य, पु, कट्फलवृक्षः । इति शब्दचन्द्रिका ॥ (स्वनामख्यातो रैवतस्य मनोः पुत्रः । यदुक्तं हरिवंशे,—
"अरण्यश्च प्रकाशश्च निर्मोहः सत्यवान् कृती ।
रैवतस्य मनोः पुत्राः पञ्चमस्यैतदन्तरं" ।)

अरण्यकदली, स्त्री, (अरण्यस्यैव कदली, षष्ठीतत्पुरुषः ।) गिरिकदली । इति राजनिर्घण्टः ॥ (वनकदली । इयं ग्रामादौ न जायते ।)

अरण्यकार्पासी, स्त्री, (अरण्ये कार्पासी, सप्तमीतत्पुरुषः ।) वनकार्पासी । तत्पर्य्यायः । वनजा २ भारद्वाजी ३ वनोद्भवा ४ । अस्या गुणाः । हिमत्व । रुच्यत्व । व्रणशस्त्रक्षतनाशित्वं । इति राजनिर्घण्टः ॥

अरण्यकुलत्थिका, स्त्री, (अरण्यस्य कुलत्थिका, षष्ठीतत्पुरुषः ।) कुलत्था । इति राजनिर्घण्टः ॥ वनकुलथी इति भाषा ।

अरण्यकुसुम्भ, पु, (अरण्यस्य कुसुम्भ, षष्ठीतत्-

द्रवक ।) वनकुसुम्भा । तत्पर्य्यायः । कौसुम्भा २ अग्निशिखा ३ । अस्य गुणाः । कटुत्वं । श्लेष्म-नाशित्वं । अग्निदीप्तिकारित्वञ्च । इति राज-निर्घण्टः ॥

अरण्यगोधी, स्त्री, (अरण्यस्य गोधी, कर्म्मधारयः ।) वनगोधी । गोधाजातिविशेषः । इति राजनिर्घण्टः ।

अरण्यचटकः पुं, (अरण्यस्य चटकः षष्ठीतत्पुरुषः ।) वनचटकः । तत्पर्य्यायः । भूचटकः २ भूमिचटकः ३ । अस्य गुणाः । शीतत्वं । लघुत्वं । शुक्रवृद्धि-कारित्वं । बलकरत्वञ्च । इति राजनिर्घण्टः । (अस्य मांसगुणा यथा राजनिर्घण्टे,—
"चटकामिषं तु शीतं च लघु मधुरं ।
बलकारकमत्यर्थं शुक्रवर्द्धनम्" ॥)

अरण्यमार्जिका स्त्री, (अरण्यं मार्ष्टि वा, अरण्य+ मृज्+ण्वुल् अरण्यस्य मार्जिका, कर्म्मधारयः ।) वनमार्जिका । इति राजनिर्घण्टः । वन भादाल इति भाषा । अस्य गुणास्ते वेत्रामध्ये द्रष्टव्याः ।

अरण्यजीरः, पुं, (अरण्यस्य जीरः, षष्ठीतत्पुरुषः ।) वनजीरः । इति राजनिर्घण्टः । वनजीरा इति भाषा ।

अरण्यमुद्गा, स्त्री (अरण्यस्य मुद्गा, षष्ठीतत्पुरुषः ।) मोचाटः । इति राजनिर्घण्टः । वनमुग इति भाषा ।

अरण्यमल्लिका स्त्री, (अरण्यस्य मल्लिका, षष्ठी-तत्पुरुषः ।) यूथी । इति शब्दरत्नावली । यूथी इति भाषा ।

अरण्यमुद्गः, पुं, (अरण्यस्य मुद्गः, षष्ठीतत्पुरुषः ।) वनमुद्गः । इति राजनिर्घण्टः । वनमुग इति भाषा । (अस्य गुणा मुद्गशब्दे द्रष्टव्याः ।)

अरण्यराजकः, पुं, (अरण्यस्य राजकः, षष्ठीतत् पुरुषः ।) मोचराजकः । इति राजनिर्घण्टः । मोच राज इति भाषा ।

अरण्यवासिनी, स्त्री, (अरण्ये वसति या अरण्य+ वस्+णिनि स्त्रियां ङीप् ।) अरण्यवासी कन्या । इति राजनिर्घण्टः ।

अरण्यशालूकः, पुं, (अरण्यस्य शालूकः, षष्ठीतत् पुरुषः ।) वनशालूकः । इति राजनिर्घण्टः । वन शेलो इति भाषा । अस्य गुणाः शालूकवत् द्रष्टव्याः ।

अरण्यशालिः, पुं, (अरण्यस्य शालिः कर्म्मधारयः अथवा अरण्यजः ।) नीवारः । वनधान्यं । इति राजनिर्घण्टः ।

अरण्यसूरणः, पुं, (अरण्यजातः सूरणः, कर्म्म-धारयः ।) वनसूरणः । इति राजनिर्घण्टः । वन ओल इति भाषा ।

अरण्यश्वा, [न्] पुं, (अरण्ये श्वेव हिंस्रः ।) वृकः । इति हलायुधः । नेकड़े वाघ इति भाषा ।

अरण्यषष्ठी, स्त्री, (अरण्यस्य षष्ठी तिथिः, चतुर्थीतत् पुरुषः ।) ज्येष्ठशुक्लषष्ठी जामाइषष्ठी इति भाषा । यथा राजमार्तण्डे,—
"ज्येष्ठे मासि सिते पक्षे षष्ठी चारण्यसंज्ञिका ।
तस्यामरण्यपत्रकामाभ्यर्च्य विधिवत् स्त्रियः ।
यान्ति विन्ध्यवासिनीं कन्यां रुद्रमारायत्रन्ति च ।
कन्यामूलकलाहारा वसन्ते वसति सुमनाः" ।
अस्य मूलादि । सूर्यं परिहरेत् । इति तिथ्या-दितत्त्वं ॥

अरण्यानी, स्त्री, (अरण्य+आनुक्+स्त्रियां ङीष् । महत् अरण्यम् इत्यस्मिन् अर्थे इन्द्रवरुणेति सूत्रेण हिमारण्ययोर्महत्त्वे इति वार्त्तिकेन अर ण्यस्य आनुगागमः, ततो ङीष् ।) महावनं । इत्यमरः । ("अपि मनसापि वसन्त्यरण्यानी नामा रण्यानी" । इति हितोपदेशे ।)

अरत्निः, पुं, स्त्री, (अरता निरता नता यस्य ।) कूर्परः । इति त्रिकाण्डशेषः । रत्नरूपे च ।
(नास्ति रतिः अस्मात् यथा अस्य यस्य वा ।)

अरतिः, पुं, (न+रतिः ।) क्रोधः । इत्यमरटीका ।

अरतिः, स्त्री (रम्+क्तिन्, नञ्समासः ।) अरम् शिचितत्वम् । इति रतिका । ध्रीडाभावः । इति चार्त्तिकः । रतिविरहः । रतिरूपे च ।
(विरक्तिः । प्रीतिविरहः । चतुरत्नपरिमितं । कफजाततुल्यिका । कामाभावः । अबोधनाविशेषः । विकलता । उत्साहभावः । दुःखं । क्षोभः । क्लीवत्वं । असन्तोषः । इत्यादिरोगात् चित्तस्याउप्रीत्यभावः । यथा,—
"कामानशक्यानानेव यैर्मनो भावयतीति ।
अरतिर्वा तु विवेका" । अतृप्तत्वाभावः । यथार्थः ।
"क्रोधोऽरतिर्भिक्षोर्न रैतावं महत्तरं" ।
इति सुश्रुते ।)

अरत्निः, पुं (ऋ+कत्निः, रतिः समस्तृतिरतः, न अस्ति अत्र ।) विस्तृतकनिष्ठमुष्टिहस्तकः । कूर्परः । इति मेदिनी ।
("उन्नतिः प्रतिवृत्तत्वे हस्तविक्षुबन्धनक" ।
इति रामायणे । कफोणि । हस्त । करस्य मध्ये । बद्धमुष्टिकरः । कौर्प, कनी इत्यादि भाषा ।
"यथा मूर्तिं महाराज मन्दरं विषविस्तरं ।
तस्य नाशु रतो भीमो भद्रो वैमनस्यिना" ।
इति महाभारते ।)

अरत्नर्ष स्त्री, (न रत्नर्षं यस्य यस्मात् सन् ।) माया माता । अपि नयानकामामाविशेत् स्थावरमनं वाम्ये । शीतनाम्ना गतिम् चलिम् दिने दश वत् द्यायस्यमनिर्युक्तये । इति चोक्तप्रतिर्थे । तत्र प्रमाणं ।
"कर्म्माण्यमथाद् विरती विशाखं विंशत्वन्तो ।
ममकाशिकासिलो दत्ता वर्षे विरोधितिं" ।
इत्यापाततोऽर्थकत्वम् ।

अरमः, त्रि, (न रमते इति, मायारे अम् ।) अरमः । अचकः । इत्यमरटीकायां रायमुकुटः । (भीतः । विरक्तः । नीचः ।)

अररं क्ली (ऋ+अरन् ।) कपाटं । इत्यमरः । अररीकोषः । कपाटार्गलं । इति त्रिका । (इति कर्म्मणमरतेर्विकारः । कपाटं । वर्मः । रथः ।)

अररिः, पुं, स्त्री, (ऋच्छति ऋ+क्रिप्, अररिर्विदे च इति ।) कपाटं । इति हैमचन्द्रः ।

अररुः, पुं, (ऋ+अरु ।) शत्रुः । इति सिद्धान्त कौमुद्यामुणादिवृत्तिः । (अग्निभेदः । असुर भेदोऽप्ययमेव ।)

अररे, अ (अरं शीघ्रं राति रा+के ।) अत्यन्त कम्पितः । नीचसम्बोधनं । इति शब्दरत्नावली । (शीघ्रं प्रकटत्वामेघ्नता अथवे अधिकसक्रोधा सम्बोधने ।
"अरे विनाशमग्ने अररे सत्यामिचे" ।
इति शब्दरत्नावली ।)

अरलुः, पुं, (अरं शीघ्रं लाति, ला+कु, ऋ+अल+ उण च ।) श्योनाकवृक्षः । इत्यमरः । शोणाकस्य इति भाषा ।

अरविन्दं, क्ली, (अरान् चक्राङ्गानि इवादि अनुरूपा दलानि यस्य, तान् विन्दति लभते इत्यर्थे विन्द +श ।) पद्मं । सारसकी । इत्यमरः । वार्ज । जलजन्म । नीलोत्पलं । इति राजनिर्घण्टः ।
("अभीष्टितं तुषिकवैर विन्दं द्रवोद्गमिभि-मितारविन्दम्" । इति कुमारसम्भवे ।
"अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलं ।
स्मरामि वदनं तस्याश्चारुचञ्चललोचनम्" ।
इति साहित्यदर्पणे ।)

अरविन्दिनी, स्त्री, (अरविन्द+इनि, ङीप् ।) पद्मिनी । इति शब्दरत्नावली । पद्मसमूहः । पद्माकरः । इति रत्नमाला ।

अरसिकः, त्रि, (रसं वेत्ति, रस+ठन् नञ् समासः ।) अरसज्ञः । अविदग्धः । यथा । "अर सिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख" । इत्युद्भटः ।

अराजकः त्रि, (नास्ति राजा यस्य वा, कप् ।) राजशून्यदेशादिः । यथा,—
"नीरभावं क्षमयं रक्षितमराजकं" ।
इति श्रीमद्भागवतं । (नियन्तृरहितः । शासनशून्यः । रहितः ।
"अराजके जनपदे दोषा जायन्ते वै सदा ।
उद्वृत्त सततं लोकं राजा दण्डेन शास्ति वै" ।
इति महाभारते ।)

अराजन्, पुं, (नास्ति राजा यत्र वा कप् ।) राज शून्यदेशादिः । यथा,—
"अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः" ।
इति मानवे ७ अध्याये ३ श्लोकः ।

अरातिः, पुं, (न राति ददाति सुखं, रा+क्तिच्, नञ्समासः ।) शत्रुः । इत्यमरः ।
("अरातिविक्रमालोकविकस्वरविलोचनः" ।
इति साहित्यदर्पणे ।
"अनेकयुद्धविजयी सन्तानं यस्य गच्छति ।
तथानेन प्रकारेण नर्दं मध्यस्थराजकम्" ।
इति पञ्चतन्त्रे ।)

अरालः, त्रि, (ऋ+क्विप्, अरमलति अल+अ +च ।) कुटिलः । वक्रः । इत्यमरः ।
("अराले यामायामविकटनमनोहरालये ।
इति काव्यप्रकाशः ।)

अराल, पुं, (ऋ + विच्, अरमालाति, आ + ला + क ।) सर्ज्जरस । मत्तहस्ती । इति मेदिनी ॥ वक्रहस्त । इति शब्दरत्नावली ॥

अराला, स्त्री, (अराल + स्त्रियां टाप्) अबद्धा । कुलटा । इति शब्दरत्नावली ॥

अरि, पु, (ऋ + इन् ।) शत्रु । इत्यमर ॥ ("उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा" । इति हितोपदेशे। [इति मनु ।) "अनन्तरमरिं विद्यादरिसेविनमेव च" । चक्र । इति त्रिकाण्डशेष ॥ खदिरभेद । तत्पर्य्याय । सन्दानिका २ दाली ३ खदिरपत्रिका ४ । अस्य गुणा । कषायत्व । कटुत्व । तिक्तत्व । रक्तार्त्तिपित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥

अरित्र, क्ली, (ऋच्छत्यनेन, ऋ + इत्र ।) कर्णं । हालि इति भाषा । तत्पर्य्यायः । केनिपातक २ । इत्यमर ॥ केनिपात ३ । इति भरत ॥ ("लोलै- रलित्रैश्चरणैरिवाभित " । इति माघः ।)

अरिन्दम, त्रि, (अरीन् शत्रून् कामादीन् वा दाम्यति दमयति, दम् + अन्तर्भूतण्यर्थे खच् मुम्, उपपद समास ।) शत्रुदमनकारक । इति मुग्धबोध- व्याकरण ।
("यथाकाम यथोत्साह यथाकालमरिन्दम ।
सेविता विषया पुत्र यौवनेन मया तव" ॥
"ज्ञात्वा तु तद्गृह सर्व्वमादीप्तं पाण्डुनन्दनाः ।
सुरङ्गां विविशुस्तूर्णं मात्रा सार्द्धमरिन्दमा " ॥
इति महाभारते ।)

अरिमर्द, पु, (अरि रोगरूप शत्रु, मर्द्दनाति, मृद् + अण्, उपपदसमासः ।) कासमर्दवृक्षः । इति राजनिर्घण्टः ॥ (त्रि, शत्रुमर्द्दनकारी ।)

अरिमेद, पु, (अरेर्विट्खदिरस्येव मेद सार यस्य स ।) वृक्षविशेष । गुया बाबला इति भाषा । तत्पर्य्याय । इरिमेदः २ रिमेदः ३ गोधास्कन्द ४ अरिमेदक ५ अहिमारः ६ पूतिमेद ७ अहिमेदक ८ विट्खदिर ९ । अस्य गुणा । कषायत्व । उष्णत्व । तिक्तत्व । भूत- विनाशित्व । शोथातिसारकासविषवीसर्पनाशि- त्वञ्च । इति राजनिर्घण्टः ॥
(अस्य व्यवहारो यत्र तदौषध यथा,—
'तुला हृता नीलसहाचरस्य,
द्रोणेऽम्भसः सम्पचेद्यथावत् ।
पूतं चतुर्भागरसे तु तैल,
पचेच्छनैरर्द्धपलप्रयुक्तैः ॥
कल्कैरनन्ताखदिरारिमेद-
जम्ब्वाम्रयष्टीमधुकोत्पलाना ।
तत्तैलमाश्वेव धृत मुखेन,
स्थैर्य्यं द्विजाना विदधाति सद्यः" ॥ * ।
महासहचर तैल ॥ इति वैद्यकचक्रपाणिसंग्रहे ।)

अरिष्ट, क्ली, (रिष हिंसायां कर्त्तरि क्त, नञ्- समासः ।) सूतिकागृह । ("अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा"। इति रघुवंशे ।) अशुभ । तक्र । मरणचिह्न । (यदुक्तम्, " रोगिणो मरण यस्मादवश्यम्भावि लक्ष्यते । तल्लक्षणमरिष्ट स्याद् रिष्टमप्यभिधीयते" ।) शुभ । इति मेदिनी ॥ उपद्रवः । तत्पर्य्याय । उप- लिङ्ग २ उपसर्ग ३ अजन्य ४ ईति ५ उत्पात ६ । इति हेमचन्द्र ॥ (मद्य । यथा । द्राक्षारिष्ट । दशमूलारिष्ट । बब्बूलारिष्ट ।
"अरिष्ट मधुपाकेन सर्व्वतश्च गुणाधिकम् ।
अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समा " ॥
इति वैद्यके ।)
("मरणचिह्नार्थे लक्षण यथा । नियतमरणा- ख्यापकलिङ्ग ॥ इति माधवसंग्रहीतरोगविनि- श्चयग्रन्थटीकाकृद्विजयरक्षित ॥ * ॥ तत्र प्रकृत- वर्णोऽर्द्धशरीरे विकृतवर्णोऽर्द्धशरीरे द्वावपि वर्णौ मर्य्यादाविभक्तौ दृष्ट्वा यथैव सव्यदक्षिणविभा- गेन यथैव पूर्व्वपश्चिमविभागेन यद्युत्तराधर- विभागेन यद्यन्तर्बहिर्विभागेनातुरस्यारिष्टमिति विद्यात्" ॥ इति चरक ।
"शरीरशीलयोर्यस्य प्रकृतेर्विकृतिर्भवेत् ।
तत्त्वरिष्ट समासेन व्यासतस्तु निबोध मे" ॥
इति च सुश्रुत ।)

अरिष्टः, पु, (रिष हिंसाया कर्त्तरि क्त, नञ्समास ।) लशुन । निम्ब । फेनिलवृक्षः । काक । कङ्क- पक्षी । इति मेदिनी । वृषभासुरः । इत्यनेकार्थ- ध्वनिमञ्जरी ॥ मद्यविशेष । इक्षुविकारसहिता- भयाचित्रकदन्तीपिप्पल्यादिभूरिभेषजक्वाथादिस- स्कारवान् अरिष्टोऽभिधीयते । इति सुश्रुतटीका ॥ अस्य गुण । अर्शःशोथग्रहणीकफरोगनाशित्व । इति राजवल्लभ ॥
("द्रवेषु चिरकालस्थ द्रव्य यत्सन्धित भवेत् ।
आसवारिष्टभेदैस्तत् प्रोच्यते भेषजोचित ॥
यदपक्वौषधाम्बुभ्यां सिद्ध मद्य स आसव ।
अरिष्ट क्वाथसिद्ध स्यात्तयोर्मान पलोन्मित" ॥
इति शार्ङ्गधर ॥ गुणोऽस्य यथा चरकेणोक्त ॥
"शोफार्शोग्रहणीदोषपाण्डुरोगारुचिज्वरान् ।
हन्त्यरिष्टः कफकृतान्रोगान् रोचनदीपनः ॥ * ॥
दन्तीचित्रकमूलानामुभयोः पञ्चमूलयो ।
भागान् पलांशानापोथ्य जलद्रोणे विपाचयेत् ॥
त्रिफलाया दलानाञ्च प्रक्षिप्य त्रिपल ततः ।
रसे चतुर्थशेषे तु पूते शीते समावपेत् ॥
तुला गुडस्य तत्तिष्ठेत् मासार्द्धं घृतभाजने ।
तन्मात्रया पिबेन्नित्य अर्शोभ्योऽपि प्रमुच्यते ॥
ग्रहणीपाण्डुरोगघ्न वातवर्च्चोऽनुलोमन ॥
दीपनञ्चारुचिघ्नञ्च दन्त्यरिष्टमिद विदुः" ॥
इति दन्त्यरिष्टः । इति चरकः ॥
"अरिष्टो द्रव्यसयोगसंस्कारादधिको गुणैः ।
बहुदोषहरश्चैव दोषाणा शमनश्च सः ॥
दीपनः कफवातघ्नः सरः पित्तविरोधनः ।
शूलाध्मानोदरप्लीहज्वराजीर्णार्शसा हितः" ॥
इति सुश्रुतश्च ॥)

अरिष्टक, पु, (अरिष्ट एव स्वार्थे क ।) फेनिलवृक्षः, इति शब्दरत्नावली ॥ रीठाकरञ्ज इति ख्यात । अरिष्टशब्दार्थोऽप्यत्र ॥ रिठा इति भाषा । (अस्य गुणा यथा,—
"अरिष्टकस्त्रिदोषघ्नो ग्रहजिद्गर्भपातन " ।
इति । एतत्फलचूर्णैर्हि कुतपाना नेपालदेशीय- कम्बलानामित्यर्थ प्रक्षालनात् शुद्धिर्भवतीति शा- स्त्रविदा मतम् । यदुक्त मनुना,
"कौषेयाविकयोरूषैः कुतपानामरिष्टकैः ।
श्रीफलैरंशुपट्टाना क्षौमाणा गौरसर्षपैः" ॥ इति)

अरिष्टताति, त्रि, (अरिष्ट + तातिल् ।) क्षेमङ्क- र । शुभङ्कर । इति भूरिप्रयोग ॥ (स्त्री, शुभा- शसन । सौभाग्यवृद्धि । कुशलातिशय्य । "तदत्र- भवता निष्पन्नाशिषा काममरिष्टतातिमाशा- स्महे" । इति महावीरचरिते ।)

अरिष्टदुष्टधी, त्रि, (अरिष्टेन मरणसूचकनिमित्तेन दुष्टा धीरस्य ।) आसन्नमरणसूचितलक्षणेन दू- षितबुद्धि । मरणकुबुद्धियुक्त । तत्पर्य्यायः । विवश २ । इत्यमर ॥

अरिष्टनेमि, पु, (अरिष्टस्य नेमि , षष्ठीतत्पुरुषः ।) जिनाना चतुर्व्विंशत्यन्तर्गतद्वाविंशतितीर्थङ्कर । इति हेमचन्द्र ॥ (विनतागर्भसम्भूत खगाख्यात काश्यपमुनिपुत्र , यथा हरिवंशे,
"तार्क्ष्यश्चारिष्टनेमिश्च गरुडश्च महाबल ।
अरुणश्चारुणिश्चैव विनताया सुता स्मृता " ॥
अथ प्रपौत्रश्चित्रकस्य पुत्र स्वनामख्यातो राजा, यथा, हरिवंशे,
"चित्रकस्याभवन् पुत्रा पृथुर्विपृथुरेव च ।
अश्वग्रीवोऽश्वबाहुश्च सुपार्श्वकगवेषणौ ।
अरिष्टनेमिरश्वश्च सुधर्म्मा धर्म्मभृत्तथा" ॥
स्वनामख्यात प्रजापतिः । यथा रामायणे,
आदिकाले महाबाहो ये प्रजापतयोऽभवन् ।
दक्षो विवस्वानपरोऽरिष्टनेमिस्तथैव च ।
काश्यपश्च महाभागस्तेषामासीदपश्चिम" ॥)

अरिष्टसूदन, पुं, (अरिष्ट तन्नामानमसुर सूदयति य, अरिष्टस्य सूदन नाशक इति वा ।) विष्णु । इति त्रिकाण्डशेष ॥ शुभाशुभनाशके त्रि ॥ (कृष्ण । स खलु माथुरे कल्पे अरिष्टनामानमसुरं सूदितवान् ।)

अरिष्टा, स्त्री, (अरिष्ट + स्त्रियां टाप् ।) कटुका । इति राजनिर्घण्ट ॥ कट्की इति भाषा ।(स्वनाम- ख्याता काश्यपपत्नी, सा हि सर्व्वान् गन्धर्व्वान् जनयामास । यथा,—
"अरिष्टा तु महासत्वान् गन्धर्व्वानमितौजसः" ॥
इति हरिवंशे ।)

अरुः, [स्] पु, (ऋ + उसि ।) सूर्य्य । इत्युणादि- कोषः ॥ रक्तखदिर । इति राजनिर्घण्टः ॥

अरुः, [स्] पु, स्त्री, (ऋ + उस् ।) व्रण । क्षत । इत्यमरः ॥

अरु, [स्] क्ल, (ऋ + उसि ।) मर्म्म । सन्धि- स्थान । इत्युणादिकोषः ॥

अरुचि, पु, (न रुचिर्यत्र सः ।) रोगभेदः । स च सत्यभिलाषेऽभ्यवहारासामर्थ्यरूप । इति रक्षित ॥ तत्पर्य्यायः । अरोचकः २ अश्रद्धा ३ अनभिलाषः ४ । इति राजनिर्घण्ट ॥
("दोषै पृथक् सह च चित्तविपर्य्ययाच्च

भ्रान्तिमिदं यदि चापलस्य प्रमाणं ।
तस्मे यदि भेवति तं विमलो विवादं,
मल्लोऽयमावमिह यदि वदन्ति" ।
इति सुश्रुतः । अस्य रुपधारणोत्तरविधिप्रकार
स्तन्नामके परिच्छिन्नो बाहुनैत्याद्यक्ता साररत्ना
विधिरन्, यथा शारीरस्थाने,—
"मध्येऽरुणोदय शाखा शाखया जायतेऽपि ।
प्रथमविकोऽन्तरोदर्यं कर्णमात्राधिका यदि" ।
अरुण, पुं. (ऋच्छति ऋ+उनन्, उन्नुपागमः ।) यार
गतवेगा । इति राजनिर्घण्टः । कौशाल इति
भाषा । (यथामथ्वावदतनविधिना ।
"प्रज्वलोऽरुणशिरा कुण्डा संज्ञारो अरुणमित्र ।
अनुसारो परिचारो पराक्ष संजयोऽरुणः" ।
इति हरिवंशे ।)
अरुणं, क्ली (ऋ+उनन् ।) कुङ्कुमं । सिन्दूरं । इति
राजनिर्घण्टः ।
अरुण पुं (ऋ+उनन् ।) सूर्य्यसारथिः । स तु
विनतागर्भजः कश्यपपुत्रः गरुडाग्रजश्च । अव्यक्तरागः ।
सन्ध्यारागः १ बधूकः २ नागमिः ३ अदकश्यपम ४
सूर्यः । कर्णवृक्षः । पुन्नागवृक्षः । रक्तवर्णः ।
शब्दवर । कुष्ठरोग । दक्षदुहिता । कपिल-
वर्णः । कुष्ठभेदः । अव्यक्तवर्णविशिष्टे तु वाच्य-
लिङ्ग । इति मेदिनी । कुष्ठरोगः । बकः ।
इति राजनिर्घण्टः । (कपिलवर्णयुक्तः । यथा
विविधवर्णविशिष्टः ।
"अरुणोदयवहो धूमो दृश्यते विमलाम्बरे" ।
इति रामायणे ।)
अरुणकमल, क्ली, (अरुणवर्णं कमलमिव निरुपमं
यत्र ।) रक्तोत्पलं । इति राजनिर्घण्टः ।
अरुणलोचन, पुं. (अरुणे रक्ते लोचने यस्य सः ।)
पारावतः । इति राजनिर्घण्टः ।
अरुणसारथि पुं (अरुणः सारथिः यस्य सः
सः ।) सूर्यः । इति हेमचन्द्रः ।
अरुणा, स्त्री (अरुण+स्त्रियां टाप् ।) अतिविषा ।
श्यामा । मञ्जिष्ठा । त्रिवृता । इति मेदिनी ।
इन्द्रवारुणी । मुण्डा इति राजनिर्घण्टः । नदी-
विशेषः । इति शब्दमाला ।
अरुणात्मज, पु. (अरुणस्य आत्मजः, षष्ठीतत्पुरुषः ।)
जटायुपक्षी । इति त्रिकाण्डशेषः ।
अरुणानुज पु. (अरुणात् अनुजः पश्चाज्जातः ।)
गरुडः । इति हेमचन्द्रः ।
("अरुणानुजं वीनाताराचोत रवेर्पथि ।
सुपर्णं यत्र गरुडा सुपर्णं वैनतेयमम् ।
इति हरिवंशे ।)
अरुणोदय पुं. (अरुणस्य सूर्यसारथेः उदयो यत्र
काले ।) सूर्योदयात् पूर्वं मुहूर्त्तद्वयकालः । यथा,—
"चतस्रो घटिकाः प्रातररुणोदय उच्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः" ।
इति स्मृतिरत्नाकरः । (यद्युक्तं,—
"रजनीशेषभागस्तु वैवाहिकस्त्वरुणोदयः" । इति ।
"दृष्ट्वा प्रतिपन्नं वा स्वप्नान्तेऽरुणोदये" ।
इति स्मृ ।)

अरुणोदयसप्तमी, स्त्री, (अरुणोदयकाले एका-
दशीवेधिता वा सप्तमी ।) माघशुक्लसप्तमी ।
माघी सप्तमी । यथा । भविष्ये ।
"सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ।
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
दद्यात् स्नानार्घदानाभ्यामायुरारोग्यसम्पदः ।
अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।
प्रयागे यदि लभ्येत सूर्य्यग्रहणवत् फलम्" ।
कोटिभास्करा कोटिसप्तमीतुल्या । सूर्य्यग्रहण
एव स्नानं कीर्त्तितं मुनिभिस्तथा इति
ज्ञानात् । तेन अरुणोदयसूर्य्यग्रहणकालीनसप्त-
म्यामनयोरेवसमप्राप्तिः अरुणेन चेयं । अत्र
अरुणोदयसूर्य्यग्रहणकालयोः प्रयोगाधिकरणत्वाद्धर्म-
सम्भवात् प्रयागे स्नानं समानमपि प्रशस्य-
त्वमर्थं गम्यते । अतो गमयितुम् । । पूर्व-
गतयोः पूर्वापरयोर्माघशुक्लपक्षे सप्तमी तत्र
पूर्वदिने स्नानादि कार्य्यं ।
"चतस्रो घटिकाः प्रातररुणोदय उच्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः ।
निशायां स्नानं प्राक्सन्ध्यापञ्चघटिकं ।
नाडीनां तदुभे सन्ध्ये दिवसान्तनिशि" ।
इति स्मृतिमाधवीयवचनप्रयोगवर्त्तेरपि पञ्चकं यद्
वाक्यं पूर्वदिवसमभिदिवसपर्यन्तं व्याप्यावधेय
इत्यस्य वैपरीत्यमाभिधानात् । अतएव स्नाने
तत्कालमात्राच्छिन्नस्नानमभिहितं । । तथा
अरुणोदयकाले मुहूर्त्तव्यापिविधान एव कार्य्यं ।
"अरुणोदयकालादौ षष्टिकेन यदा भवेत् ।
पतस्ते सा विधिर्ज्ञेया सप्तम्याः स्नानगामिनी" ।
इति विष्णुधर्म्मोत्तरात् । अत्र घटिका मुहूर्त्ते
मात्रकोऽयमनुरोधादिति गम्यते । मुहूर्त्तपर्य्य
गमने घटिका द्वयस्य । तद्वचने नाडीनाम-
न्यत्र चतुष्टयमभिधेयत्वस्य । । ये तु सूर्य्यो-
दयात् प्रागपि प्राग्व्यापित्वात् तदैव प्रात
स्नानादनुष्ठानविधिविधेयत्वादिमानमाहुः ।
प्रकरणात्पाने सप्तम्याः इति वैभिषिकेन
प्रकरणभेदे तुल्यविधिर्विरोधः । अतएव अरुणो-
दयसम्बन्धः ।
"न स्पृष्टिदिवात् शीघ्रात् अरुणसूर्य्योदयोऽपि ।
प्रातःस्नानं भवेदिह तं माघी माघमासपूर्वी" ।
इति । विष्णुश्रुती । "अथापि यथा सप्तमीं
सप्तमातरम्" । इति विष्णुस्मृतिवचनात् अरु-
णोदयव्यापिनाम् सप्तम्यान्तराविशिष्टस्नानेन
सम्बन्धमास्थितमभिमतं । न तु तत्कालव्यापित्वं ।
किन्तु सामान्यतः अरुणोदयविशिष्टेति । ।
अत्र माघमासविशिष्टसप्तमीसप्तमीनिर्णयस्य-
मन्यत्वमतो प्राप्तिस्वादत् वैशिष्ट्येन प्राप्य-
स्थितम् अरुणोदये । "प्रथमकालिका अत्र
चार्थे तत् तिष्ठते सुक । अरुणोदयादिकानन्तु
पादविधे न सम्भिदा" । इति वाचस्पतिवचनात् ।
"न स्नानमात्रेऽपि न सप्तमी न सप्तमीहि ।
न तावोऽपि अरुणोदये सप्तम्यां सप्तमी" ।

इति मनुवचनेनारुणोदयव्यापित्वनिषेधात् ।
"अष्टमीविद्धान्वितेत् सप्तमीविद्धं तथा युक्" ।
इति मनुवचनात् । अतएव माघीशुक्लसप्तम-
म्यां प्रयागस्नानमपि स्नानानां सप्तदेवताप
विहिताम् अस्मिन् विशेषितेति वाक्यविन्या-
सेऽपि । विषमासिद्धिप्रीतिकामतो षष्ठी तद्
युक्तं । शुक्लात्सप्तम्यात् सप्तम्यारब्धं इति
व्यासेन सर्वं बोध्यं । तत् स्मृतिकौस्तुभादिमाधुर्य्य
भेदसिद्धिरेव अवधेयम् ।
"यथाप्यन्तरेऽपि सप्तम्यां रवौ स्नानं प्रवर्त्तते ।
अनाद्यन्ते सप्तमे तु विशेषेणैव कारयेत् ।
इति वैमाधिकस्मृतिसंग्रहाद्युक्तम् । तत्तत्र
प्रायशः कार्त्तिकमासादाम्यदीयतं ।
"वैशाखमाघमासेषु सप्तम्यामरुणोदये ।
स्नानञ्चापि सप्तम्यां तथा विषुवतीष्वपि ।
इति महाभारतोक्तत्वात् । । तीर्थान्तरे मैथिलादि
मताच्च ।
"विषमदिवसे माघे अरुणोदये विधीयते" ।
इति सप्तमीसदृशवचनात् । "तीर्थान्तरे अरु-
णोदयेऽरुणोदयस्य" । अतएव गङ्गास्नानादि-
तीर्थविन्यासमात्रे । तत्र प्रयागे गङ्गायां कोटि-
गुणेऽपि माघसप्तमीस्नानादिकारणादिक्रमेण
पुण्यवृद्धेः प्राक् स्नानार्थं तद्युक्तं यथा माघ्
मासेन विहितत्वात् । अन्यथा अरुणोदय-
स्नानमात्रं अरुणोदयप्रवेशोत्तरमुक्तं । । अन्ये
परिगणीमाह अरुणोदयस्य सिद्धि । तत्
प्रदत्तमात्रे सप्तमीस्नाने च विशेषं विधाय ।
"सप्तम्यामपि पापं यथा सप्त जन्मसु ।
तन्मे रोगञ्च शोकञ्च माघरी हन्तु सप्तमी" ।
इत्युक्तं पापादिविशेषेण । रोगं शोकं । इति-
वचनात् पौर्णमास्यमावास्यादित्वात् मासान्तीय
सप्तम्यादिव्यापकस्मार्त्तविशिष्टविधिपरं ।
"त्रिविक्रमे च अमायां रवे सप्तम्यादिनेन च ।
विपर्य्यये च पौर्णमासे तत्त्वे विधिर्विधेयः" ।
इति मदनरत्नाकरप्रभृतिग्रन्थेषु सप्तम्यां युक्त-
त्वात् । यथा मत्स्यपुराणे ।
"सप्तम्यामन्तरादौ तु रथसप्तमीति विख्याता ।
माघमासस्य शुक्ले पक्षात् या रथसप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम्" ।
अतएव माघीति रथाख्यसप्तम्युक्तं । यथा,—
"महापातकाद्यं यस्यां महत्स्नानमपि चैव हि ।
रथसप्तम्यां विनाशाय समाप्तमेव युक्ता ।
माघमासे तु सप्तम्यां रथाख्यायाम् स्नायेत्" ।
रथयात्रा सप्तमीकालपरत्वाद् । मन्वन्तरा
मन्वन्तराणामिति वचनात् । अत महासप्तम्यादि
कारणैर्मासान्तरं प्रतीयते । अतएव चतुर्थेन
मन्वन्तरादिवर्णने नापि च रथसप्तमी । यथा ।
भविष्यपुराणे ।
"मन्वादय् सप्तमसी माघी कार्त्तिकी तथा ।
कार्त्तिका वैशाखस्य तथा भाद्रपदस्य च ।
फाल्गुनस्यामावास्या पौषस्यैकादशी तथा ।
आषाढस्यापि दशमी तथा माघस्य सप्तमी ।

श्रावणस्याष्टमी कृष्णा तथाषाढस्य पूर्णिमा ।
कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता ॥
मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारिका" ।
अत्र अमावास्याऽष्टमीव्यतिरिक्ता शुक्ला पुनः-पुनरुक्तयामदोषाकीर्त्तनादानात् । उपक्रमोपसंहारयोः शुक्लत्वकीर्त्तनाच ॥ अत्र कामधेनौ तृतीया चैव माघस्येति । कल्पतरौ तु तृतीया चैत्रमासस्येति लिखितं । अत्र पाठद्वये श्रीपतिरत्नमालायां । "अश्वयुजि शुक्लनवमी कार्त्तिके द्वादशी मधौ तृतीया च" । इति पाठाच्चैत्रतृतीयैव ग्राह्या । श्रीदत्तोऽप्येवं । माघसप्तम्याद्यावाङ्गत्वं सौरागमेऽपि ।
"अर्कपत्रैः सबदरैर्दूर्व्वाक्षतसचन्दनैः ।
अष्टाङ्गविधिना चार्घ्यं दद्यादादित्यतुष्टये ॥
माघेऽथ फाल्गुने वापि भवेद्वै माघसप्तमी ।
माकरीति च यत्नोक्ता तस्यायोत्पत्तिदर्शनात्" ॥
अष्टाङ्गविधिना ।
"योऽष्टाङ्गमर्घ्यमापूर्य्य भानोर्मूर्द्ध्नि निवेदयेत् ।
साम्बपाम्रार्घ्यदानेन पुण्यं दशगुणं स्मृतं" ॥
इति भविष्यपुराणीयेन । आदित्यपुराणे ।
"अष्टराशिविशेषेण यत्कर्म्म विहितं नरैः ।
दैवं वाप्यथवा पैत्र्यं तदन्यथापि दृश्यते" ॥ • ॥
अर्घ्यमन्त्रस्तु ।
"जननी सर्व्वभूतानां सप्तमी सप्तसप्तिके ।
सप्तव्याहृतिके देवि । नमस्ते रविमण्डले" ॥
प्रणाममन्त्रस्तु ।
"सप्तसप्तिवहप्रीत सप्तलोकप्रदीपन ।
सप्तम्या हि नमस्तुभ्यं नमोऽनन्ताय वेधसे" ॥
अरिरस्य । इति तिथ्यादितत्त्वं ॥

अरुणोपल, पु, (अरुणः उपलः, कर्म्मधारयः ।) रक्तवर्णमणिविशेषः । चुनी इति भाषा । तत्पर्य्यायः । पद्मराग २ लोहितक ३ लक्ष्मीपुष्प ४ । इति हेमचन्द्रः ॥

अरुन्तुद, त्रि, (अरूंषि मर्म्माणि तुदति, तुद+खश्+मुम् च ।) मर्म्मपीडकः । तत्पर्य्यायः । मर्म्मस्पृक् २ । इत्यमरः ॥ (परुषः । कठोरः । श्रवणकटु "माकन्द मकरन्दतुन्दिलममुं गाढस्व काक क्षयं कर्णारुन्तुदमन्तरेण रणितं त्वां मन्महे कोकिल" । इति भामिनीविलासे । मर्म्मपीडाकरः । हृदयग्रन्थिरूपमर्म्मस्थानस्पर्शकारी । यथा,
"नारुन्तुदः स्यादार्त्तोऽपि न परद्रोहकर्म्मधीः" ।
इति मनुः ।
"तीक्ष्णा नारुन्तुदा बुद्धिः कर्म्म शान्तं प्रतापवत्" ।
इति माघः ।
"अरुन्तुदमिवालानमनिर्व्वाणस्य दन्तिनः" ।
इति रघुवंशे ।)

अरुन्धती, स्त्री, (न रुन्धती ।) वशिष्ठपत्नी । तत्पर्य्यायः । अक्षमाला २ । इति हेमचन्द्रः ॥ सा कर्दममुनिकन्या महासाध्वी । इति श्रीभागवतं ॥ आकाशे सप्तर्षिमध्ये वशिष्ठसन्निधौ तस्या उदयः । गतायुषस्तां न पश्यन्ति । (यदुक्तं —
"दीपनिर्व्वाणगन्धञ्च सुहृद्वाक्यमरुन्धतीं ।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः" ॥
यथा च सुश्रुते,—
"न पश्यति स नक्षत्रं यश्च देवीमरुन्धतीं ।
ध्रुवमाकाशगङ्गां वा तं वदन्ति गतायुषं" ॥)
सप्तपदीगमनानन्तरं जामाता मन्त्रं पाठयन् वधूं तां दर्शयति च ॥

अरुन्धतीजानि, पुं, (अरुन्धती जाया यस्य सः, निङ् ।) वशिष्ठमुनिः । इति हेमचन्द्रः ॥

अरुन्धतीनाथ, पु, (अरुन्धत्या नाथः, षष्ठीतत्पुरुषः ।) वशिष्ठमुनिः । इति त्रिकाण्डशेषः ॥

अरुष्क, पु, (अरुर्म्मर्म्मस्थानं कायति पीडयति, कै+क ।) भल्लातकवृक्षः । इति शब्दरत्नावली ॥

अरुष्कर, स्त्री, (अरुः करोति अरुः+कृ+ट, उपपदसमासः मत्वं ।) भल्लातकफलं । इति हेमचन्द्रः ॥

अरुष्कर, पु, (अरुः करोति, अरुः+कृ+ट, मत्वं उपपदसमासः ।) भल्लातकवृक्षः । इति शब्दरत्नावली ॥

अरुष्करः, त्रि, (अरुः करोति, अरुः+कृ+ट, मत्वं, उपपदसमासः ।) व्रणकरः । क्षतकारकः । इति मेदिनी ॥

अरुहा, स्त्री, (रोहति, रुह+क, नञ्समासः ।) भूम्यामली । इति राजनिर्घण्टः ॥ भूमि आमला इति ख्याता ।

अरूप, त्रि, (नास्ति रूपमस्य ।) रूपशून्यं । यथा । "अरूपवातातीसारादाविवारुणं" । इति रक्षितः ॥ कुत्सितरूपं ।
("इमामरूपामसतीं भक्षयिष्यामि मानुषीम्" ।
इति रामायणे ।)

अरूषः, पु, (ऋ+ऊषन् ।) सर्पविशेषः । इत्युणादिकोषः ॥ सूर्य्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

अरे, व्य, (ऋ+रे ।) नीचसम्बोधनं । इति हेमचन्द्रः ॥ ओरे इति भाषा । अपाकृतिः । असूया । इति मेदिनी ॥ (रोषाह्वाने । अपकृतौ । "अरे चेतोमीन । भ्रमणमधुना यौवनजले त्यज त्वं स्वच्छन्दं युवतिजनधौ पश्यसि न किम्" । इति शान्तिशतके । "अरे अनुग्रन् ! निरपराधराजकुलकदन महापातकिन् अशिष्टविजृम्भितचेष्ट !" इति महावीरचरिते ।)

अरेरे, व्य, (अरे+वीप्सायां द्विरुक्तिः ।) अधमसम्बोधनं इति जटाधरः ॥ सक्रोधाह्वानं । इति शब्दमाला ॥

अरोक, त्रि, (रुच+घञ्, नञ्समासः ।) निष्प्रभः । दीप्तिरहितः । इत्यमरः ॥ रोकश्छिद्रन्तद्रहितश्च ॥

अरोचक, पुं, (न रोचयति प्रीणयति, रुच्+णिच्+ण्वुल्, नञ्समासः ।) रोगविशेषः । अरुचिरोग इति भाषा । तस्य निदानरूपे ।
"वातादिभिः शोकभयातिलोभ-
क्रोधैर्मनोघ्नाशनरूपगन्धैः ।
अरोचकाः स्युः परिहृष्टदन्तः
कषायवक्त्रोऽस्य भवोऽनिलेन ॥
कट्वम्लमुष्णं विरसञ्च पूति
पित्तेन विद्याल्लवणञ्च वक्त्रं ।
माधुर्य्यपैच्छिल्यगुरुत्वशैत्य-
विबद्धसम्बन्धयुतं कफेन" ॥ इति माधवकरः ॥

अरोचका न भोजने रुचिमुत्पादयन्तीत्यरोचकाः व्याधयः पञ्च वातजादिभेदैः ॥ • ॥ वातिकस्य लक्षणमाह । परिहृष्टदन्तः अम्लभक्षणेनेव परिहृष्टौ दन्तौ यत्र सः । तथा कषायवक्त्रः । कषायरसं वक्त्रं यत्र सः ॥ • ॥ पैत्तिकमाह ।
"कट्वम्लमुष्णं विरसञ्च पूति
पित्तेन विद्याल्लवणञ्च वक्त्रं" ।
कट्वम्लमित्यादिना विद्यादित्यन्तेन पैत्तिकस्य लक्षणं ॥ • ॥ श्लैष्मिकमाह । लवणञ्च वक्त्रं कफजलक्षणेन पठनीयः । यतो विदग्धः श्लेष्मा लवणभावमुपैति ।
"माधुर्य्यपैच्छिल्यगुरुत्वशैत्य-
स्निग्धत्वदौर्गन्ध्ययुतं कफेन" ।
पैच्छिल्यं मुखस्याभ्यन्तरे । स्निग्धत्वं बहिः ॥ • ॥
आगन्तुजमाह ।
"अरोचके शोकभयातिलोभात्
क्रोधाद्यहृद्याशुचिगन्धजे स्यात् ।
स्वाभाविकं चास्यमथारुचिश्च
त्रिदोषजे नैकरसम्भवेच्च" ।
क्रोधादित्यादिशब्देनाहृद्ययोरशनरूपयोर्ग्रहणं । स्वाभाविकं । अविकृतरसं ॥ • ॥ त्रिदोषजमाह । नैकरसं अनेकरसमास्यं स्यात् । वातजादिभेदेन मुखे विकृतिमभिधायान्यदेशे विकृतिमाह ।
"हृच्छूलपीडनयुतं पवनेन पित्तात्
तृड्दाहचोषबहुलं सकफप्रसेकं ।
श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्यात्
वैगुण्यमोहजडताभिरथापरञ्च" ॥
हृच्छूलपीडनयुतं हृदि शूलेन पीडनं तेन युतं । चोषः पार्श्वस्थिताग्निनेव सन्तापः । बहुभिस्त्रिभिर्दोषैः । बहुरुजं उरुस्तम्भवातादिरोगयुक्तं । वैगुण्यं मनसो व्याकुलत्वं । जडता शून्याङ्गता । अपरं आगन्तुजं । भक्तद्वेषाभक्तच्छन्दौ चरकसुश्रुताभ्यामरोचकत्वेनैव सङ्गृहीतौ ॥ • ॥ तद्भोजनस्तेषां लक्षणानि पृथगाह ।
"प्रक्षिप्तन्तु मुखे चान्नं यत्र नास्वादते नरः ।
अरोचकः स विज्ञेयो भक्तद्वेषमतः शृणु" ।
आस्वादते अन्नस्य मिष्टतां न प्राप्नोति । तदन्नं मिष्टं न जानाति इति यावत् ।
"चिन्तयित्वा तु मनसा दृष्ट्वा स्पृष्ट्वा च भोजनं ।
द्वेषमायाति योऽजन्तुर्भक्तद्वेषः स उच्यते ॥
कुपितस्य भयार्त्तस्य तथा भक्तनिरोधतः ।
यत्र नान्ने भवेच्छ्रद्धा सोऽभक्तच्छन्द उच्यते" ॥ • ॥
अथारोचकस्य चिकित्सा ।
"भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणं ।
रोचनं दीपनं वह्नेर्जिह्वाकण्ठविशोधनं ॥ १ ॥
शृङ्गवेररसञ्चापि मधुना सह योजयेत् ।
अरुचिश्वासकासघ्नं प्रतिश्यायकफापहं ॥ २ ॥
पक्वाम्लिका सिता शीतवारिणा वस्त्रगालिता ।

दग्धायदूर्ध्वमधिरैरसुप्तिका ।
तामवकाशं मधुरं मार्दवता मुखे मुखम् ।
घटमिव भाजनमिव स्थितं प्रजनमेतकम्" ॥
र्दिघुबाधार्थं । १ ।
"राजिका घोटका मध्ये मध्य स्थितु बलमदं ।
पीवरं तथि-घो मध्ये समानं प्रथमवेम् ।
तात्पार्थं विशेषण यथा व्याकुलित्वका ।
तद्वेषमूर्त्त्य यथो घोषमं वज्रितम्" ।
यथा । ७ ।
"अवमारचितं दृश्यं निवाद्य इति मारितं ।
इषीकम घटे इव गुणमर्मदता वर्ण ।
दग्धायदूर्ध्वमधिरिव समन्वितं ।
माता विश्वरिवी कुर्यात् धर्मं समन्वता ।
विवर्तिनी । ८ ।
दे पक्षे राशिमात्रो यथापोषकनम ।
विनुर्मिनपरीतं पूर्वमेतम धारयेत् ।
नवम मासमा सुखमरोपवारं घटे ।
दीपनं दापनम स्यात् पीनवक्षरस्य धामम्" ।
दर्शिमारितूर्ध्व । ९ ।

"चाटुककोषपुष्टीरम्भर्तं
घटं चयोऽस्मिन्नपक्षीरं ।
मम महमाङ्गदमदुखारं
घटा वशिष्ठ मधरं वर्णेषा ।
गुणानुमातिमतंक्रतोषणा-
धिवासभाता मधर्मं विशुचितं ।
द्राक्षेव मतमणिपीठितं
घदारं दद्यमर्मितोषणित् ।
उद्यचिन्मे ममर्थं मन्यान
घनावशिष्टाथंघटपीवर्थं ।
प्रायस्तोषादयुक्तं यथा
यथा घटेशाधिकर्माधिवास चि" ॥

घटोर्मे वर्णे इस्मधिपेच । धर्मं वदरं । घटे
तावदं । भङ्ग भक् । ममपुरोदं । गुणाहः वर्धुः ।
चट्टादिपूर्वे । ० । दवरोपकाधिकारः । इति
भावप्रकाशः ।
("चमत्र घवनोबक पुष्करादवपूर्णं ।
सुदृढ़चक सा समक नामा घोषर्य स्थितं ।
धरित्र्यवलान्मध्य बहुर्मं धंमकाके ।
चक्रीपदध्ययं घटं पोवतारोपचर्यम् ।
तारल घोषम यथाकू गुरवं मठी ।
घरवं धाम्न घर्ष मम घटपदं ।
इदं मनमानमवं मधुपा मर्दीचता ।
गुणा । मम पूणा । हारं चेदं घघडे ।
सोपुमर घ । मठा मात्रा । पीवदे ।
धातुमान च । वारि पेपांतुमधुक ।
इति धारी विपर्यासविधिका । ।
"चम ? च ? यात्रो गुणा मधुधारणा ।
म पिवनमापद पूर्वघातास्वदिन च ।
पुखांध चमत्रो मधुपार्दितं स्थितं ।
चाम्बधदशमोसीदविमधुबद्धवपनं ।
घोष घटो । घा पुरवधवापमं ।
पनी धाविसर्वितधोषवाघापी प्रभवापक ।

घटैवमधिवास्वेदे घमार घरवयाम ।
घटुघोहोषवान् घटुमणिवादेयमपभवान् ।
मारधी मरिचामाली सापाववारवादिम ।
पीवर्षं गुडं घीरं घर्मादीघवमायं ।
दक्षि घलीदवे स्थित्वे विरेच घनं घवे ।
कुर्याद्बुधाशुधानि पूर्वेष मनोहरे" ।
इति घटपोधाकार्याधिकम । घटियाववहर्ष चि-
किलावार । । इत्यत ।
"घोषो इसम् घम च विपविषर्थं राय
पद्मामेव इति घातवने प्रमाई ।
घटोऽर्थयर्मनर्ध सिमवो विचारं,
घट्टोषधापमिव घघर्षं घरन्ति ।
घटबुधीतमुखं विरवाममम्भं,
समायमदे घमधि स्थितुमदोषधे तु ।
घटाघपोमरत्ना घुमचित्वा च,
मूर्च्छा घवत् घमति विवरके घदीव ।
घटघुमघवघरवावकम,
घेघावदे मधुरमाअमधीच तु ।
घर्माग्रदे घटघिघवपा घट्टनि
घवमत्ताव घुरते मधुरीमचि ।
घंपाशघोषघावियुक्तेवस्तु,
विवाक्तुनो घरधि कोऽमुचिरर्मगाव" ॥
चिकित्सा यथा,—
"पाते यथाव घघर्मं घरनाक् विरेच,
घोषी सदर्पिवरपोवधिनेव पूर्व ।
प्रक्षात्मिपुरमपाकस्यवैरकामीं
दापदनिरुद्धरवनोवनमाचरयो ।
विचे गुडाम्बुमधरेकमं प्रकर्ष,
घेघा घघेमरविभ्रामपूर्णविरिक्ता ।
विमाम्बुसाविवचा घमभेदुधान
घातपुमामुमपुना तु करीयाव धाम् ।
पूर्वे घदुबुमवयादिमने घरीव
घर्मेव घर्मबुमेघुघनेव ।
माघावडोघविडोघकदोदधिम-
घूर्णविधावदरामघघेघवके ।
घीम घानूघवदूघधेव चिरे
घरं घनिर् दुराविकुचवं घवास्त् ।
मुखा घथा विवपुवं दधनीयाव,
मातचि घुघवव विरियनीच चिरा ।
मुखेऽदिव विरवधुमधु घवेत,
घाममधामधिरियां दधनीय पुष्पा ।
मनुचिमघदमधाव नवायुगघमां,
मूर्धे घवव मरित्वजा विवाधिरता ।
घदाव चलि घनूरो विवदम घेवाय,
घुभागधिनवरवम्भधुदरावधाव ।
घावाव घरेवाविवाव् विरियांव घवाव,
घावापि घूघवचदाइरावघोपाव् ।
घदाघाव विविवाव् विरिचा घवारे
घेडीव वानि घधुववमर द्ववानि ।
घावावयं विविपरव विरेचम,
पूर्णाघुघदि विरचम विरेचय चि ।
घोद्धूपवर्ति इव प्रेविधमावर्ति,

पूर्वाञ्छावि घधनूचविमिमिपावि ।
पुत्रासुपानि विमरैघुभायापाव
मम्बावि विमवघुवानि च नेत्रापि ।
कुमारिदाम्मदघर्षपाघुविबे,
चावेवेमपुवेवेविदेव वेवे ।
घुघावर्द्धेदुध्येव दधावमादिवे,
चारदावैव मधुभावमुषवमे ।
घावैवदर घवदावचे विचित्त,
घापि ममे अवयुवि प्रदमाव घदा ।
इत्थाविवावमममोवचदेऽप्यरषो
भावात् ममाव विवरैत् मम प्रवचवात् ।
घर्षेण घामवचिवेव दुमर्दवार
दीदाधिको घविधिरैदुमावेवे ।
देवं घवे ममवि पोवनम घर्वं,
घदघत् पिवं घदुघपेवमपोवदे तु ॥ ॥
घवावी घवी गुदो घघीदापेव घावयेत् ।
घमीरव घवैरापि पामवचं घथ वा ।
मातुघुरवा मोचेव घघा मवाराषेघुका ।
घघापिदोष घर्माघात् अवचवायारवेत् ।
देववं घावविवं घवावं घवायवं ।
मावचावचं दद् घम घावरैव दुघेघ वा ।
घर्मादोषकदूघावीममवार्यं दुरावर्य ।
घोऽयं विपारवघातु घेवघी घरिवं घघा ।
घवापिविघवा । । इति वैघवरोवचार
घवार ।)

घस च, भक्षे । (भ्वादि परस्मै सेट् ।) घसौ ।
इति कविकल्पद्रुमः । घवघाघ मवधि घवा-
मेवमिमिवघनिमे विमावचा घघर्म । घेव च
घर्ववधि घर्मंवधि इदं घवम । इति दुर्गादासः
घर्मः, पुं, (घर्म + धर्मादि अच् गुणः ।) घर्मः ।
इमाः घार्म । घाटिका । इति मेदिनी । घविघव
इति शब्दरत्नावली । घवधाषा । इति एघा-
दिमाका । घघवघा पविघाता । इति ज्योतिषं ।
घवविधेघ । घघवत् इति भाषा । तत्पर्यायः ।
घीररक २ इघी ३ प्रघाघ ४ घीरकालक
५ विघीर ६ घीरी ७ घर्माङ्कु ८ घीरघाघक
९ घमघा १० घीरपर्णी ११ विघीरका १२
घराघघा १३ घर्षाङ्क १४ घावघोघक १५ घुघ-
घघ १६ घुघघघ १७ । इति राजनिर्घण्टः ।
घघुवा १८ घावघोषा १९ घघघरा २० घवाद
२१ घमघर्म २२ । इघघार । । घम घोमा-
धेघधीघा । घवर्व १ राघाप २ घघारघ ३
घघवरी ४ । । घम घाघवमधीघा । विघोघ
१ घराघघी २ घविघा ३ घाविवाघिघा ४
विवर्धमिघा ५ घघ ६ । इति रत्नमाला ।
घघा घुघा । घटुर्म । उघर्म । घविघाविर्म ।
घावघोषघाघ घुघविमिवविमघ । इति राज-
निघण्टः । घघघोषघाविम । घोघघघव । घम
घोरघुघा । विविघोघवघाविर्म । घुघाघ
उदरघोघव विवघाविमघ । इति राजवल्लभः ।
घघा घघाँघुघा ।
"घघार्घो घघघा घावघघारो घघघोऽपि च ।

श्वेतपुष्पः सदापुष्पः स चालार्कः प्रतापसः ॥
रक्तोऽपरोऽर्कनामा स्यादर्कपर्णो विकीरणः ।
रक्तपुष्पः शुक्लफलस्तथास्फोतः प्रकीर्त्तितः ॥
अर्कद्वयं सरं वातकुष्ठकण्डूविषव्रणान् ।
निहन्ति शोथगुल्मार्शःश्लेष्मोदरशकृत्कृमीन् ॥
शुक्लार्ककुसुमं वृष्यं लघु दीपनपाचनम् ।
अरोचकप्रसेकार्शः कासश्वासनिवारणम् ॥
रक्तार्कपुष्पं मधुरं सतिक्तं
कुष्ठक्रिमिघ्नं कफनाशनञ्च ।
अर्शो विषं हन्ति च रक्तपित्तं
संग्राहि गुल्मे श्वयथौ हितं तत् ॥
क्षीरमर्कस्य तिक्तोष्णं स्निग्धं सलवणं लघु ।
कुष्ठगुल्मोदरहरं श्रेष्ठमेतद्विरेचनम्" ॥
इति भावप्रकाशः ॥ * ॥ निर्यासविशेषः । आरक
इति आरबीभाषा । तस्य विधिर्यथा,—
"द्रव्यकल्पः पञ्चधा स्यात् कल्कचूर्णं रसस्तथा ।
तैलमर्कः क्रमाज्ज्ञेयं यथोत्तरगुणं प्रिये ॥
पृथक् द्वन्द्वे सन्निपाते सङ्करेऽसाध्यरोगिणि ।
क्रमादेते प्रयोक्तव्या अन्यथा नु विनाशकाः ॥
आद्ये गुणा गुणाः सर्व्वे द्वितीयश्च ततो लघुः ।
तृतीयं शीघ्रकारि स्यात् चतुर्थं नातिदोषकृत् ॥
पञ्चमं दोषरहितं गुणसद्यःप्रकाशकम् ।
पञ्चमस्य तु सामर्थ्यं स्वयं पञ्चाननोऽब्रवीत् ।
वर्णनन्तु सहस्राणि कथ्यतेऽहर्निशं मया ।
सम्पूर्णो नैव जायेत कल्पोऽर्कस्य दशानन ॥ * ॥
पुवारे पुरुषर्च्चे च दिवार्को यस्तु निर्म्मितः ॥
रमणीषु प्रदातव्यो विलोमात् पुंसु योजयेत् ॥
लोहचूर्णं गैरिकञ्च खटिका भस्ममृत्तिका ।
मृत्तिकास्थिभवं चूर्णं काच कौकसजं रजः ॥
एतानि समभागानि सर्व्वतुल्या च मृत्तिका ।
आनीया पञ्चमूत्रे खराश्वमहिषोद्भवे ॥
गजाजसम्भवाभ्याञ्च घटितं तद्विशोषयेत् ।
यथा गन्धविनाशः स्यात् तथा समर्दयेत्ततः ॥
लघुहस्तः कुलालोऽस्य कुर्य्याद्यन्त्रं सुनिर्म्मलम् ।
यथेष्टा स्थालिका कुर्य्यात् अङ्गुलप्रान्तसारिकाम् ॥
पृथुबुध्नोदराकारा द्व्यङ्गुलोत्सेधवर्त्मनी ।
सारिकान्ते तु परिधिं अङ्गुलोत्सेधशोभिताम् ॥
विनिर्माणाय सार्य्यन्ते यथा शिल्पविनिर्म्मिता ।
छिद्रं कृत्वा नलं दद्याद्गजशुण्डसमं बुधः ॥
सारिकापरिधेरन्तस्तस्य कुर्य्यात् पिधानकम् ।
अर्द्धनिम्नफलसमं परिधिं तस्य चान्ततः ॥
वेदाङ्गुलं मस्तकोर्द्ध्वं कार्य्यं तोयस्य धारणे ।
समर्थां तत्र नलिकां कुर्य्यात्तोयविमोचनीम् ॥
तस्यैवान्तरतो लेप्या शीर्णास्थि मृत्तिकाम्बुना ।
अथवा श्वेतकाचं तु सर्व्वदोषापनुत्तये ॥ * ॥
अथ वक्ष्ये नु शीर्णास्थिमृत्तिकाकरणं प्रिये ।
शिलाजतुस्थले कुर्य्यात् दीर्घगर्त्तं मनोहरम् ॥
निक्षिपेत्तत्र नानास्थिसञ्चयं विषमुत्पदाम् ।
सर्जिक्षारं महाक्षारं मृतक्षारं लवणानि च ॥
गन्धकोत्पन्नजं क्षेप्यं नानामूत्राणि तत्र वै ।
एवं कृत्वा मासषट्कं दद्यात् पाषाणमृत्तिकाम् ॥
कण्ठास्थ्यूर्द्ध्वं तदूर्द्ध्वन्तु कुर्य्याद्गर्तेष्टिकां शुभाम् ।
त्रिवर्षाज्जायते सर्व्वमेकीभूतं दृषत्समम् ॥
ततो निष्काश्य तच्चूर्णं कृत्वा पात्राणि निर्ममेत् ।
प्रशस्तं भोजनं तत्र सूचयेदन्नदूषणम् ॥
महाविषस्य संयोगात्तस्य भङ्गः प्रजायते ।
सूचीविषादिसंयोगात् यत्र स्फोटा भवन्ति च ॥
तत्र क्षिप्तं क्षुद्रविषं पात्रं क्षणं प्रजायते ।
एवं ज्ञात्वा तत्र दद्यान्न कदाचिद्विषादिकम् ॥
विषादीनामर्कसिद्ध्यै कुर्य्यात् पात्रन्तु लोहजम् ।
स्वर्णजं रौप्यजं वापि कुर्य्यात् पात्रमकल्मषम् ॥
अथवा ताम्रजं कुर्य्यादन्तर्व्वङ्गविलेपितम् ।
पात्रन्तु बुद्ध्वा कुर्व्वीत कषायो न भवेद्रसः ॥
द्रव्यान्तरस्य संयोगादर्कं तैलञ्च गर्भतः ।
सर्व्वेषां निःसरत्येव पाषाणस्यापि किं पुनः ॥
अनयार्कस्तथा तैलं गन्धतालादिसम्भवम् ।
वेधकं सर्व्वधातूनां देहस्यापि च खिद्रिदम् ॥
यस्तैलकरणे दक्षश्चार्कानि सारणे क्षमः ।
तत्तत्सेवाकरो नित्यं स रोगैर्नैव बाध्यते ॥ * ॥
कुत्सितार्कस्तु यामेन द्वियामाभ्यान्तु मध्यमः ।
त्रिभिर्यामैर्भवेच्छ्रेष्ठः स एवार्कस्तु खिद्रिदः ॥
द्रव्यादधिकसौगन्ध्यं यस्मिन्नर्के प्रदृश्यते ।
शीर्णास्थिपात्रसङ्गुप्तो द्रव्यवर्णः प्रदृश्यते ॥
शङ्खकुन्देन्दुधवलोऽन्यथा पात्रान्तरे स्थितः ।
जिह्वोपरिगतं स्वादं दद्याद्द्रव्यभवन्तु यः ॥
तमेवार्कं विजानीयादन्यश्च ज्ञेयं रसादिवत् ।
कृत्वा सुगन्धं दुर्गन्धमर्कं पुष्पादिभिः सुधीः ॥
गुणार्थं पश्चात् सेवेत ह्यन्यथापगुणो भवेत् ।
दुर्गन्धं भक्षयेदर्कं यदि मोहात् कथञ्चन ॥
तदास्य जायते ग्लानिर्व्वान्तिरालस्यकं व्यथा ।
तद्दोषस्य विनाशाय कुर्य्याद्वान्तिमतन्द्रितः ॥
दीपोद्भमप्रसूनानां पिबेदर्कं पलं जनः ।
धम्मेल्यर्कं पलं वापि शीतार्त्तो मालतीभवम् ॥ * ॥
अर्कनिष्काशनार्थाय क्रमाज्ज्ञेया षडग्नयः ।
धूमाग्निश्चैव दीपाग्निर्मन्दाग्निर्मध्यमस्तथा ॥
खराग्निश्च भडाग्निश्च तेषां वक्ष्यामि लक्षणम् ।
विज्वालो यो धमशिखो धूमाग्निः स उदाहृतः ॥
ससारमतिशुष्कं यत् मुष्टिमध्ये समेष्यति ।
तत्काष्ठं काष्ठमित्याहुः खदिरादिसमुद्भवम् ॥
द्वाभ्यां तस्य चतुर्थाभ्यां योऽग्निर्दीपाग्निरुच्यते ।
चतुरंशेन तेनैव मन्दाग्निः परिकीर्त्तितः ॥
अर्द्धीकृताभ्यां द्वाभ्यान्तु मध्यमाग्निरुदाहृतः ।
अर्द्धैकैः पञ्चभिः प्रोक्तः खराग्निः सर्व्वकर्म्मसु ॥
मस्तकावधिपात्रस्य चतुर्दिक्षु क्रमेण च ।
प्रसरन्ति यदा ज्वाला स भडाग्निरुदीरितः ॥
सार्द्धयामश्च यामश्च याममेकं मुहूर्त्तकम् ।
मुहूर्त्तमात्रमित्येवमर्कार्थं वह्नयः स्मृताः ॥ * ॥
शीर्णास्थिपात्रे मृत्तीयादर्कं वा काचसम्भवे ।
पाषाणसम्भवे पात्रे कास्यजेऽथ हिमस्थले ॥
पिबेदर्कं सनिर्व्वापं पीत्वा ताम्बूलभक्षणम् ।
कुर्य्यादनुक्तताम्बूले लवङ्गं भक्षयेत्ततः ॥
मर्दनादिषु सर्व्वत्र द्रव्यतैलं प्रयोजयेत् ।
अर्कं एव प्रयोक्तव्यो भक्षणे न तु मर्दने ॥
ये ये द्रव्यगुणाः प्रोक्ताः सर्व्वे तेऽर्कसमाश्रिताः ।
देवेतार्कं प्रिये तस्माद्दाता परमधार्म्मिकः ॥
स्वस्थेऽपि वा रोगिणे वा याच्यतेऽर्कस्तु येन वा ।
ज्ञात्वा तल्लक्षणं दद्यादन्यथा ब्रह्महा भवेत् ॥ * ॥
वर्णस्वराणां प्रमितिं दूतोक्तस्य तु कारयेत् ।
शरैर्युक्ता विगुणिता त्रिभिर्भागं समाहरेत् ॥
एकशेषे गुणः शीघ्रं द्विशेषे वर्द्धते गदः ।
त्रिशेषे मरणं वाच्यं स्वार्थं वाचयते यदि ॥
अर्कं तदेतत् विज्ञाय दद्यादर्कं न चान्यथा ।
गदिना तु यदा दूतः प्रेषितश्चेद्विचार्य्यते ॥
नपुंसकान्त्यैरूणास्तु स्वरा एकादश प्रिये ।
वर्णास्त्रयस्त्रिंशत्का लेख्याः कठवाधाश्च तत्तथे ॥
एकादशसु कोष्ठेषु क्रमादङ्कान् प्रविन्यसेत् ।
रसाब्धयो द्वग वेदाः पर्व्वता ऋतवः कृताः ॥
वह्नयः पृथिवी शून्यं चन्द्रमा इति च क्रमात् ।
विधाय जीवं दूतस्य नामाक्षरयोजनम् ॥
एवमेवातुरे कृत्वा द्वयोरष्टावशेषितम् ।
कृत्वाङ्कयोगं गदिनोऽधिके शेषे शुभं भवेत् ॥
समशेषे दीर्घरोगः न्यूनशेषे च तन्मृतिः ।
एतद्विचार्य्य दातव्यमन्यदप्यौषधं बुधैः ॥
अन्नदयन्तु योऽज्ञात्वा दद्यादर्कं विमोहितः ।
जायते त्वयशस्तस्य यथा मम मृते सति" ॥
इति श्रीजगन्नाथकृतार्कचिकित्सायां यन्त्रविधि-
शतकं प्रथमम् ॥ * ॥
"अथात्र सम्प्रवक्ष्यामि निर्गमोऽर्कस्य भामिनि ।
पञ्चप्रकारद्रव्यस्य कुर्य्यान्निष्काशनं भिषक् ॥
अत्यन्तकठिनं चाद्यं कठिनञ्च द्वितीयकम् ।
आर्द्रं तृतीयमुद्दिष्टं चतुर्थं बुक्कजं भवेत् ॥
पञ्चमञ्च द्रवद्रव्यं तेषां विधिरथोच्यते ॥ * ॥
रसवच्चूर्णयेत् द्रव्यमत्यन्तकठिनन्तु यत् ॥
द्विगुणे निःक्षिपेत्तोये छायायां स्थापयेच्च तत् ।
यावच्छुष्कं भवेत्तोयं द्रव्यञ्च शिथिलं यथा ॥
ततः पुनः क्षिपेत्तोयं पूर्व्वद्रव्यसमं भिषक् ।
कृत्वाष्टप्रहरं तत्तु सूर्य्यचन्द्रकरैरलम् ॥
सम्पूज्य गणपतिं सूर्य्यं भैरवं कुलदेवताम् ।
निःक्षिपेदर्कयन्त्रे तत् क्षिप्रास्यार्कं समाहरेत् ॥
वर्षाधिकन्तु यत् द्रव्यमत्यन्तकठिनन्तु तत् ।
चन्दनादीनि सर्व्वाणि अत्यन्तकठिनानि च ॥
कीटैर्भुक्तं घुणैर्युक्तं यच्च गन्धविवर्ज्जितम् ।
रहितःस्वरसेनापि नार्ककर्म्मणि योजयेत् ॥
यथार्केऽसस्थितं द्रव्यं कुर्य्याद्धीकृत्तथा वपुः ।
अर्के तस्यभैषज्यं तस्मात् संयोजयेत् प्रिये ॥ * ॥
यवान्यजाजीत्रिकटुभूनिम्बादिकमौषधम् ।
ज्ञेयं तत् कठिनं द्रव्यं तदर्कस्य विधिं शृणु ॥
द्विगुणं निःक्षिपेत्तोयं द्रव्ये तु कठिने मते ।
वसुपक्षमदिनं। निविदमुपश्रवेण सर्वं
मासः"। इति ज्योतिषतत्त्वे।
अवमतः, त्रि, (अव+मन्+क्त।) अवज्ञातः। अव-
मानितं। अवगणितं। इत्यमरः।
("पर्यं द्वयस्य देशे दयाय मथिदुनोदे"।
इति मनुः।)
अवमतिः, पुं, (अवमत्यस्यत्वात् अवमत्वमस्य वर्णेषु
मतिर्यस्य।) स्वामी। ईश्वरः। पतिः। प्रभुः।
नेता। इति जटाधरः।
अवमर्दः, पुं, (अव+मृद्+घञ्।) पीडनं। मर्दनं।
इत्यमरः। शकादिविपक्षारेरकं राज्येन पी-
डनं। इति भरतः।
("दयामर्दंसापि कश्चिदिद्वो
यथा न गर्भेदुपदारकम्भम्"।
इति रघुवंशे।) अनुशासनात्मवाद इति केचित्।
पराभवमिति केचित्।
अवमानः, पुं, (अव+मन्+भावे घञ्।) अपमानः।
अनादरः। यथा —
"अवमानापूर्वको भितगुरिमय विनाशिय।
अवमतेव यदाहुरेणमानस्य कर्त्तरा"।
इति माघे ७ अध्याये १८ श्लोकः।

"मानावमानद्वन्द्वसहिष्णुत्वमनेन विधीयते"।
इति कुल्लूकभट्टः॥

अवमानन, क्ली, (अव+मन्+णिच्+ल्युट्।) अपमान। यथा। अवमानन अवमानना। मान कि पार्थे अवपूर्व्वे ऽपीयि अन्यीति अन। इत्यमरटीकायां भरत॥

अवमानना, स्त्री, (अव+मन+णिच्+युच्।) अवज्ञा। अनादर। इत्यमरसिंह॥
("अतोऽवमाननाऽस्माकं मानिना भवता कृता"।
इति विष्णुपुराणे।)

अवमानित, त्रि, (अव+मान+क्त।) कृतापमान। अवज्ञात। अनादृत। इत्यमर॥
("विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता"।
इति साहित्यदर्पणे।)

अवमान्य, त्रि, (अव+मन+ण्यत्।) अवमाननीय। यथा,—
"या रोगिणी स्यात्तु हिता सम्पन्ना चैव शीलत॥
सानुज्ञाप्याधिवेत्तव्या नावमान्या च कर्हिचित्"॥
इति मानवे ९ अध्याये ८२ श्लोक॥

अवमूर्द्धशय, त्रि, (अवमूर्द्ध+शी+अच्।) अधोमुखशायी। अवनतो मूर्द्धा अस्येत्यवमूर्द्ध। तथाविध शेते इत्यवमूर्द्धशय॥ ("उत्तानशया देवा अवमूर्द्धशया मनुष्या" इत्युक्त।)

अवमूर्द्धशायी, [न्] त्रि, (अवमूर्द्ध+शी+णिनि।) अधोमुखशायी। अवमूर्द्ध यथा स्यात् तथा शयितु शीलमस्य इत्यर्थे णिन् प्रत्ययेन निष्पन्न॥

अवयव, पु, (अवयौति इति यु मिश्रणे+पचाद्यच्।) अङ्ग। इत्यमर।
("स्वैरेवावयवै प्रियस्य विशतस्तन्व्या कृत मङ्गल"।
इति अमरुशतके। उपकरण। अंश। एकदेश।
"तेषामवयवान् सूक्ष्मान् षण्णामप्यमितौजसा"।
इति मनुसंहितायां। न्यायमते आरम्भकद्रव्यम्, तत् उपादानकारणतया च अवक्रियते यदुक्त,—
"अनित्या तु तदन्या स्यात् सैवावयवयोगिनी"।
इति भाषापरिच्छेदे। प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यनुमानावयवाश्च।)

अवर, त्रि, (न व्रियते इति वृञ् वरणे+अप्रत्ययश्चेति अप्।) चरम। इति मेदिनी। कनिष्ठ। अश्रेष्ठ। यथा —
"श्रीशेन विना शम्भु एपरिस्थेन तत्पुग।
न नाना शम्भुना रामादर्पणाधोऽधजोऽवर"॥
इति मुग्धबोधव्याकरणे वोपदेवः॥ निकृष्टः। यथा,—
"दूरेण ह्यवर कर्म्म बुद्धियोगाद्धनञ्जय।
बुद्धौ शरणमन्विच्छ कृपणा फलहेतव"॥
इति श्रीमगवद्गीतायां २ अध्याये ४९ श्लोक॥

अवर, क्ली, (वृ+अप् ततो नञ्समास।) गजान्यजङ्घादिदेश। इत्यमरमेदिन्यौ॥

अवरज, पु, (अवर+जन्+ड।) कनिष्ठभ्राता। इत्यमरसिंहः॥
("अस्य चावरज विद्धि भ्रातर मा तु लक्ष्मणम्"।
इति रामायणे। हीनवर्णजात।
"द्वौ शूद्रावरजौ धीरविभ्रमाख्यौ निजाख्यया"।
इति राजतरङ्गिण्या॥ शूद्र।
"यदि स्त्री यद्यवरज श्रेय किञ्चित् समाचरेत्।
तत्सर्व्वमाचरेत् युक्तो यत्र चास्य रमेन्मन"॥
इति मानवे।)

अवरत, [स्] अ, (अवर+तसिल्।) अवरस्तात्। चरमे। इति सिद्धान्तकौमुदी॥

अवरति, स्त्री, (अव+रम्+क्तिन्।) विराम। निवृत्ति। इत्यमर॥

अवरवर्ण, पु, स्त्री, (अवरश्चासौ वर्णश्चेति, कर्म्मधारय।) शूद्र। इत्यमर॥

अवरवर्णक, पु,स्त्री,(अवरवर्ण+कन् स्वार्थे।) चतुर्थवर्ण। शूद्र। इति रत्नावली॥

अवरव्रत, पु, (नास्ति वर यस्मात् तत् अवर अत्यन्तश्रेष्ठ व्रत यस्य।) सूर्य्य। इति त्रिकाण्डशेष॥

अवरस्तात्, अ, (अवर+प्रथमाद्यर्थे दिक्शब्देभ्य इति अस्तातिः।) अवरत। पश्चात्। इति सिद्धान्तकौमुदी॥

अवरा, स्त्री, (नास्ति वरा श्रेष्ठा यस्याः। अवर+टाप्।) दुर्गा। इति विश्व॥

अवरार्द्ध्य, त्रि, (अवरार्द्धे भव इति अवरार्द्ध यत्।) अवरार्द्धभव। शेषार्द्धजातः। इति केचित्॥

अवरीण, त्रि, (अवरीयते स्म इति अव+रीङ् स्रवणे क्त।) धिक्कृत। तिरस्कृत। निन्दित। इत्यमर॥

अवरोध, पुं, (अव+रुध्+भावे घञ्।) तिरोधान। (आधारे घञ्।) राजस्त्रीगृह। राजगृह।
इति विश्वहेमचन्द्रौ॥
("आयानभूमिगमनमवरोधस्य दर्शनम्"।
इति रामायणे।) राजदारा। इति मेदिनी॥
("यस्यावरोधस्तनचन्दनाना
प्रक्षालनाद्वारिविहारकाले।
कलिन्दकन्या मथुरागतापि
गङ्गोर्म्मिसंसक्तजलेव भाति"॥
इति रघुवंशे। निरोध। बाधा। अन्तराय। आच्छादन। केदारादिवेष्टन।)

अवरोधक, त्रि, (अव+रुध+ण्वुल्।) अवरोधकारक। अवरोधकर्त्ता। अवपूर्व्वकरुधधातो ण्वकप्रत्ययेन निष्पन्न॥
("सुधन्वा वीर्य्यवान् राजा मिथिलामवरोधक"।
इति रामायणे।)

अवरोधन, क्ली, (अवरुध्यते अत्र रुध आवरणे कर्म्मणि ल्युट्।) राजान्त पुर। इत्यमरसिंह॥
(अव+रुध्+ल्युट् भावे।) रोधकरण। यथा,—
"कृष्ण त्वदीय-पद-पङ्कज-पञ्जरान्ते
अद्यैव मे विशतु मानस राजहंस।
प्राणप्रयाणसमये कफवातपित्तै
कण्ठावरोधनविधौ स्मरण कुतस्ते"॥
इति पाण्डवगीता॥

अवरोधिक, पु, (अवरोध+तत्र नियुक्त इति ठक्। संज्ञापूर्व्वकत्वात् वृद्ध्यभाव। अवरोध- निवासत्वेन अस्ति अस्य वा ठन्।) राजान्त पुराध्यक्ष।
इति हेमचन्द्रः॥

अवरोह, पु, (अव+रुह्+भावे घञ्।) अवतरण। आरोहण। (कर्त्तरि संज्ञायां घञ्।) लतोद्गम। इति मेदिनी॥ वृक्षमूलादग्रपर्य्यन्त गता लता। शाखाशिफा। इत्यमरः। वोया नामगा इति भाषा॥
("सदूरमथ गत्वा तौ भ्रातरौ रामलक्ष्मणौ।
अवरोहशताकीर्णं वटमासाद्य तस्थतु"॥
इति रामायणे।) स्वर्ग। इति त्रिकाण्डशेष॥

अवरोहशाखी, [न्] पु, (अवरोहति अधोगच्छति मूलमस्याः तादृशी या शाखा सा विद्यते अस्य मत्वर्थीय इनि।) वटवृक्ष। इति राजनिर्घण्टः॥ (वटशब्देऽस्य गुणाज्ञेया॥)

अवरोहिका, स्त्री, (अवरोहति अधोगच्छति अव+रुह+ण्वुल्+टाप् अत इत्व।) अश्वगन्धालता। इति राजनिर्घण्ट॥

अवरोही, [न्] पु, (अव+रुह+णिनि।) वटवृक्ष। इति राजनिर्घण्टः॥ (वटशब्देऽस्य गुणादयो ज्ञातव्या।)

अवर्ण, पु, (वर्ण्यते प्रशस्यते अनेन इति वर्णः ततो विरोधे नञ्समास।) निन्दा। परीवाद। इत्यमरसिंह॥
("सोढु न तत्पूर्व्वमवर्णमीशे
आलानिक स्थाणुमिव द्विपेन्द्र"।
इति रघुवंशे।)

अवलग्न, पु,क्ली,(अवलग्यते इति अव+लग+क्त। इडभाव। लसज+क्त, वा।) मध्यदेश। इत्यमरः॥ माजा इति भाषा। ("विपुलतरोन्मुखलोचनावलग्नम्"। इति माघः।)

अवलग्न, त्रि, (अव+लग+क्त।) संलग्न। संयुक्त।
इति मेदिनी॥

अवलम्ब, पु, (अव+लवि+अच्।) अवलम्बन। अवपूर्व्वलम्बधातोरल्प्रत्ययेन निष्पन्नः॥(आश्रय।)

अवलम्बन, क्ली, (अव+लवि+आधारे ल्युट्।) आश्रयः। यथा,—
"प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्त्तुरभू-
न्नपतिष्यत करसहस्रमपि"॥
इति माघे ९ सर्ग॥

अवलम्बित, त्रि, (अव+लवि+क्त।) अविलम्बित। शीघ्र। इति जटाधर॥ अधोलम्बायमान। कृतावलम्बन। आश्रित॥

अवलक्ष, पु, (अवलक्ष्यते इति अव+लक्ष+घञ्।) वलक्ष। श्वेतवर्ण। (अर्शआदित्वात् अच्।) तद्वति त्रि। इत्यमरटीकायां स्वामी॥

अवलिप्त, त्रि, (अव+लिप्+क्त।) धनादिगर्व्वित। यथा,—
"न संवसेच्च पतितैर्न चाण्डालैर्न पुल्कशै।
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभि"॥
इति मानवे ४ अध्याये ७९ श्लोक। अवलिप्ता धनादिगर्व्विता इति कुल्लूकभट्ट॥
"अवलिप्तासि मैवं त्व देवि भूमि मनागपि"।

इति देवीमाहात्म्यम्।

अवलिप्तत्व, क्ली (अवलिप्त+त्व भावे।) अह-ङ्कारः। इति हेमचन्द्रः। ("वैमनस्यमवलिप्तत्वा सुखरत्या सतर्षवतिक्रिये" इति नीतिशास्त्रे।)

अवलीढ, त्रि, (अव+लिह+क्त कर्म्मणि।) भक्षितं। यथा मनुः,—
"पतत्रिणावलीढञ्च शुना संस्पृष्टमेव च"।
इत्यादि। "पतत्रिणावलीढं काकादिना भक्षितं"।
इत्याह्निकतत्त्वम्।

अवलीला, स्त्री, (अवज्ञा लीला।) हेला। अनायासः।
यथा,—
"रविबिम्बं तूदयं प्राप्य बिभतुल्यं दरात्मजे।
भार्गं कृत्वा त्रिभङ्गेन चैतायेनावलीलया"।
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २१ अध्यायः।
अपि च।
"मूर्च्छां भ्रमत्र ज्ञाना जघान राक्षसोपरि।
बभार भस्मनाथश्च तरमसात्पवीलया"।
इति च तत्रैव प्रकृतिखण्डे १८ अध्यायः।

अवलुण्ठन, क्ली, (अव+लुठि+भावे ल्युट्।) लुठनं। लोटा गड़ागड़ी इति भाषा। अवपूर्वकलुठधा-तोरनट्प्रत्ययेन निष्पन्नं।

अवलेप, पुं, (अव+लिप्+भावे घञ्।) अहङ्कारः। ("हिमवतामपि परिहरन् कुवलयावलेपान्" इति मेघदूते।) गर्व्वः। दूषणं। इति मेदिनी। लेपः। इति शिष्टप्रयोगः।

अवलेपनं, क्ली, (अव+लिप्+ल्युट् भावे।) विले-पनं। मर्द्दनं। माखा इति भाषा। अवपूर्वक-लिपधातोरनट्प्रत्ययेन निष्पन्नं।

अवलेह, पुं, (अवलिह्यते आस्वाद्य इत्या जायते इति अव+लिह+कर्म्मणि घञ्।) लेह्यौषधं। तस्य लक्षणं परिभाषा यथा —
"क्वाथादेर्यत् पुनः पाकात् घनत्वं सा रसक्रिया।
सोऽवलेहश्च लेहः स्यात् तन्मात्रा स्यात् पलोन्मिता"।
("सितामधुमत्स्यण्डिका") इति च वैद्यकपरि-भाषा। यथा —
"कल्पयेत् पौष्करं मङ्क्षी घोषं सावचक्षारकी।
तन्मूर्द्धिकञ्च चैतन्मधुना च लेहयेत्।
स्मरवेदिका भवति वक्षिमर्द्दं हरात्मजं।
हिक्कां वातञ्च कासञ्च कण्टरोगञ्च नाशयेत्।
एतद्योगं वर्णोपेते पूर्व्वमार्गकथे हरे"।
तन्त्रान्तरे च पाठः।
"पथ्याञ्च मधुना लिह्याद्रसेन वा।
पर्णोऽदे रास्नां च भावप्रकाशसम्मितम्" इति।
"सर्व्वेषु बलिपाकेषु न कौसमं धारयेत्।
प्रीतिमिन्धारि चौर्णं स्वार्थावधान विवर्ध्यते"।
अयमभिप्रायः। बलिपाकान्तरेषु लेहविधानार्थं सर्व्वत्र बोधो विध उक्तः। यथाविधम्भारेण लौह्यता विशेषेण। पञ्चेन मधुना विशेषेण प्रकृत्य प्रयोगेण।
"उर्द्धदेशावह्नौ वर्त्ती विधायास्त्रजा मधु।
उत्कर्षमेतव्यस्य बलिदिग्न्ति यथा विधे" इति।
श्रीगोपचारि कौमतिमिति। श्रीविनोपचारोऽस्या-स्तीति श्रीगोपचारि। श्रीलक्षणं बलिपाके विवर्ध्यते। अयमपीड़ा पाकोऽप्यमृतपनस्तोम वत्सात् वायुमुपयुज्यते। अत्र पाठे चरकेण।
"अथ मधुमद्गुडी वा ना वायसपीठिका।
पयोरोगहरी वा या गोमपावास प्रयुज्यते"।
पौष्करं पुष्करमूलं वराहमे कुष्ठं देवं।
मङ्क्षी कर्कटशृङ्गी। घोषं गुडूचीविषघ्नीमरिचानि च। भार्गी यवासः। केचित् यवक्षारे यवानीं पठन्ति। कारवी मधरिका इति वैद्ये। कण्ट-कारीवेदिका।
"त्रिकटुसमभागं पिप्पली मापसा तत्र मेलयेत्।
त्रिकमेकमलेहार्थं मधुना तत्र देवयेत्।
वेनात्र शाम्यति कासः श्वासो मूर्च्छापि कफजा"।
स्मरवेदिका। अन्यत् यथा,—
"पिप्पली त्रिफलाचापि समभागं कारी त्रिकम्।
मधुना सर्पिषा वापि शाक्षी भाषी सुखी भवेत्।
अपरञ्च पौष्करं शृङ्गी वचा च मधुना कर।
भावनाद्यपरतरो वेदोऽयं मधुपालनः"।
चातुर्भद्रिका।
"कट्फलं पौष्करं शृङ्गी यवानी कारवी वचा।
चतुष्पच समांशानि समभागानि चूर्णयेत्।
पार्थस्य रसैर्लेहान्मधुना वा कफजरी।
कासश्वासार्त्तिहृद्रोगैश्चाग्निमान्द्यविनाशने"।
चतुरङ्गावलेहः। इति भावप्रकाशः।
("अरसत्वात् इवा घाताद् यथा तारवलिका।
सोऽवलेहश्च वेदा ख्यात् तथाऽप्यन्नाद्योऽभिषा।
त्रिवार चतुर्भेदा चार्गी चूर्णेव त्रिधुवो ठक।
मर्दं चतुर्भुदं रसानीति कर्म्मेव त्रिकला।
सुवले बहुमत्स्यं भावसंबीरेऽप्यसम्भवं।
क्षिरार्द्रं पीयते सदा श्लेष्मपित्तोद्भवा।
पुष्पमिश्रुतरनं पूर्वं पञ्चमूलकवायक।
तथाहार्यं यथायोग्यमनुपानं प्रदास्यते।
मधुरादयं। यथा —
"वायकारीतुषां पीर मोके प्रस्थं पचायनं।
दारुभेदं मधीमा च कर्णपूर्वाणि दापयेत्।
पचत् यथाधार्मेणापि गुडूचीबलाविवर्जयेत्।
पूर्णं कर्कटशृङ्गी च मूलकं प्रपचायनं।
भार्गी रास्ना शठी पैन शर्करा वर्द्दिकाहित।
क्षौद्रेण पञ्चभिश्ची मदयादयत्वशोपचारे।
प्रस्थं विवरमासमीष शीते मधु प्रदापयेत्।
चतुर्थं तु गोधीजां विषमीयं चतुर्थकं।
क्षिप्ता निरधात् सहड़े मन्धये भावये गुन।
वैरोऽयं हन्ति हिक्काविंन्तानकासवकेवल।
चकशार्ल्येश। इति च शार्ङ्गधरः।)

अवलेहनं, क्ली (अव+लिह्+भावे ल्युट्।) लेहनं। निजशाखा चाटनं। चाटन् इति भाषा। अव-लेहः। अवपूर्वलिहधातोरनट्प्रत्ययेन निष्पन्नं।

अवलोकनं, क्ली, (अव+लुक्+ल्युट् भावे।) दर्शनं। आलोकनं। इति हेमचन्द्रः।
("अवलोकयतोऽवलोकनकुतूहली"।
इति माघकाव्ये।)

अवलोकित, पुं, (अव+लोक+भावे क्त ततो अस्त्यर्थे अच्।) बोधिसत्त्वः। बुद्धः। इति त्रिकाण्डशेषः।

अवलोकित त्रि (अव+लोक+कर्म्मणि क्त।) निरीक्षितं। दृष्टं। इति शिष्टप्रयोगः। (भावे क्त।) प्रेक्षणक्रियायां क्ली।

अवल्गुज, पुं, (अवल्गोरसौभाग्यात्कायते इति अव-वल्गु+जन्+ड।) सोमराजी। इत्यमरः। अव-सर्व्वसोमराजी। वाकुच् इति भाषा। तस्य गुणाः। पाकरस-कुष्ठ-कफ-श्लेष्म-नाशित्वं। इति राजनिघण्टुः। अस्य विवरणं वाकुची शब्दे द्रष्टव्यं।
("अवल्गुजादीन्मासे पीता चौषधेन शाम्यिता।
मोषणं सर्पिषा चास्ये कर्म्मकुष्ठनाशनम्"।
इति वैद्यकचक्रपाणिदत्तः।)

अववाद, पुं, (अव+वद+घञ्।) आज्ञा। निन्दा। विश्वासः। इति मेदिनी।

अवश, त्रि, (न विद्यते वशः आयत्तत्वं यस्य।) पराधीनः। विवशः।
यथा,—
"बैजानु चन्द्रैकेण मेषो वृषे महोन्नतः।
बलो न रोहितश्च क्रिया कार्य्या विवशता"।
इति मुक्तिचिन्तामणौ। (स्त्री अवशा। निषिद्धम्।)

अवशङ्गम, त्रि, (अवशमेव गच्छति येन।) पदातिरादिः पञ्चकादिभ्रमरस्य इतिपरिच्छिन्नयूप-रक्षितः। पोड़ावादिर्वा यथा इति भाषा। यथा। आपामरणा।
"अपामार्गपादेषु माणुतोऽर्णीतोपकृष्टकाया।
क्षयापवलिभो गमु पौण्ड्रक च बद्धते"।
अपामार्गपादेषु अपामार्गपादस्य। भाण्डोऽर्णीयो जयायवलिभी यथाविधा क्षयापवनाशनम्। इत्याह्निकतत्त्वम्।

अवशिष्ट, त्रि, (अवशिष्यते इति अव+शिष+क्त।) शेषः। उद्धृतः। अवशेषमात्रः। यथा,—
"पत्नीस्वपितृपौत्रनायो भरतस्यावशेषं यथा।
श्रीनाथवंशे मैत्रत्य बारपात् वेणवसर्णं"।
इत्याह्निकतत्त्वम्।

अवश्यं, अ, (न वश्यं।) निश्चयः। अवश्यमर्थे। पूर्वं २। नियमं २। इत्यमरः।
("अवश्यं याति तिर्य्यक्त्वं जग्ध्वा चैवाहुतं हविः"।
इति मनुः।) (न+वश+यत्।) अवश्यं त्रि।

अवश्या, स्त्री, (अव+श्यै+क। पृषोदरादित्वात् ह्रस्वः।) कुज्झटिका। इति शब्दरत्नावली।
(कुज्झटिकाशब्देऽस्य विवृतिर्ज्ञेया।)

अवश्याय, पुं, (अवश्यायते हिमत्वमापद्यते इति अव+श्यै+णः। अथवा अवाङ् अस्ति+ण्यत्।) हिमं। इत्यमरः।
("अवश्यायनिपातेन किञ्चित्प्रक्लिन्नशाद्वला"।
इति रामायणे।) अम्बु। इति त्रिकाण्डशेषः।

अवश्यायवती, स्त्री, शङ्खवती। निरन्तरा गौः। इत्यमरटीकायां भरतमल्लः।

अवष्टब्ध, त्रि (अवष्टभ्यते स्म इति अव+ष्टम्भ+

रोधने वा क्तः । स्तम्भे अवाचेति च । अवा-
चालम्बन इति सूत्रेण आविदूर्य्ये स्तम्भे षत्व-
विधानादवष्टब्धशब्द आसन्नपर इति अवष्टब्धीना-
वष्टब्धे इत्यत्र मनोरमायां स्थित ।) अविदूर ।
समीपं । अवलम्बित । आश्रित । इत्यमरः ॥ बद्ध ।
बद्धः । इति भरत ॥ आक्रान्त । इति मेदिनी ॥
अवष्टम्भः, पुं, (अव + ष्टम्भु रोधे इति + घञ् ।
षत्वञ्च ।) स्वर्णं ।
("रघोरवष्टम्भमयेन पत्रिणा
हृदि क्षतो गोत्रभिदप्यमर्षणः" ।
इति रघुवंशे ।) स्तम्भः । प्रारम्भ । इति मेदिनी ॥
सौष्ठव । इति हलायुध ॥ (अवलम्बनं । बोधनम् ।
निष्पन्दता ।)
अवष्वाण, क्ली, (अव + स्वन शब्दे + घञ् । षत्वञ्च ।)
भक्षणं । इति हेमचन्द्र ॥
अवस्, व्य, (अवर + पूर्व्वाधरावराणामित्यसि-
प्रत्ययः, तत्सन्नियोगेन अवरस्य अवादेशश्च ।)
व्यतिरेकः । इति केचित् ॥
अवस, पु, (अव रक्षणादौ अवति इति अत्यवि-
चमीत्यादिना असच् प्रत्ययः ।) राजा । सूर्य्यः ।
इति सिद्धान्तकौमुदी ॥
अवस, क्ली, (अव + असिच् भावे ।) रक्षणं । वैदिक-
शब्दोऽयं ॥
अवसक्थिका, स्त्री, (अववद्धे सक्थिनी यया बन्ध-
प्रणाल्या सा, अव + सक्थि + समासे कप् ।) खट्टा ।
तत्पर्य्याय । पर्य्यस्तिका २ परिकरः ३ पर्य्यङ्कः ४ ।
इति हेमचन्द्र ॥ (पर्य्यङ्कबन्धम् । वस्त्रादिद्वारा पृष्ठ-
जानु-जङ्घा दयवृढ़बन्धनपूर्व्वकोपवेशन । यथा,—
"आसनारूढ़पादस्तु जानुनोर्व्वाथ जङ्घयोस्तथा ।
कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते" ॥
इति कात्यायनः ।
"शयानः प्रौढ़पादश्च कृत्वा चैवावसक्थिकाम् ।
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च" ॥
इति मनु ।)
अवसथः, पु, (अव + सो + कथन् ।) छात्रनिलयः ।
इति हेमचन्द्र ॥ पाठशाला चौपाड़ी यस्य
प्रसिद्धि । ग्राम । इति शब्दरत्नावली ॥ गृह ।
इति हलायुधः ॥
अवसथ्य, पुं, (अवसथ + यत् ।) छात्रवेश्म ।
इति हेमचन्द्रः ॥ चौपाड़ी इति भाषा ॥
अवसन्न, त्रि, (अव + सद + क्त ।) अवसादप्राप्त ।
विषण्ण । यथा,—
"महिम्नः पारन्ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्व्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः" ॥
इति पुष्पदन्तकृतशिवस्तोत्रं । अपि च ।
"आधारेणावसन्नोऽपि पुनः प्रार्थयते यदि" ।
इति व्यवहारतत्त्व ॥
अवसर, पु, (अव + सृ + अप् ।) प्रस्तावः । मन्त्र-
विशेष । वर्षणं । इति मेदिनी ॥ वत्सर । इत्य ।
इति हेमचन्द्र ॥ अवकाश । यथा । "गो-

वधे एका चेद्बहुभिरित्युपदेशेन दण्डवत् प्राय-
श्चित्तानि भवन्तीत्यतिदेशानवसरात् । तदवस-
रत्वे प्रत्येकं पूर्णप्रायश्चित्तदैगुण्य स्यात्" । इति
प्रायश्चित्ततत्त्व ॥ (योग्यकाल । क्रियास्थितियोग्य-
तासम्पादककाल कालिकोऽवकाश । यथा,—
"कामस्तु वाणावसर प्रतीक्ष्य" । इति कुमारे ।
शिष्यजिज्ञासानिवृत्त्यावयवान्तरवक्तव्यत्वरूपः सङ्गति-
विशेष । अनन्तरवक्तव्यत्वम् अवसरः । "उप-
मानेऽवसरसङ्गति" । इति जगदीश ।)
अवसर्ग, पु, (अव + सृज् + घञ् ।) स्वेच्छाचारः ।
तत्पर्य्यायः । प्रकाम्य २ स्वाच्छन्द्य ३ अनुमनन ४ ।
इति त्रिकाण्डशेष ॥
अवसर्प, पु, (अव + सृप् + अच् ।) अपसर्पः । चर ।
इत्यमरटीकायां भरत ॥
अवसर्पिणी, स्त्री, (अव + सृप + णिन् ङीप् ।)
जिनाना कालविशेष । स तु दशकोटिकोटि-
सागरवर्षेण समाप्यते । इति हेमचन्द्र ॥
अवसव्य, त्रि, अपसव्य । दक्षिण । इति रायमुकुट ॥
अवसादः, पु, (अव + सद + घञ् ।) अवसन्नता ।
तत्पर्य्यायः । विषादः २ सादः ३ विषण्णता ४ ।
इति हेमचन्द्र ॥ (शेष । क्षय । यथा,—
"मैर्य्यावसादेन हृतप्रसादा
वन्यद्विपेनेव निदाघसिन्धुः" ।
इति किरातार्ज्जुनीये ।)
अवसान, क्ली, (अव + सो + ल्युट् ।) क्रियासमाप्तिः ।
शेषः । तत्पर्य्याय । साति २ । इत्यमर ॥ विराम
३ । इति जटाधरः ॥ मृत्युः ।
("पुत्रोऽवसान प्रभवतोऽपि निष्ठुरे-
रिष्टैर्धर्मैः पञ्चपदीनमुच्यते" ।
इति पञ्चतन्त्रे ।) सीमा । इति हेमचन्द्रः ॥
अवसाय, पु, (अव + सो + घञ् ।) शेष । समाप्तिः ।
निश्चयः । इति मेदिनी ॥
अवसित, त्रि, (अव + सो + क्त ।) परिपक्कमर्दित-
धान्य । तत्पर्य्याय । ऋद्ध २ । इति भरतमेदिन्यौ ॥
ज्ञात । अवसानगत । समाप्त । तत्पर्य्याय । सित
२ । इत्यमरमेदिन्यौ ॥ ("यदि नेपथ्यविधानम्
अवसितम्" । इति शाकुन्तले ।)
अवसेकिम, पु, (अवसेकेन + निर्वृत्त । अवसेक +
इमनुच् ।) वटक । इति हेमचन्द्र ॥ वड़ा इति
भाषा ॥
अवस्कन्दः, पु, (अव + स्कन्द + अच् ।) विजिगीषूणा
निवेशस्थान । शिविरं । इति हलायुध ॥ अव-
गाहन । यथा,—
"लतानुपात कुसुमान्यगृह्णात्
स नद्यवस्कन्दमुपास्पृशच्च ।
कुतूहलाञ्चारुशिलोपवेशं
काकुत्स्थ ईषत् स्मयमान आस्त" ॥
इति भट्टौ २ सर्गे ११ श्लोक ॥ नद्यामवस्कन्दो-
ऽवगाहो यत्र स्नानक्रियायां । इति तट्टीकायां
भरत ॥ (आक्रमण । यथा,—
"अवस्कन्दभयात् राजा प्रजागरकृतश्रमम् ।
दिवासुप्त समाहन्यान्निद्राव्याकुलसैनिकम्" ॥

इति हितोपदेश ।)
अवस्कन्दन, क्ली, (अव + स्कन्द + ल्युट् ।) अव-
गाहन । इति भट्टिः ॥ अवतरण । इति महा-
भारत ॥ अवपूर्व्वस्कन्दधातोरनट्प्रत्ययेन निष्पन्नं ॥
अवस्कर, पु, (अव कीर्य्यते क्षिप्यते इति । अव +
कृ + अप् + सुट् ।) विष्ठा । गुह्य । इत्यमरमेदिन्यौ ॥
समार्ज्जन्यादिनिक्षिप्तधूल्यादि । इत्यमरटीकायां
मथुरानाथ सारसुन्दरी च ॥
अवस्तात्, व्य, (अवरस्मिन्, अवरस्मात्, अवरमि-
त्यर्थे अस्ताति ।) अवरे । पश्चात् । शेषे । अन्ते ।
इति पाणिनि ॥ ("अवस्तात्स्वर्गलोकं प्रापयन्त" ।
इति शतपथब्राह्मणे ।)
अवस्तार, पु, (अव + स्तृ + घञ् ।) यवनिकादि ।
कानात् इत्यादि भाषा ॥ अवस्तीर्य्यतेऽनेनेति स्तृञ्
आच्छादने घञ् ॥
अवस्तु, क्ली, (न वस्तु । नञ्तत्पुरुषः ।) असद्वस्तु ।
(यथा,—
"अवस्तुनिर्ब्बन्धपरे कथ नु ते
करोऽयमामुक्तविवाहकौतुक" ।
इति कुमारे ।) वेदान्तमते अज्ञानादिसकल-
जड़समूह ॥
अवस्था, स्त्री, (अव + स्था + अङ् ।) दशा । काल
कविशेषः । इत्यमर ॥
"कौमार पञ्चमाब्दान्त पौगण्ड दशमावधि ।
कैशोरमापञ्चदशात् यौवनन्तु तत पर ॥
आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते ।
वृद्धस्तु सप्ततेरूर्द्ध्वं वर्षीयान् नवते पर" ॥
इति स्मृतिः ॥
अवस्थाचतुष्टय, क्ली, (अवस्थायाश्चतुष्टय । तत्पुरुष ।)
कालकृतचतुर्व्विधदशा । यथा । "आपञ्चदशवर्ष
बाल्य । आत्रिंशद्वर्षं कौमार । आपञ्चाशद्वर्षं यौ-
वन । पञ्चाशत ऊर्द्ध्व वृद्धत्व" । इति वैद्यकशास्त्रे ॥
अवस्थान, क्ली, (अव + स्था + ल्युट् ।) स्थिति ।
वास । यथा । "पर सन्निकर्षञ्च उपर्य्यधोभावा-
पन्नसमसूत्रपातन्यायेनैकाश्रयावच्छेदेन सहाव-
स्थानरूप" । इति तिथ्यादितत्त्व ॥ (अवस्था ।
प्रतिष्ठा । यथा "कीदृक् ते व्यसनावस्थानम्" ।
इति पञ्चतन्त्रे ।
"मङ्गा वृक्षमवस्थान स कृत्वा कपिकुञ्जर" ।
इति रामायणे ।)
अवस्थित , त्रि, (अव + स्था + क्त ।) कृतावस्थान ।
अवस्थितिविशिष्ट । स्थित । यथा ।
"यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्त्तराष्ट्राः" ।
इति श्रीमद्भगवद्गीतायां २ अध्याये ६ श्लोक ॥
अवस्थिति , स्त्री, (अव + स्था + क्तिन् ।) अवस्थान ।
थाका । इति भाषा । अवपूर्व्वकस्थाधातोः क्ति-
प्रत्ययेन निष्पन्ना ॥ (अनुसरणम् । अभ्यासः ।)
अवहस्त, पु, (अवर हस्तस्य । एकदेशी तत्पुरुष ।)
हस्तपृष्ठ । इति हेमचन्द्र ॥
अवहार, पु, (अव + हृ + घञ् ।) चौर । द्यूत-
युद्धादिविश्राम । निमन्त्रण । उपनेतव्यद्रव्य ।

माप्नामपचनखाः। इति विश्वमेदिन्यौ। पश्चा न्त रं। इति शब्दरत्नावली। (त्याज्यम्। अम र्षपरिणामपूर्व्वकसंभोगानन्तरम्। मत्सर्य्यम्।)

अपहारक, पुं, (अपहार+स्वार्थे कः।) चौरस्तुति भेदः। चाइर इति भाषा। अपहरतीति वेदितव्। तस्करोचि। अपयाना २ अपयाना २ अपहार ३। इति शब्दरत्नावली। अपहरि णिमर्त्ये त्रि।

अपहार्य्य, त्रि (अप+हृ+ण्यत्।) हरणीया। यथा—
"नाविचोरविधिवोषौ न चाथामनमर्षेण।
अपहार्य्यौ चरेता तौ दीर्घकालमवस्थितौ"।
इति माघे च अध्याये १७. श्लोकः। (वर्ज्जनीया। यथा—
"अपहार्य्यो चौरैव चाद्यक महत्वं स्मम्।
निरन्तरोऽपहरो भाग स्वार्थैरविच्छिन्न"।
इति मनुः।

अपहासिका, स्त्री, (अप+हस+ण्वुल्+टाप्।) माचीर। इति शारदावली।

अपहित, त्रि (अप+धा+क्त।) निहतं। अप भागं गतं। इति वस्ती। (नाशयान। प्रमाद रहित। यथा—
"महाभारतविदो भूमा वसुधं मन्दन हरा"।
इति मार्कण्डेयपुराणम्।)

अपहिल्ला, स्त्री,स्त्री, (न हिक्किका यस्यामिति अपहिक्का+ का+च+टाप्। पृषोदरादित्वात् साधुः।) अपमारप्रभा। एतानिवृत्तपीतमुखरागादिरा भावः। चतुर्थेऽध्यायमिति शोषविज्ञा। अपस्मा रिणा वच योषय। इत्यमरटीकायां भरतः। (अपहल्लं यथा नाविकमर्ष्ये,—
"अपश्चौरवचमार्दवेषोषायासपूर्विरविहिल्ला।
चाचारन्तरवाक्यावचनामम-विचोषणादि कर्त्री"। उदाहरणम्। यथा कुमारसम्भवे—
"अथ नागिनि दर्शनं पार्श्वे पितुरधोमुखी।
योकाक्षमवलम्ब्यापि अवनामाय पार्व्वती"।
अन्यमपास्य पञ्चमप्रकरणावधेन पश्ये कुमोप हर्षः। अनेन अपहिल्लाव्यभिचारी भाव उक्तः, यदुक्तम्,—
"अपहिल्ला तु अन्यारेपनापाचारगोपनं"।
इति अर्थमाला।)

अपहेल, स्त्री, स्त्री, (अप+हेड्+घञ् टाप् च, डलयोरैक्यात् लत्वम्।) अनादरः अवज्ञा। इत्यमरः।

अपहेलन स्त्री, (अप+हेड्+ल्युट्।) अनादर करण यथा। इति शब्दरत्नावली।

अपहेलित, स्त्री, (अप+हेड्+क्त।) अनादरः। अवहेला। अवहेलिते त्रि। अनादरीकृतद्रव्य। अत इत्थं आदरस्य इतरे हृतधनेन विनष्टं।

अपह्नुतं स्त्री, (अप+ह्नु+क्त।) अपहरणकृतम्। यथा मनुः,—
"अपह्नुतं धनमर्धं वर्धितमधमकुलं"।
इत्यादिकरणं।

अपाक्, [च] त्रि, (नास्ति वाक् यस्य सः।) वाक् रहित। इत्यमरः। बोवा इति भाषा। विशेष्य मनुष्यादौ दृष्टान्तपूर्वकार्यं प्रयोगः। रहितं। अधो मुखं। इत्यस्य तेन अपपूर्वानृणामाद्य प्रयोगः।

अपाङ्गुष्ठी, स्त्री, (अपाद् अधोमुखं पुष्पमस्याः) अपामार्गः। मयूरा इति भाषा। शिखेका। इत्यमरटीकायां। ओंगी इति भाषा। तस्य विशेष। वेनलाहो वौरलाहो वीरेन्द्रवृषी इति भाषा। अल्पम्बीला। अपपुष्पी २ मयूरका २ अपरह्लिखा ३। इति रत्नमाला।

अपाकशिरा, [स्] पुं, (अपाद् अवनतं शिरो यस्य।) अधोमुखः। यथा—
"अपाक्शिराजनमभवे विजिनी नरकं व्रजेत्।
न वर्षं विशत्यूनं भृत्यात् सत्यं प्रकृत यत् धर्मनिश्चये"।
इति मानवे च अध्याये ८० श्लोकः।
("इति श्रुति रामेषु नरकोऽस्ताद्धिरावरा"
इति रामायणम्।)

अपार्थ, त्रि, (अपगतमर्थमस्य।) व्यर्थं। अनर्थकं। इत्यमरः।

अपाच् [ञ्च] त्रि (अप+अञ्च+क्विप्।) नीच गतः। अधोमुखः। अधोमुख २ अधोमुख २ अवाचीन ३। इत्यमर-भरतावली।
("अवाची मृदुमुखारवत् विशुद्धार्थपरावरि।
अपाक् परममपि भेद कर्तीय धीयते"।
इति मनुः।)

अपाङ्मुख, त्रि (अपाङ्मुखमस्य।) अधोवदनं। यथा
"अथ भुजा च यत्र येन-पर्व-दुःख अपाङ्मुखः।
अपाक्पुरुष पानवासी वासुदावानुषङ्गदः"।
इति कथासरित्सागरे अश्वादश्चस्वीयाध्याये (१२ तर।

अपाची, स्त्री, (अप+अञ्च+क्विप्+ङीप्।) दक्षिणदिक्। इति योगेश्वरारः। अधोदिक। इति शास्त्र। अधोमुखी।

अपाचीन, त्रि (अपाच्य भवं। अपाची+ख।) दक्षिणदिग्भवम्। अधोमुख। इति मात्रि अव्ययी।

अपाङ्ग, स्त्री, (न+अञ्ज+अच्।) पूर्वाङ्ग। अप- र्याप। अपाङ्गं २। इत्यमरः। चक्षुरपाङ्गं। च- क्षुषः इति पश्यति इति मनुः। निविदाय नरादि चम अपाङ्गं व्यवस्थानमपेक्षाणमस्य यत् लिखिता। इत्यमरस्य वाह्यकोणनं नयने मादि पर्यवायितिदि नव तनपदेनि च- निपेक। इति भरतः।
("अपाङ्गायमिति कुर्वितो न दिवाकरम्बन्दितविन्।
इति भारत।
"अपाङ्गं मन्दो निशा वर्षं न बलिहा तव"।
इति रामायणे।)

अपाटव, त्रि, (अपगत्+स्वार्थे अण्।) अनिपुण। इति पालिनि। अपटुता। रुग्णत्वं। यथा,—
"अपटवम् समर्थानु प्रस्तरीन प्रबुध्येत्।
नत सम्भाव्यो नाति आत्मसामर्थेन।
सम्बन्धमपि नन्दः स्वयमर्थतस्युर्वेत्"।

इति शब्दरत्नावली। (अपरत्वगापालो भव।)

अपाण्डरेव, पुं, (अपाचो देशः।) देशिका। इति त्रिकाण्डशेषः।

अपापी [न्] त्रि (पाप+इनि। न पापी। नञ् तत्पुरुषः।) अतिदोषी। अविकारी। अनघ। अनवद्यदीक। पवित्रतापूर्विन् पञ्चपापमपार्थे नञ् समासनिष्पन्न।

अपार्थ त्रि, (नास्ति बाधा यस्मिन्।) बाधाशून्यं। अपमर्थं। अल्पमोक। निरर्थ २। इत्यमरः।

अपाधक, त्रि, बाधाशून्यं। बाधनेच्छा। अवाधनीक। अपरिवाधक। न बाधक अबाध इति नञ् समासनिष्पन्न।

अपाङ्ग, त्रि, (अप+अङ्+अच्।) शुल्कापाङ्गि। इति शब्दरत्नावली।
("अपापमनुवादकमैकमापनन्दं विन।
इति भारते।)

अपामार्ग, त्रि, (अपगतमन्तरं मध्यम्। नास्ति मध्यं।) अपामार्ग वाचि। एवं अधमानिर्दे प्रेत- गर्भनकमाच साधनता न भवति। किन्तु यदि तुष्कानां यात्रासमना अपान्तरकर्मणके चमेद प्रमात्मरणमार्थं। यथा भेरव्ये धीयते वसुमानरं। यथा,—
"रति निर्ने प्रसादामि यत्र ते अन्यवयुक्तम्।
विनिवृत्तः तिथिविनिमत्स्यविनायन"।
"अथ विज्ञानिर्मायविनाय न यत्र अन्धकारितान सह भयेनापि विस्तारितां यथा वेदेऽप्यस्तान्तर कवि प्रयोग्यम् वैराग्येन कर्मोनि निधने"
इति मनुमाष्यतन्त्रे।

अपाणिपाद्यवार्त्त, त्रि, (अपगतिर्वाच्चान्तराद्यं यस्य।) अन्यवस्थमवार्त्त। रोगिवार्त्त। रोगायन इति भाषा। वद् व्याधिप्रसन्नारप्रयन्न निर्दिष्टोनिर्व्व। इति राजवलभ।

अपार, स्त्री (अप+ऋ+अच्।) पर्वाङ्गुरं। अनारं। पूर्णगीरं। इत्यमरः। इत्यार इति भाषा।

अपारदार, पुं, (अपारं पर्य्यातीरं पारं परं तीरस्य यस्य।) समुद्र। इति हेमचन्द्र।

अपारधारिन, त्रि, (अपारपारे गच्छतीति। अपा- रपार+ख।) पारगा। अपारपारगामिनि। इति पाणिनि।

अपारिषा, स्त्री, (नास्ति पारि यस्य तथा पार्थे क्+टाप्।) अपारं। अरीणा इति भाषा। अपरिखा च पारा। इति हारनिर्णय।

अपारिक, त्रि (न पारिकं। नञ्समासः।) पाराप्र- यार्थं। अविचार्यितं। यथा,—
"अपारिषवादयमा निरवा-
नन्यगती अत्र विचिन्न राजा।
सर्वेषु एकोऽपि विशेन
नमस्यमानः परमानुभवात्।
इति वेदेषु १ कर्णे ४८ श्लोका।

अपारीण, त्रि (अपारं गच्छतीत्यर्थे खः।) पा रगः। अतिपारगत। इति पाणिनि।

अपार्थ्य, त्रि, (न पार्थ्य। नञ्समासः) अविचार्य।

अवारणीय । अवारितव्य । वारणायोग्यं । यथा,—
"नमस्ते नित्यविलसद्वैभवस्वनिकेतन ।
अवार्य्यवीर्य्यवद्रूप विश्वायैश्च प्रणमाम्यहं" ॥
इत्युत्कलखण्डे २७ अध्यायः ॥

अवासाः, [स्] त्रि, (नास्ति वासो यस्य ।) वस्त्ररहित । नग्न । इत्यमरः ॥

अवास्तव, त्रि, अयथार्थे । मिथ्या । न वास्तवं अवास्तवमिति नञ्समासनिष्पन्नं ॥

अवाच्, त्रि, परिरक्षक । अवपूर्व्वकाञ्चधातोरल् प्रत्ययेन निष्पन्नं ॥

अवि, पुं, (अव + इन् ।) सूर्य्य । पर्व्वत । मेष । इत्यमरः ॥ [इति मनुः ।)
("श्वसूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणां" ।
"मूषाधि हस्तिकरभमहिषीखरवाजिनां ।
गोऽजादीनां स्त्रिया प्रसा मूत्रवर्गं उदाहृतः" ॥
इति वैद्यकरत्नेन्द्रसारसंग्रहे ॥)
नाथ । मूषिककम्बल । इति मेदिनी ॥ प्राचीर । वायुः । इति दण्डी ॥

अविः, स्त्री, ऋतुमती । इत्यमरः ॥

अविकटः, पु, (अवीनां मेषाणाम् सङ्घातः । अवि + कटच् ।) मेषसमूह । इति सिद्धान्तसारपरिशिष्ट ॥ भेड़ारपाल इति भाषा ।

अविकटः, त्रि, अविशाल । अकराल । अविस्तार । न विकटः अविकटः इति नञ्समासनिष्पन्नं ॥

अविक, क्ली, (अवि + क ।) हीरक । इति राजनिर्घण्टः ॥ (हीरकशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

अविकारी, [न्] त्रि, (न विकारी + नञ्तत्पुरुषः ।) विकाराजनकः । यथा स्मृतिः ।
"कन्दमूलफलैः पुष्पैः शस्ते सुष्कैस्तु यत् ।
अविकारि भवेन्मेध्यमभक्ष्य तद्विकारवत्" ॥
इत्याह्निकाचारतत्त्वं ॥

अविगन्धिका, स्त्री, (अवेर्मेषस्य गन्ध इव गन्धोऽस्याः । तत स्वार्थे कन् ।) अजगन्धावृक्षः । इति राजनिर्घण्टः ॥

अविगीत, त्रि, (न विगीतम् । नञ्तत्पुरुषः ।) अनिन्दित । यथा । "नापि मङ्गलं सफलमविगीतशिष्टाचारविषयत्वाद्वैदवत्" । इति मङ्गलवादचिन्तामणिः ॥

अविघ्नः, पुं, (न विघ्नः । नञ्तत्पुरुषः ।) करमर्दकवृक्षः । इत्यमरः ॥ पानियामला इति ख्यातः । इति सारसुन्दरी ॥

अविचारः, पु, (नास्ति विचारो यस्येति ।) अन्याय । अत्याचार । विचाररहिते त्रि । (विचाराभावः ।) यथा,—
"अविचारेण सर्व्वाभिरनुष्ठेयन्तु तत् पुनः ।
सचारोत्तारणायालमेवदेवविदो विदुः" ॥
इति मत्स्यपुराणं ॥

अविचारितः, त्रि, (न विचारितः । नञ्तत्पुरुषः ।) अकृतविचार । अविवेचित । अविचारशब्दादितच्प्रत्ययेन निष्पन्नं ॥ ("अतः सर्व्वथाऽविचारितं कर्म्म न कर्त्तव्यम्" । इति पञ्चतन्त्रम् । अविवेचित सम्यग्विवेचन विना । यथा,—
"स किंभृत्यः स किं मन्त्री य आदावेव भूपतिम् ।
युद्धोद्योगं स्वभूत्यागं निर्दिशत्यविचारितम्" ॥
इति हितोपदेशः ।)

अविच्छिन्न, क्ली, (न विच्छिन्नं, नञ्तत् ।) विच्छेदाभाववत् । अनिष्पत्तिमत् । यथा,—
"अविच्छिन्ने कथमभावे यत् प्रधानस्य मन्यते ।
अविज्ञातफलं कर्म्म तस्य प्रकारणाकृता" ॥
इति मलमासतत्त्वम् ॥

अविज्ञ, त्रि, (न विज्ञः । नञ्तत्पुरुषः ।) अप्रवीण । अनिपुण । अनभिज्ञ । अशिक्षित । अज्ञानी । यथा,—
"एते सर्व्वे गुणाः कान्त सन्ति कान्ते त्वयि ध्रुवं ।
त्वां न वाञ्छन्ति या कान्तास्ता अविज्ञाश्च वञ्चिताः" ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २३ अध्याय ॥

अविज्ञेय, त्रि, (न विज्ञेयं । नञ्तत्पुरुषः ।) दुर्ज्ञेय । यथा,—
"आसीदिदं तमोभूतमप्रज्ञातमलक्षणं ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः" ॥
इति मानवे १ अध्याय ॥

अविडीन, क्ली, (न विडीनम् । नञ्तत्पुरुषः ।) पक्षिणां आभिमुख्याभिगमन । इति महाभारत ॥

अवित, त्रि, (अव + क्त ।) पात । रक्षित । इत्यमर ॥

अवितथ, क्ली, (न वितथम् । नञ्तत्पुरुषः ।) सत्य । ("अवितथमाह प्रियंवदा" । इति शाकुन्तले ।) तद्विशिष्टे त्रि । इति रत्नावली ॥ (सार्थक । यथा,—"वत्स । अवितथैषा तव भारती भवतु" । इति [illegible] ।)

अवित्यजः, पु, क्ली, (न विशेषेण त्यज्यते रसायनादिषु इति । न + वि + त्यज + क ।) पारद । इति राजनिर्घण्टः ॥

अविदूस, क्ली, (अवेर्मेषस्य दुग्धम् । अवे दुग्धे सोढदूसमरीसच, इति दूसप्रत्यय ।) मेषदुग्ध । इति हेमचन्द्रः ॥ (मेषदुग्धविवरणेऽस्य विशेषो ज्ञेयः ॥)

अविद्धकर्णा, स्त्री, अम्बष्ठा । आकनादि इति ख्याता । इति भट्टराज । इत्यमरटीकायां भरत ॥

अविद्धकर्णी, स्त्री, (न विद्ध पर्णमस्य कर्णो यस्याः ।) विद्धकर्णीलता । इति भरतः ॥ (माचिकाशब्देऽम्बष्ठाशब्दे चास्या गुणादयो ज्ञातव्याः ॥)

अविद्य, त्रि, (नास्ति विद्या यस्य स ।) विद्यारहित । अविद्वान् । विद्याहीन । यथा,—
"अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः" ।
अपि च । कात्यायनः ।
"नाविद्यानान्तु वैद्येन देयं विद्याधनात् क्वचित्" ॥
इति दायतत्त्व ॥ अन्यच्च ।
"अविद्यानान्तु सर्व्वेषामीहातश्चेद्धनं भवेत् ।
समस्तत्र विभागः स्यादपित्र्य इति धारणा" ॥
इति मानवे ९ अध्याये २०५ श्लोकः ॥

अविद्यमानः, त्रि, (न विद्यमानः । नञ्तत्पुरुषः ।) अवर्त्तमान । असत्तारहित । अभाव । यथा नारदः,—
"अविद्यमाने पित्रर्थे स्वांशादुद्धृत्य वा पुनः ।
अवश्यकार्य्याः संस्काराः भ्रातृभिः पूर्व्वसंस्कृतैः" ॥
इति दायतत्त्व ॥

अविद्या, स्त्री, (न विद्या । नञ्तत्पुरुषः ।) अज्ञान । इत्यमरः ॥ माया । इति वेदान्ते ॥ (अहङ्कारहेतुकमज्ञान, मिथ्याज्ञान, विद्याविरोधिनी, अयथार्थबुद्धि । यदुक्तम्,—
"अविद्याया अविद्यात्वमिदमेव तु लक्षणम् ।
यत्प्रमाणासहिष्णुत्वमन्यथा वस्तु सा भवेत्" ॥
अन्यच्च,
"सेयं भ्रान्तिर्निरालम्बा सर्व्वन्यायविरोधिनी ।
सहते न विचारं सा तमो यद्वद्दिवाकरम्" ।
अयथार्थमहङ्कारपञ्चतन्मात्रेष्वनात्मस्वात्मबुद्धिः । यथा,—"शरीरे मनुष्योऽहमित्यादि" । इयञ्च सर्व्वक्लेशमूलभूता तम इत्युच्यते ।
"अविरोधितया कर्म्म नाऽविद्यां विनिवर्त्तयेत् ।
विद्याविद्यां निहन्त्येव तेजस्तिमिरसङ्घवत्" ॥
इति आत्मबोध ।)

अविधि, पु, (न विधि । नञ्तत्पुरुषः ।) अविधान । शास्त्राविहित । यथा,—
"येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्व्वकं" ॥
इति श्रीभगवद्गीतायां ९ अध्याये २३ श्लोकः ॥
अपि च याज्ञवल्क्यः ।
"वसेत् स नरके घोरे दिनानि पशुरोमभिः ।
सम्मितानि दुराचारो यो हन्त्यविधिना पशून्" ॥
इत्याह्निकतत्त्व ॥

अविन, पु, (अव + इनच् ।) यष्टा । यागकर्त्ता । इत्युणादिकोष ॥

अविनय, पुं, (न विनयः । नञ्तत्पुरुषः ।) विनयाभाव । यथा,—
"बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः ।
वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे ॥
वेणो विनष्टोऽविनयान्नहुषश्चैव पार्थिव ।
सुदासो यवनश्चैव सुमुखो निमिरेव च" ॥
इति मानवे ७ अध्याये ४०।४१ श्लोकौ ॥ (अशिष्टाचार । यथा,—
"अयमाचारत्यविनय मुग्धासु तपस्विकन्यकासु" ।
इति शाकुन्तले ।) अविनीते त्रि ॥

अविनाभावः, पु, (विना व्यापक विना न भाव स्थितिः ।) व्याप्ति । व्याप्यनिष्ठव्यापकनिरूपितधर्म्म । यथा,—"वह्निमान् धूमात्" इत्यादौ धूमनिष्ठा वह्निनिरूपिता व्याप्तिः ॥ इति न्यायमीमांसयोर्मतं ॥ तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभाव । यथा । केयमाकाङ्क्षा न तावदविनाभावः । नीलं सरोजमित्यादौ तदभावात् । विमलं जलं नद्याः कच्छे महिष इत्यत्र अनन्वितनद्याअविनाभावात् कच्छे साकाङ्क्षत्वापत्तेश्च । इत्याकाङ्क्षाचिन्तामणि । अविनाभाव इति । तत्पदार्थेन विना यो भावः सत्त्वं तदभाव इत्यर्थः । तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभावस्तत्पदार्थे तत्पदार्थाकाङ्क्षा इति भावः । इति तट्टीका माथुरी ॥

अविनीत, त्रि (न विनीतः। नञ्तत्पुरुषः।) विनयरहितः। अशिक्षितः। अनुद्धतः २। इत्यमरः। (यथा —
"न चापि प्रतिबुद्धेन नाविनीतेन राघव।।
राज्यं पालयितुं शक्यं राज्ञा तीक्ष्णेन वा क्वचित्"।
इति रामायणे। अविनयिता। यथा —
"नाविनीतैर्विनिर्मूर्खैर्न च क्षुधाविनीतकैः"।
इति मनुः।)

अविनीता, स्त्री, (न विनीता। नञ्तत्पुरुषः।) दुष्टस्त्री। असती। इति हेमचन्द्रः।

अविपट, पुं, (अवि+पट्।) अवीनां विस्तारः इति कविकल्पद्रुमे। चर्म्मादि।

अविभीक, पुं, (अवि+भी+क।) मामाखर्म्मं। इति राजनिर्घण्टः। (यस्य न विभेति इत्येवं ख्यात् यस्य इष्टः।)

अविशिरा, स्त्री (अवीनां मेषाणां शिरा।) मेषा-क्षा। इति राजनिर्घण्टः।

अविभक्त, त्रि (न विभक्तः। नञ्तत्पुरुषः।) अस-हम्। यथा दायविभागतत्त्वे।
"विभक्ता अविभक्ता वा कुर्य्युः श्राद्धमदैवकम्।
मघासु च यथान्यत्र अविभक्ताः पृथक् क्रियाः"।
इति मत्स्यपुराणम्।

अविभाज्य, त्रि, (न विभाज्यम्। नञ्तत्पुरुषः।) विभागायोग्यम्। यथ विभाज्याविभाज्ये। तत्र कात्यायनः
"अभाविता पितृधनं वलात्सोऽपि यदर्जनम्।
सहायेभ्यो न दद्यात् विद्याप्राप्तं तदुच्यते" ॥
विद्याधनमाह कात्यायनः।
"उपन्यस्ते तु यल्लब्धं विद्यया पणपूर्व्वकं।
विद्याधनन्तु तद्विद्यात् विभागे न नियोजयेत्।
शिष्यादार्त्विज्यतः प्रश्नात् सन्दिग्धप्रश्ननिर्णयात्।
स्वज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत्।
विद्याधनन्तु तत्प्राहुर्विभागे न प्रयोजयेत्।
शिल्पेष्वपि हि धर्म्मोऽयं मूल्याद्यच्चाधिकं भवेत्।
परं निरस्य यल्लब्धं विद्यया द्यूतपूर्व्वकं।
विद्याधनन्तु तद्विद्यात् न विभाज्यं बृहस्पतिः" ॥
यदि भवान् सन्दिग्धमप्यर्थं मदग्रे वदेत् तदा मदीयमिति यदुक्तं प्रत्यर्थिनि विचार्य्य जयति। विद्यादेवाविभाज्य। चा-तिज्यं यज्ञमानादृत्विजा लब्धं न प्रति-ग्रहलब्धं वैद्यकत्वसाधक। तथा सन्दिग्धविषय प्रश्ने निर्णीतेऽर्थितं यदि अर्थिन् परितोषा दद्याति। तथा योऽपि च ब्राह्मणो स्वकीयं ज्ञानमप्यति तस्मै धनमिदं दत्तानीत्युक्तियुक्त-मेतदवगत्य गृह्णाति। शास्त्रीयोर्थे स्वार्थे व्याख्यानेनार्थमासाद्य वस्त्वन्तरविभक्तेन लब्धं सर्व्वाधिक्यं तथा शास्त्राधिगमद्वारेण धनमाप्य प्रतिग्रहादिना लब्धं। तथा ब्राह्मणादीनां वादे ... यत्र कुशलत्वोपायार्जितार्थविचारे निर्णीय लब्धं। अध्यापित् देवे भवानपि पुत्रे चैव प्रदद्यात् लब्धं। तथा शिल्पादिविद्याभिः शिल्पकारैरर्जितं धनलब्धं। तथा द्यूतेनापि जितं निर्णीय लब्धं। अविभाज्यं देवे मदागत शुद्धे चैव यद्यागत् लब्धं। तथा शिल्पादिविद्यया शिल्पाद्युपायार्जितमुपलब्धं। तथा द्यूतेनापि पणं निर्णीय लब्धं। अविभाज्यं। कात्यायनः। अविभक्तविभक्तानां विभाज्यमविभक्तितः। अत्र मध्यगोऽनुवर्तते यत्र माता विद्यमाना न भ्राता पुत्रः स पितृद्रव्यं ससंदर्भं। अत एव स्मृतिः। "तत्र विभज्यानां सर्व्वं न सर्व्वं विभजन्ति" इति। प्रश्नान्तरे विवादे तत्र पितामहस्य पितुः कुटुम्बकानां समानत्वं लभते। तत्र ...

"कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः।
भार्य्या विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन्"॥
विद्याविशेषेण धनमर्जितवान् यदा। यदि वि-धाभ्यासवतो भ्रातुः कुटुम्बमपरो भ्राता धन-धान्यादिरक्षया संरक्षति तदा तद्विद्या-र्जितधने तस्यापि भागः। अस्तवो मूर्खः। तत्र तदभिप्रायत्वाद् विज्ञानस्य। कात्यायनः।
"परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या।
तया प्राप्तं धनं यत्तु विद्याप्राप्तं तदुच्यते"।
अन्यस्य कुटुम्बविनियोगात्। अत्र विशेषमपि च कथ।
"अविद्यानान्तु सर्व्वेषां देयं विद्याधनात् क्वचित्।
समविद्याधिकानान्तु देयं वैद्येन सर्व्वदा"॥
अतोऽविद्यविद्यापरस्याविद्यानां समभावे तेन धन-विद्याभिर्विभाज्यं भ्रातरो न तु मूर्खाः वैद्येन विदुषा। ... इत्यविनीतवति।
"कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा।
शौर्य्यप्राप्तन्तु यद्वित्तं विभाज्यं तद्बृहस्पतिः"॥
कुले स्वकुले विद्यावद्विद्यावत्सु। पितृ पि वा। पितृविद्याविनीतानां भ्रातॄणां। अविभाज्यं भार्य्या धनं अविभक्तमिति सनकदायभागे। एक कात्यायनः।
"ध्वजाहृतोऽर्ज्जितो वा स्वविभाज्यमेव तत्।
स्वविभाज्यमिति। ध्वजपतिर्ब्रवीति धनम्
प्रकाशम् इति भावत् स्वविभाज्यपि स्वकीयम् पितृ-भीतिमं निजबाहुपराक्रमेण स्वसम्पत्त्या-वदितस्य। अर्थेनैव तु मीनिर्म मन्त्रको मध्ये तु तेषामभ्येत्यादिर्मे धनवित्तहरण-नात्। पितृद्रव्यभेदेन तु विप्राणां विभाज्य सम्पादेवेति सायमाहा। चतुर्भागं पितुः पैतृक-पत्नीभावात् धनमपि पैतृकं द्रव्येणार्जितं। आश्वयोपगते तु नयोपेताय इति पौत्रार्थमर्जितं। ... इत्य कात्यायनः।
"शौर्य्यभार्य्या धनं न भवेत् स्वकृत्योर्जितं।
मातोर्धं च विभज्येत विभाज्यं तु भर्त्रे लभेत"।
मातोर्धं तथा प्रयोगपातेऽप्यतदपि न अनूर्ध्वं रिक्थं तत्र अविभक्तादिविभिन्नमयीर्थे स्वनैव रक्षणाक्रमत्वादिभावस्य। याज्ञवल्क्यः।
"पितृद्रव्याविरोधेन यदन्यत् स्वयमर्जितम्।
मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत्"।
क्रमादभ्यागतं द्रव्यं हृतमप्युद्धरेत्तु यः।
"शौर्य्यभार्य्याधने चोभे यच्च विद्याधनं भवेत्।
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः"।
प्राप्त वर भार्य्येति भरणानन्तरमाद् भार्य्या प्रतिगृहीते धनं यत् भार्य्याधनमोपरितवति तथा। चोभे हरन् विशेषे मध्ये एकत्रिणं विद्यादिवदिति वृद्धये वन त्वार्ज्जितभा-ज्यादिति। न सम्भवितो भोगयात्रायाम्-
रोगयुक्तत्वीपाद्यव्यालयां प्रत्यग्रात्मसां विभाज्य इति प्रत्यर्थविदिति। यदिन् यस्मात् येन यद्यो सामादिना धनं यदर्जितं अन्यान्तरे तदा इव चेत् यदा तेन यत् ज्ञा लभेत्। अत्रा-प्येवं। ... शाकारस्वपार्थिवेऽपि विभिन्नमाह व्यासः।
"वाहनं चैव वस्त्रं च वस्त्राभरणमाश्रयं।
पौर्व्वीरिणात्रोऽपि धर्म्मं व्यवहारेण कारिकः।
तत्र मातरं देवं प्रियस्य कन्यादिका।
मध्ये भावरं स्वयुक्तत्वं विभागेऽप्यपि मोक्ष-णम्। कात्यायनः। शाकारकोऽस्वार यत्र नाम मोऽन्यस्मात् भवतो वा धनदानस्य तत् कुर्य्यादिति भागवन्ता कार्य्यमिति हलायुधः। बृहस्पतिः।
"भ्रातृभ्रातृन्यं सर्व्वं सममृक्थं च वा।
समाविभ्यो न दद्यात् विद्यया लब्धमेव च"।
पितृविद्याविभाज्यं यथाश्रेष्ठं योऽप्रजाया मातृपा तथापि सर्व्वासामभ्योन दद्यात्। ... पत्नी तु निर्विशति यदा।
"पूर्व्वभाषण यो भूमिवेव यजोऽर्जयेत् सभाम्।
प्राप्ता तयां मनसा वैश्याभ्यु दृष्टिवत्"।
तदर्थकं प्राप्तिकामर्मेप्यासदेवुपारिणामव्यपि प्रविभागादयुक्तवेति हलायुधः। तत्र राघवा-मिलाक्षरामतविभिर्न्नमाह। इति दायभाग।

अविमरीस स्त्री, (अवि+मरीसच्। अवेर्दुग्धे मरीसच्प्रत्ययः।) मेषदुग्धं। इति हेमचन्द्रः। ("सर्व्वाधोऽपि वैषीक्षमपनूढमाविषं"। इति शार्ङ्गधरः।)

अविमुक्त, क्ली (वि+मुच्+क्त। ततो न विमुक्तम्। नञ्तत्पुरुषः।) वाराणसीक्षेत्रं। यथा,—
"पुरे मम न चापि तु न मम क्षेत्रं भवत्तव।
विमुक्तं न मया यस्मात् अविमुक्तं ततो विदुः।
अविमुक्तं भवत्स्थानं क्षेत्रमेतत्पुरोदिते।
सर्व्वानन्दमयं धाम प्रागप्यासीत् शिवाप्रिय।
क्षेत्रमानन्दकानाम विमुक्तमनन्तरं।
आनन्दकन्दवीजानामङ्कुराणि महान्त्य।
तेषामपि महालिङ्गानि अविमुक्तानन्दकानने।
अविमुक्तमिति ख्यातमासीदिह घटोद्भव"।
इति काशीखण्डे २६ अध्यायः। (भूतविशेषान्त राजवामे च। यथा,—
"यत्र योऽभवत् राज्ञ माता योऽग्निप्रभो महाविष इति "आनर्त्तविदं येनं मयांशेनाभिकाय पूर्व्व-विधायायाचे"। इति च भावे।)

अविमुक्त, पुं, (न विमुक्तः। नञ्तत्पुरुषः।) वारा-णसीक्षेत्रं। इति शब्दार्थकल्पे। कामार्थं त्रि।

अविरतं क्ली, (न विरतम्। नञ्तत्पुरुषः।) अजस्रं। अनवरतं।
("अविरतोऽभिद्यमपरिविजयाकृति-
विराविभिर्विरतपुविनेष्यन्"।
इति किरातार्जुनीये।) तद्वति त्रि। इत्यमरः।

अविरल, त्रि, (न विरलं। नञ्तत्पुरुषः।) निरन्त-रमविरलं। सान्द्रम्। निबिडम् २ अर्थे २

निविड ४ निरन्तर ५ सान्द्र ६ नीरन्ध्र ७ बहल ८ दृढ़ ९ गाढ़ १० । इति हेमचन्द्रः ॥

अविरोध, पु, (न विरोध । नञ्तत्पुरुष ।) विरोधाभाव । यथा,—
"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्य्यं स्मार्त्तं वैदिकवत् सता" ॥
इति श्राद्धतत्त्वधृतजावालवचनं ॥ अपि च ।
"अपसर्पन्तु ते भूता ये भूता भूमिपालकाः ।
भूतानामविरोधेन पूजाकर्म्म करोम्यहं" ॥
इत्याह्निकतत्त्वं ॥

अविलम्बनं, क्ली, (न विलम्बनम् । नञ्तत्पुरुष ।) शीघ्रं । अविलम्बित । इति रायमुकुट ॥

अविलम्बित, क्ली, (वि + लबि + क्त । ततो नञ्तत्पुरुषः ।) विलम्बाभाव । तत्पर्य्याय । शीघ्र २ त्वरित ३ लघु ४ क्षिप्र ५ अर ६ द्रुत ७ सत्वर ८ चपल ९ तूर्णं १० आशु ११ । इत्यमरः ॥

अविलम्बितः, त्रि, (न विलम्बित । नञ्समास ।) त्वरायुक्तः । तत्पर्य्यायः । उष्णक २ । इत्यमरः ॥ अवलम्बित १ । यथा,—
"अविलम्बितमुष्णक केऽप्याकुलरवलम्बित" ।
इति जटाधर ॥

अविला, स्त्री, (अव + इलच् ।) मेषी । भेड़ी । इति हेमचन्द्रः । (नास्ति विलं यत्रेत्यर्थे, त्रि ।)

अविवादः, पुं, (न विवादः । नञ्तत्पुरुष ।) विवादाभावः । यथा,—
'यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः ।
तेन चेदविवादस्ते मा गङ्गां मा कुरून् गम " ॥
इति मानवे ८ अध्याये ९२ श्लोकः ॥

अविवादी, [न्] त्रि, (न विवादी । नञ्तत्पुरुषः ।) विवादरहितः । निर्व्विवादी । नञ्पूर्व्वविवादशब्दादिन्प्रत्ययेन निष्पन्नः ॥

अविवाहितः, पु, स्त्री, (न विवाहितः । नञ्तत्पुरुषः ।) अनूढः । अकृतोद्वाह । अकृतोपयम । अपरिणीतः । अकृतपाणिग्रह । आइबड़ इति भाषा । नञ्पूर्व्वविवाहशब्दादितप्रत्ययेन निष्पन्नं ॥

अविवाह्या, स्त्री, (न विवाह्या । नञ्तत्पुरुष ।) विवाहानर्हा । यथा । सुमन्तु । "मातृपितृसम्बन्धा आसप्तमादविवाह्या कन्या भवन्ति" । आपञ्चमादन्येषां मत । नारदोऽपि ।
"आसप्तमात् पञ्चमाच्च बन्धुभ्य पितृमातृत ।
अविवाह्या सगोत्रा च समानप्रवरा तथा ॥
सप्तमे पञ्चमे वापि येषा वैवाहिकी क्रिया ।
ते च सन्तानिन सर्व्वे पतिता शूद्रतां गता " ॥
सर्व्वाः पितृपत्न्यो मातरस्तद्भ्रातरो मातुलास्तद्दुहितरो भगिन्यस्तदपत्यानि भागिनेयानि तान्यविवाह्याः अन्यथा सङ्करकारिण्यस्तथाध्यापयितुरेवदेवेति । तासु यथा । पितृपितामहादीनां सप्ताना सन्ततिः सप्तमीपर्य्यन्ता नोद्वाह्या । एव पितृबन्धुप्रभृतिसम्बन्धघटकानां सप्ताना सन्तति सप्तमीपर्य्यन्ता नोद्वाह्या एव मातामहप्रमातामहादीना पञ्चानां सन्ततिः पञ्चमीपर्य्यन्ता नोद्वाह्या । एव मातृबन्धुप्रभृतिसम्बन्धघटकानां पञ्चानां सन्तति पञ्चमीपर्य्यन्ता नोद्वाह्या । बन्धुतन्मामोरसत्त्वेऽपि पितृमातामहमातृमातामहप्रभृत्युभयत्रिवनाना पञ्चानां धाराया सप्तमीपञ्चमीपर्य्यन्ता नोद्वाह्येति । एवञ्च पितुर्मातुश्च मातामहकन्यान्तरसत्त्वे तामादाय सप्तमीपञ्चमीपर्य्यन्ताया नपरीहार । एव बन्धन्तरेऽप्यूह्यं । बन्ध्वपेक्षया त्रिगोत्रगमन परतः सर्व्वत्र । पूर्व्वतस्तु पितुर्म्मातुश्च मातुलपुत्रत्वरूपबन्धोरपि स्वापेक्षया अन्येषां बधूनां मातामहगोत्रापेक्षया त्रिगोत्रगमन सर्व्वेसामप्रस्य स्यात् । अन्यथा पितु पितामहदौहित्रीकन्याया पितामहभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत स चायुक्तः । पितृगोत्रापेक्षया तस्यास्त्रिगोत्रमध्यवर्त्तित्वात् । एवं पितु प्रमातामहदौहित्रीकन्याया पितामहीभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाह प्रसज्येत स चायुक्तः । पितामहीभ्रातृपुत्रबन्ध्वपेक्षया तस्यास्त्रिगोत्रमध्यवर्त्तित्वात् । एवं मातु प्रपितामहदौहित्रीकन्याया मातामहभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाह प्रसज्येत स चायुक्तः । वरस्य मातामहापेक्षया तस्यास्त्रिगोत्रमध्यवर्त्तित्वात् । एव मातुः प्रमातामहदौहित्री कन्याया मातामहीभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाह प्रसज्येत स चायुक्तः । मातामहीभ्रातृपुत्रबन्ध्वपेक्षया तस्या स्त्रिगोत्रमध्यवर्त्तित्वात् । इति । एवं मातृसपत्नीभ्रातृसन्तति पितृमातृसगोत्रादयोऽप्यविवाह्याः ॥ ० ॥ असवर्णाया अविवाह्यत्व यथा । कश्चो असवर्णाया अविवाह्यत्वमाह उद्धन्नारदीय ।
"समुद्रयात्रास्वीकार कमण्डलुविधारण ।
द्विजानामसवर्णासु कन्यासूपयमस्तथा" ॥
इत्यादि । इत्युद्वाहतत्त्व ॥

अविवेक, पुं, (न विवेक । नञ्तत्पुरुष । नास्ति विवेको यस्य इति समासे वाच्यलिङ्गः ।) सदसद्विवेचनाराहित्य । यथा । 'देहात्मनोरविवेकादस्यैव शोको भवतीति तद्विवेकप्रदर्शनार्थं श्री भगवानुवाच अशोच्यानित्यादि" । इति श्रीमगवद्गीता २ अध्यायस्य ११ श्लोकटीका ॥ तद्वति त्रि । अविमृश्यकारी । यथा,—("सहसा विदधीत न क्रियामविवेक परमापदाम्पदम्" ॥ इति किरातार्ज्जुनीये ॥ सदसद्विवेकरहितः । यथा,—
"उत्तमोत्तममप्राप्यमविवेकोऽभिवाञ्छसि" । इति विष्णुपुराण ।)

अविवेकी, [न्] त्रि, (न विवेकी । नञ्तत्पुरुष । विवेकशून्य । अविवेचक । यथा । "तस्मादविवेकिन सुखमात्रलिप्सवो नात्राधिकारिणः") इति मुक्तिवादस्य गादाधरी टीका । अपि च ।
"यस्मिन् प्रसन्ने देवेन्द्रे परमं धाम लभ्यते ।
मयाविवेकिना तस्य हृदये जनिता व्यथा ॥
सर्व्वपापहरो विष्णुः स मया व्यथित कृतः" ।
इति पाद्मे क्रियायोगसारे ११ अध्याय ॥

अविवेचक, त्रि, (न विवेचक । नञ्तत्पुरुष ।) विवेचनारहित । अविवेकी । न विवेचक अविवेचक इति नञ्समासनिष्पन्न ॥

अविशेष, त्रि, (न विशेष । नञ्तत्पुरुष ।) विशेषरहित । अभेद । तुल्य । विशेषाभावे, पुं ॥ विशेषाभाव । यथा,—
"पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुव ।
अविशेषेण कर्त्तव्य विशेषान्नरकं व्रजेत्" ॥
इति श्राद्धतत्त्वं ॥ ("शब्दादिभिरविशिष्टानि तन्मात्राख्यानि सूक्ष्मभूतानि, तानि च इदमेतदेवगुणकमिति व्याहृततया नानुभूयन्ते इत्यविशेषाः सूक्ष्माश्चोच्यन्ते" । तथा च विष्णुपुराणे,—
"तस्मिंस्तस्मिंस्तु तन्मात्रास्तेन तन्मात्रता स्मृता ।
न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिण " ॥
इति ।)

अविश्रान्त, त्रि, विश्रामरहितः । विश्रान्तिशून्य । अनवरते, क्ली । विपूर्व्वश्रमधातो क्तप्रत्ययानन्तरं नञ्समासनिष्पन्न ॥ ("अविश्रान्तं पत्युर्गुणगणकथाम्रेडनजडा" ॥ इति आनन्दलहर्य्याम् ।)

अविश्राम, स्त्री, (नास्ति विश्रामो यस्मिन् इति ।) विश्रामराहित्य । यथा,—
"अविश्राम वहेत् भारं शीतोष्णञ्च न विन्दति ।
ससन्तोषस्तथा नित्य त्रीणि शिक्षेत गर्द्दभात्" ॥
इति चाणक्य ॥

अविश्वस्तः, त्रि, (न विश्वस्त । नञ्तत्पुरुष ।) विश्वासानर्हः । अकृतविश्वास । प्रत्ययायोग्य । यथा,—
"न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासात् भयमुत्पन्न मूलान्यपि निकृन्तति" ॥
इति चाणक्य ॥
("विश्वस्तवदविश्वस्ता वञ्चयन्तः पुरोचनम्" ।
इति भारते ॥)

अविश्वासा, स्त्री, (नास्ति विश्वासो यस्याम् सा ।) चिरप्रसूता गौ । केलेनगाइ इति भाषा । इति शब्दचन्द्रिका ॥

अविष, पुं, (अव + टिषच् ।) समुद्र । इति कातन्त्रीयोणादिवृत्तिः । (राजा । पृथिवी । स्वर्गः । रक्षकमात्रे त्रि ।) विषशून्ये त्रि ॥ (यथा,—
"इत्येवा अविषा व्याख्याता" ॥ इति सुश्रुते ॥)

अविषा, स्त्री, (नास्ति विष यस्याम् ।) निर्व्विषाख्यं । इति राजनिर्घण्टः ॥

अविषी, स्त्री, (अविष + ङीप् ।) नदी । इत्युणादिरत्नावल्युज्ज्वलदत्त ॥

अविसोढ़ं, क्ली, (अवेर्दुग्धम् । अवि + सोढ़च् ।) मेषदुग्धं । इति हेमचन्द्रः ॥

अविस्पष्टं, क्ली, (वि + स्पश + क्त । ततो नञ्समासः ।) अस्पष्टवाक्यं । तत्पर्य्याय । क्लिष्ट २ । इत्यमरः ॥
("नाविस्पष्टमधियीत न शूद्रजनसन्निधौ" ॥
इति मनुः ॥ अस्फुट । यथा,—
"विदृद्धि कम्पस्य प्रथयतितरां साध्वसवशादविस्पष्टा दृष्टि स्तिरयति पुनर्वाष्पसलिलं" ॥
इति रत्नावल्याम् ॥)

अवी, स्त्री (अवत्यात्मानं लज्जया। अव+ई।) ऋतुमती। इति हेमचन्द्रः।

अवीचि, पुं (नास्ति वीचिः प्रकाशः सुखं वा यत्र।) नरकविशेषः। इति शब्दरत्नावली। ("अवीचिमन्धतामिस्रं कुम्भीपाकं तथैव च। असिपत्रवनञ्चैव तापनञ्चैकविंशकम्"। इति मार्कण्डेये।) तापनिरूपणं नरकस्थाने।

अवीचि, पुं, (नास्ति वीचि सुखं यस्मिन्) } नरकवि-
अवीचिमत् क्ली, (अवीचि+मतुप्।) } शेषः। यथा। "वैतरणी पूयोद प्राणरोधो विश-
सनं लालाभक्षः सारमेयादनमवीचिरयःपान-
मिति। य स्विह वा असत्यं वदति साक्ष्ये द्रव्य-
विनिमये दाने वा कथञ्चित् स वै प्रेत्य नरके
अवीचिमत्यधःशिरा निरवकाशे योजनशतो-
च्छ्रायात् गिरिमूर्द्ध्नः सम्पात्यते। यत्र जलमिव
स्थलमश्मपृष्ठमवभासते अवीचिमत् तिलशो वि-
शीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो
निपतति"। इति श्रीभागवते पञ्चमस्कन्धे।

अवीचिमत्, पुं, (अवीचि+मतुप्।) नरकभेदः। "यः साक्ष्ये असत्यं वदति स विरतस्त्वेतीति अधः शिरा निपात्यते यत्र"। इति श्रीभाग-वते।

अवीर, त्रि, (नास्ति वीरो यस्य।) वीररहितः। निर्वीर्यः। इति मेदिनी।

अवीरा स्त्री, (नास्ति वीरः पत्यादिर्यस्याः।) पति-पुत्ररहिता। इति अमरः। निष्पतिसुता। स्वतन्त्रस्त्रैणी। अवीराया अन्नं दोषमावहति यथा —

"यो विप्रोऽवीराया अन्नं भुङ्क्तेऽज्ञानमोहितः। अवीरा यावद्दिनं भवेत् तावद्वर्षाणि स नरकम्"।
इति ब्रह्मवैवर्ते प्रकृतिखण्डे २१ अध्यायः।

अपि च।

"अवीराया यो भुङ्क्ते योषितोऽन्नं च मायया। असिपत्रादिविवर्जे च यातना भवेत् ध्रुवम्"।
इति च तत्रैव २९ अध्यायः। ॥ विष्णुः। अव-
प्रविष्टाज्ञानादिवर्णानि ब्राह्मणस्य वर्जयेत्। अवी-राया अन्नं वर्जयेत् इति प्रायश्चित्तविवेकः। ॥ वामनेनाप्यवीरा-
भोजनमपरत्र मनुः— [इत्यादि।
"नाश्नीयात् ... प्रेते च मातापितरि तथा"।
"अवीरैर्द्विजातीनां अन्नं सर्वथा वर्जितम्"
इत्यादिवचनात्।

ब्रह्म॰ "भर्तृसन्तानरहितायाः ... अन्नम्"।
"अन्ना ब्रह्मा वदेत् ब्रह्म देवी स्त्रियमुखेन"।
इति। अवीरा पतिपुत्ररहिता स्त्रियाम्नापिनी।
ब्रह्मचारिणां ... वर्णानाम् ... इति च प्रायश्चित्त-विवेकः। ॥ अथ अवीरायाः कर्त्तव्यं यथा वृद्धमनुः,—
"भर्त्री मृते तु विधवा या नारी ब्रह्मचारिणी। स्वर्गं गच्छेदपुत्रापि यथा ते ब्रह्मचारिणः।
सजातीयं पूर्वस्य ब्रह्मलोकं गच्छति"।

"अवीरायाः सम्पत्तमं कर्त्तव्यं तिथि"। यथा विष्णुः। "अपुत्रस्य धनं पत्न्यभिगामि तद-भावे दुहितृगामि। इत्यादि। तेन पत्नीप्र-भृतयो धनाधिकारिणः। यथा कात्यायनः।
"अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता। पत्न्येव दद्यात् तत्पिण्डं कृत्स्नमंशं लभेत च। भर्तुः तत्पत्नी दायमर्हति विधवा पतिव्रता। ब्राह्मणी च पति अपुत्रपरायणा पतिव्रता धनं ग्रहीतुमर्हति। ब्रह्मचर्यव्रतां स्थितां भर्त्तुः पिण्डदानादिकृत्यकारिणीम्।"
"भर्तुर्दायं मृते पत्यौ विन्यसेत् स्त्री यथेच्छया। विद्यमाने तु संरक्षेत् क्षपयेत् तत्कुलेऽन्यथा। अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता। सुतीभावनाय स्वामिनः संयमाध्याये तु"।
अपि च तथैव च।

"वाचोभगमाद्यमाणि पुत्राद्यमानाद्यमानि। विद्यमानेष्वपि हि पुत्रादि यथा मृते"। यथा वृद्धमनुः,—
"अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता। पत्न्येव दद्यात् तत्पिण्डं कृत्स्नमंशं लभेत च"।
अविभक्तधनाविभक्तं भर्त्तुः ... भर्त्तुः ... धनं तु नापत्न्या वरयेत् न तु सर्वमविभक्तम्। इति रत्नाकरः। ॥ अथा-
विभक्ताधिकारी यथा। इतरौरसपुत्रादि पत्नी। यथा च ब्रह्म।

"पितृ द्विजेन कर्तव्या पितृपिण्डोदकक्रिया। अपुत्रे तु पत्नी स्यात् तदभावे सहोदरः। तदभावे तु पत्न्यन्ये सर्वे कार्या यथेच्छ च। तदभावेऽत्र पुत्रा येन धनभाजे विशिष्यते"।
इत्यादि।

"अपुत्रा स्त्री यथा पुत्र ... परमपत्नी"।
"पिण्डं दद्यात् सवर्णेव सवर्णमपत्नी"।
इति निर्णये वसुबन्धेऽपि ...
... इति
। । अथ भर्तुविभक्तस्थावरे यथा स्मृतिः।
"पत्नी भर्तुर्धनहरी या स्यादव्यभिचारिणी। अविद्यमानेषु पुत्रेषु भर्तुः पिण्डप्रदा तु सा"।
अपि च सर्वं पत्नीसापत्नीमविभक्तमिति अपर परिभाषा। इति। ॥ अथवा ... धनं दत्तवति सवर्णस्य सर्वेषं न तु अपरम्।
यथा। ...
"पत्न्येव तु धर्मं ... स्त्रियाः।
इत्यस्य धनस्य ... ते"।
इति भवदेवभट्टस्य ...
विशेषात्। ...
"अविभक्तधनं भ्रात्रा ... न विन्दते।
इति कात्यायनवचनात्।
"यानि तत्रोपयोगानि भवन्ति ... च।
... रक्षेत् विधवा"।

इति शब्दार्थचिन्तामणिरितिनामधेयप्रतिष्ठितः ... । हेमचन्द्रोऽपि च ...
... नास्तोऽनुर्द्धाः। इति च शुद्धितत्त्वम्।

अवेक्षा, पुं (निर्+ईक्ष्। अवेः, न वेदा यस्य माता।) ... इति शब्दचन्द्रिका। सम्यक् निरीक्षणम्। अवेक्षते त्रि। (अवेक्षया। यथा,—
"अवेक्षेत गतीर्नॄणां कर्मदोषसमुद्भवाः। अवमानञ्च मानेन सर्वभूतेषु"।
इति मनुः।)

अवेल, पुं, (नास्ति वेला यस्य वा।) अपलापः। अव-ज्ञा। इति मेदिनी।

अवेला स्त्री, पुष्पविशेषः। इति मेदिनी। विलास-पुष्पा इति भाषा। अपराह्णः। इति वैद्यकनिघण्टुः। वैद्यशास्त्रे च।

अवेक्षणं क्ली, (अव+ईक्ष+ल्युट्।) अवेक्षा। दर्शनं। यथा। "कटाक्षेणापाङ्गदर्शनं च साक्षात् अवेक्षणं सर्वकार्यनाम्"। इति पञ्चतन्त्रम्। (यथाह।
"दूरादवेक्षणं हास्यं संभाषे सावहेलनम्। परोक्षेऽपि दुरुक्ताख्या सापत्न्यं विभावयन्"।
इति विद्यासागरः। अवधानम्। प्रतिपालनम्। अनुसन्धानम्। यथा,—
"नित्यं राज्ञा च सम्यक्त्वा निजाय
सर्वांसमाविश्यावेक्षणम्।"
इति रघुवंशे।)

अवेक्षा स्त्री, (अव+ईक्ष+अ+टाप्।) प्रत्य-वेक्षणम्। अवधानपूर्वकं। अवलोकनं। प्रतिपा-लनं २। इत्यमरः। (अवधानम्। अनुसन्धा-नम्। यथा,—
"अवश्यमिन्द्रियेन धर्मं नरेन्द्रैरवेक्ष्या। रक्षितं वर्द्धयेद्भ्रष्टं दद्यात् तत्त्वेन विधिवत्"।
इति मनुः।
("यदि रामस्य नावेक्षा त्वयि स्वात्मप्रयुक्तता"।
इति रामायणे।)

अवेक्षित त्रि (अव+ईक्ष+क्त।) दृष्टः। यथा मनुः।
"वैश्यशूद्रावपि प्राप्तौ कुटुम्बे ब्राह्मणः। अवेक्षितौ तौ समौ संरक्षेत्"।
प्रत्यवेक्षणम्। (अवधानम्। यथा, रघुवंशे। "न सशिष्टैरवेक्षितम्"।)

अवेद्य, त्रि, (न वेद्यं विदितुं शक्यं। अनुग्रहणम्।) विधानिरूप्यम्। विनिर्देश्यम्। विशिष्टार्थिनः।
("अवेद्यं परमं कुर्वन्ति राजन् प्रजेन तु मन्ये"।
इति स्मृतिः।)

अवोढ त्रि, (अव+वह+क्त।) ऊढः। इति हलायुधः।

अवोधा, त्रि, (नास्ति बोधो यस्य।) निर्बोधः। अज्ञानः।

अवोक्षणं, क्ली, (अव+उक्ष+ल्युट्।) प्रोक्षण-विशेषः। उत्तानेन पाणिना सेचनम्। यथा श्राद्धविवेकः।

"तस्मादद्भिरवोक्ष्यैतद्यादालभ्य एव च"।
अवोक्ष्य प्रोक्ष्य इति रत्नाकरः॥ नव्यवर्द्धमान-
धृतम्।
"उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतम्।
न्युब्जताभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतम्" ॥
इति शुद्धितत्त्वम् ॥

अब्द, पु, (अव+दन्॥ औणादिकोऽयं।) वत्सरः।
मेघः। मुस्ता। इति रायमुकुट सारसुन्दरी च॥
(मुस्तार्थे प्रयोगो यथा,—
"किराताब्दामृताविश्वचन्दनोदीच्यवत्सरैः।
शोथातिसारशमनं विशेषाज्ज्वरनाशनम्" ॥
इति वैद्यकचक्रपाणिसङ्ग्रहः॥)

अव्यक्तः, पु, (वि+अन्ज+क्त। ततो नञ्समासः।)
विष्णुः। शिवः। कन्दर्पः। इति मेदिनी। मूर्खः इति
हेमचन्द्रः। अस्फुटे त्रि॥)

अव्यक्तं, क्ली, प्रकृतिः। आत्मा। इति हेमचन्द्रः।
महदादि। परमात्मा। इति मेदिनी॥
("योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः।
सर्व्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ" ॥
इति मानवे॥
गणितादौ अज्ञातराश्यादिः। अदृश्यं। साङ्ख्यमते
सर्व्वकारणं रूपादिहीनतया चक्षुराद्यगोचरं
प्रधानं महदादि।
"महतः परमव्यक्तमव्यक्तात् पुरुषः परः"।
इति कठोपनिषद्॥
वेदान्तमते सूक्ष्मशरीरं स्वापावस्थायां शब्द-
प्रवृत्तिनिमित्तैर्जातिगुणक्रियासम्बन्धैर्व्वर्ज्जितं नि-
र्व्विकारं निराकारं ब्रह्म। परमात्मा, मायोपा-
धिकं ब्रह्म, सूक्ष्ममतीन्द्रियं लिङ्गग्राह्यं परब्रह्म।
यदुक्तम्,—
"अव्यक्तमिति विज्ञेयं लिङ्गग्राह्यमतीन्द्रियम्"।
रूपादिविहीनत्वेन चक्षुराद्यगोचरो योगाभ्या-
सावसेयो भावः।
"ब्राह्मं सरः कारणमाप्तवाचो
बुद्धेरिवाव्यक्तमुदाहरन्ति"। इति रघुवंशे॥
प्रकृतिः। तथा हि,—"यत् सर्व्वस्य जगतो
वीजभूतमव्याकृतमनामरूपमतत्त्वं सर्व्वकार्य्यकार-
णशक्तिसमाहाररूपं अव्यक्ताव्याकृताकाशादिना-
मवाच्यं परमात्मन्योतप्रोतभावेन समाश्रितं वट-
कणिकायामिव वटवृक्षशक्तिः। सत्त्वादिरूपेण
निरूप्यमाणे व्यक्तिरस्य नास्तीत्यव्यक्तम्"।
यदुक्तम्। "हेतुमदनित्यमव्यापि सक्रियमनेक-
माश्रितं लिङ्गम्। सावयवं परतन्त्रं व्यक्तं विप-
रीतमव्यक्तम्" ॥•॥ सर्व्वभूतानां कारणमकारणं
सत्त्वरजस्तमोलक्षणमरूपमखिलस्य जगतः स-
म्भवहेतुरव्यक्तं नाम। तदेकं बहूनां क्षेत्रज्ञाना-
मधिष्ठानं समुद्र इवोदकानां भावानां"॥ इति
सुश्रुतः॥
"अनादिं पुरुषो नित्यो विपरीतस्तु हेतुजः।
सदकारणवन्नित्यं दृष्टं हेतुमदन्यथा॥
सदेव भावादग्राह्यं नित्यत्वान्न कुतश्चन।
भावाज्ज्ञेयं तदव्यक्तमचिन्त्यं व्यक्तमन्यथा"॥ इति॥
"अव्यक्तमात्मा क्षेत्रज्ञः शाश्वतो विभुरव्ययः"।
इति च॥
"अतोऽन्यत् पुनरव्यक्तं लिङ्गग्राह्यमतीन्द्रियं"॥
इति च॥
"अव्यक्तमस्य क्षेत्रस्य क्षेत्रज्ञमृषयो विदुः"॥
इति च चरकः॥)

अव्यक्तरागः, पु, (न व्यक्तोऽल्पव्यक्तो रागोऽरुणिमा।)
ईषल्लोहितवर्णः। तत्पर्य्यायः। अरुणः २। इत्य-
मरः॥ ताम्रः ३ गौरः ४। इति जटाधरः॥

अव्यङ्गः, त्रि, (न सन्ति व्यङ्गानि यस्य।) व्यङ्ग-
रहितः। अविकलाङ्गः। यथा,—
"ततः आह्वय धर्म्मज्ञं ब्राह्मणं वेदपारगं।
अव्यङ्गावयवं पूज्य गन्धधूपार्चनादिभिः"॥
इति मत्स्यपुराणे ६६ अध्यायः॥

अव्यङ्गा, स्त्री, (अवेर्मेषस्य अङ्गं शृङ्गमिव अङ्गं
यस्याः।) शूकशिम्बी। इति केचित्॥ अमर-
कोषे अध्यण्डा इति तट्टीकायां अव्यण्डा इति
च पाठः॥ व्यङ्गरहिते अविकलाङ्गे च त्रि॥

अव्यङ्ग्यं, क्ली, (नास्ति व्यङ्ग्यालङ्कारो यस्मिन्।) व्यङ्ग्या-
लङ्काररहितकाव्यं॥ यथा,—
"सव्यङ्ग्यमुत्तमं काव्यमव्यङ्ग्यमधमं स्मृतं।
किञ्चिद्व्यङ्ग्यसमायुक्तं मध्यमं परिकीर्त्तितं"॥
इति काव्यचन्द्रिका॥

अव्यञ्जनः, पु, (नास्ति व्यञ्जनं श्मश्रुलक्षणं शृङ्गं यस्य।)
शृङ्गहीनपशुः। इति हलायुधः॥ अस्फुटे त्रि॥
(अनुद्भिन्नरजस्वलाचिह्ना कन्या। यथा,—
"असम्प्राप्तरजा गौरी प्राप्ते रजसि रोहिणी।
अव्यञ्जना भवेत् कन्या कुचहीना च नग्निका"॥
इति मत्स्यसूक्ते॥)

अव्यण्डा, स्त्री, (न विगतमण्डं वीजमस्याः।) अध्यण्डा
इति कुत्रचिदमरकोषे पाठः॥ आलकुशीति
भाषा।

अव्यथः, त्रि, (नास्ति व्यथा यस्य सः।) पीड़ारहितः।
व्यथाशून्यः। सर्पे पुं। इति मेदिनी॥

अव्यथा, स्त्री, (न व्यथा। नञ्तत्पुरुषः।) हरी-
तकी॥ पद्मचारिणी। इत्यमरः॥

अव्यथि, पु, अश्वः। सङ्ग्रामे न बिभ्यतीति अव्यथि।
व्यथ भयसञ्चलनयोः सर्व्वधातुभ्य इति इन्प्रत्ययः
ततो नञ्समासः। वेदप्रयोगोऽयं॥

अव्यथिषः, पुं, (न+व्यथ+टिषच्।) समुद्रः। सूर्य्यः।
इति सिद्धान्तकौमुद्या उणादिवृत्तिः॥

अव्यथिषी, स्त्री, (अव्यथिष+ङीप्।) पृथिवी।
अर्द्धरात्रः। इति सिद्धान्तकौमुदी॥

अव्यथ्य, त्रि, (न+व्यथ+क्यप्।) व्यथाशून्यः।
इति पाणिनिः॥

अव्ययं, क्ली, पु, (न+वि+इन्+अच्।) शब्द-
विशेषः। तत्परे विभक्तिर्न तिष्ठति अतएव लि-
ङ्गत्रयाविकृतं। तथाच कातन्त्रे,—
"सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु।
वचनेषु च सर्व्वेषु यन्न व्येति तदव्ययम्"॥
(क्ली, अनाद्यन्तं विकारशून्यं परब्रह्म। यथा,—
"अनणस्वनमङ्गस्वमदीर्घमजमव्ययम्।
अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत्"॥
इति आत्मबोधे॥)

अव्ययः, पु, (नास्ति व्ययो यस्य।) विष्णुः।
("नमस्कृत्य सुरेशाय विष्णवे प्रभविष्णवे।
पुरुषायाप्रमेयाय शाश्वतायाव्ययाय च"॥
इति मार्कण्डेयपुराणे॥) व्ययरहिते, त्रि। इति
मेदिनी॥ (अविनाशी। नित्यपुरुषः। यथा,—
"तमसः परमापदव्ययं पुरुषं योगसमाधिना
रघुः"॥ इति रघुवंशे।
"सूक्ष्माभ्यो मूर्त्तिमात्राभ्यः सम्भवत्यव्ययाद्ययम्"।
इति मानवे॥)

अव्यर्थः, त्रि, (न व्यर्थः। नञ्तत्पुरुषः।) अमोघः।
सफलः। यथा,—
"दुर्निवार्य्यञ्च दुर्द्धर्षमव्यर्थं वैरिघातकम्।
तेजसा चक्रतुल्यञ्च सर्व्वशस्त्रास्त्रघातकम्"॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १८ अध्यायः॥

अव्यवसायवान्, [त्] त्रि, (अव्यवसाय+मतुप्।
मस्य वः।) व्यवसायरहितः। अव्यवसायी।
तत्पर्य्यायः। शिक्षुः २। इति त्रिकाण्डशेषः॥
(अनुशीलनरहितः।)

अव्यवस्था, स्त्री, (वि+अव+स्था+अङ्। ततो
नञ्समासः।) अवसिद्धान्तः। अविधिः। शास्त्र-
विरुद्धव्यवस्था। इति नञ्समासनिष्पन्ना॥
(चञ्चले। यथा, कुमारे,
"स्थलारविन्दश्रियमव्यवस्था"॥)

अव्यवस्थितः, त्रि, (न व्यवस्थितः। नञ्समासः।)
नीतिशास्त्रादिव्यवस्थानभिज्ञः। सिद्धान्तरहितः।
यथा,—
"क्वचिद्रुष्टः क्वचित्तुष्टो रुष्टस्तुष्टः क्षणे क्षणे।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः"॥
इति हितोपदेशः॥

अव्यवहार्य्यं, त्रि, (वि+अव+हृ+ण्यत्। ततो नञ्-
समासः।) व्यवहारायोग्यः। अव्यवहरणीयः।
यथा। ज्ञानतश्चाण्डालान्त्यस्त्रीगमने तत्तुल्यतया
द्विगुणव्रताचरणे कृतेऽपि न व्यवहार्य्यः। यथा
याज्ञवल्क्यः।
"प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्।
कामतोऽव्यवहार्य्यस्तु वचनादिह जायते"॥
पापान्तरेऽप्यव्यवहार्य्यत्वं याज्ञवल्क्येनोक्तम्।
"शरणागतबालस्त्रीहिंसकान् संवसेन्न तु।
चीर्णव्रतानपि सदा कृतघ्नसहितानिमान्"॥
"अत्र च कामतो महापातकादिहत्यापकर्तु-
रव्यवहार्य्यत्वदर्शनात् कामतो महत्तरगुणयुक्त-
शरणागतादिहन्तृणामव्यवहार्य्यत्वं न तु हीनतर-
हन्तॄणां अन्यथा विषमशिष्टतापत्तिः स्यात्"।
इति प्रायश्चित्ततत्त्वम्॥

अव्यवहितं, त्रि, (वि+अव+धा+क्त। ततो नञ्-
तत्पुरुषः।) व्यवधानशून्यः। तत्पर्य्यायः। संसक्तः २
अपटान्तरः ३ अपदान्तरः ४। इत्यमरः॥ तट्टीका
च॥ लग्नः ५। इति शब्दरत्नावली॥ ("सिसा-
धयिषाविरहविशिष्टत्वयाव्यवहितोत्तरत्वयोत्प-
त्तिकानुमितिकभिन्नेति"। इति दीधितिः॥)

अव्यवहार्य, त्रि (न व्यवहार्यः। नञ्तत्पुरुषः।) व्यवहारानर्हः। इति मनूक्तप्रायश्चित्तम्।

अव्याज, पुं, (न व्याजः। नञ्समासः।) छलाभावः। यथा।

"दत्तं विप्रायाव्याजमनोऽहर्दं यत्
तदव्याजं प्राप्यते न इच्छति।
पुनः स मीतिस्तनयस्तथाऽऽरतः
प्रतीक्ष्य हेतुमविषयं यद्वदति"।

इत्यभिप्रायानुकूलाव्याजानी प्रस्तोऽपि।
प्रीति। यथा। "वैदग्धो यदि मातरमन्यस्य गर्भस्थाः पीडितस्थाने यदि विद्यते किं विरचते व्याज परिहासमिति। पूर्वे निमग्ने रति विश विधे प्रौढे यदा गच्छति न कारण परिचिन्तो महतो भवति तदा वद।" इत्युक्तम्।

अव्याप्य, त्रि (न व्याप्य। नञ्तत्पुरुषः।) अव्याप्यविषयं। व्यापितरहित। अव्यापीतं। यथा। "व्याप्ति व्याप्यव्यापकयोरेव व्यातिरिक्तेव्याप्यतया व्यापकव्याप्यत्वाभावेऽपि व्याप्यव्यापक-भावात्। व्याप्यविशेषेभावाभावादपरमिति"। इत्यव्याप्यादिप्रसङ्गमति। अपि च, "व्याप्यत्वेऽपि व्याप्तेर्विशेषणस्य इत्यादि"। इति भाषापरिच्छेदः।

अव्याप्यवृत्ति, त्रि (अव्याप्य वर्तते स्वाश्रयसमवाय वृत्तिर्यस्य।) विषयिवृत्तिरूपवृत्ति।
("अव्याप्यवृत्ति वर्तते विशेषगुण इत्यादि"।
इति भाषापरिच्छेदः।)
स्वसमानाधिकरणात्यन्ताभावप्रतियोगीति यावत्। ते विषयाभिन्नभेदेन च द्विविधः। तत्प्रभेदाः। सांयोगिक १। आत्मनो विशेषगुणाः। बुद्धि १ सुखं २ दुःखं ३ इच्छा ४ द्वेष ५ यत्न ६ धर्मो ७ अधर्मो ८ भावना ९ संस्कारः १० शब्दः ११ विभागश्च १२। एते सर्वे अव्याप्यवृत्तयः स्युः। इति भाषापरिच्छेदः।

अव्याहत, त्रि, (न व्याहतम्। नञ्तत्पुरुषः।) व्याघातशून्यं। यथा।
"यस्य विद्यावनत्वं व्याहत्य वार्थं यथा।
वेदि विद्यासविद्या च ताभ्यो भवतामिति"।
इति ब्रह्मपुराणे। किञ्च। विष्णुपुराणम्।
"यत्र यत्र ये भूपेन्द्राः सम्यक् नियम्य च।
मनोऽपि यद् परिपक्वो मनोऽव्याहतं सुखम्।
सावधानमनास्तस्मात् धर्मात्मने तथा।
धर्मं सुविमल कर्म मनोऽव्याहतं सुखम्"।
इत्यादिविधानाव्याहतम्। (अकुण्ठितं। यथा —
"वेदशास्त्रार्थविज्ञाने वेदाव्याहता मतिः"।
इति मार्कण्डेयपुराणे।)

अव्याहृत, त्रि अकथितः। न व्याहृतः अव्याहृत नञ्समासनिष्पन्नः।

अश ऊ उ ञ न (स्वादिं-आत्मं-सकं-वेट्।) व्याप्तौ। संहतौ। ऊ ञ अशित्वा अष्ट्वा। न अश्नुते। अंशयति अस्तुः। इति दुर्गादासः।
("अश्नाति अशनाय सर्वमाम्नायमश्नुते"।
इति शब्दरत्नावली।)

अश म (क्र्यादिं परं-सकं सेट्।) भोजने। अश्नाति। दुर्गादासः। इति दुर्गादासः।

अशकुम्भी, स्त्री, (अशा बर्हिषं कुम्भानि व्याप्नोति इति। अश+कुम्भ+ड+पृषोदरादित्वं।) जलपिप्पली। इति रत्नमाला। पाना इति भाषा।

अशक्य, त्रि (न शक्यम्। नञ्तत्पुरुषः।) अशक्य शीर्षं। असाध्यं। यथा। "अशक्ये अवश्यता समर्थना"। इति मुग्धबोधव्याकरणम्।

अशक्त, त्रि, (न शक्तः। नञ्तत्पुरुषः।) शक्तिरहितं। असमर्थः यथा। मनुः।
"निमन्त्रयेच्छक्तः सन्नेव श्लोको ब्राह्मणः यथा विधि।
भाषायामः पठितो या ब्राह्मणो वा बुधो विधिः"।
इति याज्ञवल्क्यम्।
"अस्वाध्यायास्वप्नगर्भा मद्यं लोकविभिन्नवेदे"।
इति शिक्षारत्नम्।

अशङ्कु, पुं (न+शम्+कु। नञ्तत्पुरुषः।) बलः। इति शब्दचन्द्रिका। शङ्कुरहिते त्रिषे च त्रि।

अशनं, क्ली, (अश+ल्युट्।) भक्षणं। भक्षः। इति हेमचन्द्रः। ("धीरं निर्मरयति दानमशनं भाषाः प्रशाखा प्रकाश। इति भावाख्ये।
"विविधमिष्टचारो पथिरिति रक्षारक्षिणि।
मनोर्थं तपि भावार्थं भवप्रमाणं विद्धे"।
इति उज्ज्वला।)

अशनः, पुं, असनवृक्षः। पीतशालकः। इति रायमुकुटः। (अशनशब्देऽस्य विशेषो ज्ञातव्यः।)

अशनपर्णी, स्त्री, (अशनस्य असनवृक्षस्येव पर्णं यस्य सर्वपर्णमस्याः।) लताविशेषः। तत्पर्यायः। शातला २ शीतला ३ शीतिवल्लरिका ४ अशन-पर्णी ५ शणपर्णी ६ तपस्वी ७ शीता शीतलका ८ अपराजिता ९। मारादी इति भाषा। इति शब्दरत्नावली।

अशनाया स्त्री, (अशन+क्यच्।) भोजनेच्छा। क्षुधा। इत्यमरः।
("अशनायाः अशनाया निरस्तौ दानादिमार्गाः"।
इति ब्रह्मवैवर्त्ते। "बुभुक्षायाः अशनाया भवति क्षुधा"। इति श्रुतिः।)

अशनायित, त्रि (अशनाय+क्त। अशनस्य भोजनेच्छा जाता अस्य इति इतच् वा।) क्षुधितं। इत्यमरः।

अशनिः, पुं, स्त्री, (अश्नाति अश्नुते व्याप्नोति। अश+अनि।) वज्रं। इत्यमरः। विद्युत्।
("अशनिः कल्पस्तमसिसुप्रमिव वज्रिकर एव देवता" इति रघुवंशे।)

अशब्द [द्,] क्ली, (न शब्दः। नञ्समासः। नास्ति शब्दो यस्मिन् इति बहुव्रीहौ सत्यपि।) ब्रह्म। दुर्गः।
("स्पर्शमदृश्यं वदत्सनं तथा
विज्ञानविदो ज्ञानमिव जगरे।"
इति भारविः।) शब्दरहिते त्रि। इति मेदिनी।

अशाखा स्त्री, (नास्ति शाखा यस्याः।) गुण्डितृणं। इति राजनिर्घण्टः।

अशितं त्रि (अश+क्त।) भुक्तं। खादितं। भक्षितं। इति हेमचन्द्रः।
("अस्य इव सदशितं भवन्ते"।
"वैनोदुभित्व भेदा विधीयते"।
इति च शब्दरत्नावली अभिधानम्।
"अशितं मात्रया काले यथा शक्ति भवति सुखं"।
इति चरकः। "यावत् ह्यस्याशनमशितमनुपहत्य प्रकृतिं यथाकालं जरां गच्छति तावदस्य मात्रा प्रमाणं वेदितव्यं भवति"। इति चरकश्च।)

अशितङ्गवीनं त्रि, (अशिताः भोजिता गावो यत्र। अशितगो+ख+निपातनात् मुमागमः।) गवा-शितङ्गवीनं। पूर्वमध्याधिकरणविशेषणादि। इत्यम-रटीकायां भरतः।

अशित्र, त्रि, (अश+इत्र।) भोक्ता। इत्यमरटीका। (भक्ष।)

अशिरं क्ली, (अश+इरन्।) हीरकं। इति राजनिर्घण्टः। (हीरकशब्देऽस्य विशेषो ज्ञेयः।)

अशिरः, पुं, (अश भोजने+इरन्।) अग्निः। राक्षसः। सूर्यः। इति मेदिनी।

अशिरा स्त्री, अशिरसाधनवी। इक्षुमादिदोषः।

अशिश्विका, स्त्री, (अशिश्वी+स्वार्थे कन्।) अपत्या। अपत्यपतिविहीना स्त्री। इति शब्दरत्नावली। बाँझ्जुड़ी इति भाषा।

अशिश्वी, स्त्री, (नास्ति शिशुर्यस्याः इति। निपातनात् ङीष्।) अशिश्विका। इत्यमरः।

अशिक्षित त्रि, (न शिक्षितं। नञ्समासः।) शि-क्षारहितं। अविदग्धं। अनभिज्ञः। यथा। "यत् सारथिरपरीक्षणात् असमर्थका गच्छति यत् विद्यार्थ्यशिक्षितसारथिनियोगात् स्वामी वि-घ्न एवं राजा स्यात्"। इति प्रकृत्यनुकूलता-स्यात्। इति मार्कण्डेयपुराणं।

अशीन, त्रि, (न शीनः। नञ्तत्पुरुषः।) क्षीणा-भावकः। यथा,—
"अशीनावस्थतो भावे प्राप्नुते महापदियौ।
येषां कश्मला सर्वे दैवादि परात्परौ"।
इति स्मृतिः।

अशीतिः, स्त्री, (अष्टौ दशतः परिमाणमस्य। दशति-शब्दस्याशीतिः निपातनात् साधुरेषोऽशीतिरादेश-स्वरश्च।) संख्याविशेषः। ८० आशी इति भाषा। यथा मनुः,—
"अशीतिभागं गृह्णीयात्
मासात् वार्द्धुषिकः शतम्।
द्विकं शतं वा गृह्णीयात्
सतां धर्ममनुस्मरन्"।
इत्यादिव्याख्यातम्। अपि च।
"अशीतिवर्षस्य भवेत् वाचो सम्पूर्णयोवनः।
मार्गवित्तारणेऽपि विज्ञो धीरिव वय च"।
इति मार्कण्डेयपुराणम्।

अशुचि, त्रि, (न शुचिः। नञ्तत्पुरुषः।) अपवित्रं। अशुद्धौवं। अपवित्रं। यथा। मनुः,—

"तत श्राद्धमशुद्धो तु कुर्य्यादेकादशे तथा ।
कर्त्तुस्तात्कालिकी शुद्धिरशुद्ध पुनरेव स" ॥
इति ।
"शुद्धा भर्त्तुश्चतुर्थेऽह्नि अशुद्धा दैवपैत्रयो ।
दैवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुद्ध्यति" ॥
इति च शुद्धितत्त्व ॥ (वर्णाद्यशुद्धियुक्त ।)

अशुभ, क्ली, (न शुभम् । नञ्तत्पुरुष । नास्ति शुभ यस्येति समासे वाच्यलिङ्ग एव ।) पाप । इति हेमचन्द्र ॥ अमङ्गल । ("न च किञ्चिदुवाचैन शुभ वा यदि वाशुभम्" । मा च वोऽस्त्वशुभ किञ्चित्सर्व्वथा पाण्डुनन्दना' ॥ इति च भारते ॥) तद्युक्ते त्रि । यथा,—
"सर्व्वाशुभाना परिमोक्षकारि
सम्पूजन देववरस्य विष्णो" ।
इति ज्योतिस्तत्त्व ॥ अपि च । मदनपारिजातधृत ।
"अशुभ खञ्जन दृष्ट्वा देवब्राह्मणपूजन ।
दान कुर्व्वीत कुर्य्याच्च स्नान सर्व्वौषधीजलै" ॥
इति तिथ्यादितत्त्व ॥

अशून्यशयनव्रत, क्ली, (न शून्य शयन यस्मात्, तत् व्रतम् ।) श्रावणकृष्णद्वितीयाकर्त्तव्यव्रतविशेष । यथा,—
"ब्रह्मोवाच ।
भगवन् ! पुरुषस्येह स्त्रियाश्च विरहादिक ।
शोक व्याधि भय दु:ख न भवेद्येन तद्वद ॥
भगवानुवाच ।
श्रावणस्य द्वितीयाया कृष्णाया मधुसूदनः ।
क्षीरार्णवे सलक्ष्मीक सदा वसति केशव ॥
तस्यां सपूज्य गोविन्दं सर्व्वान् कामान् समश्नुते ।
गो-भू-हिरण्य-दानादि सप्तकल्पशतानुग ॥
अशून्यशयना नाम द्वितीया या प्रकीर्त्तिता ।
तस्या सम्पूजयेद्विष्णुमेभिर्म्मन्त्रैर्व्विधानत ॥
श्रीवत्सधारिन् श्रीकान्त श्रीधाम श्रीपतेऽव्यय ।
गार्हस्थ्य मा प्रणाश मे यातु धर्म्मार्थकामद ॥
अग्नयो मा प्रणश्यन्तु देवताः पुरुषोत्तम ।
पितरो मा प्रणश्यन्तु मत्तो दाम्पत्यभेदतः ॥
लक्ष्म्या वियुज्यते देवो न कदाचित् यथा भवान् ।
तथा कलत्रसम्बन्धो देव मा मे वियुज्यतु ॥
लक्ष्म्या न शून्यं वरद यथा ते शयन सदा ।
शय्या ममाप्यशून्यास्तु तथैव मधुसूदन ॥
गीतवादित्रनिर्घोष देवस्याग्रे तु कारयेत् ।
घण्टा भवेदशक्तस्य सर्व्ववाद्यमयी यतः ॥
एव सम्पूज्य गोविन्दमश्नीयात्तैलवर्ज्जित ।
नक्तमक्षारलवणं यावत्तत्स्याच्चतुष्टय ॥
तत प्रभाते संजाते लक्ष्मीपतिसमन्विता ।
दीपान्नभाजनैर्युक्ता शय्या दद्याद्विचक्षणः ॥
पादुकोपानहच्छत्रचामरासनसयुता ।
अभीष्टोपस्करैर्युक्तां शुक्लपुष्पाम्बरावृतां ॥
सोपधानकविश्रामां फलैर्नानाविधैर्युता ।
तथाभरणधान्यैश्च यथाशक्त्या समन्विता ॥
अव्यङ्गाङ्गाय विप्राय वैष्णवाय कुटुम्बिने ।
दातव्या वेदविदुषे न बकव्रतिने क्वचित् ॥
तत्रोपवेश्य दाम्पत्यमलङ्कृत्य विधानत ।
पत्न्यास्तु भाजन दद्यात् भक्ष्यभोज्यसमन्वित ।
ब्राह्मणस्यापि सौवर्णीमुपस्करसमन्विता ।
प्रतिमा देवदेवस्य सोदकुम्भा निवेदयेत् ॥
एव यस्तु पुमान् कुर्य्यादशून्यशयन हरे ।
वित्तशाठ्येन रहितो नारायणपरायण ॥
न तस्य पत्न्या विरह कदाचिदपि जायते ।
नारी चाविधवा ब्रह्मन् यावच्चन्द्रार्कतारक ॥
न विरूप न शोकार्त्त दाम्पत्य जायते क्वचित् ।
न पुत्त्रपशुरत्नानि क्षय यान्ति पितामह ॥
सप्तकल्पसहस्राणि सप्तकल्पशतानि च ।
कुर्व्वन्नशून्यशयन विष्णुलोके महीयते" ॥
इति मत्स्यपुराणे अशून्यशयनव्रत ६७ अध्याय ॥

अशृत, त्रि, (न शृतम् । नञ्तत्पुरुष ।) अपक्व । इति रत्नमाला ॥
"तण्डुलात् षोडशगुणे शृते वाप्यशृते तथा ।
तोये पेयां पचेत्तावद्यावत् सिक्थकनिर्गम" ॥
इति वैद्यकपरिभाषा ॥

अशेष, त्रि, (नास्ति शेषो यस्येति ।) शेषरहित । नि:शेष ॥ सर्व्व । इत्यमर ॥
("स्नान प्राप्स्याम्यशेषाणा जगतामपि पूजितम्" ॥
"अहिंसादिष्वशेषेषु गुणेषु गुणिना वर" ॥
इति च विष्णुपुराणम् ॥ अशेषेण । यथा,—
"अथ विवादेन यथा श्रुतस्तथा
तथाविधस्तावदशेषमस्तु स" ।
इति कुमारे ।
"वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतय" ॥
इति गीतायाम् ॥)

अशोक, क्ली, पारद । इति मेदिनी ॥ शोकरहिते त्रि ॥

अशोक:, पु, (नास्ति शोको यस्मात् ।) स्वनामख्यातपुष्पवृक्षविशेष । तत्पर्य्याय । शोकनाश २ विशोकः ३ वञ्जुलद्रुम ४ वञ्जुल ५ मधुपुष्पः ६ अपशोक ७ कङ्केलि ८ केलिक ९ रक्तपल्लव १० चित्रः ११ विचित्र १२ कर्णपूर १३ सुभग १४ दोहली १५ ताम्रपल्लव १६ रोगितरु १७ हेमपुष्प १८ रामा १९ वामाङ्घ्रिघातन २० पिण्डीपुष्प २१ नट २२ पल्लवद्रु २३ । अस्य गुणा शीतलत्व । हृद्यत्व । पित्तदाहश्रमापहत्व । गुल्मशूलोदराध्माननाशित्व । कृमिकारकत्वञ्च । इति राजनिर्घण्ट ॥ अस्य पर्य्यायगुणा ।
"अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लव ।
कङ्केलि पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥
अशोक शीतलस्तिक्तो ग्राही वर्ण्य कषायक ।
दोषापचीतृषादाहकृमिशोषविषास्रजित्" ॥
इति भावप्रकाश ॥
अस्य कलिकाभक्षणविधिरशोकाष्टमीशब्दे द्रष्टव्य ॥ (योषिता सनूपुरचरणप्रहारेण अशोकाना पुष्पोद्गमो भवतीति कविसमयप्रसिद्धि । यदुक्तम् ।
"पादाघातादशोक विकसति वकुल योषितामास्यमद्यै" । इति साहित्यदर्पणे । अपरञ्च ।
"पादाहत' प्रमदया विकसत्यशोक
शोक जहाति वकुलो मुखशीधुसिक्त" ।
अपरञ्च ।
"सनूपुररवेण स्त्रीचरणेनाभिताडनम् ।
दोहद यदशोकस्य तत पुष्पोद्गमो भवेत्" ॥
कुमारसम्भवे ऽपि ।
"असूत सद्य कुसुमान्यशोक" । इति ॥
"कुसुम कृतदोहदस्त्वया
यदशोकोऽयमुदीरयिष्यति" ।
इति रघुवंशे ।
"अशोकवल्कलक्वाथ शृत दुग्ध सुशीतल ।
यथाबल पिबेत्प्रातस्तीव्रासृग्दरनाशन' ॥"
इति वैद्यकचक्रपाणिसंग्रह ॥
अशोकवल्कलप्रस्थ तोयाढके विपाचित ।
तेन पादावशेषेण जीरकेण तथैव च ॥
घृतप्रस्थ पचेदेतत्प्रक्षिप्य च तथापर ।
तण्डुलाम्बुन्यजाक्षीर प्रस्थ प्रस्थ पृथक् पृथक् ॥
केशराजरसस्यापि प्रस्थमेक भिषग्वर ।
जीवनीयै पियालैश्च परूषसरलाञ्जनै ॥
यष्ट्याह्वाशोकमूलञ्च मृद्वीका च शतावरी ।
तण्डुलीयकमूलञ्च कल्कैरेतै पलार्द्धकै ॥
शर्करायाः पलान्यष्टौ गर्भदत्त्वानुचूर्णित ।
पुष्यायोगेन तत्पीत निहन्यात् सर्व्वदोषज ॥
श्वेत कृष्ण तथा नील प्रदर हन्ति दुस्तर ।
कुक्षिशूल योनिशूल पृष्ठशूलञ्च दारुण ॥
मन्दाग्निमरुचि पाण्डु कृशता श्वासकासिना ।
अशोकघृतमेतत्तु विख्यात स्त्रीगदेषु च' ॥ * ॥
अशोकघृत ॥ * ॥
इति वैद्यकस्वेष्टमालिकायां ॥)

अशोक, त्रि, (नास्ति शोको यस्येति वाच्यलिङ्ग ।) शोकरहित । यथा,
"त्वामशोक हराभीष्ट मधुमाससमुद्भव ।
पिबामि शोकसन्तप्तो मामशोक सदा कुरु' ॥
इति तिथ्यादितत्त्व ॥ (स्वनामख्यातो दशरथस्य मन्त्री । उक्त रामायणे ।
"धृष्टिर्जयन्तो विजयः सिद्धार्थोऽप्यर्थसाधक ।
अशोको धर्म्मपालश्च सुमन्त्रश्चाष्टमोऽभवत्" ॥
स्वनामख्यातो नृपतिश्च, यथा भारते ।
"अशोको नाम राजाभून्महावीर्य्योऽपराजित ।
तस्मादवरजो यस्तु राजन्नश्वपति स्मृतः" ॥

अशोकरोहिणी, स्त्री, (अशोकइव रोहतीति । अशोक + रुह + णिनि + ङीप् ।) कटुरोहिणी । इत्यमर ॥ कटकीति भाषा । ("अशोकरोहिणी-वैजयन्ती-सुवर्चला पुनर्नवा-वृश्चिकाली ज्योतिष्मती-प्रभृतीनि समासेन तिक्तो वर्ग:" ।
इति सुश्रुते ॥)

अशोकषष्ठी, स्त्री, (अशोका शोकादिरहिता या षष्ठी ।) चैत्रस्य शुक्ला षष्ठी । तस्या षष्ठीपूजा यथा,
"चैत्रे मास्यसिते पक्षे षष्ठ्या षष्ठीं समर्च्चयेत् ।
सुखाय पुत्त्रलाभाय शुक्लपक्षे तथैव च" ॥
इत्युत्तरकामाख्यातन्त्रे ११ पटल ॥०॥
"प्रसूत्या द्वादशे मासि सम्पूज्यापत्यरक्षये ।

द्वे मासे यथा यष्टा षष्ठी दारकर्पिकी ।
पैठवे भाद्रपदी षष्ठी ज्येष्ठे चारण्यषष्ठिका ।
आषाढ़े कार्दमी सेना श्रावणे लुण्ठनी मता ।
भाद्रे चपेटी विज्ञेया दुर्गाकारावली तथा ।
नापाख्या कार्त्तिके मासि मार्गे मूलकवर्त्तिकी ।
पौषे भाद्रपदा च शीतला सर्पषष्ठी मता ।
शोकषष्ठी माघमासे च चैत्रेऽशोका प्रकीर्त्तिता" ।
इति स्कन्दपुराणम् ।

अशोका, स्त्री, (न विद्यते शोको दुःखं यस्याम् ।) कटुकी । इत्यमरः । कटुका आवन्तीदेशभेदः । इति हेमचन्द्रः ।

अशोकारिः, पुं (अशोकस्य अरिः ।) कदम्बवृक्षः । इति शब्दचन्द्रिका ।

अशोकाष्टमी, स्त्री, (न विद्यते शोको यस्यां सा । तत्सम्भूता अष्टमी ।) चैत्रमासीयशुक्लाष्टमी । अ- शोककलिकाप्राशनपूर्वकतत्तत्स्नानव्रतकर्त्तव्यम् । यथा तिथ्यादितत्त्वे ।
"चैत्रे मासि शुक्लपक्षे अशोकाख्या तथाष्टमी ।
पिबेदशोककलिका चाष्टाशीतिवारिणि" ।
अशोककलिकाप्राशनाद्विधिमाचेऽपि सप्तार्थ । वचनं अन्यविधानात् शोकादिविशमवचनाच । चौर्य्यादिरिति वचनमालाकरकाले । तस्मिंस्तु बौद्धे तु तथाविधं । तत्र विद्युद्वदलाभो ।
"अशोककलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ ।
चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयः" ।
मन्त्रमपि ।
"त्वामशोक हराभीष्ट मधुमाससमुद्भव ।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु" ।
कौम्भिकस्तुभ्यमपेऽपि मास्यवनात् । अर्थ मत्स्य- पुराणम् । कौमदे अष्टोऽपि नास्ति विशेषे- इति शिवत्वे । पौषियकपुत्त यवमासंप्रसादादि- मानवन्दो मन्त्रविशेषमपप्यत् । इति तिथ्यादि तत्त्वं ॥ * ॥ अपि च । अत्र चोदेयक्ते अन्वरे पुनर्वसुनक्षत्रसंयोगाभावे मासंप्रसवात्मकत्व नक्षत्रमासीकाल प्राप्यात् । प्रमाणे तु वर्ष- मासपक्षमुख्यत्वाकर्मकालव्याप्तिकानां त्व- सात् । अत्र विशेषवचनं विचाय ।
* तदुक्तम् मन्त्रमाह वाल्मीको कृतपस्य ।
अशोकारूपेवस्तु कर्म बौद्धिक वे परे" ।
इति वचिता मानात् ।
अशनुकाभ्यां तद्रमचवचनम् । तदभाव- प्रवत्तकादिभ्यां एतत्संयुक्ताद्वैतवाक्यां वा गुरुः । तत्र शाकटिकस्वभाव अशोकपोषणिका अपि विनापि इति वाक्य,—
"त्वामशोक हराभीष्ट मधुमाससमुद्भव ।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु" ।
इति मन्त्रेण विष्णुप्रसादमनविना अशोक- कलिका अष्टौ पिबेत् । कौम्भिकमुखीवेरपि अन्य-दर्शनेन शौचाविकत्वात् । कौम्भिकविहितो नास्ति कलशाद अवशेषाचैवमसात् । इति तत्त्वार्थ ।

अशोच्य, त्रि, (शोक । शोचनमर्हम् ।) शोकानर्हः । अनुशोचनीयः । इति शिवाकृतिः ।

अशौच, त्रि, (शुच् + कर्म्मणि घ्यत् । ततो नञ्स- मासः ।) शोकायोग्यः । अशोचनीयः । यथा,—
"अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः" ॥
इति श्रीभगवद्गीतायां २ अध्याये ११ श्लोकः ।
(तथा च भारते,—
"अशोच्यो निर्धनः प्राज्ञोऽशोच्यः पण्डितबान्धवः ।
अशोच्या विधवा नारी पुत्रपौत्रप्रतिष्ठिता")

अशौचं, क्ली, (शुचेः पवित्रस्य भावः शौचं ततो नञ्- तत्पुरुषः) शुचिभावाभावः । अशुद्धिः तु । वैदिककर्म्मा- नर्हत्वप्रयोजककालविशेषः । यथा । वैदि- ककर्म्मानर्हत्वप्रयोजकमशुचिविशेषरूपमशौचं । वैदिककर्म्मानर्हत्वप्रयोजककालरूपं शौचं । न चाशौचाभाव एव शुचित्वं कालविशेष इति वाच्यं । अशौचाभावस्य स्वशौचेऽपि नश्वरत्वात् एकैकाशौचाभावे शौचे पापकर्म्मानवकाशप्रसङ्गात् अशौचपदस्य यथाश्रुतार्थत्वम् । यथा,—
"दैवाच्च पितृकार्य्याद्युक्ते जाते विपन्नता ।
आशौचं तस्मादधिकं शुद्धं सकलं कर्म्म तत्" ।
इत्यादिवचनात्संयोगे शौचे तत्परतर्कात् शौचमाने अनन्यता प्रतीयते । इति शुद्धि- तत्त्वं ॥ * ॥ अश्रद्धमृतस्य अशौचं यथा,—
"अस्मिन् दैवालम्ब पाकविशेषवर्णं सर्वं ।
दशाहकं विरात्रन्तु अतएव तुतौ तथा ।
अथ गोत्राणामतो अधस्त्रिरपि विरात्रके ।
दैवीपाणुपासाभ्यां काञ्चनं विनियते यथा ।
स्नात्वा प्रतिपुच्छं तेन दैवस्ताणो यथा तथा ।
अस्थिपूते चैवमाचं तुर्य्ये तिथ्ये तथैव च ॥"
इति ब्रह्मवैवर्त्ते मदनमर्दे ११ अध्याय । अपि च ।
"मुण्डमपत्ये चैव षष्ठाकि ह्यनवरात्रौ" ।
इति विवादमर्थम् ॥ * ॥ अन्यद् मूर्खविधिस्त्वं । विविधवर्ण्याविद्याभूय्यर्थमेव । तत्तेभ्योऽपि तत् मुक्तिमार्गोपायाशौचानि कथ्यन्ते ।

अथ सपिण्डाशौचं १ ।
जनने मरणे च ब्राह्मणादिवर्णानां सम्पूर्णाशौचं । अथ विप्रस्य दशाहः क्षत्रियस्य द्वादशाहः । वैश्यस्य पञ्चदशाहः । शूद्रस्य मासः (यथाह मनुः ।
"शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति" ।)
जनने मरणे च दशाहादिपञ्चदशाहान्तं सर्व्वेषां वर्णानां मासः । चतुर्थ्यादिदशमाह्न्यन्तं पक्षिणी ।
जनन मरणे च सपिण्डानां निर्गुणानां सर्व्ववर्णानामेकाहः । अन्यगोत्रसप्तपुरुषाणां च भागमार्गं । अशौचं प्रति सम्पूर्णं निरूपयितुं वाचिकं । मामा- महमरणे सर्व्वेषां वर्णानां त्रिरात्रं ।
मातामहीपितृष्वसृ मातृष्वसृ-मातुल-पितृव्य-मरणे सर्व्ववर्णानां पक्षिणी ।
पितामहपक्षिणीपुत्र–पितामहीपक्षिणीपुत्र–पि- तामहीभ्रातृपुत्रक-पितामहात्मजमरणे सर्व्व- वर्णानां पक्षिणी ।
मातामहपक्षिणीपुत्र-मातामहीपक्षिणीपुत्र-मा- तामहीभ्रातृपुत्रक-मातामहात्मजमरणे सर्व्व- वर्णानामशौचं ।
अन्यसमानोदकभिन्नमरणे सर्व्ववर्णानामशौ- चम् ।
पौरजनविरिविशुद्धमाममरणेऽशौचपूर्व्ववाक्य- प्रमाणमरणेन सर्व्ववर्णानां त्रिरात्रं ।
आचार्य्यमरणे आचार्य्यादिसर्व्वपत्नी त्रिरात्र । अमातपसीमिभूदमाशीतबन्धवान्तर-अमरोम अपस्मारमरणे सर्व्वेषां त्रिरात्रं । शीतस्पर्शोत्पन्न- मरणे तु नाशौचं ।
भगिनीपुत्रमरणे मातृसपत्नीपुत्रमरणे पितृ- सपत्नी पितृष्वसृपुत्रे मातुलपुत्रक भागिनेयमरणे अनूढभ्रातुर्भगिनीमरणे भगिनीपुत्रादिपुत्री त्रि- रात्रं ।
अनूढकन्ययोः वाग्दत्तमरणे सर्व्ववर्णानां त्रि- रात्रं । अनूढकन्ययोरिषमानखितयोर्मरणे स- र्व्वेषां पक्षिणी ।
अनूढकन्ययोर्विवाहमरणे सर्व्वेषामशौचं ।
भगिनी-मातुलानी मातुल-पितृव्य-मातृष्वसृ दुर्हित्-मातामही-मरणे सर्व्वेषां पक्षिणी ।
आचार्य्यपत्नीपुत्रपौत्रयाज्यमातृ मातृमातावद ग्रामस्य च सहाध्यायिनः शिष्यस्य च मरणे सर्व्व वर्णानामशौचम् । मातृसपत्नी-पितृसपत्नी- मातुलपत्नीपुत्रशालकमरणे सर्व्ववर्णानां पक्षिणी ।
(तथा च मनुः—
"मातुले पक्षिणीं रात्रिं शिष्यर्त्त्विग्बान्धवेषु च" ।
अयमत्रश्लोकः देवैव अभिप्रेता इत्यवधि- वाप्नमानिका यथावेतापि अभिप्रेता अतो एतयोरेकाहमपि प्रथमदर्शनोर्दिनमपि त्रिरात्र । अस्थिज्ञानामेकरात्रं । वाद्विज- पितुर्मरणे अथाविवाहस्वोरपि त्रिरात्रं । अथा- विवाहयोः परस्परमानमरणयोरेकमात्रा- शौचं ।
दौहित्रमरणे सर्व्वेषां वर्णानां पक्षिणी ।
विवाहमरणे ऊढ़ानां कन्यानां त्रिरात्रं । अपि मातुलमातामहविधवसपत्नीनां एकाहमपि कुर्य्यादि यदा सर्व्वेषां वर्णानां त्रिरात्रं ।
मातामहादीनां विरात्राबधि मरणमात्रे अधैकाह सुचि । अन्यान्येतरमरणे तु नाशौचं । विस्तारदरात् नामोक्ता ।

अथ नालाशौचं २ ।
एकमातृकिसम्बन्धमरणे मातृसम्बन्धाशौचानन्तरे मर णे मातामहीयोऽष्टमकं यद्यपि तथापि अपत्या- ऽशौचं । जातिमात्राशौचं नास्ति ।
नवमासीयादिमातृकयोः कन्याकृतयोः विवा- हितकन्याः मातुल अपत्याशौचं । अथ अत्र मासे दशाहं सततं भवति । एतद्यद्यपि विष्णु- वचनं प्रमाणं । एतदनुसारतः एव व्यव- स्थाः ।
(तथाच मनुः —
"जाते पुत्रे पितुः स्नानं सचेलं तु विधीयते ।

माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः" ॥)

पुत्रकन्याजनने ब्राह्मण्या दशाहानन्तरं लौकिककर्म्माधिकारः ।

पुत्रजनने ब्राह्मण्या विंशतिरात्रोत्तरस्नानात् वैदिककर्म्माधिकारः ।

कन्याजनने ब्राह्मण्या मासोत्तरस्नानात् वैदिककर्म्माधिकारः ॥

शूद्रायाः कन्यापुत्रजनने त्रयोदशाहोत्तरं लौकिककर्म्माधिकारः । वैदिककर्म्मणि तु मासोत्तरस्नानात् शुद्धिः ॥

एतत् सर्व्वं कन्यापुत्रयोर्विद्यमानत्वे बोध्यं ॥

जननाशौचोत्तरं षण्मासाभ्यन्तरमजातदन्तमरणे मातापित्रोरेकाहः । सपिण्डानान्तु सद्यः शौचं ॥ षण्मासाभ्यन्तरेऽपि जातदन्तस्य मरणे मातापित्रोस्त्र्यहं । सपिण्डानामेकाहं ॥ षण्मासोपरि द्विवर्षपर्य्यन्तं बालकमरणे मातापित्रोस्त्र्यहं । सपिण्डानामकृतचूडे एकाहः । कृतचूडे त्र्यहं ॥

(अत्र मनुः,—

"नृणामकृतचूडानां विशुद्धिर्नैशिकी स्मृता ।
निर्वृत्तचूड़कानां तु त्रिरात्राच्छुद्धिरिष्यते ॥
ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः ।
अलङ्कृत्य शुचौ भूमावस्थिसञ्चयनादृते ॥
नास्य कार्य्योऽग्निसंस्कारो न च कार्य्योदकक्रिया ।
अरण्ये काष्ठवत् त्यक्त्वा क्षपेयुस्त्र्यहमेव वा ॥")

द्विवर्षोपरि मासत्रयाधिकषड्वर्षपर्य्यन्तमनुपनीतबालकस्य मरणे मातापित्रादिसपिण्डानां त्र्यहं ॥ तन्मध्येऽप्युपनीतस्य मरणे दशाहः । मासत्रयाधिकषड्वर्षोपरि मरणे पित्रादिसपिण्डानां दशाहं ॥

शूद्रस्य षण्मासाभ्यन्तरे अनुत्पन्नदन्तस्य मरणे त्रिरात्रं । उत्पन्नदन्तस्य पञ्चाहः ॥ षण्मासोपरि द्विवर्षाभ्यन्तरे अकृतचूडमरणे पञ्चाहं । तथापि कृतचूडमरणे द्वादशाहं ॥ द्विवर्षोपरि षड्वर्षाभ्यन्तरे मरणे द्वादशाहं । अत्रापि दैवात् कृतोद्वाहे मासो व्यवह्रियते ॥ षड्वर्षोपरि मासः ॥

अथ स्त्र्यशौचं ॥ ३

कन्याया जन्मावधिद्विवर्षाभ्यन्तरे मरणे सर्व्ववर्णानां पित्रादिसपिण्डानां सद्यः शौचं । द्विवर्षोपरि वाग्दानपर्य्यन्तमेकाहः ॥

वाग्दानोत्तरं विवाहपर्य्यन्तं कन्यामरणे भर्तृकुले पितृकुले च त्रिरात्रं

("स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यन्ति बान्धवाः",
इति मनुः ।)

विवाहोत्तरं मरणे भर्तृकुलएव सम्पूर्णाशौचं ॥

दन्तजन्मपर्य्यन्तं भगिनीमरणे सोदरभ्रातुः सद्यः शौचं ॥

चूड़ापर्य्यन्तं भगिनीमरणे एकरात्रं । विवाहपर्य्यन्तं त्रिरात्रं ॥

दत्तकन्यायाः पितृगृहे प्रसवमरणयोः पित्रोः शयनासनादिससर्गशून्ययोस्त्रिरात्रं । तथाविधबन्धुवर्गाणां एकरात्रं । तथाविधससर्गिणान्तु सर्व्वेषां पूर्णाशौचं ॥ एतत्सर्व्वं सर्व्ववर्णसाधारणं ॥

अथ गर्भस्रावाशौचं ॥ ४

षण्मासाभ्यन्तरे गर्भस्रावे सर्व्ववर्णस्त्रीणामेवाशौचं । तत्र लौकिकवैदिककर्म्मयोर्गर्भमाससमसङ्ख्यदिनव्यापकं ॥ [इति मनुः ।)

("रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति" ॥

द्वितीयमासावधिगर्भस्रावे माससमसङ्ख्यदिनाधिक्यादेकदिनात्परं ब्राह्मण्या वैदिककर्म्माधिकारः ॥ क्षत्रियाया गर्भमाससमसङ्ख्यदिनाधिकात् दिनद्वयात् । वैश्याया दिनत्रयात् । शूद्राया षड्दिनात् ॥

सप्तमाष्टममासयोर्गर्भपतने मातुः सम्पूर्णाशौचं । सगुणसपिण्डानां सद्यः शौचं । निर्गुणपित्रादिसपिण्डानामहोरात्रं । यथोक्ताचरणशीलानां सपिण्डानां त्रिरात्रं तत्र जातस्य तद्दिनएव मरणे एव ज्ञेयं ॥ सप्तमाष्टममासजातबालस्य जन्मद्वितीयदिनादौ मरणे नवमादिमासजातबालकमरणवदशौचं । तत्र बालाद्यशौचे विहितं ॥

अथ मृत्युविशेषाशौचं ॥ ५

शास्त्राननुमतबुद्धिपूर्व्वकात्मघातिनो नाशौचदाहश्राद्धादि ॥

शास्त्रानुमत्या अनशनादिमृतस्य प्रमादादनशनाग्नि-वह्नि-जलोच्चदेशप्रपतन-सङ्ग्राम-शृङ्गि-दंष्ट्रि-नखि-व्याल-विष-चण्डाल-चौर-हतस्य च त्रिरात्रं ॥ शृङ्ग्यादिभिः स्त्रिया च क्रीड़ां कुर्व्वतः प्रमदाप्रमादमृतस्य नाशौचादि ॥ नागविप्रियकारित्वेन तद्धतस्य मरणोद्देशप्रवृत्तविद्युद्धतस्य चौर्य्यदोषेण राज्ञा हतस्य कलहं कृत्वा चाण्डालादेरसमानवर्णैर्हतस्य विप्रादेर्याधिजनकौषधस्य विषस्य वह्नेर्वा दातुर्म्मरणे पाषण्डाश्रितस्य नित्यपरापकारिणः क्रोधात् स्वयं प्रायविषवह्न्यादिशस्त्रोद्बन्धन जल गिरि उच्चप्रपात-मृतस्य चर्म्मास्थ्यादिमयपात्रनिर्म्मातृविप्रादेर्मनुष्यवधस्थानाधिकारिणः कण्ठदेशोत्पन्नभगरोगस्य पुंकर्म्माशक्तनपुंसकस्य ब्राह्मणविषयापराधकरणान्निहतस्य बुद्धिपूर्व्वकब्राह्मणहतस्य च महापातकिनो गलत्कुष्ठिनश्च एवंविधपतितानां मरणे च न दाहाशौचादिकं कार्य्यं ॥ तत्कृत्वा तप्तकृच्छ्रद्वयं कुर्य्यात् ॥

(अत्र मनुः,—

"वृथासङ्करजातानां प्रव्रज्यासु च तिष्ठताम् ।
आत्मनस्त्यागिनाञ्चैव निवर्त्तेतोदकक्रिया ॥
पाषण्डमाश्रितानाञ्च चरन्तीनाञ्च कामतः ।
गर्भभर्तृद्रुहाञ्चैव सुरापीनाञ्च योषितां" ॥

इति ।) म्लेच्छतस्करादिभिर्युद्धे स्वाम्यर्थहतविप्रादेर्दाहाशौचादिकमस्त्येव ॥

कृतप्रायश्चित्तगलत्कुष्ठिनो दाहाशौचादिकं कार्य्यं ॥ शस्त्रेणाभिमुखहतस्य तु सद्यः शौचं दाहादि च ॥ गवार्थे ब्राह्मणार्थे वा दण्डेन युद्धे हतस्याहोरात्रमशौचं ॥

नृपतिरहितयुद्धे लगुड़ादिहतस्य पराङ्मुखहतस्य च त्रिरात्राशौचं ॥

गोविप्रपालनेऽभिमुखयुद्धहतस्य सद्यः शौचं पराङ्मुखहतस्य तु त्रिरात्रं ॥

लौकिकपारिभाषिकोभयशस्त्रघातेतरहतमरणे सर्व्ववर्णानां सप्ताहमध्ये त्र्यहं सप्ताहादूर्द्धं सम्पूर्णाशौचं ॥

लौकिकपारिभाषिकशस्त्रघातमरणे त्र्यहमध्ये त्र्यहं त्र्यहादूर्द्धं प्रकृताशौचं ॥

लौकिकशस्त्रघातः खड्गशरादिघातः ॥ पारिभाषिकशस्त्रघातस्तु ।

"पक्षिमत्स्यमृगैर्ये तु दंष्ट्रिशृङ्गिनखैर्हताः ।
पतनानशनप्रायैर्व्वज्राग्निविषबन्धनैः ॥
मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः" ॥

इति देवीपुराणोक्तं ॥

अथ विदेशस्थाशौचं ॥ ६

अशौचकालाभ्यन्तरे विदेशस्थजननमरणाशौचश्रवणे शेषाहोभिः शुद्धिः ॥

("विगतं तु विदेशस्थं शृणुयात् यो ह्यनिर्दशं ।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्" ॥
इति मनुः ।)

अशौचकालोत्तरं विदेशस्थज्ञातिजननश्रवणेऽशौचं नास्त्येव । पुत्रजननश्रवणे तु सचेलस्नानात् शुद्धिः ॥ (अत्र मनुराह ।

"निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च ।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः" ॥)

सम्पूर्णाशौचिमरणे वर्षाभ्यन्तरश्रवणे सपिण्डानां त्रिरात्रेण शुद्धिः । सचेलस्नानादङ्गास्पृश्यत्वनिवृत्तिः । वर्षोत्तरश्रवणे तु सपिण्डानां स्नानेन शुद्धिः ॥ (अत्र मनुः ।

"अतिक्रान्ते दशाहे च त्रिरात्रमशुचिर्भवेत् ।
संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति" ॥)

मातृ-पितृ-भर्तृ मरणे वर्षोत्तरश्रवणे पुत्रपत्न्योरेकाहेन शुद्धिः ॥ द्विवर्षोत्तरश्रवणे स्नानमात्रं ॥ पूर्णाशौचातिक्रमएव विदेशस्थमरणाशौचश्रवणे त्र्यहाशौचं । न खण्डाशौचातिक्रमे ॥ यत्र मरणमात्रं श्रुतं विशिष्य मासादिकमज्ञातं तत्र श्रवणदिनावधिस्वजात्युक्तमशौचं । खण्डाशौचेऽपि महागुरुनिपाते एकरात्रं ॥

अथाशौचसङ्करः ॥ ७

जननाशौचमध्ये जननाशौचान्तरपाते मरणाशौचमध्ये मरणाशौचान्तरपाते च पूर्व्वाशौचकालेन सर्व्ववर्णानां शुद्धिः ॥ (यथाह मनुः—

"अन्तर्दशाहे स्यातान्चेत् पुनर्मरणजन्मनी ।
तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशं" ॥)

पूर्णजननाशौचान्तदिने पूर्णजननाशौचान्तरपाते पूर्णमरणाशौचान्तदिने पूर्णमरणाशौचान्तरपाते च पूर्णाशौचान्तिमदिनोत्तरदिनद्वयेन शुद्धिः ॥ पूर्णजननाशौचान्तिमदिवसीयोत्तरप्रभाते सूर्य्योदयात् पूर्व्वं तत्पाते सूर्य्योदयावधिदिनत्रयेण शुद्धिः ॥

एवं मरणाशौचेऽपि ॥

पूर्व्वाशौचवर्ज्जितदिनद्वयत्रयाभ्यन्तरेऽशौचान्तरपाते पूर्व्वाशौचकालेन शुद्धिः ॥

अशौचचतुर्थान्तदिनकृत्यं चौरादिकमेकदैव तद्वितीयदिनकृत्यं श्राद्धादिकं तत्परदिने ॥

अत्र च अशौचान्तिमदिवसमात्रयोः अनुग-
मने पितृमातृभिन्नमरणे च न दिवसवृद्धि
रस्ति। किन्तु अनुगमनमारभ्य पितृमातृभिन्न-
मरणमपि च पूर्वाशौचं। जातिजन्याशौच
पूर्वार्द्धे अनुगमने जातिजन्याशौचकालेन
शुद्धिः। परार्द्धे चेत् अनुगमनाशौचकालेन
शुद्धिः।
जातिमरणाशौचकालमध्ये पितृमातृभिन्नमरणे
पूर्वार्द्धे पूर्वाशौचकालेन परार्द्धे परशौचकालेन
शुद्धिः।
अनुगमनाशौचान्तिमदिवसमात्रयोरनुग-
मने पितृमातृभिन्नमरणाशौचान्तिमदिवसमात्र-
योर्यामिमरणेऽपि न दिवसवृद्धिः। कि-
न्तु पूर्वाशौचकालेन शुद्धिः।
अनुगमनाशौचान्तिमदिवसमात्रयोः अनुगमना-
मरणमने एवं मातृमरणाशौचान्तिमदिवसमात्र-
योः पितृमरणे पितृमरणाशौचान्तिमदिवस-
मात्रयोर्मातृमरणे च क्रमेण दिवसत्रयवृद्धिः।
अनुगमनाशौचस्य अतिपाते पूर्वमातरि परशौचका
लमध्ये सपत्नमातृमरणे सपत्नाशौचेन
पूर्वाशौचनाशः। तथापि परामृतजातस्य
मातृपितृव्यतिरिक्तसपिण्डस्य पूर्वार्द्धमातृजातस्य
मातापितृव्यतिरिक्तसपिण्डस्य परमगमनाशौचस्य
निवृत्तिः। पूर्वजातकस्य मातापितृव्यतिरिक्तानु-
गमनाशौचसमानमरणाशौचं। गमनाशौच
स्ववर्णपाते प्रथमगमनाशौचपूर्वार्द्धमातृगमन
मरणे सम्पातदिनयोः पूर्वाशौचस्य वर्णक
चतुराहपूर्वसम्भवाशौच। परार्द्धमातृगमनमरणे
तु सम्पातदिनं सम्पातदिनात् अतपूर्वमनुगम
मातृगमनाशौच। पितृमातृव्यतिरिक्तसपिण्डस्य
सपिण्डगमनमरणाशौचयोः संनिपाते मरणाशौच
कालेन शुद्धिः। जननमरणयोरितरेतरसमरणा-
शौचयोः संनिपाते तु दीर्घाशौचकालेन शुद्धिः।
गुणवत्तया हरणमथपूर्वदिनविभाताशौचा-
न्तरे सगुणेषुवेऽपि हरणमगमनाशौचकालेन
शुद्धिः।
पूर्वोक्तपितृमरणस्य पर्यावसाशौचमध्ये पितृमातृ
भ्रंमरणेऽपि यदि पितृव्यतिक्रमगमनाशौचकालेन
शुद्धिः। एवम् पूर्वाशौचविधपितृवर्णमरणे पा-
रशौचं यावत् वर्णपितृगमनमनुष्ठेयम्।
चतुर्थदर्शनकलापेरप्रसरणे विपादिमरणे-
ऽपि अशौच त्रिरात्रं। अन्यास्पृश्यस्वेनपात्रं।
कर्नेषु त्रिरात्रत्वं गृह। विदेशमरणे यदि
अशौचमध्ये अन्यदशिमरणे त्रिरात्राशौचं
अनुगमनपक्षनाशौचानन्तरं। अवलाबु। एवं च
विपाके गृहस्थेव शुद्धिः।
विदेशस्थ अतिविप्रत्यावलोकन अनुगा विदेश
अतिवित्तपक्षविराजाशौचेन शुद्धिः।
तुल्यविराजाशौचसंनिपाते पूर्वेणैव शुद्धिः।
अन्याहनसमनोत्पत्ती अर्थपूर्वेण मातृमरणेन
शुद्धिः पितृमरणविरात्रं कालावधानाशौचं।
अयोरशौचमध्ये एकतरमरणे प्रथममित्रमातुः

अन्यामरणात् सद्यः शुद्धिः। न तु एकमरणात्।
पितादिसपिण्डानां प्रथममात्रमरणात् शुद्धिः।
न तु परमात्रमरणात्। मृतायां जननोत्पत्ती
प्रथमभात्रमरणाशौचेन शुद्धिः। न तु परमात्र
मरणात्। पितादिसपिण्डानां प्रथममात्रमर
णात् शुद्धिः न तु परमात्रमरणात्। एतमत्र
ज्ञात्वं सुधीभिः।

अथ मृतानुगमनापद्यशौच। ८

ब्राह्मणमृतानुगमने ब्राह्मणस्य सचेलस्नानादि
स्पर्शोदकपानाद्यैः शुद्धिः।
क्षत्रियमृतानुगमने ब्राह्मणस्य एकाहेन शुद्धिः।
वैश्यमृतानुगमने ब्राह्मणस्य पक्षेण शुद्धिः। शूद्र-
मृतानुगमने ब्राह्मणस्य प्राणायामशतेन दिन-
त्रयेण च शुद्धिः।
प्रमादात् शूद्रमृतानुगमने ब्राह्मणस्य नव प्राणा-
यामैः सर्पिःप्राशनप्राप्तैः शुद्धिः।
असमानाज्ञस्य स्नेहात् एकनगरस्थो वास
एकमासमात्रा एक शौच।
योषेय अनाथोऽप्राप्ते एकमासानन्तराशौच।
एकमासीयएकरात्रगमनशौचे एकमासान्तराशौचं।
वेदाध्ययनविराजकविनादिकत्रयाहे त्रिरात्रं।
अशौचिकुलाभ्यागमने सपिण्डाशौचं। अशौ
चाभ्यागमने विना वस्त्रमपाठेऽशौचं।
विविधगमनादे अन्तर्विनो मातुलादिस्वेषे
नापि तावे त्रिरात्रं।
विवाहमूलेनैव स्नानात् शुद्धिः। (यथाह मनुः।
"आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम्।
निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते"।
मातामहपि मृतं तु स्नानेनैव शुद्ध्यति।
अन्यत्रमश्रौच न चेत् तस्मिन् गृहे वसेत्।
अनुगच्छन्त्या प्रेत ज्ञातिमज्ञातिमेव वा।
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥)
मृते सखेऽज्ञातिपरपक्षामाधान्तरे तत्पक्षे सता-
नुपिताचिन पितृव्य त्रिरात्रं। आसान्तरे उपना-
यनेऽशौचं।
मृते सखेऽज्ञातिपरपक्षामात्रे मातामहान्तरे वर
सखेऽज्ञातस्मरणे त्रिरात्राशौचं सचेलस्नानम्।
अक्षिनवयस्य पूर्वे पिष्ठ्ये दीपने पितृव्य
दशाहेन शुद्धिः।
ब्राह्मणयोर्मध्ये दीपने पितृव्य पक्षेण शुद्धिः।
शूद्रस्य वर्णेन दीपने मासेन शुद्धः।
महापुरुष नामतो वद दीपमदिवाविभावमाने
ब्राह्मणस्याशौचं।
अविभक्तकालस्य पूर्वाशौचे ब्राह्मणस्य चतु
र्थहः। क्षत्रियस्य षष्ठाहः। वैश्यस्य अष्टमाहः।
शूद्रस्य दशमाहः। असपिण्डे वर्णानां त्रिरो-
त्राणः।
पूर्वाशौचमरणे ब्राह्मणस्य चतुर्थेऽस्पृश्यता-
निवृत्तिः। क्षत्रियस्य पञ्चमे। वैश्यस्य सप्तम
दिने। शूद्रस्य दशमदिनेऽस्पृश्यतानिवृत्तिः।
एवं जननाशौचे विवाहकालेनाप्यस्पृश्यतादि
वर्ज्य।

मरणोऽशौचे पञ्चदशमेनास्पृश्यतानिवृत्तिः।
जननाशौचे क्षत्रियाणां अस्पृश्यता नास्ति।
पुत्रोत्पत्तौ स्नानात् पूर्वं पितुर्विप्रावस्थानम्
स्मृतम्।
सपिण्डासर्वे पितुर्विप्रावस्थानं सपिण्डानुक-
लानास्पृश्यत्वं। पञ्चैवां स्नानमात्रं।
कन्याजन्मनोत्पत्ती मातुर्दशरात्रमस्पृश्यत्वं।
कन्याजन्मनोर्मध्ये मृतायामपरसोरात्रमस्पृश्यत्व

अथ गर्भाशौचं। ९

गर्भपातसमये रक्तेस्रावे अस्पृश्यत्वादि
दिनत्रयेवावत्।
एतदाहृते वर्णेन वर्णसंख्याक।

अथ रजस्वलाशौचं। १०

तत्र प्रथमदिनावधि त्रिरात्रमशौचं। त्रिरात्रम्
परं स्नानपानाद्यर्थं रजोदर्शनेऽशौचाभाव।
चतुर्दशाहे रजोदर्शने एकाहमशौच।
अष्टादशदिने रजोदर्शने पक्षाशौचं।
अष्टादशदिवसात् परं रजोदर्शने त्रिरात्राशौचं।
रजस्वला चतुर्थेऽहि स्नानेन शुध्यति स्त्रीकर्मणि
शुद्धा। पञ्चमेऽहनि दैवपैत्र्यकर्मणोः शुद्धा।
("शुद्धा भर्तुश्चतुर्थेऽह्नि स्नाता नारी रजस्वला।
दैवे कर्मणि पैत्रे च पञ्चमेऽहनि शुध्यति"।
इति शुद्धितत्त्वे॥)
रजस्वलाया अशौचमध्ये शुचिजातस्पर्शे अज्ञान-
जातिस्पर्शे च त्रिरात्रोपवासेन शुद्धिः। अत्र
जातस्य अशौचात् परं करणीयं।
भर्तृपुत्रादिविकल्पनायां यदि रजस्वला भवति
तदा सर्वा जाता एव स्नात्वा पूर्वं स्वयम्
किन्तु अन्नपूरणाशौचदिनानन्तरमर्थं विधि।
मलपाते तु स्नात्वा यथा देवं।
आम्निस्नायात्रालेऽशपानौ यदि रजस्वला
भवति तदा पञ्चमेऽहनि अशायं कुर्यात्॥
(अविविक्तप्रविमायां श्रान्तरकार्यतत्कारिणं
दधाम्यसप्तश्राद्धकरणाय अधिकरणाशाय
शौचाभावश्च। तदुक्तं मनुना।
"न राज्ञामघदोषोऽस्ति व्रतिनां न च सत्रिणाम्।
ऐन्द्रं स्थानमुपासीना ब्रह्मभूता हि ते सदा"।
विष्णुपुराणम्। "अशौचं न राज्ञां राजकर्मणि,
न व्रतिनां व्रते, न सत्रिणां सत्रे"। इति॥)
इत्यशौचप्रकरणं समाप्तम्।

अश्म, पुं, पर्वतः। मेघः। पैरिपक्वान्तोऽयं।
अश्मकरणी, स्त्री, (अश्मा इव कठिना करणी यस्याः।)
करवीरविशेषः। इति राजनिर्घण्टः। अस्याः
गुणपर्यायौ पाषाणकरवीरशब्दे द्रष्टव्यौ।
अश्मकेतुः, स्त्री, (अश्मेव केतुरस्याः।) कुशपाषाण-
भेदकः। इति राजनिर्घण्टः।
अश्मगर्भं, पुं, (अश्मेव गर्भो यस्य।) हरिन्मणिः।
मरकतं। इत्यमरः।
अश्मगर्भजं, क्ली, (अश्मनो गर्भाज्जायते इति। अश्म-
गर्भ+जन्+ड।) मरकतं। इति राजनिर्घण्टः।
पाना इति भाषा। (पुं, पाषाणजो मणिः।)
अश्मघ्नः, पुं, (अश्मानं पाषाणं हन्ति भिनत्तीति। अश्म

+हन्+टक् ।) पाषाणभेदनवृक्षः । इति राज-
निर्घण्टः ॥ पाथरकुचो इति भाषा ॥ अश्मभेदशब्दे-
ऽस्य पर्य्यायगुणौ ज्ञातव्यौ ॥

अश्मजं, क्ली, (अश्मनः प्रस्तराज्जायते इति । अश्मन्
+जन+ड ।) शिलाजतु । इत्यमरः ॥ लौहं
इति राजनिर्घण्टः ॥
("अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ।
तेषां सर्व्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥"
इति मनुः ॥ शिलाजत्वर्थे वैद्यकचक्रपाणिसंग्रहे
चास्याश्मरीरोगचिकित्सायां वक्ष्यते यथा ॥
'अमृता चाश्मजं देयं' ॥)

अश्मजतुकं, क्ली, (अश्मजतु+स्वार्थे कन् ।) शिला-
जतु । इति राजनिर्घण्टः ॥ (शिलाजतुशब्देऽस्य
विशेषविवरणं ज्ञेयं ॥)

अश्मदारणः, पुं, (अश्मानं दारयतीति । अश्म+
दृ+णिच्+ल्युट् ।) टङ्कः । पाषाणविदारणास्त्रं ।
इति जटाधरः ॥ टाँकी इति पश्चिमदेशे ख्यातः ॥

अश्मन्तं, क्ली, (अश्मनः प्रस्तरस्यापि अन्तो नाशोऽत्र ।
शकन्ध्वादिरूपं ।) चुल्ली । अशुभं । मरणं । अन-
वधि । क्षेत्रं । इति मेदिनी ॥ (पुं, धर्म्मात्
मरुत्वत्यां जातः स्वनामख्यातो मरुद्देवः । तथा च
हरिवंशे ।
"मरुत्वती मरुत्वन्तो देवानजनयत्सुतान् ।"
'अश्मन्तं विश्वरश्मिश्च तथा निष्कुषितं नृप ॥")

अश्मन्तकं, क्ली, (अश्मन्त+स्वार्थे कन् ।) चुल्ली ।
मल्लिकाच्छादनं । दीपाधाराच्छादनं । इति मे-
दिनी ॥ सेज पाँधारिया इत्यादि भाषा ।

अश्मन्तकः, पुं, अश्मन्त+कन् ।) वृक्षविशेषः । अम्ल-
कुचाइ इति भाषा । तत्पर्य्यायः । अम्लोटकः २ ।
इति रत्नमाला ॥ वृक्षविशेषः । आवुटा इति
पश्चिमदेशे ख्यातः । तत्पर्य्यायः । इन्दुकः २ कुराली
३ अम्लपत्रः ४ अश्मालकः ५ गीलपत्रः ६ यमलप-
त्रकः ७ । अस्य गुणाः । मधुरत्वं । कषायत्वं । सुशी-
तलत्वं । पित्तश्लेष्मविदाहतृष्णाविषमज्वरविषा-
र्त्तिच्छर्द्दिभूतनाशित्वञ्च ॥ इति राजनिर्घण्टः ॥

अश्मपुष्पं, क्ली, (अश्मनः पुष्पमिव ।) शैलेयं । शैल-
जनामगन्धद्रव्यं । इत्यमरः ॥

अश्ममालं क्ली, (अश्मेव भाजयति चूर्णितं करोति ।
भज चूर्णने । भज+णिच्+अण् । पृषोदरादि-
त्वात् जस्य लत्वम् ।) द्रव्यचूर्णार्थलौहादिपात्रं ।
तत्पर्य्यायः । लोहमाण्ड २ । इति शब्दचन्द्रिका ॥
हामानदिस्ता इति भाषा ॥

अश्मभित्, [द्,] पुं, (अश्मानं भिनत्तीति । अश्म+
भिद्+क्विप् ।) पाषाणभेदी वृक्षः । इति रत्न-
माला ॥ प्रस्तरभेदके त्रि ॥

अश्मभेदः, पुं, (अश्मनो भेदो भवत्यस्मात् ।) पाषाण-
भेदी वृक्षः । इति रत्नमाला ॥ (अस्य गुणाः ।
"अश्मभेदो हिमस्तिक्तः कषायो वस्तिशोधनः ।
भेदनो हन्ति दोषार्शोगुल्मकृच्छ्राश्महृद्रुजः ॥
योनिरोगान् प्रमेहांश्च प्लीहशूलव्रणानि च" ।
इति भावप्रकाशः ॥
"एरण्डो विजपूरश्च गोक्षुरः वृहतीद्वयं ।
अश्मभेदस्तथा बिल्वं एतन्मूलं कृतं शृतः ॥
एरण्डतैलहिङ्ग्वाढ्यो यवक्षारः ससैन्धवः ।
स्तनकण्ठकटीमेढ्रहृदयोत्थव्यथां जयेत्" ॥
इति शार्ङ्गधरः ॥)

अश्मयोनिः, पुं, (अश्मा योनिरुत्पत्तिस्थानं यस्य ।)
मरकतमणिः । इत्यमरटीकायां भरतः ॥

अश्मरः, त्रि, (अश्मनोऽयमिति । अश्म+र ।) प्रस्तर-
सम्बन्धीयः । इति पाणिनिः ॥ पाथुरिया इति
भाषा ।

अश्मरी, स्त्री, (अश्मानं राति ददाति या । अश्मन्+
रा+क+गौरादित्वात् ङीष् । मूत्रकृच्छ्ररोगो
हि मूत्रद्वारे प्रस्तरमिव कठिनमांसं रचयति ।)
मूत्रकृच्छ्ररोगः । पातरी इति भाषा । यथा ।
अथाश्मर्य्यधिकारः । अथाश्मर्य्याः सन्निकृष्टनिदानं
सङ्ख्याञ्चाह ।
"वातपित्तकफैस्तिस्रश्चतुर्थी शुक्रजा मता ।
प्रायः श्लेष्माश्रयाः सर्व्वा अश्मर्य्यः स्युर्यमोपमाः" ॥
श्लेष्माश्रयाः श्लेष्मसमवायिकारणाः । शुक्रजां
विना । शुक्रजायास्तु शुक्रस्यैव समवायिकारण-
त्वात् । अन्ये तु शुक्राश्मर्य्यामपि कफकारणत्व-
मिच्छन्ति । प्रायः शब्दश्चात्र विशेषार्थः । यमो-
पमाश्चिकित्सां विना ॥ * ॥ सम्प्राप्तिमाह ।
"विशोषयेद्वस्तिगतं सशुक्रं
मूत्रं सपित्तं पवनः कफं वा ।
यदा तदाश्मर्य्युपजायते तु
क्रमेण पित्तेष्विव रोचना गोः ॥
पवनो वस्तिगतं सशुक्रं मूत्रं सपित्तं कफं वा
शोषमुपनयेत् यदा तदा अश्मरी क्रमेण क्रमशो
वर्द्धमाना । यथा गोः पित्तेषु रोचनेत्यन्वयः ॥ * ॥
पूर्व्वरूपमाह ।
"नैकदोषाश्रयाः सर्व्वा अथासां पूर्व्वलक्षणं ।
वस्त्याध्मानं तदासन्नदेशेषु परितोऽतिरुक् ॥
मूत्रे वस्तसगन्धत्वं मूत्रकृच्छ्रं ज्वरोऽरुचिः" ।
वस्तः छागलः ॥ * ॥ सामान्यलक्षणमाह ।
"सामान्यलिङ्गं रुङ्नाभिसेवनीवस्तिमूर्द्धसु ।
विशीर्णधारं मूत्रं स्यात् तया मार्गनिरोधने ॥
तद्व्यपायात् सुखं मेहेदच्छं गोमेदकोपमं ।
तत्संक्षोभात् क्षते सास्रमायासाच्चातिरुग्भवेत्" ॥
वस्तिमूर्द्धा नाभेरधोदेशः । विशीर्णधारं सवि-
च्छेदधारं । तया अश्मर्य्या । मार्गं मूत्रवाहि
स्रोतः । तद्व्यपायात् कदाचित्तया अश्मर्य्या
मूत्रमार्गादन्यत्र गमनात् । सुखं मेहेत् मूत्रयेत् ।
गोमेदकोपमं गोमेदको मणिः किञ्चिल्लोहित-
स्तद्वर्णं । तत्संक्षोभात् तस्या अश्मर्य्याः सञ्चारात् ।
घर्षणेन मूत्रवहे स्रोतसि क्षते जाते सास्रं सरक्तं
मेहेत् । आयासात् प्रवाहणादिजनितात् ॥ * ॥
वातोल्वणामाह ।
"तत्र वाताद्भृशं त्वार्त्तो दन्तान् खादति वेपते ।
मृद्गाति मेहनं नाभिं पीडयत्यपि सङ्क्वणन् ॥
सानिलं मुञ्चति शकृन्मुहुर्म्मेहति विन्दुशः ।
श्यावारुणाश्मरी चास्य स्याच्चिता कण्टकैरिव" ॥
सङ्क्वणन् आर्त्तनादं कुर्व्वन् नाभिदेशं पीडयति ।
शकृत् पुरीषं सानिलं मुञ्चति । मुहुर्व्वारंवारं ।
विन्दुशः विन्दुं विन्दुं मेहति मूत्रयेत् । श्यावे-
त्यादि श्यावा किञ्चित् श्यामा । अरुणा किञ्चि-
द्रक्ता । एवं चाश्मर्य्यां वर्णाकारकथनं व्या-
ख्यातां प्रत्यक्षसंवादिशास्त्रप्रामाण्यख्यापनार्थ-
माह । चिता कण्टकैरिव वदरीवीजवत् क्षुद्रा-
ङ्कुरैर्व्वेष्टिता ॥ * ॥ पित्तोल्वणामाह ।
"पित्तेन दह्यते वस्तिः पच्यमान इवोष्णवान् ।
भल्लातकास्थिसंस्थाना रक्ता पीता सिताश्मरी" ॥
दह्यते साक्षादग्निनेव । वस्तिरिति मूत्रकोषः ।
पच्यमान इव क्षारेणेव । उष्णवान् उष्णस्पर्शः ॥ * ॥
कफोल्वणामाह ।
"वस्तिर्निस्तुद्यत इव श्लेष्मणा शीतलो गुरुः ।
अश्मरी महती श्लक्ष्णा मधुवर्णाथवा सिता" ॥
महती कुक्कुटाण्डतुल्या । मधुवर्णा ईषत्पिङ्गल-
शुक्ला ॥
"एता भवन्ति बालानां तेषामेव हि भूयसा ।
आश्रयोपचयाल्पत्वात् ग्रहणाहरणे सुखा" ॥
एता दोषत्रयजनिता बालानां स्युः ॥ यतः सर्व्वा
एवाश्मर्य्यो विशेषतः श्लेष्मसमवायिकारणा । बाला-
स्तु विशेषतस्तन्निदानसेविनो भवन्ति । उक्तञ्च
सुश्रुतेन । प्रायेणैता अश्मर्य्यो दिवास्वप्नसमश-
नाध्यशनस्निग्धशीतगुरुमधुराहारप्रियत्वात् विशे-
षेण बालानां भवन्तीति । भूयः पदोपादानात्
महतामपि त्रिदोषजनिता भवन्ति । तेषामेव
बालानामेव । ग्रहणाहरणे सुखा ग्रहणं निष्का-
सनार्थमङ्गुलिभ्यां । आहरणं पाषाणादिपूर्व्वकं
निष्कासनं तत्र सुखा सुखदा । तत्र हेतुमाह ।
आश्रयोपचयाल्पत्वादिति आश्रयो वस्तिः तस्यो-
पचयः स्थौल्यं तस्याल्पत्वात् ॥ * ॥ शुक्राश्मरीमाह ।
"शुक्राश्मरी तु महतां जायते शुक्रधारणात्" ।
अव्ययानामनेकार्थत्वात् तुशब्दोऽत्रावधारणार्थः ।
तेन महतामेव न तु बालानां । तेषां वक्ष्यमाण-
सम्प्राप्तेरसम्भवात् । न तु शुक्राभावो वाच्यः ।
शुक्रधारणात् वेगात् च्यवमानस्य शुक्रस्य धार-
णात् ॥ * ॥ शुक्राश्मर्य्याः सम्प्राप्तिमाह ।
"स्थानाच्युतममुक्तं हि मुष्कयोरन्तरेऽनिलः ।
शोषयत्युपसंहृत्य शुक्रं तच्छुक्रमश्मरी" ॥
अनिलः मैथुनवेगेन स्थानाच्युतं । अमुक्तं मैथुन-
वेगधारणेन धृतं शुक्रं । मुष्कयोः मेढ्रसन्निहितयोः ।
मेढ्रवृषणयोरन्तरं इति सुश्रुतवचनात् । तेन
मेढ्रवृषणमध्यगतवस्तिमुखे उपसंहृत्य एकीकृत्य
शोषयति । तच्छुक्रमश्मरी तथाभूतं शुक्रमेवा-
श्मरी ॥ * ॥ अस्या लक्षणमाह ।
"वस्तिरुङ्मूत्रकृच्छ्रत्वमुष्कश्वयथुकारिणी ।
तस्यामुत्पन्नमात्रायां शुक्रमेति विलीयते ॥
पीडिते त्ववकाशेऽस्मिन्नश्मर्य्येव च शर्करा" ।
तस्यां शुक्राश्मर्य्यां । उत्पन्नमात्रायां यदा सा कथ-
मपि विलीयते विलयं याति तदा शुक्रं एति
मूत्रमार्गात् प्रवर्त्तते । पीडिते त्ववकाशेऽस्मिन्
तुशब्दोऽवधारणे । तेन अस्मिन्नेव अवकाशे
स्थाने मेढ्रवृषणयोरन्तरे पीडिते सति अ-

विरीभवे बस्तावौसा भवति । वातस्यापेतरश्मरी शर्करा सिकता भवतीत्याह । अश्मर्य्येव च शर्करा भवरात् सिकता च भवति । शर्करासिकतयोरेव भेदो महतामसामर्थ्ययोगश्च । अथ अश्मरी भवरा भवतीत्याह । सा भिन्नमूर्त्तिर्वायुना शर्करेत्यभिधीयते । सा अश्मरी ।*। शर्करामाह भवरोगञ्च कथेतुमाह ।

"अश्मरी शर्करा चैव तुल्ये सम्भवलक्षणैः ।
निरेति वायुना भिन्ना प्रतिलोमे विपद्यते ।
मूत्रस्रोतःप्रवृत्ता सा सक्ता कुर्य्यादुपद्रवान्" ।
सो अश्मरी । तस्मिन् रागी । अनुलोमगे मूत्रस्रोतस्सु तत्प्रवृत्ता मूत्रेण सह सा शर्करा निरेति पतति । प्रतिलोमगे अनवगते वायौ विपद्यते । तदा मूत्रस्रोतः भिन्ना सक्ता सा तत्तदुपद्रवान् कुर्य्यात् । तानेवोपद्रवानाह ।
"दौर्ब्बल्यं सदनं कार्श्यं कुक्षिशूलमथारुचिम् ।
पाण्डुत्वमुष्णवातञ्च तृष्णां हृत्पीडनं वमिम्" ।
दौर्ब्बल्यमित्यादयो । सदनं सादनम् । पा पाण्डुत्वम् । उष्णवातो मूत्र । उष्णवातं मूत्रघातविशेषं ।*। अश्मरी शर्करा सिकतास्तासां भेदमाह ।
"प्रकुपिताश्मरी कफमूत्र समाश्रितम् ।
अश्मरी परतस्तासु शर्करा सिकतास्थिता" ।
शर्करा सिकतेति च नामद्वयमन्यत् । ।
अथासाध्यत्वचिकित्सा ।
"पुरुषानश्मरीयुक्तान् विधिमत्कोटरः ।
भवबाधरसयुक्तो कार्य तथा विचक्षणः ।
रामकवायाञ्जनबृन्दे विधिना भिषक्
अश्मरी मूत्रकृच्छ्राच्च पाषाणभेदाति निर्धिशेत् ।
क्षारा गुल्मप्रविधाम घोषस्य तथा वदेत् ।
समिन्धोऽश्मविनं तथा अश्मरीभेदयुक्तम्" ।
सर्पदे ।
मुक्तादिरसायनम् । ।
"हरीतकीकल्ककलायमेव
चौरीनिवद्धाश्वकलायुते ।
मिश्र विवेरकपुष्पयुक्ता
तक्रेण मूत्रकृच्छ्रमहेद्" ।
अश्मरी शर्करान्वितं मूत्र मूत्रकृच्छ्रे मूत्रघाते । सर्वार्तिहरम् ।*।
"कुलत्थकल्कस्य निद्रुकवातकल्कं पिबेत् ।
सशौ वेटे मूत्रकृच्छ्रे अश्मरीशर्कराहरेत्" ।*।
"एरण्डमूलिकाकल्कयुक्तमीषोत्पुरके सहा ।
शमनप्रहारतो हा शर्करा वातरक्तके" ।
तारा वरुणा । ।
"विश्वकृतरस वीजानां मूल माक्षिककर्त्तकम् ।
भवोदधीव शतावरसरीषाणां पिबेत्" ।
कर्णमौदी । ।
"वरुणस्य त्वचस्तथा वीजो गुडसमन्विता ।
अश्मरी शर्करापात्र रसिकृष्ण पातयेत्" ।
क्षारो वरुणमूलस्य तथा अश्मसंघ ।
त्रिकुलस्य च क्षारा यवक्षारोऽश्मरीं हरत्" ।*।
"गोक्षुरैरण्डाद्यपामार्गबीजान्विता ।
पश्चिमतो भिन्नकुसुमलत देवीमाञ्च पायता" ।
कुन्दुरुर्वा । ।
"यो नाम भिन्नमिक्षुरसकं सिंहाय गृहीतानन्द तथैव कपिसिरीणि के वरुणं सिंहा तुषं पायसेद्
अश्मतुल्यं वत्सुर्बास्मषि वचैतत् पाषाणभेदं सर्वं तक्रेण हरेत् वे कुम्भ्दे बाले नरिथ सुरा ।
कामेन वरुणा तुण्डे करिहे सर्वोवधेता पथ्य मुस्तैरार्द्रकवत्तकोपुटकवायाशालिभिर्बृहिका ।
क्षुधाशमकवायकमुद्गतटीवालकोलाज्जं माहेयाश्रितिवासकमाक्षिकयुक्तैश्चपानादुषेहत्
अश्मरी प्रविशति सुखमूलं कोऽपममाध नरः ।
शरीरस्य बलवर्णमविश्राम वर्धयति सर्वं" ।
एतत्सर्ववीर्यं ककारीवीर्यं । पाषाणभित् तथा कोडरीति बोधे । क्षीरेण बीजपूरां । तथाच ।
"बीजपूर्ण पत्रमा सर्व्वं शाखवं करिले तथा ।
कवर्षो मिश्रमधु कौवसा वासनी तथा" ।
इति विश्वकृत् अश्मसारि । कुलत्थी वाशकं । विशिष्ट विवानतु । अश्मिद्रव् विद्रुग । वरुणा त्रिवृत । ।
"सक्षिप्त बाहुलं बीजं बीरकां मलप्रमितं ।
पाथोदत्त वरसं अक्ष्वकष भस्मना ।
ज्ञेयेन समभागानां चूर्णं तत्क्षिप्तं नरा ।
अश्वमूत्रेण पिबेत् शर्करा मूत्रकृच्छ्रहरी हर्ब ।
"पवकरमिले बोले कुष्माण्ड हते तु सः ।
यस्य इतप्रद्राव कार्य्यमाषकतोन्मिव ।
सिंहा पिबेद् यवेरक्ष मूत्रेण समसतारी ।
शर्करा सिकता चापि दृष्टमेतदनेकधा" ।
इक्षुमूलविकारः ।*। इति भावप्रकाशः ।
(अश्मा निबाधित्रमाद मोचा ।
"पुष्पकाशमधना चापि अश्माश्मसारी निदुः ।
इति मात्रावसर्षिविरबद्धगुग्गुलुमस्करीकाष्ठको
"त्रिमाषकसरोमेन मपया मूत्रविरेचनात् ।
कसिमचाविकारीर्दहते शस्करीवर ।
मूत्राविधौ च मिवदी हरते कृच्छ्रो यदि ।
मूत्रेण मिश्रितं दद्यं भवते अर्शमपदं ।
वज्जस्व वरिदसा च च तद प्रभाशवे ।
मूर्च्छं मूत्रस्य बध्यासे करोति यस्य पिबु ।
कोऽयकाशो मूत्रस्थापासूपसि पापुरे ।
मात्रको पापि बाबब मावके मूत्रशर्करा ।
विपरीतेन पोपाने सिया च द्रवेन वा ।
मनास मदधीयत क्षीरवत् विधिमोति च ।
दृष्ट्या वेदने यस्य यातेन शोणितस्य यत् ।
सर्व वर्षं मवपेव मूत्रतां चक्रि च ।
वेन मूत्राश्मरीवस्य मावके शीतवेगा ।
अश्मरीत्यधिविका यापि शर्करा अश्मसमावा ।
कालो सम्पति मेघम भवव्रग । मवागते" ।
अथाशिचिकित्सा यथा ।
"गुग्गुलोः पुरस्कृत्य वरसस्य भवचका ।
क्षारो मुद्रमाषादगुगाशरिषाजन ।१।
गोक्षुरस्य बोवानां चातुर्मासिककषायं ।
मूत्र माक्षिकयुक्तेन मानवायारिपायर्ने" ।२।
अथ अश्मरीसप्न यथा ।
"इराकदिकाद्यश्चिरक्तमूलकाम्बुवा ।
प्रामाक्ष बोदशोरासो अश्मरीहापकर्मं ।
कुष्माण्डबोधूमाकपादेवात्ती विदन् ।
वाराप्राय प्रयोगका बोधने पाषरोगिषा ।
बीजापानि च मोकानि बधाकशारिकाशन"
इति हारीतः ।
"विरोवनेवजिवदन्त मुर्वं
मूत्र करोति यदा अर्थं वा ।
यदा तरामहृद्रूपात्ते तु
कलेन पिशोनिन रोचका को ।
वरुणद्युमान्विरतागुत्ता
वक्षा विद्रुमाप्यवपति भवो ।
मूत्रस्य चेन्मार्गमुपैति तदा
मूत्र तदा तस्य करोति वक्तौ ।
सवीसवीलेन्द्रकसिमूर्वं
विदीर्णमाशस्य करोति मूत्र ।
प्रक्षाति मेढ च तु वेदनार्तौ
कृष्ठा शक्नुवाति मेहते च ।
कोपात् सवे मूत्रकौच बावन्
अश्मा मुख मेदति च मवासम् ।
रसाश्मरी मारुतमिश्रमूर्छा
प्राप्नर्य्यमासमूत्रवात् चरन्ती" ।
चिकित्सा यथा ।
"त्रिफा त्रिफा तकारिचर्णस्यां
हर्षे वर्षेण शवाविभास्यां ।
वाकपाषारीवद्यपापतस्य
विदंमपुर्णं मधु अर्कविदं ।
पाषाणभेदं सकलं चाङ्गा
पाडमबाबोबडीगिकुम्भा ।
त्रिवीकराताविविधारकाश्या-
मेतांविधाको यावक्षु पीर्म ।
वस्तुमिषा त्रिवृ वनेकला
क्वाथे वै वरुणी वदता तथा च ।
पूर्वे विवेचनादिभिरेवं वर्ष
वर्तिश वोमूत्रवजूलेपे ।१।
त्रियोजकुम्भो मधुसूदनक्वा-
त्रिकामनादाकूदकशेकपदात् ।
क्षीरोद्भवमिश्रवदिभिमकवम
वेमा प्रयातं भवेव रक्षा ।२।
भवेन कौवाद्रमूत्रकक्ष
पवो विषमाफारिचकरास्यां ।३।
रसिमा च मय बिवर्त रवीन
बलेन वा कौशलेन वावन् ।
तैः शर्करा प्रभवतेऽश्मरी तु
बाधेवैवपूवाविद्युदरैच" ।४।
अथा अर्श्मविनाशाद ।
"पाकमतध्यारकवकमसव
विश्वारणाधावकरणवादात् ।
अर्बुदर हामूल-कटिकाकन्न
विर्ष भवावह रवं भवेत" ।
इति च चरक ।)
पवकोऽश्मर्य्यो वर्जित । तृष्णा यातेन निरोध

मूत्रञ्च चेति ॥ तत्रासंशोधनशीलस्यापथ्यकारिणः प्रकुपितः श्लेष्मा मूत्रसम्पृक्तोऽनुप्रविश्य वस्तिमश्मरीं जनयति । तासां पूर्ब्बरूपाणि वस्तिपीडारोचकौ मूत्रकृच्छ्रं वस्तिशिरोमुष्कशेफसां वेदना कृच्छ्रो ज्वरावसादौ वस्तगन्धित्वं मूत्रस्येति ॥

"यथास्वं वेदनावर्णं दुष्टं सान्द्रमथाविलम् ।
पूर्ब्बरूपेऽश्मनः कृच्छ्रान्मूत्रं सृजति मानवः" ॥

अथ जातासु नाभि-वस्ति-सेवनी-मेहनेष्वन्यतमस्मिन् मेहतो वेदना मूत्रधारासङ्गः सरुधिरमूत्रता मूत्रविकिरणञ्च गोमेदकप्रकाशमनाविलं ससिकतं विसृजति धावन-लङ्घन-प्लवन-पृष्ठयानाध्वगमनैश्चास्य वेदना भवति ॥

तत्र श्लेष्माश्मरी श्लेष्मलमत्यभ्यवहरतोऽध्यर्थमुपलिप्याध परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतिघाताद्दाल्यते भिद्यते निस्तुद्यत इव च वस्तिर्गुरुः शीतश्च भवति । अश्मरी चात्र श्वेता स्निग्धा महती कुक्कुटाण्डप्रतीकाशा मधूकपुष्पवर्णा वा भवति तां श्लैष्मिकीमिति विद्यात् ॥

पित्तयुक्तस्तु श्लेष्मा संघातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतीघातादुष्यते चूष्यते दह्यते पच्यते इव वस्तिरुष्णवातश्च भवति । अश्मरी चात्र सरक्ता पीतावभासा कृष्णा भल्लातकास्थिप्रतिमा मधुवर्णा वा भवति तां पैत्तिकीमिति विद्यात् ॥

वातयुक्तस्तु श्लेष्मा संघातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतीघातात्तीव्रा वेदना भवति तथात्यर्थं पीड्यमानो दन्तान् खादति नाभिं पीडयति मेढ्रं मृद्नाति वायुं स्पृशति विशर्द्धते विदहति वातमूत्रपुरीषाणि कृच्छ्रेण चास्य मेहतो निःसरन्ति । अश्मरी चात्र श्यावा परुषा विषमा खरा कदम्बपुष्पवत् कण्टकाचिता भवति तां वातिकीमिति विद्यात् ॥

प्रायेणैतास्तिस्रोऽश्मर्य्यो दिवास्वप्न-समशनाध्यशन-शीत-स्निग्ध-गुरु-मधुराहारप्रियत्वादिशेषेण बालानां भवन्ति तेषामेवाल्पवस्तिकायत्वादनुपचितमांसत्वाच्च वस्ते सुखग्रहणाहरणा भवन्ति ॥ महतान्तु शुक्राश्मरी शुक्रनिमित्ता भवति । मैथुनाभिघातादतिमैथुनाद्वा शुक्रञ्च तिलमनिर्गच्छद्विमार्गगममनादनिलोऽभितः सम्पच्य मेढ्रवृषणयोरन्तरे सञ्चरति संहृत्य चोपशोषयति सा मूत्रमार्गमावृणोति मूत्रकृच्छ्रं वस्तिवेदनां वृषणयोश्च श्वयथुमापादयति पीडितमात्रे च तस्मिन्नेव प्रदेशे प्रविलयमापद्यते तां शुक्राश्मरीमिति विद्यात् ॥

अस्याश्चिकित्सा यथा ॥

"अश्मरी दारुणो व्याधिरन्तकप्रतिमो मतः ।
औषधैस्तरुणः साध्यः प्रवृद्धश्छेदमर्हति ॥
तस्य पूर्ब्बेषु रूपेषु स्नेहादिक्रम इष्यते ।
तेनास्यापचयं यान्ति व्याधेर्मूलान्यशेषतः ॥
घृतैः क्षारैः कषायैश्च क्षीरैः सोत्तरवस्तिभिः ।
यदि नोपशमं गच्छेत् छेदस्तत्रोत्तरो विधिः ॥
कुशलस्यापि वैद्यस्य यतः सिद्धिरियं ध्रुवा ।
उपक्रमो जघन्योऽयमतः स परिकीर्त्तितः ॥
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत् ।
तस्मादापृच्छ्य कर्त्तव्यमीश्वरं साधुकारिणा" ॥

अथ रोगान्वितमुपस्निग्धमपहृतदोषमीषत् कर्शितमभ्यक्तस्विन्नशरीरं भुक्तवन्तं कृतबलिमङ्गलस्वस्तिवाचनमयोपकरणोक्तेन विधानेनोपकल्पितसम्भारमाश्वास्य ततो बलवन्तमविक्लवमाजानुसमे फलके प्रागुपविश्य पुरुषस्योत्सङ्गे निषण्णपूर्ब्बकायमुत्तानमुन्नतकटीकं वस्त्राधारकोपविष्टं सङ्कुचितजानुकूर्परमितरेण सहावबद्धं सूत्रेण शाटकैर्वा ततः स्वभ्यक्तनाभिप्रदेशस्य वामपार्श्वं विमृद्य मुष्टिनावपीडयेदधो नाभेर्यावदश्मर्य्यध प्रपन्नेति । ततः स्नेहाभ्यक्ते कृतनखे वामहस्तप्रदेशिनीमध्यमे पायौ प्रणिधायानुसेवनीमासाद्य प्रयत्नबलाभ्यां पायुमेढ्रान्तरमानीय निर्व्वलीकमनायतमविषमञ्च वस्तिं सन्निवेश्य भृशमुत्पीडयेदङ्गुलिभ्यां यथाग्रन्थिरिवोन्नतं शल्यं भवति ॥

"सचेदगृहीतशल्ये तु विवृताक्षो विचेतनः ।
हतवद्गलम्बशीर्षश्च निर्विकारो मृतोपमः ॥
न तस्य निर्हरेच्छल्यं निर्हरेत्तु म्रियेत सः ।
विना त्वेतेषु रूपेषु निर्हर्त्तुं समुपाचरेत् ॥"

इति सुश्रुतः ॥

"यवोरजः श्वदंष्ट्राचिरं मधुना सह योजयेत् ।
अश्मरीं विनिहन्त्याशु मूत्रकृच्छ्रञ्च दारुणम् ॥"

॥•॥ लौहप्रयोगः ॥•॥

इति वैद्यकरसेन्द्रसारसंग्रहः ॥)

अश्मरीघ्नः, पुं, (अश्मरीं मूत्रकृच्छ्रं हन्ति । अश्मरी + हन् + टक् ।) वरुणवृक्षः । इति त्रिकाण्डशेषः ॥

अश्मरीहरः, पुं, (अश्मरीं हरति । अश्मरी + हृ + अच् ।) धान्यविशेषः । इति रत्नमाला ॥ दे धान इति ख्यातः ।

"वदरं कामवातघ्नो भेदी योध्यादश्मरीहरः" ।

इति वैद्यकद्रव्यगुणः ॥)

अश्मसारः, पुं, क्ली, (अश्मनः सारः ।) लौहः । इत्यमरः ॥ ("प्रायाः सलरमश्मसारकठिना गच्छन्ति गच्छन्त्वमी" । इति साहित्यदर्पणे ।)

अश्मीरः, पुं, क्ली, (अश्मन् + ईरः ।) अश्मरीरोगः ॥ इत्युणादिकोषः ॥

अश्मोत्थं, क्ली, (अश्मनः उत्तिष्ठति यत् । उत् + स्था + क ।) शिलाजतु । इति राजनिर्घण्टः ॥

अश्रं, क्ली, (अश्नुते व्याप्नोति नेत्रं कण्ठं वा अश् + रक् ।) नेत्रजलम् । इत्युणादिकोषः ॥

("वामश्चास्या नवजलमयं मोचयिष्यत्यवश्यं" ।

इति मेघदूते ॥

"सखीभिरश्रोत्तरमीक्षितामिमाम्" । इति कुमारे ।) रक्तम् । इत्यमरटीका ॥

अश्रद्दधानः, त्रि, (न श्रद्दधानः । नञ्तत्पुरुषः ।) श्रद्धाहीनः । यथा देवलः ।

"प्रत्ययो धर्म्मकार्य्येषु तथा श्रद्धेत्युदाहृता ।
नास्ति ह्यश्रद्दधानस्य धर्म्मकृत्ये प्रयोजनम्" ॥

इति श्राद्धतत्त्वम् ॥

अश्रद्धा, स्त्री, (न श्रद्धा । नञ्तत्पुरुषः ।) शास्त्रार्थे अदृढप्रत्ययः । यथा,—

"विधिहीनं भावदुष्टं कृतमश्रद्धया च यत् ।
तद्धरन्त्यसुरास्तस्य मूढस्य दुष्कृतात्मनः" ॥

इति श्राद्धतत्त्वम् ॥ (मानसिकवृत्तिभेदः । यथा श्रुतौ,—

"कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्व्वं मन एव" ॥

"अश्रद्धया च यद्दत्तं तत्तामसमुदाहृतम्" ॥

इति गीतायाम् ।)

अश्रद्धेयः, त्रि, श्रद्धानर्हः । अनादरणीयः । शास्त्रार्थादृढप्रत्ययविषयः । श्रत् शब्दपूर्ब्बक धाधातोर्यप्रत्यये पश्चान्नञ्समासेन निष्पन्नः ॥ ("किमनेनाश्रद्धेयव्याधवचनप्रत्ययमात्रपरिस्फुरितेनाशुभेन" । इति पञ्चतन्त्रे ।)

अश्रपः, पुं, स्त्री, (अश्रं रक्तं पिबति यः । अश्र + पा + क ।) राक्षसः । इत्यमरः ॥

अश्राद्धभोजी, [न्] त्रि, (न श्राद्धभोजी । नञ्तत्पुरुषः ।) श्राद्धान्नाभक्षकः । यथा । दुर्गसिंहोऽपि अश्राद्धभोजीत्यस्य सति भोजने अश्राद्धमेव भुङ्क्ते न श्राद्धमिति न नियमः । तथात्वे व्रतलोपः स्यात् । इति प्रायश्चित्ततत्त्वम् ॥

अश्राद्धी, [न्] पुं, (अश्राद्धमस्त्यस्य । अश्राद्ध + इन् ।) श्राद्धपाकयज्ञशून्यः । यथा मनुः ।

"नाद्यात् शूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः ।
आददीताममेवास्मादवृत्तावेकरात्रिकम्" ॥

अश्राद्धिनः श्राद्धपाकयज्ञशून्यस्य । इत्याह्निकाचारतत्त्वम् ॥

अश्राद्धेयः, पुं, (न श्राद्धेयः । नञ्समासः ।) श्राद्धानर्हः । श्राद्धायोग्यब्राह्मणः । यथा । षष्ठिकाक्ष्यपौ,—

"पितुर्गेहे च या कन्या रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥
यस्तु तां वरयेत् कन्यां ब्राह्मणो ज्ञानदुर्ब्बलः ।
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम्" ॥

इत्युद्वाहतत्त्वम् ॥

अश्रान्तं, क्ली, (अविद्यमानः श्रान्तमत्र । नञ्समासः ।) अनवरतम् । नित्यम् । इत्यमरः ॥ श्रमरहिते त्रि ॥

अश्रान्तः, त्रि, श्रमरहितः । यथा । "अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा जिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना । पूर्व्वं गाधिसुतेन सामिघटिता मुक्तानु मन्दाकिनी यत् प्रासादुकूलवल्लिरनिलान्दोलैरखेलद्दिवि" ॥ इति नैषधे १ सर्गः ॥

अश्रि, स्त्री, (अश्नाति अश्नुते वा । अश भोजने अशू व्याप्तौ वा । आश्रीयते प्राप्तार्थम् । अब्दिशिषलिभ्या क्रश्चेति इन् स च कित् डिलात् टिलोपः आडो ह्रस्वश्च ।) गृहादेः कोणः । इति हेमचन्द्रः ॥ पक्षादेरग्रभागः । इत्यमरः ॥

("स्वच्छ राज्ञः कुचयोः कुचिवाग्नोरजातं" ।
इति कुमारे ।
"अजो यः स च यस्माजोऽप्यजितो जनतोऽप्यजित
वै यथा" । इति वेदवैद्यकाच्ये ।)

अजी, स्त्री, धनिका । [illegible] । इत्यमर
टीका ।

आकाशः, पु, क्ली, (आ समन्तात् काशन्ते दीप्यन्ते सूर्य्यादयो यत्र । आ + काश् + घञ् ।) पञ्चभूतान्तर्गतभूतविशेषः । स तु शून्यः । तत्पर्य्यायः । द्योः २ द्यौः ३ अभ्रं ४ व्योम ५ व्योम ६ पुष्करं ७ अम्बरं ८ नभः ९ अन्तरीक्षं १० अन्तरिक्षं ११ गगनं १२ अनन्तं १३ सुरवर्त्म १४ खं १५ वियत् १६ विष्णुपदं १७ विहायः १८ । इत्यमरः ॥ नाकः १९ अनन्तः २० नभसं २१ मेघवेश्म २२ महाविलं २३ । इति जटाधरः ॥ मरुद्वर्त्म २४ मेघवर्त्म २५ त्रिपिष्टपं २६ । इति शब्दरत्नावली ॥ न्यायमते अस्य सामान्यगुणाः संख्यादि पञ्च । विशेषगुणः शब्दः । स तु नित्य अशरीरी च । अस्येन्द्रियं कर्णः । सत्वेकः किन्तु उपाधिभेदेन नाना भवति ।
("शब्दः श्रोत्रेन्द्रियञ्चापि छिद्राणि च विविक्तता ।
वियतः कथिता ह्येते गुणागुणविचारिभिः" ॥
तथा च भाषापरिच्छेदे ।
"आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ।
इन्द्रियं तु भवेत् श्रोत्रमेकः सन्नप्युपाधितः" ॥)
वेदान्तमते स जन्यः ॥

आकाशगङ्गा, स्त्री, (आकाशपथवाहिनी गङ्गा ।) स्वर्गङ्गा । यथा, शिवरात्रिव्रतकथायां,—
"आकाशगङ्गासलिलतरङ्गगणादिते ।
त्रैगुण्यजलितेत्यागमद्रिपयोधिते" ॥
("नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे" ।
इति रघौ १ । ७८ ।
"उभौ यदि व्योम्नि पृथक् प्रवाहा-
वाकाशगङ्गापयसः पतेताम्" । इति माघः ।)

आकाशजननी [न्] पु, (आकाशमार्गस्य जननी ।) प्रगण्डीमध्यस्थितजानां वाह्यार्थदर्शनार्थानि चतुष्कच्छिद्राणि । यद्द्वारा आग्नेयास्त्रगुलिकाः प्रक्षिप्यन्ते । इति राजधर्म्मः ॥ (आकाशजननी स्त्री आकाशपथस्य जननीव पोषिका । इति केचित् ।)

आकाशदीपः, पु, (आकाशे दीयमानो दीपः ।) कार्त्तिकमासे भगवदुद्देशेन नभसि दत्तप्रदीपः । यथा । कार्त्तिके आकाशदीप उक्तो निर्णयामृते पुष्करपुराणे ।
"तुलायां तिलतैलेन सायकाले समागते ।
आकाशदीपं यो दद्यात् मासमेकं हरिं प्रति ॥
महतीं श्रियमाप्नोति रूपसौभाग्यसम्पदम्" । इति तद्विधिश्च हेमाद्रौ आदिपुराणे ।
"दिवाकरेऽस्ताचलमौलिभूते
गृहाददूरे पुरुषप्रमाणं ।
यूपाकृतिं यज्ञियवृक्षदारु-
मारोप्य भूमावथ तस्य मूर्द्ध्नि ॥
यवाङ्कुरच्छिद्रयुताष्टु मध्ये
दिक्षस्तदीर्घा अथ पट्टिकास्तु ।
कृत्वा चतस्रोऽष्टदलाकृतीस्तु
याभिर्भवेद्दृष्टदिशानुसारी ॥
तत्कर्णिकायान्तु महाप्रकाशो
दीपः प्रदेयो दलगास्तथाष्टौ ।
निवेद्य धर्म्माय हराय भूम्यै
दामोदरायाप्यथ धर्म्मराजे ॥
प्रजापतिभ्यस्त्वथ सत्पृभ्यः
प्रेतेभ्य एवाथ तमःस्थितेभ्यः" । इति ।
अपरार्कोक्तमन्त्रो यथा,—
"दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे" ॥
इति निर्णयसिन्धौ २ परिच्छेदे कार्त्तिकमाहात्म्यं ॥

आकाशप्रदीपः, पु, (आकाशे दीयमानः प्रदीपः ।) तुलायां दीयमानलक्ष्मीदामोदरसम्प्रदानाकाशदीपः । तथाच ब्रह्माण्डपुराणे ।
"तुलायां तिलतैलेन सायं सन्ध्यासमागमे ।
आकाशदीपं यो दद्यात् मासमेकं निरन्तरं ।
सश्रीकाय श्रीपतये स श्रीमान् भुवि जायते ॥
ॐ दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे ॥
इति मन्त्रेण यो दद्यात् प्रदीपं सर्पिरादिना ।
आकाशे मण्डपे वापि स चाक्षयफलं लभेत् ।
विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकं ॥
अग्निष्टोमसहस्रस्य फलमाप्नोति मानवः" ॥

आकाशमांसी, स्त्री, (आकाशजाता मांसी ।) सूक्ष्मजटामांसी । केदारे उत्पत्तिरस्याः । तत्पर्य्यायः । गिरिजाम्भा २ खसम्भवा ३ शैवाली ४ सूक्ष्मपत्री ५ गौरी ६ पर्व्वतवासिनी ७ अश्ममांसी ८ । अस्या गुणाः । हिमत्वं । शोषव्रणनाड़ीरोगनाशित्वं । लूतागर्द्दभपाञ्चाकाहारित्वं । वर्णकारित्वञ्च । इति राजनिर्घण्टः ॥

आकाशमूली, स्त्री, (आकाशे भूमिरहितस्थाने मूलमस्याः । ङीप् ।) कुम्भिका । इति हारावली ॥ पाना इति ख्याता । (कुम्भिकाशब्देऽस्या गुणा ज्ञेयाः ।)

आकाशरक्षी [न्] पु, (आकाशे उच्चस्थाने स्थितः सन् रक्षतीति । आकाश + रक्ष + णिन् ।) प्रगण्डीस्थितप्रणिधिः । दुर्गवहिः प्राचीरोपरिस्थितचरः । इति राजधर्म्मः ॥

आकाशवल्ली, स्त्री, (आकाशस्य वल्लीव । अत्युच्चशिखत्वात् ।) लताविशेषः । आकाशवेल अमरवेल इति ख्याता । तत्पर्य्यायः । खवल्ली २ दुस्पर्शा ३ व्योमवल्लिका ४ । अस्या गुणाः । मधुरत्वं । कटुत्वं । पित्तानिलत्वं । शुक्रवर्द्धकत्वं । रसायनत्वं । बलकारित्वं । दिव्यौषधिपरत्वं । इति राजनिर्घण्टः ॥
"आकाशवल्ली तु बुधैः कथितामरवल्लरी ।
खवल्ली ग्राहिणी तिक्ता पिच्छिलाक्ष्यामयापहा ॥
तुवराग्निकरी हृद्या पित्तश्लेष्मामनाशिनी" ।
इति भावप्रकाशः ॥

आकाशवल्ली, स्त्री (आकाशमाश्रिता वल्ली।) अमर वल्लरिति भाषा। देववल्ली। इति राजनि।

आकाशसलिल, क्ली, (आकाशात् पतितं सलिलं यस्य) शिशिरार्थं। इति राजनिर्घण्टः।

आकिञ्चन्य क्ली (अकिञ्चनस्य दरिद्रस्य भावः। अकिञ्चन+ष्यञ्।) अकिञ्चनता।

आकीर्ण त्रि, (आङ्+कॄ विक्षेपे+क्त।) व्याप्तं। तत्पर्य्यायः। सङ्कीर्ण २ सङ्कुल ३। इत्यमरः। समाकीर्ण ४। इति शब्दरत्नावली। (यथा रघुवंशे। प्रथमसर्गे। घोषः।

"आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः"॥)

अपत्यैरिव नीवारभागधेयोचितैर्मृगैः। इति भरतः।

आकुञ्चन त्रि, (आङ्+कुचि+ल्युट्।) आकर्षणे वक्रीकरणकर्म्मनिर्वर्त्तकधर्म्मविशेषः। सङ्कोचः। (प्रसारितस्य सङ्कोचनकर्म्मास्य। समस्य। सकल कर्म्मारम्भ। यथा। भाषापरिच्छेदे।

"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।

प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च"॥)

आकुल, त्रि, (आङ्+कुल+क।) व्याकुलः। व्याप्तः। व्यस्त २ अप्रगुण ३। इत्यमरः। (यथा रघुवंशे। "विषमेऽपि गाहते प्रविशन्नकुल"॥)

आकूत स्त्री (आङ्+कूङ्+क्त) अभिप्रायः। आशयः। इति शब्दरत्नावली। भावः। इच्छा। यथा कादम्बर्य्याम्। २य परिच्छेदे।

"स्वस्थभावापितामूर्च्छ गीतायते निमीलितं"। इति "प्रकटितमिदं भावाकूतं समक्षमिवेक्षते"।

इति शकुन्तले।)

आकृति, स्त्री, (आक्रियते इदं गौरयं अयं इति अनयेति। आङ्+कृ+क्तिन् ।) रूपं। शरीरं। जातिः। इति मेदिनी। (यथा रघुवंशे प्रथमसर्गे।

"आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः"।

आकारो आकृतिः, जातिः। "आकृतिर्जाति लिङ्गाख्या"। इति न्यायसूत्रम्। जातिलिङ्ग विज्ञापका यथा शिरःपाण्यादिर्विलक्षणसंस्थान विशेषो लिङ्गम्। तस्य च तन्मात्रा प्रमाणधि-कम्। भर्तृहरिणा तस्य जातिस्वरूपत्वादाकृतिरिव वर्ण्यते जातिः इति परिचयः।)

आकृतिच्छत्रा, स्त्री, (आकृत्या छत्रमिव या।) घोषा लतिका। घोषलता इति भाषा। इति राज-निघण्टः। (घोषकसदृशा लताविशेषो घोषः।)

आकृष्ट, त्रि, (आङ्+कृष्+कर्म्मणि+क्त।) कृताकर्षणः। आकर्षितः। (प्रलोभितः, पुरुषः। यथा किरातार्जुनीये। "असौ चौलामृष्टेन कश्चित् ... ")

आक्रन्द, पुं, भ्रातृपालकः। इति शब्दरत्नावली।

आक्रन्द, पुं, (आङ्+क्रन्द+घञ् वा।) रोदनं। यथा रामायणे।

("रावणारम्भ्यमानेन तत्रैवाक्रन्दतः" ।) आह्वानं। मित्रं। दारुणयुद्धं। भ्राता। इति मेदिनी। यथा रामायणे।

"तवैव विद्धि सखायमाक्रन्द शूद्रे महान्"।) त्राता। मार्ष्टियायात् भटो राज्ञा। इति भरतः। (यथा माघे ७। २०।

"आक्रन्दनाद मधिकं दधतां मदान्धे")।

आक्रम, पुं, (आङ्+क्रम्+घञ्।) आक्रमणं। तत्पर्य्यायः। अधिक्रम २ क्रान्ति ३। इति हेमचन्द्रः। (अतिक्रमः। व्याप्ति। विक्रमः। अतिक्रमः। प्राप्ति। अधिकारः।)

आक्रमण, क्ली, (आङ्+क्रम्+ल्युट्।) आक्रमकरणं। ("न प्रयाति बलाक्रान्ति दैवात्सम्बाधायति"। इति मुग्धबोधः।) आक्रम। (अतिक्रमः। यथा, रामायणे।

"रावणाक्रमणव्याप्तां समस्त गमिष्यति"।

आरोहणम्। यथा रामायणे।

"न दैवमेवाक्रमणं नामरसमत्र हस्ते"।)

आक्रान्त, त्रि (आङ्+क्रम+क्त) कृताक्रमणः। अभिभान्तः। आक्रमविशिष्टः। इति शब्दमाला। (अभिभूतः। पराभूतः। बद्धभूतः। यथा मनुः— "न शत्रुभिरुपाक्रान्तः मोचयन्त्युत्तमैरपि"॥)

आक्रीड, पुं, (आङ्+क्रीड+घञ्।) उद्यानविशेषः। राज्ञा साधारणं वनम्। इत्यमरः। (क्रीडावनं, क्रीडास्थानं। यथा, रामायणे।

"आक्रीडानृपि वीर्त्तं तपस्यां सुखप्रदम्"।

यथा च कुमारे। २। ४०।

"यत्कीडन्ती क्षान्त वल्लिरा बोधु रोमशः"।

कुक्कुटाश्रमपदेषा कलाभरक्षा गौरवाः"।

यथा हरिवंशे।

"दुर्गस्थस्तु यदा तत्र कुरङ्गमा मयोकरः।

कुरुभामारयाक्रीडमारभस्य चाक्रमात्"॥)

आक्रोश, पुं, (आङ्+क्रुश+घञ्।) दोषाकीर्त्तन-निन्दा। तत्पर्य्यायः। आक्षेपः २ अभिषङ्गः ३ शापः ४। इति हेमचन्द्रः। (यथा रामायणे।

"आक्रोश ममसमातुल प्रमाण्य दशमेव" इति।)

आक्रोशन,स्त्री (आङ्+क्रुश्+ल्युट्।) अभिशापः। तत्पर्य्यायः। अभिषङ्गः २ अभीषङ्ग ३। इत्यमरः।

आक्षपाटिक, पुं, (अक्षपटे नियुक्तः। अक्षपट+ठक्) आक्षदर्शकः। धर्म्माध्यक्षः। इति जटाधरः।

आक्षपाद, पुं, (अक्षपाद+अण्) नैयायिकः। इति शब्दरत्नावली।

आक्षारणा, स्त्री स्त्री, (आङ्+क्षर+णिच्+युच्।) मैथुनं प्रति आक्रोशः। इत्यमरः। परस्त्री-निमित्त दण्डः परपुरुषनिमित्त स्त्रिया वा दूषणं। यथा "क्षत्रियमागमवर्ज्जं आक्षारणं उक्तम्"। इति भरतः। कलङ्कारोपः इति भाषा।

आक्षारित त्रि, (आङ्+क्षर+णिच्+क्त।) पर स्त्रियो परपुरुषे वा मैथुनं प्रति निन्दादूषितः। अभिशस्तः। इत्यमरः।

आक्षिक, पुं, आच्छुकवृक्षः। इति रत्नमाला। आचिर गाछ इति भाषा। (द्यूतविनिमयः। द्यूत क्रीडाविषयकः। अक्ष आक्षेरीव्यति जितो वा इति अक्ष+ठञ्। यथा मनौ ८म।१५९

"प्रातिभाव्यं वृथादानमाक्षिकं सौरिकञ्च यत्।

तदत्र पुत्रो न दाप्यः स्यात् तत्पुत्रोऽपि च" ॥

("प्रतिभाव्यप्रपन्न दण्डशुल्कावशेषकम्।

न पुत्रो दातुमर्हति पितृदेयं कदाचन" ॥)

इति चरकः।

"आक्षिका मन्दरोगघ्नो रक्त पयाष्टको" इति सुश्रुतः।)

आक्षीव पुं, (आङ्+क्षीव+अच्।) अक्षीवः। शोभाञ्जनवृक्षः। इति राजनिर्घण्टः।

आक्षेप, पुं, (आङ्+क्षिप्+घञ्।) भर्त्सनं। इत्यमरः। अपवादः। (यथा—नीतिशतके।४५।

"आक्षेपरावेरनतार्थश्रुतिरतुलतापवृत्तिकलुषपदस्पृशां स्मृता नार्थमेव तथा कथयति तथामता क्षिप्तमतिर्मनसा आकर्षणं।

("स्वकृदितमङ्गलाद्भुतयां शस्यवीरां।

शरवणमवरुध्य तल्पकाक्षेपमीशः" ।

इति कुमारे। ७। ८१। निन्दा। अपवादः।

"सर्वोपदेशो घोषवत्यायक्ष

मोदितेनाक्षेपिकान्नतीरे।

यस्तत्र कपोलौ परतामयतात्" ।

इति कुमारे। ७। १० आकर्षणं। यथा,— "वर्णपुत्राक्षेपविकम्पितानां"। १। १४ कुमारे। अपहितिः। यथा कार्त्तिकस्तवम्।

"भुजाक्षेपकरतलो राजपौर्व्यगतिकाले"।

इति।) काव्यालङ्कारः। इति मेदिनी। (अल-ङ्कारप्रकरणे विशेषो लक्षणा।)

आक्षेपक पुं, (आङ्+क्षिप्+ण्वुल्।) निन्दकः। व्याधः। इति मेदिनी। वातरोगविशेषः। यथा भावप्रकाशे। निदाने यथा—

"यदा तु धमनीः सर्वाः कुपितोऽभ्येति मारुतः।

तदा क्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चरः।

मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृतः"।

आक्षोट, पुं, (अक्षोट एव स्वार्थे अण्।) अक्षोट वृक्षः। पर्वतपीलुवृक्षः। इति शब्दरत्नावली।

("वातामाभिषवाक्षोटमुकूलकतिलोत्कट।

गुरूष्णस्निग्धमधुरा बीजपाका चलाः॥

वातघ्ना बृंहणा वृष्याः कफपित्ताभिवर्द्धनाः"॥

इति चरकः।)

आखेट, पुं, आखेटकः। इत्यमरटीकायां भरतः।

आखेटक, क्ली, (आङ्+खिट्+ण्वुल्।) मृगया। इत्यमरः।

आखण्डल पुं, (आङ्+खडि+कलच्।) इन्द्रः। इत्यमरः। (यथा कुमारसम्भवे। प्रथमसर्गे।११।

"आखण्डलः काममिदं बभाषे"।)

आखनिक, पुं, (आङ्+खन+इकन्।) चौरः। मूषिकः। शूकरः इति मेदिनी। (खनित्रम्। खननसाधनम्। खन्यत्री।)

आखात, पुं, क्ली, (आङ्+खन्+क्त।) अखातं। देवखातं। इत्यमरटीकायां रायमुकुटः।

आखु,पुं, (आङ्+खन+डु।) मूषिकः। इत्यमरः। (यथा नीतिशतके। "आखुरयं विवरं कृत्वा विवरी भीतं मुखे भोगिनः") शूकरः। चौरः।

इति हेमचन्द्रः ॥ देवताड़वृक्षः । इति रत्नमाला ॥

(आखुमांसगुणा यथा,—

("आखोर्मांसं यदि बहुधा खण्डखण्डीकृतं यत्तैले

पाच्यं द्रवति नितरां यावदेतन्न सम्यक् ।

तत्तैलाक्तं वसनमनिशं योनिमार्गे दधाना,

हन्ति व्रीडाकरभगफलं नात्र सन्देहबुद्धिः" ॥

इति वैद्यकचक्रपाणिसंग्रहः ॥)

आखुकर्णी, स्त्री (आखोः कर्णमिव पत्रमस्याः । आखुकर्ण+ङीप्) लताविशेषः । मूषाकाणी इति भाषा । तत्पर्य्यायः । द्रवन्तिका २ द्रवन्ती ३ चित्रा ४ सुवर्णा ५ उन्दुरुकर्णी ६ न्यग्रोधी ७ मूषककर्णी ८ वृश्चिकर्णी ९ बहुकर्णिका १० माता ११ भूमिचरी १२ घण्टा १३ शम्बरी १४ बहुपादिका १५ प्रत्यक्श्रेणी १६ रवा १७ पुत्रश्रेणी १८ न्यग्रिभू १९ । अस्या गुणाः । कटुत्वम् उष्णत्वम् । कफपित्तहरत्वम् । सारकत्वम् । आनाहज्वरशूलनाशित्वम् । परमपावकत्वम् । इति राजनिर्घण्टः ॥

"आखुपर्णी आखुकर्णी कर्णिका भूदरीभवा ।

आखुकर्णी कटुस्तिक्ता कषाया शीतला लघुः ॥

विपाके कटुका मूत्रकफामयक्रिमिप्रणुत्" ।

इति भावप्रकाशः ॥

आखुग, पु, (आखुना गच्छति य । गणेशस्य मूषिकवाहनत्वात् तथात्वम् ।) गणेशः । इति हेमचन्द्रः ॥

आखुपर्णिका, स्त्री, (आखोः कर्णमिव पर्णमस्याः ।) लताविशेषः । इति रत्नमाला ॥ इन्दुरकाणी इति भाषा । (आखुपर्णीशब्दे आखुकर्णीशब्दे चास्या गुणादयो ज्ञातव्याः ॥)

आखुपर्णी, स्त्री, (आखोः कर्णमिव पर्णमस्याः ।) आखुपर्णिका । इति रत्नमाला ॥

"मुस्ताखुपर्णीफलदारुशिग्रु-

क्वाथः सकृष्णा क्रिमिशत्रुकल्कः ।

मार्गद्वयेनापि चिरप्रवृत्तान्

क्रिमीन्निहन्यात् क्रिमिजांश्च रोगान्" ॥

इति वैद्यकचक्रपाणिसंग्रहः ।

"आखुपर्णीकिशलयैः सुपिष्टैः पिष्टमिश्रितैः ।

पक्वा पूपलिका खादेद्धान्याम्लञ्च पिबेदनु" ॥

इति वाभटः ॥ गुणादयोऽन्येऽस्या आखुकर्णीशब्दे ज्ञातव्याः ॥)

आखुपाषाणः, पु, पाषाणभेदः । आखुपाषाणनामोऽयं लोहसंकरकारकः । इति राजनिर्घण्टः ॥

आखुभुक् [ज्] पु, (आखून् भुङ्क्ते य । आखु+भुज्+क्विप्) बिड़ालः । इत्यमरः ॥

आखुरथ, पुं, (आखुः रथो वाहनं यस्य ।) गणेशः । इति हलायुधः ॥

आखुविषहा, स्त्री, (आखोर्विषं हन्ति या ।) देवताड़वृक्षः । इति जटाधरः ॥ देवदालीलता । इति राजनिर्घण्टः ॥

आखेटः, पु, (आङ्+खिट्+घञ्) मृगया । इत्यमरः ॥ शिकार इति भाषा । ("शुभमाखेटभूमित्वम्" । कथासरित्सागरे १५ । १२० ।

आखेटकः, पु, (आङ्+खिट्+ण्वुल् ।) मृगया । इति शब्दरत्नावली ॥ यथा पद्मवन्ये ।

"आखेटकस्य धर्म्मेण विभवाः स्युर्वशे नृणाम् ।

नृप्रभा प्रेरयत्येको हन्त्यन्योऽत्र मृगानिव" ॥)

आखेटशीर्षक,क्ली, कुट्टिमभेदः । इति शब्दरत्नावली सुड़ङ्ग इति भाषा । (यदुक्तम् ।

"कपिशीर्षे द्रुमशीर्षे तथाचाखेटशीर्षकम् ।

इति कुट्टिमभेदाः स्युः शाब्दिकैः समुदाहृताः" ।)

आखेटिक, पु, (आखेटे मृगयायां कुशलः । आखेट+ठक् ।) मृगयाकुशलकुक्कुरः । तत्पर्य्यायः । आखेटिकः २ विश्वकद्रुः ३ । इति हारावली ॥ (मृगयाकर्त्ता । भासजनकः । भयङ्करः । मृगयुः । व्याधः ।)

आखोट, पुं, (आख+उट् ।) फलवृक्षविशेषः । आखरोट् इति भाषा । तत्पर्य्यायः । पार्व्वतीयः २ फलस्नेहः ३ गुड़ाशयः ४ कीरेष्टः ५ कन्दरालः ६ मधुमज्जा ७ वृहच्छदः । अस्य गुणाः । मधुरत्वम् । मलकारित्वम् । स्निग्धत्वम् । उष्णत्वम् । वातपित्तनाशित्वम् । रक्तदोषप्रशमनत्वम् । शीतलत्वम् । कफकोपनत्वम् । इति राजनिर्घण्टः ॥ (आक्षोड़शब्दे आक्षोटशब्दे चास्य गुणादिकं ज्ञेयम् ॥)

आख्या, स्त्री, (आङ्+ख्या+अङ्+टाप्) नाम । संज्ञा । इत्यमरः ॥ यथा कुमारसम्भवे १ । २६ ।

"उमेति मात्रा तपसो निषिद्धा

पश्चादुमाख्यां सुमुखी जगाम" ।

आख्यात, त्रि, (आङ्+ख्या+क्त) कथितः । उक्तः । इत्यमरः ॥ (प्रथित, प्रसिद्ध, प्रकाशित ।) व्याकरणोक्तधातूत्तरविहिततिङ्प्रत्ययादि ॥

आख्यान, क्ली, (आङ्+ख्या+ल्युट्) कथनम् । यथा

"कथितं मङ्गलाख्यानं ब्रह्मपुत्र यथागमम् ।

देवी मङ्गलचण्डी या तदाख्यानं निशामय" ॥

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४१ अध्यायः ॥

आख्यायिका, स्त्री, (आङ्+ख्या+ण्वुल् । टाप् ।) उपलब्धार्थकथा । इत्यमरः ॥ इतिहास उपन्यास इति ख्याता ॥ (आख्यायिकालक्षणं । यथा,—

"प्रबन्धकल्पना स्तोकसत्या प्राज्ञाः कथां विदुः ।

परम्पराश्रया या स्यात् सा मताख्यायिका क्वचित्"

इति च साहित्यदर्पणे ।

"आख्यायिका कथावत्स्यात् कवेर्वंशादिकीर्त्तनं"

आग, [स्] क्ली, पापं । अपराधः । इत्यमरः ॥ (यथा शिशुपालवधे ३य सर्गे १०८ श्लोकः ।

"सद्विष्ये शतमागांसि सूनोस्ते इति यत्त्वया" ।)

आगत, त्रि, (आङ्+गम्+क्तः ।) आयातः । उपस्थितः ॥ (लब्धः । प्राप्तः यथा, हितोपदेशे ।

"आगतन्तु भयं वीक्ष्य प्रतिकुर्य्याद् यथोचितम्" ।)

आगन्तुः, त्रि, (आङ्+गम्+तुन् ।) अतिथिः । इत्यमरः ॥ आगमनशीलः । अनियतः ॥ ("अकस्मादागन्तुना सह विश्वासो न युक्तः" । इति हितोपदेशः ।) आकस्मिकरोगादि । यथा,

"आगन्त्वपि शरीरशल्यव्यतिरेकेण यावत्सोभावा दुःखमुत्पादयन्ति" । इति सुश्रुतः ।

निजागन्तुभेदेन रोगस्य द्वारणद्वैविध्यादागन्तुशब्दोऽयमामयस्यान्यतरकारणवाची ।

तद्यथा,—

"द्विविधा पुनः प्रकृतिरेषामागन्तुनिजविभागात्" । "मुखेनानि तु खल्वागन्तोर्नखदशनपतनाभिचाराभिशापाभिषङ्गवधबन्धपीड़न रज्जु दहन मन्त्राशनि-भूतोपसर्गादीनि" ।

"आगन्तुर्हि व्यथापूर्व्वमुत्पन्नो जघन्यं वातपित्तश्लेष्मणां वैषम्यमापादयति" ।

उदाहरणं । "तत्रागन्तवच्छेदनभेदनक्षणनभञ्जनपिच्छनोत्पेषणवेष्टनप्रहार-वध-बन्धन-व्यधन पीड़नादिभिर्व्वा । भल्लातक-पुष्पफलरसात्मगुप्ताशूकक्रिमिशूकाहितपत्रलतागुल्मसंस्पर्शनैर्वा स्वेदनपरिसर्पणावमूत्रणैर्व्वा विषिणाम् ॥ सविषाविषप्राणिदन्तविषाणनखनिपातनैर्वा ।

सागरविषवात-हिम-दहन संस्पर्शनैर्व्वा शोथाः समुपजायन्ते" ॥ इति चरकोक्तः ॥

आगन्तुक, त्रि, (आगन्तु+स्वार्थे कन्) आहार्य्यः । अनित्यस्थायि । इति शिक्षाविशेषः ॥ (अज्ञातकुलशीलादिर्नवागत पुरुषः । यथा "तदा च मूलभृत्यानपास्यायमागन्तुकः पुरस्कृतः" । इति हितोपदेशे ॥ अतिथिः । अज्ञातस्वामिकः पश्वादिः । यथा याज्ञवल्क्ये ॥

"भक्तेऽचौर् तृष्यद्व सूतिकागन्तुकादयः ।

पालो येषां तु ते मोच्या दैवराजपरिप्लुताः" ॥

आकस्मिकक्षतादिरोगः । यथा, सुश्रुते ।

"शल्यस्य आशुगमने धातुस्तस्य शल्यमितिस्मृत तत् द्विविधं, शारीरमागन्तुकं च" । इति ॥)

आगम, स्त्री, (आङ्+गम+अच् ।) तन्त्रशास्त्रम् । (अस्यार्थः । यथा तन्त्रशास्त्रे ॥

"आगतं पञ्चवक्त्रात्तु गतञ्च गिरिजानने ।

मतञ्च वासुदेवस्य तस्मादागममुच्यते" ॥ इति

(एतल्लक्षणं यथा,—

"सृष्टिश्च प्रलयश्चैव देवतानां तथार्च्चनं ।

साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च ॥

षट्कर्म्मसाधनं चैव ध्यानयोगश्चतुर्विधः ।

सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदुर्बुधाः" ॥ इति

यथा रघुवंशे । १० । २६ ॥

"बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः")

आगमः, पुं, (आ+गम्+अच् ।) शास्त्रमात्रम् ।)

('आगमादिव तमोपहादितः

सम्भवन्ति मतयो भवच्छिदः" ।

इति किराते । ५ । २२ ।) आगमनम् । इति मेदिनीकरहेमचन्द्रौ ॥ (अर्थादीनामागमः । यथा, नीतिशतके ७३ श्लोके । "नित्यव्यया प्रचुरनित्यधनागमा च" । इति । प्राप्तिः । उपार्जनम् ।

"नाधर्म्मेणागमः कश्चिन्मनुष्यान् प्रति वर्त्तते" ।

इति मनुः ॥)

साक्षिपत्रादि । इति व्यवहारमातृका ॥ प्रकृतिप्रत्ययानुपघाति कार्य्यम् । इति व्याकरणम् ॥ (शास्त्रज्ञानम् । श्रुतवत्ता । यथा,

"आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः" ।

इति रघुवंशे १म सर्गे १५ । यथा च रवौ १४ । ८० ।

"तामर्पयामास च शोकदीनां

[illegible]

आगमनं, क्ली, आङ्पूर्वकगमधातोर्ल्युट्प्रत्ययनिष्पन्नमिदं। आसा इति भाषा॥ (यथा रघुवंशे।
"रामस्यागमने स्वलात् भरतागमनं पुरा"।
प्रतीक्षणा। यथा —
"बध्वागमनपालस्य यावद् दृश्यन् न निर्ज्ञातं"।
इति रामचरितश्रुती।)

आगममायनी स्त्री, दक्षिणापीठस्था। इति राजनिर्घण्टः॥

आगमितं, त्रि, (आ+गम+णिच्+क्त) अधीतं। पठितं। इति शब्दरत्नावली॥ (ज्ञापितं ज्ञापितं।)

आगारं, क्ली, (अगमस्य इदं। कार्ये अण्।) अगारं। परिग्रहीतं इत्यमरटीकायां भरतमाला॥

आगाम्बुः, त्रि आगन्तुकः। अतिथिः। इत्यमरटीकायां दीपवरुड़ः॥ (आगामुकः। आगन्तुः।)

आगामी, [न्] त्रि, (आङ्+गम्+णिन्। भविष्यत्काले। इति राजनिर्घण्टः। (यथा विष्णौ देवे। "यो वर्त्तमानः आगामिष्यामधायस्याः पञ्चानि जन्म")

आगारं, क्ली, (आग+ऋ+अण्) गृहं। इत्यमरटीका। (यथा मनुः।
"आगारे निष्कृतेर्वास्य आगारुपलभेत् ।)

आगुः, [र्] स्त्री, आगूः। प्रतिज्ञा। इत्यमरटीकायां रमानाथः॥

आगूः, स्त्री, (आङ्पूर्वक गिरि शब्दे हागिलक्षणे कलकमतीनामिपात्यानेन) प्रतिज्ञा। इत्यमरः॥

आग्नीध्रं, क्ली, (अग्निमिन्धे, इन्धोर्निपातनेन क्विप् अग्नीध्। अग्नीधः स्थानं, अग्नीधः शरणं रणः। रणविधानात् आग्नीध्रप्रपीयमधः) अग्नीध्रं। यज्ञमण्डपं इत्यमरटीकायां रमानाथः॥ आधमता अपोम-मुपविष्ट स्वाम आग्नीध्रं मखवर्णिनासाम वर्धमात्। अधरात्र धरनीस्थलमिति तु॥ (आग्नेय प्रथमस्य मनोर्दायादप्रथमे प्रविज्ञात आनामस्थाता पुत्रः। यथा हरिवंशे।
"अप्रियव्रतप्रियाख्यो मेधा मेधातिथिर्वसुः।
ज्योतिष्मान् द्युतिमान् भव्यश्च पुत्र तत्र च॥
सनो आग्नमस्कोऽपि तत्र पुत्रा मनीषिणः"।
प्रियव्रतपरात्र बलसम्भावो मनुद्वीपो च बलि। वस्तुतः,—
"आग्नीध्रो नाम वरतिर्मनुनामा भगो कुले।
प्रजानो मनसोऽपि भवन्ने भरतावना"।
प्रियव्रत राजा ततपतमजेपरिकल्पित आग्नीध्रस्यात पुत्र। वस्तुतस् विष्णुपुराणे २।१।
"प्रियव्रतस्य नामायोधा बलाति वे मनु।
अग्नीध्राग्निबाहुश्च वपुष्मान् द्युतिमांस्तथा।
मेधा मेधातिथिर्भव्य सवन पुत्र दश च।
ज्योतिष्मान् दशमस्तेषां सत्यनामा सुतोऽभवत्"॥)

आग्नेयं, क्ली, (अग्निर्देवता यस्य।) स्वर्णं। इति राजनिर्घण्टः। देवपितृतः। इति शब्दरत्नावली। रक्तं इति हेमचन्द्रः। घृतं। इति पाणिनिः।

आग्नेयः, पुं, (अग्निर्देवताम अण्। अग्निपौर्णं इदम्) अगस्त्य देवपनिकृतमित्रावरुणाभ्यो नवाग्रहाक-

मेरे अग्निपुराणे च। अग्निदेवतात्वे इत्यमावे च त्रि। अग्निकोणमिति आग्नेयाम् अग्निदेशम् आग्नेयादि च। आग्नेयास्त्रं। यथा मनौ ८।२१।
"दूरमानमगर्भिणस्य मरायनस्त्रं स्वकम्" ।)
धनञ्जनुरीति। इति भागिति प्राग्नाम्ग्नेयो त्रि

आग्नेयी, स्त्री, (आग्नेय+ङीप्।) अग्निकोणं। स्वाहा। इति महाभारतं।

आग्रयणं, मो नवशस्येष्टि। यथा —
"प्रस्वपषमग्नो येऽग्निष्वश्वं प्रयच्छे।
धान्यकालदाराग्ने माघासो पश्चिमा स्मृता"॥
इत्यनेन शरदस्तपोविदितमनवसम्भेदे।
"माघापौर्णिमाविव वैरस्मोत्सवकामना।
पशुवह्नमन्त्रेऽभ्यर्चं न प्रवायनकामवान्"।
इति कालकारदर्शनात् माध्येऽपि तथा इति।
आग्रयणं नवशस्येष्टि। इति मलमासतत्त्वं।

आग्रहः, पुं, (आङ्+ग्रह+अप्) अनुग्रहः। आसक्तिः। आक्रमः। ग्रहणं। इति मेदिनी। (प्रकारः, अभिनिवेशः, आवेशः, यथा
"इत्याग्रहात् परमं यं न पिता मम पीडयाम्"।
इति कथासरित्सागरे २५।८८।)

आग्रहायणिकः, पुं, मार्गशीर्षमासः। इति शब्दमुक्ता।

आग्रहायणिकः, पुं (आग्रहायणी मार्गशीर्षस्य पौर्णमासी अस्मिन्॥ आग्रहायण+ठञ्) अग्रहायणमासः। मलमासे अग्रहायणमासोऽयं। अस्मिन् मासे रविवृश्चिकराशिस्थो रवि। अमार्गीयः। मार्गशीर्षः १ सहाः २ मासः ३। इत्यमरः। आग्रहायणी १ अगहन ४ मार्गशिरः ५। इति शब्दरत्नावली। अग्रहायणमासविधि त्रि।

आग्रहायणी, स्त्री (अग्रे हायनमस्याः। मलमेरे मार्गशीर्षमासस्य अग्रभवत्वे। मघापदं। मृगशिराविरति स्त्री। गौरादित्वात् ङीष्) मृगशिरो नक्षत्रं। इत्यमरः। मार्गशीर्षमासस्य पौर्णमासी।

आघट्टकः, पुं, (आङ्+घट्ट+ण्वुल्। ततः स्वार्थे कन्) रक्तापामार्गः। इति राजनिर्घण्टः।

आघाटः, पुं, (आङ्+हन+अच्) सीमा। इति हेमचन्द्रः। अपामार्गः। इति राजनिर्घण्टः।

आघातः, पुं, (आङ्+हन्+घञ्) वधस्थानं। इति त्रिकाण्डशेषः। हननं। हिंसनं। मोर मोर इत्यादि भाषा। (यथा शाकुन्तलपञ्चमे। "पारस-वातामयोदं विकसति वधुर्त योगितामशक-सके।)

आघातनं क्ली, (आङ्+हन्+स्वार्थे णिच्+ल्युट्) वधस्थानं। इति शब्दरत्नावली। हननं।

आघारः, पुं, (आङ्+घृ+घञ्) घृतं। इति हेमचन्द्रः। अग्नौ होमे घृतेन चतुरस्रं क्रमिक रेखा प्रजापतये स्वाहा इत्यनेन पूर्वोत्तरभागस्थपलाशा-दारम्भाद्दक्षिणी रेखावधिवरकाण्डसमानाश्रितात्। इत्यनेन चतुरस्रं क्रमिक रेखा इन्द्राय स्वाहा इति मन्त्रेण नोवायव्यकोणारम्भ देवाग्नी नैऋतविधिकालपर्यन्तार्थं। इति कर्मीया। चतुरस्रापि क्षरेण मन्नोत्तारस्रुवमपूर्वनैवेद्य स्वस्वस्थाने। इति पद्धतिः।

आघूर्णितं त्रि, (आङ्+घूर्ण+क्त) कम्पितं, घूर्णाय इति भाषा। यथा दैवीभागवते।
"आघूर्णितो वा वातम विक्रम रोस मनोरमे ।।

आघ्राणं, क्ली (आङ्+घ्रा+ल्युट्) तृप्तिः। इति हेमचन्द्रः। गन्धग्रहणं। शोंका इति भाषा।
"भैरवं मत्सामाच्छ।" इति कथासरित्सागरे ११।२८।)

आघ्रात त्रि (आङ्+घ्रा+क्त) जिघ्रितः। आक्रान्तः। इति मेदिनी। तृप्तः। इति हेमचन्द्रः। (घ्राणविषयीकृतः। यथा, माघाम्बरे। "चीमः निं न निष्प्रा सुवाङ्गलवसा मालतिग्धीरितं।)

आङ्कं, क्ली, चीनपद्मविशेषमध्यवल्लभक्तिसर्वार्थ वालोलासमय। अस्य गुणाः। अतिसारचरणित्य रतिर्बं। अपस्मिरतानरोगनाशित्वः। इति राजनिर्घण्टः। यथा, माघप्रत्यवः।
"मधुरसाद्या सितांश मलयाम्ग्रीष्मोऽभ्युपयुक्त।
वारव्याभं रुदा स्थाभं मोवकं सातवे सुग।
शीतप्रस्थानवातपीका मग्नविलम्बुपयोगताः।
वामोऽहवंशयाल् पतरासमियापरे मृग" ।
("आङ्गे सम्भवियनुर्य अपाभिष्वरं तर्दं।
अमार्य बहुवाच च दर्शं विभ्रमसावसम्"।
इति सुश्रुत।)

आङ्ग, म जनपदविशेषः। अङ्गदेशः। रथम्। यथा आङ्गिकम। आङ्गिकाङ्ग। यथा आङ्ग-नपयावदी। कौमा। यथा आङ्गवतिवशेषार्णी। इति रघौ १५ सर्गे। साहुवेशजय। यथा आङो-पति। इत्यमरटीका। अङ्गरान। मांसं। प्रवादिक। इति दुर्गादासः।

आङ्गः, स्त्री, (अङ्गस्य इदं। अङ्ग+अण्) कोमलाङ्गं। इति त्रिकाण्डशेषः।

आङ्गारं, क्ली, (अङ्गार+अण्) अङ्गारसमूह। इति शब्दमुक्ता।

आङ्गिकं त्रि, (अङ्ग+ठक्) अङ्गक्रियाप्रकाशकमनुचेष्टादि। इत्यमरः। मातृभिका। इति शब्दरत्नावली। (यथा साहित्यदर्पणे।
"भवेदभिनयो ऽवस्थानुकारः स चतुर्विधः।
आङ्गिको वाचिकश्चैवमाहार्यः सात्विकस्तथा"

आङ्गिरसः, पुं, (अङ्गिरस्+अण्) बृहस्पतिः। इत्यमरः। (यथा मनुः। २। १५१।
"अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः।
पुत्रका इति होवाच ज्ञानेन परिगृह्य तान्"।)

आचमनं, क्ली, (आङ+चम्+ल्युट्) वैधकर्मारम्भात् पूर्वं शास्त्रविधानाभ्यन्तरं जलपान-माङ्गस्पर्शनपवित्रीकरणविधि। तत्पर्याय। उपस्पर्शः १। इत्यमरः। आचमनं २ आचामः ३। इति शब्दरत्नावली। अस्य विधिर्यथा।
"विप्रस्तावेदया पूर्वं ग्रि प्रभातको गृहं।
अलसात्पुष्पानुपूर्वेण विभिन्नाङ्गस्पृशेत्।
अङ्गुष्ठेन प्रदेशिन्या घ्राणं संस्पृशेत्ततः।
अङ्गुष्ठानामिकाभ्यां चक्षुःश्रोत्रे पुनः पुनः।
कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयञ्च तलेन वै।
सर्वाभिश्च शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्।

ऋचो यजूंषि सामानि त्रिः पिबन् प्रीणयेत् क्रमात्।
अथर्व्वाङ्गिरसौ पूर्व्वं द्विः प्रमार्ष्ट्या नयेन्मुखम्॥
सेतिहासपुराणानि वेदाङ्गानि यथाक्रमम्।
खं मुखं नासिके वायुं नेत्रे सूर्य्यं श्रुती दिशः॥
प्राणग्रन्थिमथो नाभिं ब्रह्माणं हृदयं स्पृशेत्।
रुद्रं मूर्द्धानमालभ्य प्रीणात्यथ शिखामृषीन्॥
बाहू यमेन्द्रवरुणकुवेरवसुधानलान्।
अभ्युक्ष्य चरणौ विष्णुमिन्द्रविष्णुकरद्वयम्॥
वासुकिप्रमुखान् नागान् जलं क्षिपति यत् क्षितौ।
येऽन्तरा विन्दवो यान्ति भूतग्रामश्च तैर्द्विज॥
अग्निवायुसूर्य्येन्द्रा गिरयोऽङ्गुलिपर्व्वसु।
गङ्गाद्याः सरितस्तासु या रेखाः करमध्यगाः॥
तलं सोमः सतीर्थञ्च स्मृतोऽयं पावनः करः।
इति गारुडे २१५ अध्यायः॥*॥
अन्यच्च। अथाचमनं। पराशरः। यथा,—
"कृत्वाथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः।
निवद्धशिख आसीनो द्विज आचमनं चरेत्"॥
आपस्तम्बः। यथा,—
"इत्येवमद्भिराजानु प्रक्षाल्य चरणौ पृथक्।
हस्तौ चामणिबन्धाभ्यां पश्चादासीत संयतः"॥
आजान्विति अभ्यस्रमादिना तत्पर्य्यन्तमशौचे
आमणिबन्धात् इति हारीतोक्तं सामान्यतः।
"कृत्वोपवीतं सव्यांशे वाङ्मनःकायसंयतः"॥०॥
शिखाबन्धे विशेषमाह ब्रह्मपुराणम्।
"गायत्र्या तु शिखां वद्ध्वा नैर्ऋत्यां ब्रह्मरन्ध्रतः।
जुटिकाञ्च ततो वद्ध्वा ततः कर्म्म समारभेत्"॥
याज्ञवल्क्यः। यथा,—
"अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्"।
अन्तर्जानु जानुनोर्मध्ये हस्तौ कृत्वेति शेषः॥
भविष्यपुराणे। यथा,—
"सनौ तु चरणौ कृत्वा तथा वद्धशिखोऽस्पृशः।"।
आचामेदित्यनुवृत्तौ देवलः। यथा,—
"शिखां वद्ध्वा वसित्वा तु निर्णिक्ते वाससी शुभे।
तूष्णीं भूत्वा समादाय नोद्धरन्न विलोकयन्"॥२॥
ब्रह्मावरोधे तु मनुः। यथा,—
"धावन्नदृश्शिकाभ्यान्तु न पिबेच्च कदाचन"।
मार्कण्डेयः। यथा,—
"सम्यग्विवेच्य शुक्लेन कुर्य्यादाचमनक्रियाम्।
नोच्छिष्टं तत् पवित्रन्तु भुक्तोच्छिष्टन्तु वर्जयेत्"॥
उदकग्रहणे परिमाणमाह भरद्वाजः। यथा,—
"आयतं पर्व्वणा कृत्वा गोकर्णाकृतिमत् करम्।
संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः॥
मुक्ताङ्गुष्ठकनिष्ठाभ्यां शेषेणाचमनं चरेत्।
माषमज्जनमात्रास्तु सम्पृक्ता त्रिः पिबेदपः"॥
याज्ञवल्क्यः। यथा,—
"अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः।
हृत्कण्ठतालुगाभिश्च यथासङ्ख्यं द्विजातयः॥
शुद्ध्येरन् स्त्री च शूद्रश्च सकृत् स्पृष्टाभिरन्ततः"।
अन्ततः ओष्ठप्रान्ते। प्रचेताः।
"अनुष्णाभिरफेनाभिः पूताभिर्वीक्ष्य चक्षुषा।
हृद्गताभिरशब्दाभिस्त्रिश्चतुर्व्वाद्भिराचमेत्"॥
चतुर्व्वेति भावशुद्ध्यपेक्षया॥*॥
आचमनप्रकारमाह दक्षः।
"प्रक्षाल्य हस्तौ पादौ च त्रिः पिबेदम्बु वीक्षितम्।
संहत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्॥
संहत्य तिसृभिः पूर्व्वमास्यमेवमुपस्पृशेत्।
अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम्॥
अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः।
नाभिं कनिष्ठाङ्गुष्ठेन हृदयन्तु तलेन वै॥
सर्व्वाभिस्तु शिरोदेशं बाहू चाग्रेण संस्पृशेत्"।
पुनःपुनरिति घ्राणादीनां गोलकद्वयाभिप्रायेण।
इति श्रीदत्तः॥*॥
वीक्षणानुष्णयोरपवादमाह यमः।
"रात्रावनीक्षितेनापि शुद्धिरुक्ता मनीषिभिः।
उदकेनातुराणाञ्च तथोष्णेनोष्णपायिनाम्"॥१॥
मुखमार्ज्जनानन्तरं व्यासः। "वामहस्तं पादौ
शिरश्च दक्षिणेन पाणिना जलेनाभ्युक्षयेत्" इति
सामवेदिकम्। यजुर्व्वेदिनान्तु गोभिलः। "पादौ
चाभ्युक्षयेत् खानि चोपस्पृशेत् शीर्षाणि मूर्द्धि
दद्यात् उदकविन्दून्"॥*॥
इन्द्रियस्पर्शे विशेषमाह मनुः। "खानि चैव
स्पृशेदद्भिः" इति। नाभिस्पर्शे व्यासः। यथा,—
"ततः स्पृशेन्नाभिदेशं पुनरापश्च संस्पृशेत्"।
इन्द्रियस्पर्शानन्तरं भविष्ये। यथा,—
"यदङ्गुष्ठमावृदक्षं वीर समुत्सृजति दानवः।
वासुकिप्रमुखान्नागान् तेन प्रीणाति मानवः"॥*॥
जलस्थलोभयकर्म्मानुष्ठानार्थञ्च जलस्थलैकचरणे-
नाचमनं कर्त्तव्यमाह पैठीनसिः। "अन्तरुदके
आचान्तो अन्तरेव शुद्धो भवति वहिरुदके आ-
चान्तो वहिरेव शुद्धः स्यात् तस्मादन्तरेकं वहि-
रेकञ्च कृत्वा पादमाचामेत् सर्व्वत्र पूतो भवति"
इति॥२॥ जलमात्रे जानोरूर्द्धमुत्तिष्ठन्नाचमन-
माह विष्णुः। यथा,—
"जानोरूर्द्ध्वं जले तिष्ठन्नाचान्तः शुचितामियात्।
अधस्ताच्छतकृत्वोऽपि समाचान्तो न शुध्यति"॥
हारीतः। यथा,
"आर्द्रवासा जले कुर्य्यात्तर्पणाचमनं जपम्।
शुष्कवासाः स्थले कुर्य्यात्तर्पणाचमनं जपम्"॥१॥
आचमननिषेधे देवलः। यथा,—
सोपानत्को जलस्थो वा नष्टकेशोऽपि वा पुनः।
उष्णीषी वापि नाचामेद्वस्त्रेणावेष्ट्य वा शिरः॥
न गच्छन्न शयानश्च न चलन्न परान् स्पृशन्।
न हसन् नैव सञ्जल्पन्नात्मानञ्चैव वीक्षयन्॥
केशान्नीवीमधः कायमस्पृशन् धरणीमपि।
यदि स्पृशति चैतानि भूयः प्रक्षालयेत् करम्"॥
आत्मानं हृदयम्। तथा व्यासः।
"शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्"॥
मरीचिः। यथा,
"न वहिर्जानु रथ्या नासनस्था न चाल्पितः।
न पादुकास्थो नान्यचित्तः शुचिः प्रयतमानसः॥
भुक्तासनस्थोऽप्याचामेन्मान्यकाले कदाचन।
जानुभ्यामूर्द्धमाचम्य जले विष्ठन्न दुष्यति"॥
शाण्डायनः। यथा,
"स्नानमाचमनं होमं भोजनं देवतार्च्चनम्।
प्रौढपादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम्"॥*॥
द्विराचमननिमित्तानि।
"स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे।
आचान्तः पुनराचामेद्वासो विपरिधाय च"॥
ब्रह्मपुराणे। यथा,
"होमे भोजनकाले च सन्ध्ययोरुभयोरपि।
आचान्तः पुनराचामेदन्यत्रापि सकृत् सकृत्"॥२॥
अथाचमननिमित्तानि।
"निष्ठीवने तथाभ्यङ्गे तथा पादावसेचने।
उच्छिष्टस्य च सम्भाषादशुच्युपहतस्य च॥
सन्देहेषु च सर्व्वेषु शिखां वद्ध्वा तथैव च।
विना यज्ञोपवीतेन नित्यमेवमुपस्पृशेत्॥
उष्ट्रवायसससंस्पर्शे दर्शने चान्त्यवासिनाम्"॥
हारीतः। यथा,
स्त्रीशूद्रोच्छिष्टसम्भाषणे मूत्रपुरीषोत्सर्गदर्शने
देवमभिगन्तुकाम आचामेत्॥*॥
अथ आचमनप्रतिप्रसवमाह स्मृतिः। यथा,
"क्षुते निष्ठीवने सुप्ते परिधानेऽश्रुपातने।
कर्म्मस्थ एषु नाचामेद्दक्षिणं श्रवणं स्पृशेत्"॥
वृद्धशातातपः।
"वातकर्म्मणि निष्ठीवे दन्तश्लिष्टे तथानृते।
क्षुते पतितसम्भाषे दक्षिणश्रवणं स्पृशेत्"॥
मार्कण्डेयपुराणम्। यथा,
"कुर्य्यादालम्भनं स्पर्शं गोपृष्ठस्यार्कदर्शनम्।
कुर्व्वीतालम्भनं वापि दक्षिणश्रवणस्य च॥
यथाविभवतो ह्येतत् पूर्व्वाभावे ततः परम्"॥१॥
आचमने जलाधारनिषेधमाह। उशनाः। यथा,
"कांस्यायसेन पात्रेण त्रपुसीसकपित्तलैः।
आचान्तः शतकृत्वोऽपि न कदाचित् शुचिर्भवेत्"॥
इति गोपालपञ्चाननकृताचारनिर्णयः॥
"आयतं पर्व्वणा कृत्वा गोकर्णाकृतिवत् करम्।
संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः॥
मुक्ताङ्गुष्ठकनिष्ठाभ्यां शेषेणाचमनं चरेत्।
माषमज्जनमात्रास्तु सम्पृक्ता त्रिः पिबेदपः"॥
इति भारद्वाजः॥
"अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः।
हृत्कण्ठतालुगाभिश्च यथासङ्ख्यं द्विजातयः॥
शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः"॥
इति याज्ञवल्क्यः॥
"हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः।
वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरन्ततः"॥
इति मनुः॥
"स्त्रियाश्चैवमिक वीर्यं शूद्रजातिस्तथैव च।
सकृदाचमनाच्छुद्धिरेतयोरेव चोभयोः"॥
इति मिताक्षरा॥

आचमनकः, पुं, (आचमन + वुन्।) निष्ठीवनपात्रम्।
पिकदान डाबर इति भाषा। तत्पर्य्यायः।
प्रोक्षः २ कटकोलः ३ पतद्ग्रहः ४। इति
हारावली॥ ("कौतस्त्रिवाङ्गनचक्षिताचमनक-
वाहिनि"। इति हर्षचरिते॥)

आचमनीयं, क्ली, (आचम्यतेऽनेन । आङ्+चम्+अनीयर् ।) मुखप्रक्षालनार्थजलं । तदुत्पत्तिविधिर्यथा, कालिकापुराणे ६० अध्याये ।
"एलालवङ्गकर्पूरजातीनां कुसुमैः शुभैः ।
कर्पूरादिभिर्वापि तथागुरुचन्दनैः ।
यथा यथा सुगन्धी स्यात् तथा तेनाभिमन्त्रितं ।
तत्रैव यत्नेन मन्त्रेण प्रदापयेत् ।
उदकं दीयते यत् प्रकृष्टं चेतसार्पितं ।
आचमनाय देवेभ्यस्तदाचमनमुच्यते ।
तोयं वा देवतायै तथा स्वच्छमभिमन्त्रितं ।
तदेतन्नु सम्पादितं सुगन्धं यदि लभ्यते ।
आचमनं ददाति मुदा तदाचमनीयकं ।
यदेतेन तावतो नित्यं कामादेव यदीप्सितम्" ।
आचरणं क्ली, (आङ्+चर्+ल्युट्) आचारः । व्यवहारः । ("आभीरविषये आचरणमनाचारेषु" । इति मैत्रे ।)
आचरितं त्रि, (आङ्+चर्+क्त) कृताचरणं । ("मन्त्रं नामकृते कृता वा सम्यगाचरिता हिते" । इति कादम्बर्यां ।) व्यवहृतं । (यथा ।
"सायङ्कालस्य गत्वा कृत्वा दारपरिग्रहं ।
कथायां रामवेऽर्थे च व्यवहारमिवाचरेत्" ।
इत्यत्र सारिमाचितं ।)
आचान्त, त्रि, (आङ्+चम्+क्त) कृताचमनः । यथा । गोभिलः ।
"आचान्तः पीतवान् पुत्रे सुप्तः स्नात्वा तथोपसर्पणे ।
आचान्तः पुनराचामेत् वासो विपरिधाय च" ।
इत्याह्निकतत्त्वं ।
आचाम, पुं, (आङ्+चम्+घञ्) आचमनं । इति शब्दरत्नावली । भक्तमण्डः । इत्यमरः । (अवज्ञं । मण्डं । यथा, माघस्य ।
"कपोलैः सह विरसाचितमाचाममभ्येति" ।)
आचारः, पुं (आङ्+चर्+घञ्) व्यवहारः । तत्पर्य्यायः । चरितं २ चरित्रं ३ चारित्रं ४ चरणं ५ वृत्तं ६ शीलं ७ । इति हेमचन्द्रः । आचारमर्य्यादा । इति भरते २ । आचारे (८ श्लोकटीकायां भरतकृतः । व्यवहारः । न तु विचारः । यथा भट्टकल्पे ।
"आचारैराचारोऽपि सर्वेषामपि यदि ।
कोऽपि स्यात् सिद्धा पूर्वं धात्वाचारश्च उच्यते" ।
इति व्यवहारतत्त्वं । यतिः । इत्येतिहास तदाचारध्वे यत्नं । (रघुः । २ । १ । "आचार-मार्गेरिव शीलवत्ताम्" ।))
आचारदीपिका, त्रि, (आचारेण दीपिका ।) आचारविधायिका । इति भट्टाचार्यः । (कथयितृका । विवरणिका ।)
आचारी, स्त्री (आङ्+चर्+णिन्) हिलमोचिका शाकं । इति रत्नमालायां । अन्यत्र इति न्यायः । आचारनियमितं त्रि । (हलमोचिका प्रवेशतः सुवालको चारणा ।)
आचार्य्य, पुं, (आङ्+चर्+ण्यत् ।) उपाध्यायः । यस्तु परमात्मनामाचार्यः । तन्त्राचार्य्यवान् २ । इत्यमरः । दीक्षाचार्य्यः ।

इति विद्यापात्रेषु । तत्प्रमाणं यथा,—
"उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः ।
सकल्पं सरहस्यं च तमाचार्य्यं प्रचक्षते" ।
इति मनुः २ । १४ ।
(अथोऽनन्तरमाचार्य्यं परीक्षेत । तद्यथा —
"पर्य्यवदातश्रुतं परिदृष्टकर्माणं दक्षं दक्षिणं शुचिं जितहस्तमुपकरणवन्तं सर्वेन्द्रियोपपन्नं प्रकृतिज्ञं प्रतिपत्तिज्ञमनुपस्कृतविद्यमनहङ्कृतमनसूयकमकोपनं क्लेशक्षमं शिष्यवत्सलमध्यापकं ज्ञापनसमर्थं चेति । एवंगुणो ह्याचार्य्यः सुक्षेत्रमार्त्तवो मेघ इव शस्यगुणैः सुशिष्यमाशु वैद्यगुणैः सम्पादयति । तमुपसृत्यारिराधयिषुरुपचरेदग्निवच्च देववच्च राजवच्च पितृवच्च भर्तृवच्चाप्रमत्तः । ततस्तत्प्रसादात् कृत्स्नं शास्त्रमधिगम्य शास्त्रस्य दृढतायामभिधानस्य सौष्ठवेऽर्थस्य विज्ञाने वचनशक्तौ च भूयो भूयः प्रयतेत सम्यक्" । इति चरके ।)
आचार्य्या स्त्री, (आचार्य्य+टाप् ।) मन्त्रव्याख्याकर्त्री । इत्यमरटीका । (वैदिकमन्त्राध्यापनकर्त्री ।)
आचार्य्यानी, स्त्री, (आङ्+चर्+ण्यत्+ङीप्+आनुक ।) आचार्य्यपत्नी । इत्यमरः । (यथा महावीरचरिते ।
"भगवत्यैरुन्धत्याचार्य्यानीव गार्ग्यै" ।)
आचितं क्ली, (आङ्+चि+क्त ।) शकटस्य दशभारं । इत्यमरः । दश मोन इति भाषा ।
आचित्, पुं, (आङ्+चि+क्त ।) आचयो भारः । इत्यमरः । दश मानिक् बोझा इति भाषा । सङ्कलनं । इति मेदिनी ।
आचितः, त्रि, (आङ्+चि+क्त) संग्रथितः । व्याप्तः । इति मेदिनी । (तत्र पर्य्यायाः, आकीर्णः, व्याप्तः, ग्रथितः, गुम्फितः । यथा भारवौ ।
"क्वचित्पयो विमलशिलातलैः शुचौ" । यथा रघुवंशे ।
"वसुधांश्रिता भ्रमरगुम्फितावला
पदे पदे दुर्दिनभिन्नवक्त्री" ।)
आच्छकः, पुं, वस्त्रविशेषः । आछ इति भाषा । तत्पर्य्यायः । राष्ट्रगुः २ पथीकः ३ वल्किका ४ चालिका ५ । इति रत्नमाला ।
आच्छन्नं, त्रि, (आङ्+छद्+क्त ।) आच्छादितं । आवृतं । यथा । "मेघाच्छन्नेऽह्नि दुर्दिनं" । इत्यमरः ।
("मदुपाश्रयमाच्छन्नं छत्रं रत्नविभूषितं" ।
इति हितोपदेशः ।)
आच्छादः, पुं, (आङ्+छद्+घञ् ।) वस्त्रं । इति हेमचन्द्रः ।
आच्छादनं क्ली, (आङ्+छद्+ल्युट् ।) वस्त्रं । इत्यमरः ॥ अपिधानं । आवरणमात्रं । इति मेदिनी । (यथा मनुः । २ । ५८ ।
"अन्नादेन यदा कश्चित् भूतवाच्छादनादिके" ।)
आच्छादितः, त्रि (आङ्+छद्+णिच्+क्त) आच्छन्नः । आवृतः । ढाका इति भाषा ।
आच्छुरितं क्ली, (आङ्+छुर+क्त) नखच्छुरितं । नखाघातः । इति भरतः । हसितं । (यथा

कथासरित्सागरे ।
"न जेरे वधुवेणापि क्षितमाक्षुरितं यदा" ।)
आच्छुरितकं, क्ली, (आङ्+छुर्+भावे क्त । ततः स्वार्थे कन्) नखाघातहास्यं । इत्यमरः । हास्यं । नखाघातविशेषः । इति मेदिनीकरहेमचन्द्रौ ।
आच्छोदनं क्ली, (आङ्+छिद्+ल्युट् । तत उपलो ...) मृगया । इत्यमरः ।
आज, ह, आज्ञाने । (भ्वादिं परं-अकं-सेट् ।) इति कविकल्पद्रुमः । इत्यादौ क्रियायाः प्रकृति प्रत्ययार्थं । ह आच्छादने । आजामो रोगीं करणं । आजति वदं शिवी । इति दुर्गादासः ।
आजं, क्ली (अज+अण् । अजस्यापि छागस्य इदं मांसादि) दधि । इति महाभारतम् । (यथा देवले ।
"अजमाजं यथा चोदनादिषु साविरच यत् ।
यतो धातुविकारार्थमाजं मतावते" ।)
(तथाच रामायणे । २ । ८१ । १० ।
"आजैश्चापि च वाराहैर्निष्ठानवरसञ्चयैः" ।
इत्यत्र—तथाविधमनेन बहूनां जलानां तत्र इत्यर्थे आजं विशिष्टमन्नदत्तमनुलक्ष्यते गुणसञ्चयतत्त्वप्रदानतः ।
"आजं दधि मनोज्ञं सकलाविनाशनं ।
दुर्नामपाण्डुरेषु हितमतिरोचनं ।
शिशवे मधुरं बल्यं लघु विकृतघातनं ।
बल्यं वाताविहं सोढं शारविकविवर्त्तं" ।
इति हारीतसंहिता ।
"आजिनीर्दं कुपितं मोज्यं मनोहरं ।
मदीयं सुखमायादनमिति दंशनं" ।
इति चरको वामरथ ।
"अजानुष्णकषायं विधिवत्कौविक्षं चिरं ।
दीपनं लघु बलादि नाशनातिविषम् ।
कामलापाण्डुरोगनाशनं धर्मवर्धितं तत् ।
"तथाजं नवविषम् श्वसनादिवर्दं ।
दुर्नामपाण्डुरोगेषु हितमपि दीपनं ।
शिशवे मधुर बल्यं लघु विकारदरं" ।
"आजं दधि दीपनीयं चक्षुष्यं ज्वरापहं ।
वाते वात दधि यदि हितं सामे च समम्" ।
इति च सुश्रुते ।)
आजकं क्ली, (अज+वुञ्) अजसमूहः । छागादि पाल इति भाषा । इत्यमरः ।
आजकारः, पुं, (आज+कृ+अण्) शिववृष । इति शब्दरत्नावली ।
आजगवं, क्ली, (अजगव+प्रज्ञादि अण्) शिवधनुः । इति हेमचन्द्रः ।
आजन्मसुरभिपत्त्रः, पुं, (आ जन्मनः सुरभीणि पत्त्राणि यस्य सः) मरुवकः । इति राजनिर्घण्टः ।
आजानेयः, पुं, स्त्री, (आ+जन+अण्+ढक्) कुलीनाश्वः । सद्वंशोद्भवः । इत्यमरः । "शक्तिभिर्भिन्नहृदयाः स्खलन्तोऽपि पदे पदे । आजानेया हयाः यान्ति ... " । इत्यश्ववैद्यके ।
आजिः, स्त्री, (अज+इण्) । युद्धं । समभूमिः ।

इत्यमरकोषमेदिन्यौ। तत्व। इति हेमचन्द्र ।
(युद्धार्थे यथा,—"आहवती लोचनमार्गमाजौ रजोन्धकारस्य विजृम्भितस्य"। इति रघु। ७।४२।)
आक्षेप। इति शब्दरत्नावली ॥

आजीव, पु, (आङ्+जीव+घञ्।) जीविका। इत्यमरः ॥
("षड्मूलफलो रम्य आजीव प्रतिभाति मे"॥ इति रामायणे।)

आजु, [र्] स्त्री, (आङ्+जुर्+क्विप्।) आजूः। विष्टि। इति स्वामी ॥

आजू, स्त्री, (आ+जुगतौ+क्विप् दीर्घश्च।) वेतन विना कर्म्मकारः। वेगार इति भाषा। इत्यमरः ॥
(यदुक्तम्,
"हठादश्रतिक्रा स्तोऽपोविष्टिराजूश्च कीर्त्यते"।)

आज्ञप्त, त्रि, (आ+ज्ञा+णिच्+क्त।) आज्ञाप्राप्त। यथा, देवीमाहात्म्यम्।
"आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः।
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः"॥

आज्ञा, स्त्री, (आङ्+ज्ञा+अङ्+टाप्।) आदेश। तत्पर्य्यायः। अववादः २ निर्देश ३ निदेश ४ शासन ५ शिष्टि ६। इत्यमरः ॥
("तथेति शेषामिव भर्तुराज्ञां"। इति कुमारे। ३।२२।
"पश्चात् वनाय गच्छेति तदाज्ञा मुदितोऽग्रहीत्" इति रघौ। १२।७।)

आज्ञाकारी, [न्] त्रि, (आज्ञा+कृ+णिन्।) आज्ञया कर्म्मकारी। आज्ञावह। आज्ञानुवर्त्ती ॥

आज्ञाचक्र, क्ली, षट्चक्रान्तर्गतषष्ठचक्रम्। तथा च तन्त्रे,—"आज्ञानामाम्बुजं तद्धिमकरसदृशं ध्यानधामप्रकाशं हक्षाभ्यां वैकलाभ्यां प्रविलसितवपुर्नेत्रपत्रं सुशुभ्रम्। तन्मध्ये हाकिनी सा शशिसमधवला वक्त्रषट्कं दधाना विद्यां मुद्रां कपालं डमरुजपवटीं बिभ्रती शुद्धचित्ता ॥ एतत् पद्मान्तराले निवसति च मनः सूक्ष्मरूपं प्रसिद्धम्"॥ इति तत्त्वचिन्तामणौ षष्ठप्रकाश ॥

आज्ञापक, त्रि, (आङ्+ज्ञा+णिच्+ण्वुल्।) आज्ञाकर्त्ता।

आज्ञापत्र, (आज्ञायै पत्र।) क्ली आदेशलिपि। निदेशलिखन। हुकुमनामा इति पारस्यभाषा ॥

आज्ञापन, क्ली, (आङ्+ज्ञापि+ल्युट्।) विज्ञापन। जानान इति भाषा ॥

आज्ञाप्त, त्रि, (आङ्+ज्ञापि+क्त।) आज्ञातिविशिष्टः। सन्नाप्त। आज्ञाप्राप्त ॥

आज्य, क्ली, (आङ् पूर्व्वात् अञ्जेः संज्ञायामिति क्यप्।) घृत। इत्यमरः ॥ श्रीवास। इत्यजयपाल ॥ (यागक्रियासाधन तैलदुग्धादिकमपि आज्यशब्देनोच्यते। यदुक्तं च्छन्दोगपरिशिष्टे।
"घृत वा यदि वा तैल पयो वा दधि यावक।
आज्यस्थाने नियुक्तानामाज्यशब्दो विधीयते"॥
यथा रघुवंशे। ७।२०। "तत्रार्च्चितो भोजपतेः पुरोधाः हुत्वाग्निमाज्यादिभिरग्निकल्प"॥)

आज्यभाग, पु, (आज्यस्य भाग) ऋग्वेदिना अग्नेरुत्तरभागे सूर्य्येणाग्निसम्प्रदानकघृताहुति तद्दक्षिणभागे सोमसम्प्रदानकाहुतिश्च। इति कालेशि।
यजुर्व्वेदिनान्तु अग्नेरुत्तरदक्षिणयोः पश्चिमादिप्राक्‌पर्य्यन्तघृतधारा। इति पशुपति ॥

आञ्जनेय, पु, (अञ्जनाया अपत्य, अञ्जना+ढक्।) अञ्जनानामवानरीपुत्र। स तु हनूमान्। इति त्रिकाण्डशेष ॥ (यथा महानाटके।
"उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयं"॥)

आञ्जिनेयः, पु, (आञ्जन+ढक्+इट्।) जन्तुविशेष। आजनाइ इति ख्यात। इति शब्दमाला ॥

आटि, पु, (आङ्+अट+इञ्।) पक्षिविशेष। शरालि इति ख्यात। इत्यमरः ॥

आटीकन, क्ली, (आङ्+टीक्+ल्युट्।) वत्सानां गमन। इति त्रिकाण्डशेष ॥

आटीकर, पु, (आटीक+र।) वृष। इति भूरिप्रयोग ॥

आटोप, पु, (आङ्+टुप्+घञ्।) दर्प। इति हेमचन्द्र ॥ वायुजन्य-उदरगुड़्गुड़ाशब्द। इति वैद्यक ॥ (गर्व्व, सम्भ्रम, संरम्भः। यथा-पञ्चतन्त्रे "विष भवतु मा वाभूत् फटाटोपो भयङ्करः"। यथा शिशुपालवधे। "साटोपमुर्व्वीमनिशं नदन्त"।
"आटोपशूलास्यवमीगुरुत्व-
स्तैमित्यमानाहकफप्रसेकैः"।
इति माधवकर ।)

आडम्बर, पु, (आङ्+दम्+वरच्। तत ट स्थाने ड। आडम्बाते डवि लोपे घञ् भावे वा। आड़म्ब राति रमयति वा आतोनुपेति कः। मृगविभुजेति वा कः। आड़म्बयति वा बाऊलकादरन्।) पटह। तूर्य्यरव। गजेन्द्रगर्जन। इत्यमरः ॥ आरम्भ। इति त्रिकाण्डशेष ॥ पक्ष। दर्प। इति मेदिनी ॥ क्रोध। इति स्वामी ॥ हर्ष। इति शब्दरत्नावली ॥ (आयोजन। रङ्गन सन्निवेश, यथा, भामिनीविलासे। "धात कि नु विधौ विधातुमुचितो धाराधराड़म्बर"॥ युद्ध। स्वार्थे यथा,
"असारस्य पदार्थस्य प्रायेणाडम्बरो महान्।
नहि तादृक्‌ध्वनि स्वर्णे यथा कांस्ये प्रजायते"॥)

आडि, स्त्री, (आड्+अड़+इन्।) शरालिपक्षी। इत्यमरः ॥ स्वनामख्यातमत्स्यविशेषः। अस्या गुणाः। गुरुत्वं। स्निग्धत्व। वातश्लेष्मप्रकोपनत्व। अतिवलशुक्रमेधाग्निवृद्धिकारित्वञ्च ॥ इति राजवल्लभ ॥ (विश्वामित्रशापेन वशिष्ठो महर्षिराडिपक्षिरूपतां गत इति पौराणिकी कथा॥ यथा मार्कण्डेयपुराणे आडिवकयुद्धे,—
"श्रुत्वा शाप महातेजा विश्वामित्रोऽपि कौशिक।
त्वमप्याडिर्भवस्वेति प्रतिशापमयच्छत ॥
आडिः सोऽप्युन्नतग्रीवो वक पद्भ्यामताड़यत्"॥)

आड़ू, पुं, (अड शब्दे। अनेोऽच्चूः।) उडुप। भेला भाउ इत्यादि भाषा। इत्यमरादिकोष।

आढ़क, क्ली, (आ समन्तात् ढौकते ढौक्यते वा ढौक गतौ अच् घञ् वा पृषोदरादि। परिमाणविशेष। आढ़ा इति भाषा। यथा,—
"शतयोजनविस्तीर्णे त्रिंशद्योजनमायतं।
आढ़कस्य प्रमाणन्तु मुनिभिः परिकीर्त्तितं"॥
अपि च ॥
"त्रिंशद्योजनविस्तीर्णं शतयोजनमायतं।
विंशयोजनगम्भीरमाढ़कं परिकीर्त्तितं"॥
इति गणपतिभट्ट। इति ज्योतिस्तत्त्व ॥

आढ़क, पु, क्ली, चतुःप्रस्थपरिमाण। आड़ी इति भाषा। इत्यमरः ॥ द्रोणचतुर्थभाग। इति लीलावती ॥ अष्टमुष्टिर्भवेत् कुञ्चिरित्यादिवचनात् षट्‌पञ्चाशदधिकद्विशतमुष्टिर्भवति। व्यवहारे षोडशसेरो विंशतिसेरो वा। वैद्यकमते अष्टशरावपरिमाण। तत्पर्य्याय। पात्र २ कंस ३ भाजन ४। इति परिभाषा ॥
('चतुःप्रस्थैस्तथाढ़क।
भाजन कांस्यपात्रञ्च चतुःषष्टिपलञ्च तत्"॥
इति शार्ङ्गधर।
'चतुःप्रस्थमथाढ़क।
"पात्र तदेव विज्ञेय कंसप्रस्थाष्टकं तथा"॥
इति चरक।)
अपचयविवक्षाया आढ़किकेत्यपि स्यात्। इत्यमरटीकासारसुन्दरी ॥ आढ़िका। इति भरत ॥

आढ़किक, त्रि, (आढ़क+ठञ्।) आढकपरिमित बीजवपनादियोग्यक्षेत्रादि। इत्यमरः ॥

आढ़की, स्त्री, शमीधान्यविशेष। अड्हर इति भाषा। तत्पर्य्याय। तुवरी २ वर्णा ३ करवीरभुजा ४ वृत्तबीजा ५ पीतपुष्पा ६। अस्या गुणा। कषायत्व। मधुरत्व। कफपित्तनाशित्वञ्च। तद्दिदलगुणा। ईषद्वातरुचिकारित्व। गुरुत्व। शीतलत्वञ्च। पीता रक्ता सिता त्रिविधेय। श्वेता दोषदा। लोहिता रुच्या बल्या पित्ततापादिहन्त्री च। पीता दीपनी पित्तदाहध्वंसिनी च ॥ तद्‌यूष बल्य। इति राजनिर्घण्ट ॥ अमरमते तत्पर्य्याय। काक्षी २ मृतत्स्ना ३ तुवरिका ४ मृतालक ५ सुराष्ट्रज ६। भरतमल्लिकमते एतत् षट्कं अरहरस्य। सारसुन्दरीमते तुवरिकाख्यगन्धद्रव्यस्य। केषाञ्चिन्मते सुगन्धिमृत्तिकायाः ॥
(अस्याः पर्य्यायगुणावाह।
"आढ़की तुवरी चापि सा प्रोक्ता शणपुष्पिका ॥
आढ़की तुवरा रूक्षा मधुरा शीतला लघु।
ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित्'॥
इति भावप्रकाश ॥
"मृदु कषाया च सरक्तपित्त
निहन्ति कासानतिवातला स्यात्।
गुल्मज्वरारोचककासछर्द्दि-
हृद्रोगदुर्नामहराढ़की स्यात्"॥
इति हारीत ॥
'आढकी कफपित्तघ्नी वातला,'। इति चरक ॥
'आढकी कफपित्तघ्नी नातिवातप्रकोपनी'। इति सुश्रुत ॥)

आतङ्कीन, त्रि, (आतङ्क + ख।) आतङ्किका। इत्यमरटीका।
आतत, त्रि (आङ्पूर्व्वात् तनोतेः क्तः। आतनुते विस्तारात् क्तः।) विस्तृतम्। इत्यमरः। ततः। विस्तृतः। व्याप्तः। यथा, तमालद्रुमाग्रे इत्यादि। (यथा मनुस्मृतौ १।४।
"यमाराध्यतोऽपि विभ आप्तो वर्णित यत्र।
यथा भगवद्गीतायां —
"आप्तोऽभिमतमसि शौर्य्योऽसि ततो मतः"।)
आततम, त्रि (अत्यन्त तत आर्षे तमप्।) अत्यन्तः। अत्यन्तः। इति रायमुकुटः।
आततीन त्रि (आतत + ख।) आततं। अवधा मोदनोपवेशनेन। इत्यमरटीकायां रायमुकुटः।
आतति, स्त्री (आ + तन् + क्तिन्।) आयामदैर्घ्यम्। वर्द्धिना। सीमा। इति मेदिनी।
आतङ्क, पुं, (आङ् + तकि + घञ्।) रोगः।
(यथा, माघवधे,—
"स्फुरा यदि निदाघ्य क्षमा वा प्रभवा यदि ।)
सन्तापः। शङ्का। (यथा, महावीरचरिते —
"आतङ्कमसमयस्तदविपरीतमस्य धर्मतन्तोः"।)
मुरजध्वनिः। इति मेदिनीकरौ महती। ज्वरः।
इति राजनिर्घण्टः।
("आतङ्कनिर्धनानां निवृत्तामत्यमेधया।
सर्व्वं विज्ञातुमातङ्कमस्मेर भविष्यति।
इति माधवकरः।
रोगार्थे यत्पर्य्यायं यथा सुश्रुते।
"प्रबेश च विमार्गीशाद देह वार्य्य मार्ग वाल्य मध्यमस्मृत्यर्तिं वेदनाक्षमुत्पत्ति मतिमादिः"।
ज्वरार्थे यथाभायाश।
"ज्वरो विकारो रोगश्च व्याधिरातङ्क एव च।
एकार्थकाभिधानैरभिविधिभेदैरभिधीयते"।
इति चरकः।)
आतञ्चन, क्ली, (आङ् + तञ्च + ल्युट्।) प्रतिवापः। दधिकरणाय दुग्धादिषु दध्याद्यर्पणम्। इति स्वामी। जिवेश्वम्। इति सुभूतिः। जवनम्।
इति रायमुकुटः। प्रवाप्यमानवस्तुरसोत्कर्षः।
इति सारसुन्दरी। अवनं। वेगः। आप्यायनम्।
तर्पणम्। इत्यमरभरतौ।
आततायी, [न्] त्रि (आतत + अय + णिन।) वधोद्यतः। इत्यमरः।
"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारापहारी च षडेते आततायिनः।
आततायिनमायान्तं अपि वेदान्तपारगम्।
जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्।"
इति भगवद्गीताटीकायां श्रीधरस्वामी।
आतप, पुं (आङ् + तप + अच्।)
रौद्रं। सूर्य्यालोकः। प्रकाशः २ घोतः ३। इत्यमरः। दिनज्योतिः ४ सूर्य्यालोकः ५ दिनप्रभा ६ रविप्रकाशः ७ प्रद्योतः ८ प्रभातिः ९ भाषया १० दीप्तिः ११। यत्र आतपः। अतर्लं। बेष्टनं स्वेदाकाशमहोष्ण। सर्व्वाङ्गतापी बलकृत्। इति राजनिर्घण्टः।
("आतप पतङ्गो यथा वेदस्य कामशालायाः।
तापवैषम्यजनो वेदविषमकोपनः"।
"आतपः पित्तरक्ताग्निमूर्च्छाभ्रमतृषावहः।
तापवैवर्ण्यकारी च" इति सुश्रुतः।
यथा शाकुन्तले —
"कथमातपे गमिष्यति परिबाधाकोमलैरङ्गैः"।
यथा कुमारसम्भवे,११।—
"प्रभा प्रभञ्जनसमाश्रिता महसः"।)
आतपत्र, क्ली (आतप + त्रै + क।) छत्रम्। इत्यमरः।
(यथा शाकुन्तले —
"राज्यं स्वहस्तधृतदण्डमिवातपत्रम्"।
यथा रामायणे —
"आलक्ष्य आतपत्रेण निवसासेन मूर्द्धनि।
"हन्तमन्योऽस्य तुषारयो आतपात्"।)
आतपत्रक, क्ली, छत्रम्। इति शब्दरत्नावली।
आतपवारण, क्ली (आतप + वारि + ल्युट्।) छत्रम्।
इति हेमचन्द्रः। (यथा रघुवंशे २।७।
"स न्यविकपुरं रमा पूने विनातपवारणम्"।
"अपुरिवामविनातपवारणः"।)
आतपाभाव, पुं, (आतपस्य अभावः। अर्द्धान्धुत्तरूप) छाया। इति राजनिर्घण्टः।
आतर, पुं, (आङ् + तॄ + अप्। आतरत्यनेन, इति संज्ञायामिति अप्) नद्यादितरणार्थं देयद्रव्यं भाटिः। तरपण्यम्। तरपण्यम् २। इत्यमरः।
पारानिकडि नौकाभाडा इति भाषा।
आतर्पण, क्ली, (आङ् + तृप् + ल्युट्।) प्रीणनम्।
तृप्तिः। मङ्गलविलेपनम्। आलिपना इति भाषा।
इति मेदिनी। (यथा मेदिनी।
"आतर्पणं प्रीणने स्यात् मङ्गल्यालेपनेऽपि च"।)
आतापी, [न्] पुं, (आङ् + तापि + णिनि।) चक्रवाकः। चिल्ह। इत्यमरटीकायां स्वामी। (असुरभेदः। चिल इति ख्यातः पक्षिभेदः।)
आतायी, [न्] पुं (आङ् + ताय + णिनि।) चिल्लः।
चिल इति भाषा। इत्यमरः।
आतार पुं, (आङ् + तॄ + घञ्।) आतरः। तरपण्यम्। इति शब्दरत्नावली।
आति पुं, (अत + इञ्।) पक्षी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः।
आतिथेय, त्रि, (अतिथि + ढञ्। अतिथौ साधु।) अतिथिसेवातत्परः। इत्यमरः। (यथा रघुवंशे १।६
"प्रत्युज्जगामातिथिमातिथेयः।
यथा कुमारसम्भवे ५।३१।
"तमातिथेयी बहुमानपूर्व्वया सपर्य्यया।
यथा मनुः, ३।१८।
"देवतातिथिभृत्यानां पितॄणामात्मनश्च यः"।
आतिथ्य, त्रि, (अतिथि + ञ्य।)
अतिथ्यर्थम्। अतिथिसत्कारविषयं इत्यमरः। आतिथेया च। (यथा शिशुपालवधे
"आतिथ्यमुचितं सम्भाविनं प्रयुज्यते"।)
आतिथ्य पुं, अतिथिः। इति मेदिनी।
आतु पुं, (अत् + तु + कु।) भेलकः। भेला आड़ इत्यादि भाषा। इति शब्दमाला।
आतुर, त्रि (आङ् + तुर + क) रोगी। व्याधितः।
आमयावी २ विकृतः ३ व्याधितः ४ अपटुः ५ अभ्यमितः ६ अभ्यान्तः ७। इत्यमरः। (यथा हितो परेहि। वैद्याणामातुरः श्रेयान्। यथा मनुः ४।१९४
"न आत्मनाप्नोति भोगान् आतुरो न सतामिति"।
आतुरस्तावत् आर्त्तानां प्रति चिकित्सा यथा। तद्यथा—असाध्यवध्यानामप्यसाध्योऽप्यातुर इत्युच्यते। एतदपि भवसत्वविशेषेण तथाप्यातुराणां प्रति चिकित्सा। तस्य परीक्षा कृतकर्म्मकृत्यातुरस्य वर्णाः सम्यग्विधिनावेक्षणं यथायोग्यमवलोकनं। न कुविधिविषयमप्रमाणं वा भेषजमनुष्यं भवति। आतोऽपि वैद्यवेन पर्य्यालोचनमभिनिर्देशः। इति चरकः।
आतुरस्य सम्यगवेक्षणेन भिषगातुरस्यायुः परीक्षेत।
इति सुश्रुतः।)
आतर्ष, स्त्री (आङ् + तृष + अच्।) तृषाविशेषः।
पासा इति भाषा। अस्य गुणाः। प्रियमत्वं। रक्तवर्द्धनं। आतुरं। प्रीतवर्णं। रूक्षत्वं। कारिणं। अपरं। तापरक्तपित्ताश्मरीहरत्वं।
इति भावप्रकाशः।
आतोद्य, क्ली, (आङ् + तुद + ण्यत्।) वाद्यं। तत्र तुर्य्यादि। वीणादिकार्य्यं ततं १ मुरजादिकार्य्यं आनद्धं २ वंशादिकार्य्यं सुषिरं ३ कांस्यतालादिकार्य्यं घनं ४ इत्यमरः। (यथा रघुवंशे। "आतोद्यमृतस्य तूर्य्यनिर्घोषैः।
"आतोद्यं मादयामास मन्थमानमहास्वनम्"।)
आत्तगन्ध, त्रि (आत्तः गृहीतः अपहृतः गन्धः गर्वो यस्य वा गन्धो येन।) दूरीकृतगर्वः। आक्रान्तः। अभिभूतः २। इति हेमचन्द्रः। अपकृतगर्वः। (यथा रघुवंशे ११।१०।
"स मातङ्गमिवात्तगन्धः।
शरणमेनं प्रहृतो महीपाः"।)
आत्तगर्व्व, त्रि (आत्तः गृहीतः अपहृतः गर्व्वः यस्य वा गर्व्वो येन।) धर्षितः अभिभूतगर्व्वः। दूरीकृतगर्व्वः। धर्षितः। इत्यमरः।
आत्मगुप्ता स्त्री, (आत्मना गुप्ता। रक्षिता शूकशङ्कुभिः।) कपिकच्छूः। आलकुशी इति भाषा। अव्यण्डा। मर्कटी १ कच्छुरा २ अजहा ३ शूकशिम्बी ४ कण्डुरा ५ प्रावृषा ६ महा ७ दुरभिग्रहा ८ आत्मगुप्ता ९ कपिकच्छू १० वानरी ११ कण्डूरा ११। इति रत्नमाला।
("आत्मगुप्ता समाख्याता ऋषभप्रोक्ता। इति सुश्रुतः।
विशेषोऽस्या अवगम्यतां कपिकच्छुशब्दे द्रष्टव्यः।)
आत्मघाती [न्] त्रि, (आत्मन् + हन + णिन्।)
आत्मघातकः। आत्महा।
आत्मघाती, [न्] त्रि, (आत्मन् + हन् + णिन्।)
आत्महन्ता। यथा कूर्म्मपुराणे।
"आत्मानमेव यो हन्यात् सर्पो वह्न्यमुदकादिभिः।
विधिवत्तस्य नाशौचं नाग्निर्नाप्युदकादिकम्"।
आत्मघातकस्य। वर्द्धमानविधिर्मूर्च्छाशस्त्रेण
प्रायश्चित्तं यथा,—
"दशमेऽहनि मासादौ वै च सूक्ष्म विचारिकः।

घातयन्ति स्वमात्मानं पश्वादिहताश्च ये ।
तेषां पुत्राश्च पौत्राश्च दयया समभिप्लुताः ।
यच्छ्राद्धं प्रतन्वन्ति विघ्नं तामप्रतिष्ठितम् ॥
तथा ते सम्प्रवक्ष्यामि नमस्कृत्य स्वयम्भुवे" ।
इति हेमाद्रौ वृद्धशातातपेनोक्तम् ॥
'आत्मनो घातनं कुर्य्यात् चरेच्चान्द्रायणद्वयम् ।
तप्तकृच्छ्रचतुष्कञ्च त्रिंशत् कृच्छ्राणि वा पुनः ॥
अर्व्वाक् संवत्सरात् कुर्य्यादश्वादि यथोदितम् ।
कृत्वा नारायणबलिमनिन्द्यात्तदायुषः' ॥
इत्यात्मवधनिमित्तं तज्ज्ञातिवधप्रायश्चित्तं समुचितं कार्य्यम् । इति निर्णयसिन्धौ ५ परिच्छेदः ॥ अन्यत् पतितशब्दे द्रष्टव्यम् ॥ १ ॥ आत्मत्यागिषु विशेषमाह गौतमः । "प्रायोऽनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छताम्" इति । प्रायो महाप्रस्थानं । अनाशकमनशनं । प्रपतनं शैलशिखरादवपातनं । इत्यादिनिमित्तैः शास्त्रविहितमार्गेण इच्छापूर्व्वकमृतानामशौचादिकं न कर्त्तव्यमित्यर्थः । अङ्गिराः ।
"चाण्डालादुदकात् सर्पात् ब्राह्मणाद्वैद्युतादपि ।
दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्म्मिणाम् ॥
उदकं पिण्डदानञ्च प्रेतेभ्यो यत् प्रदीयते ।
नोपतिष्ठति तत्सर्व्वं अन्तरीक्षे विनश्यति" ॥
यथा मनुः ।
'वृथासङ्करजातानां प्रव्रज्यासु च तिष्ठताम् ।
आत्मनस्त्यागिनाञ्चैव निवर्त्तेतोदकक्रिया" ॥
वृथासङ्करजातानामिति वृथाजाताः पञ्चमहायज्ञादिरहिताः । सङ्करजाताः प्रतिलोमजाः ॥ २ ॥ प्रमादात् पूर्व्वोक्तनिमित्तैर्मरणे विधत्ते एव शौचादिकम् । यतस्त्वाङ्गिराः ।
"अथ कश्चित् प्रमादेन म्रियेताग्न्युदकादिभिः ।
तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया" ॥
चाण्डालादिहताहिताग्नेर्ब्राह्मणादीनां प्रतिपत्तिकर्म्म च स्मृत्यन्तरेऽभिहितम् ।
"वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे ।
पात्राणि तु दहेदग्नौ यजमाने वृथामृते" ॥
वृथामृत अविहितमार्गेण मृत । तथा,—
"आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया ।
तेषामपि च गङ्गायास्तीरे संस्थापनं मतम्" ॥
गङ्गेति पुण्यनद्युपलक्षणम् ॥ ३ ॥ एवं पूर्व्वोक्तनिन्दितमरणे मृतानां स्नेहादिनामाशौचौर्द्ध्वदेहिककरणे स्मृत्यन्तरे प्रायश्चित्तमाम्नातं ।
"कृत्वाग्निमुदकं स्नानं स्पर्शनं वहनं तथा ।
रज्जुच्छेदाश्रुपातञ्च तप्तकृच्छ्रेण शुद्ध्यति" ॥ इति ।
एतच्च बुद्धिपूर्व्वं प्रत्येकमग्न्यादिकरणे ॥
अबुद्धिपूर्व्वके तु संवर्त्तः ।
"एषामन्यतमं प्रेतं यो वहेत दहेत वा ।
कटोदकक्रियां कृत्वा कृच्छ्रं सान्तपनं चरेत्" ॥
अत्र समन्त्वादिमांसभैक्षाहारस्त्रिषवनञ्च । तथा एकरात्राभोजनादिकं चाभिहितं तदशक्तविषये देशकालावस्थापेक्षानुसारेण योजनीयम् ॥ ४ ॥ यस्तु वृद्धादिर्लुप्तमभिषक्क्रियस्त्वात्मघननमप्यनुज्ञातमादिपुराणे ।
"वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥
तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः ।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमारभेत्" ॥
तथा —
"गच्छेत् महापथं वापि तुषारगिरिमादरात् ।
प्रयागे वटशाखायां देहत्यागं करोति यः ॥
स्वयं देहविनाशस्य काले प्राप्ते महामतिः ।
उत्तमान् प्राप्नुयाल्लोकान्नात्मघाती भवेत् क्वचित् ॥
एतेषामधिकारस्तु सर्व्वेषां सर्व्वजन्तुषु ।
नराणामथ नारीणां सर्व्ववर्णेषु सर्व्वदा ॥
अशौचं स्यात् यथा तेषां वज्राग्न्यहतेषु च ।
वाराणस्यां म्रियेद्यस्तु प्रत्याख्यातभिषक्क्रियः ॥
प्रणवं तारकं ब्रूते नान्यथा कस्यचित् क्वचित्" ।
विवस्वान् ।
"सर्व्वेन्द्रियविमुक्तस्य स्वव्यापाराक्षमस्य च ।
प्रायश्चित्तमनुज्ञातमग्निपातो महापथः" ॥
धर्म्मार्ज्जनासमर्थस्य द्वादशवार्षिकादिरूपप्रायश्चित्तासमर्थस्य । एवं शास्त्रविहितमार्गेण मृतानां चाण्डालादिहतानां संवत्सरादूर्द्ध्वमौर्द्ध्वदेहिकं कार्य्यं । षट्त्रिंशन्मते ।
"गोब्राह्मणहतानाञ्च पतितानां तथैव च ।
ऊर्द्ध्वं संवत्सरात् कुर्य्यात् सर्व्वमेवौर्द्ध्वदेहिकम्" ॥ ५ ॥
अथापरं विशेषमाह पराशरः ।
"चाण्डालेन श्वपाकेन गोभिर्व्विप्रैर्हतो यदि ।
आहिताग्निर्मृतो विप्रो विषेणात्मघातकः ॥
दहेत ब्राह्मणं विप्रो लोकाग्नौ मन्त्रवर्ज्जितम् ।
दग्ध्वास्थीनि पुनर्गृह्य क्षीरेण क्षालयेत्ततः ॥
स्वेनाग्निना समन्त्रेण पृथगेतत् पुनर्दहेत्" ॥ ६ ॥
संवत्सरादर्व्वागपि तत्तत्पापानुसारेण त्रिकृच्छ्रादि प्रायश्चित्तं विधाय नारायणबलिञ्च कृत्वा और्द्ध्वदेहिकं कार्य्यं । आयुषोऽनियतत्वेन संवत्सरानन्तरं नौर्द्ध्वदेहिकादिलोपप्रसङ्गात् । तत्र नारायणबलिं कृत्वा । तथा च वृद्धयाज्ञवल्क्यः ।
"नारायणबलिः कार्य्यो लोकगर्हाभयान्नरैः ।
तथा तेषां भवेत् शौचं नान्यथेत्यब्रवीद्यमः" ॥
नारायणबलौ कृते और्द्ध्वदेहिककरणे भवतीत्यर्थः ॥ ७ ॥ सर्पहते तु विशेषः । संवत्सरं यावत् पञ्चम्यां नागपूजां विधाय तदनन्तरं नारायणबलिं कृत्वा सौवर्णनागं प्रत्यक्षां गाञ्च व्यासोद्देशेन ब्राह्मणाय दत्त्वा और्द्ध्वदेहिकं कुर्य्यात् ॥ ८ ॥
नारायणबलिस्वरूपञ्च विष्णुनाभिहितं ।
"एकादश्यां समासाद्य शुक्लपक्षस्य वै तिथिम् ।
विष्णुं समर्च्चयेद्देवं यमं वैवस्वतं तथा ॥
दशपिण्डान् घृताभ्यक्तान् दर्भेषु मधुसंयुतान् ।
तिलमिश्रान् प्रदद्याद्वै संयतो दक्षिणामुखः ॥
विष्णुं बुद्धौ समासाद्य नद्यम्भसि ततः क्षिपेत् ।
नामगोत्रग्रहं कृत्वा पुष्पैरभ्यर्च्च्य ततः ॥
धूपदीपप्रदानञ्च भक्ष्यभोज्यं तथापरम् ।
विद्यातपःसमृद्धान् वै कुलोत्पन्नान् समाहितान् ॥
निमन्त्रयेत विप्रान् वै पञ्च सप्त नवापि वा ।
अपरेऽहनि सम्प्राप्ते मध्याह्ने समुपोषितः ॥
विष्णोरभ्यर्च्चनं कृत्वा विप्रांस्तानुपवेशयेत् ।
उदङ्मुखान् यथाज्येष्ठं पितृरूपमनुस्मरन् ॥
मनो निवेश्य विष्णौ वै सर्व्वं कुर्य्यादतन्द्रितः ।
आवाहनादि यत् प्रोक्तं देवपूर्व्वं तदाचरेत् ॥
तृप्तान् ज्ञात्वा ततो विप्रान् भूमिं शुद्धां यथाविधि ।
दक्षिणाग्रकुशैरेव तिलादिसर्पिषेण च ॥
पञ्च पिण्डान् प्रदद्यात्तु देवरूपमनुस्मरन् ।
प्रथमं विष्णवे दद्यात् ब्रह्मणे च शिवाय च ॥
यमाय सानुचराय चतुर्थं पिण्डमुत्सृजेत् ।
मृतं सङ्कीर्त्य मनसा गोत्रपूर्व्वमतः परम् ॥
विष्णोर्नाम समुच्चार्य पञ्चमं पूर्व्ववत् क्षिपेत् ।
विप्रानाचम्य विधिवत् दक्षिणाभिः समर्च्चयेत् ॥
तत्र एकतमं विप्रं हिरण्येन समर्च्चयेत् ।
गवा वस्त्रेण भूम्या च प्रेतं तु मनसा स्मरेत् ॥
ततस्तिलाम्भो विप्राणां हस्तैर्दर्भसमन्वितैः ।
तिलपर्णं नमःपूर्व्वन्तु नाम बुद्धौ निवेश्य च ॥
धृतिगन्धानलाकान्तु ततो दद्युः समाहिताः ।
मित्रभृत्यजनैः सार्द्धं पश्चाद्भुञ्जीत वाग्यतः" ॥
भविष्यपुराणे ।
"सुवर्णतारनिष्पन्नं नागं कृत्वा तथैव गाम् ।
व्यासाय दत्त्वा विधिवत् पितुरानृण्यमाप्नुवान्" ॥
इति मदनपारिजाते ५ स्तवकः ॥

आत्मघोषः, पुं, (आत्मानं घोषयतीति । आत्मन् + घुष् + अण् ।) काकः । इत्यमरः ॥ कुक्कुटः । इति शब्दचन्द्रिका ॥

आत्मजः, पुं, (आत्मन् + जन् + ड । आत्मा वै जायते पुत्र इति श्रुतेः ।) पुत्रः । इत्यमरः ॥ मनुः, ७।१४ ।
"तस्यार्थे सर्व्वभूतानां गोप्तारं धर्म्ममात्मजम्" ।
आयुष्मान्, [त्] त्रि, (आयुस् + मतुप् ।) चिरजीवी । दीर्घायु । तत्पर्य्याय । जैवातृक २ । इत्यमर ॥ (यथा मनु, २ । १२५,३ । २६३ ।
"आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने" ।
"आयुष्मन्त सुत सूते यशोमेधासमन्वित" इति च ॥)

आयुष्मान्, पु, विष्कम्भादिसप्तविंशतियोगान्तर्गततृतीययोग । तत्र जातफल । "यस्यायुष्मान् जन्मकाले धनुष्मान् याने यान तस्य देशेषु कार्य्यं । कुर्य्यान्नून क्रीडन पुण्यवाक्या दाक्षैर्व्वासैरन्वितो गर्व्वितश्च" ॥ इति दीपिका ॥
("आयुष्मान् सत्त्ववान् साधो द्रव्यवानात्मवानपि"
इति सुश्रुत ॥)

आयुष्य, त्रि, (आयुष् + यत् ।) पथ्य । इति राजनिर्घण्टः ॥ आयुर्हितकारक ॥ (मनु । ४।१०६ ।
"धन्य यशस्यमायुष्य स्वर्ग्यं चातिथिपूजन" ।
तत्रैव २ । ५२ ।
"आयुष्य प्राङ्मुखो भुङ्क्ते यशस्य दक्षिणामुखम्" ।
"आयुष्य भोजन जीर्णे वेगानाञ्चाविधारण ।
ब्रह्मचर्य्यमहिंसा च साहसानाञ्च वर्ज्जन" ॥
इति सुश्रुत ॥
"आयुष्या दीपनी चैव चक्षुष्या व्रणशोधिनी" ।
इति हारीतः ।)

आयुष्यसूक्त, क्ली, (आयुष्यञ्च तत्सूक्तञ्चेति । कर्म्मधारयः ।) नान्दीश्राद्धादौ वसुधारासम्पादनानन्तरपाठ्यो वैदिकमन्त्रविशेषः ।
सामगाना तन्मन्त्रो यथा,—
ॐ आयुर्विश्वायुर्विश्व विश्वमायुरसिमचि । प्रजान्त्वष्टरधिनिधेह्यस्मे शत जीवेम शरदो वयन्ते । आयुषे मे पवस्व वर्चसे मे पवस्व विदुः पृथिव्या दिवो जनित्या श्रृण्वन्त्वापोध क्षरन्ती सोमो धेहाय ममायुषे मम ब्रह्मवर्चसाय यजमानस्याश्च मामुष्य राज्याय । अमुष्य स्थाने यदर्थं दक्षिणस्य मध्यन्तनाम प्रयोज्य । इति रघुनन्दनभट्टाचार्य्यकृतश्राद्धप्रयोगतत्त्व ॥ * ॥
यजुर्व्वेदी तन्मन्त्रो यथा,—
ॐ आयुष्य वर्चस्य रायस्पोषमौद्भिद इद हिरण्य वर्चस्व जैत्रायाविशतादुमां । न तद्रक्षांसि न पिशाचास्तरन्ति देवानामोजः प्रथमजं ह्येतत् । यो बिभर्त्ति दाक्षायणं हिरण्यं स देवेषु कृणुते दीर्घमायुः समनुष्येषु कृणुते दीर्घमायुः । यदा बध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमाना । तन्म आबध्नामि शतशारदायुष्माञ्जरदष्टिर्य्यथास" । इति तत्कृतयजुर्व्वेदीयश्राद्धप्रयोगतत्त्व ॥

आयुष्कर, त्रि, (आयुस् + कृ + क ।) परमायुर्जनक ॥ (आयुर्वृद्धिजनकः ।
"सक्षौद्रमामलकचूर्णरसैर्दशैरेवं तैलेन वा
गुडेन पयसा घृतेन यवशक्तुभिर्वा सह ।
तिलेन सह माक्षिकेण पलनेन सूपेन वा
वपुष्करमरुष्कर परममेध्यमायुष्कर" ॥
इति वाभटः ॥)

आयोग, पु, (आङ् + युज् + घञ् ।) गन्धमाल्योपहारः । व्यापारः । रोध । इति हेमचन्द्र ॥ (यथा रामायणे,—
"सरले कर्णिकारैश्च किंशुकैश्च सपुष्पितैः ।
स देशो भमनायोग प्रदीप्त इव लक्ष्यते" ॥)

आयोगव, पु, (अयोगव एव स्वार्थे अण् ।) शूद्राद्वैश्याया जातो जातिविशेष । इति हेमचन्द्र ॥ तस्य कर्म्म काष्ठतक्षण । (यथा मनु १०।१२, १० । १६ ।
"शूद्रादायोगव क्षत्ता चण्डालश्चाधमो नृणा ।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः" ॥
"आयोगवोऽथ क्षत्ता च चाण्डालश्चाधमो नृणा ।
प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रय" ॥)

आयोजन, क्ली, (आङ् + युज् + ल्युट् ।) उद्योग । आहरण । उपासादन । यथा,—
"कुत्रचित् तण्डुला सन्ति क्व च स्थाली क्व चेन्धन ।
तेषामायोजन कुर्व्वन् मुख्य कर्त्ताभिधीयते" ॥
इति गोयीचन्द्रकृतकारिका ॥

आयोधन, क्ली, (आङ् + युध + ल्युट् ।) युद्ध । वध । इति मेदिनी ॥ (रघुवंशे, ६।४२ ।
"आयोधने कृष्णगति सहाय-
मवाप्य य क्षत्रियकालरात्रि" ।
भट्टि, "आयोधने स्वायुकमस्त्रजातम्" ।
रघु, ५ । ७१ । "आयोधनाग्रसरतां त्वयि वीर । याते)

आर, क्ली, (आङ् + ऋ + भावे घञ् ।) मुण्डायस । मुण्डलोह । इति राजनिर्घण्ट ॥ पित्तल । इत्यमरटीका ॥ कोण । प्रान्तभाग । इत्यानन्दलहरीटीका । (चक्राङ्गकाष्ठभेद । यथा महाभारते
"आरान्तरेणावपतत् सन्निपात्य स्वयेन च" ।
"पञ्चिमषष्टिशतारश्च वेदार्थे स परः कविः" ॥)

आरः, पुं, (आङ् + ऋ + कर्त्तरि सज्ञाया घञ् ।) मङ्गलग्रहः । शनिः । पित्तल । इति हेमचन्द्रः ॥ वृक्षभेद । तत्पर्य्याय । मधुराम्लफल २ । इति रत्नमाला ॥ रेपथ इति ख्यातः ॥

आरकूटः, पु स्त्री, (आरं कूटयति स्तूपीकरोति पचाद्यच् ।) पित्तल । इत्यमर । (यथा नैषधे ।
"अस्माघने काञ्चननायिकाकृते किमारकूटाभरणेन न प्रिय" ।)

आरक्ष, त्रि, (आरक्षतीति । आङ् + रक्ष + अच् ।) रक्षायुक्त । इति शब्दरत्नावली ॥ रक्षणीय । इति विश्वः ॥

आरक्ष, पु, (आङ् + रक्ष + घञ् ।) गजकुम्भसन्धि । इति त्रिकाण्डशेषः ॥

आरग्वधः, पुं, (आ + रगे शङ्कायां क्विप् । आरक् रोगसङ्घातमपि हन्ति अच् वधादेशश्च ।) वृक्षविशेष । सोनालु सोंदालि इति ख्यात । तत्पर्य्याय । राजवृक्ष २ सम्पाक ३ चतुरङ्गुल ४ आरेवत ५ व्याधिघात ६ कृतमाल ७ सुवर्णक ८ । इत्यमर ॥ मन्थान ९ रोचन १० दीर्घफल ११ नृपद्रुम १२ हिमपुष्प १३ राजतरु १४ कण्डुघ्न १५ ज्वरान्तक १६ अरुज १७ स्वर्णपुष्प १८ स्वर्णद्रु १९ कुष्ठसूदन २० कर्णाभरणक २१ महाराजद्रुम २२ कर्णिकार २३ स्वर्णाङ्ग २४ । इति राजनिर्घण्ट ॥ प्रग्रह २५ । इति रत्नमाला ॥ अस्य गुणा । अतिमधुरत्व । शीतलत्व । शूलज्वरकण्डुकुष्ठमेहकफविष्टम्भनाशित्वञ्च । इति राजनिर्घण्ट ॥ अपि च । ज्वरहृद्रोगवातरक्तोदावर्त्तरोगे अतिशयपथ्यत्व । मृदुत्वञ्च । अस्य फलगुणा । मधुरत्व । शुक्रकारित्व । वातपित्तहारित्वञ्च । इति राजवल्लभ ॥ आमलतास इति हिन्दीभाषा ।
"आरग्वधो राजवृक्ष सम्पाकश्चतुरङ्गुल ।
आरेवतव्याधिघातकृतमालसुवर्णका ॥
कर्णिकारो दीर्घफल स्वर्णाङ्ग स्वर्णभूषण ।
आरग्वधो गुरु स्वादु शीतल स्रसनोत्तम ॥
ज्वरहृद्रोगपित्तास्रवातोदावर्त्तशूलनुत् ।
तत्फल स्रसन रुच्य कुष्ठपित्तकफापह ॥
ज्वरे तु सतत पथ्य कोष्ठशुद्धिकर परं" ।
इति भावप्रकाश ॥
(अस्य प्रयोगो यथा,—
"बाले वृद्धे क्षते क्षीणे सुकुमारे च मानवे ।
योज्योऽमृदुत्वमायित्वाद्विशेषाच्चतुरङ्गुल" ॥ * ॥
ग्रहणप्रणाली यथा ॥ * ॥
"फलकाले फलन्तस्य ग्राह्य परिपक्वञ्च यत् ।
तेषा गुणवता भार सिकतासु निधापयेत् ॥
सप्तरात्रात् समुद्धृत्य शोषयेदातपे भिषक् ।
ततो मज्जानमुद्धृत्य शुचौ भाण्डे निधापयेत्" ॥ * ॥
प्रयोगविशेषे गणा यथा ॥ * ॥
"द्राक्षारसयुतो देयो दाहोदावर्त्तपीडिते ।
चतुर्व्वर्षसुख बाले यावद्द्वादशवार्षिके ॥ * ॥
चतुरङ्गुलमज्ज्ञस्तु प्रसृत वाप्यञ्जलि ।
सुरामण्डेन सयुक्तमथवा कोलसीधुना ॥
दधिमण्डेन वा युक्त रसेनामलकस्य वा ।
कृत्वा शीतकषाय त पिवेत् सौवीरकेण वा" ॥
इति चरक ॥)

आरट्ट, पु, (आङ् + रट् + टच् ।) देशविशेष । त्रिकाण्डशेषे क्षत्रियवर्गे आरट्टशब्ददर्शनात् ॥ तत्र आरट्टोऽपि पाठ ॥ (यथा भारते,—
"पञ्चनद्यो वहन्त्येता यत्र पीलुवनान्युत ।
शतद्रुश्च विपाशा च तृतीयैरावती तथा ॥
चन्द्रभागा वितस्ता च सिन्धुषष्ठा बहिर्गिरे ।
आरट्टा नाम ते देशा नष्टधर्म्मा न तान् व्रजेत्" ॥
"पञ्च नद्यो वहन्त्येता यत्र निःसृत्य पर्व्वतात् ।
आरट्टा नाम वाह्लीका न तेष्वार्य्यो द्व्यह वसेत्" ॥)

आरट्टज, पुं, (आरट्टदेशे जायते आरट्ट + जन + ड ।) आरट्टदेशोद्भवघोटक । इति जटाधर

विनाशदैवमृरिपयोगी च। (आरकूटेनोत्तेक्ष्ट,
त्रि। यथा महाभारते —
"वीथ्यो यानं मरकतमयैर्
मस्तका परिस्फारकाः।
येषां पश्यताम् इति यास्वथम-
आरकूटान् प्रसवराम् मिश्रम्" ।)

आरग्वि, पुं, (आङ्+रम्+अविन्।) आरग्वः।
वन्यर्पोक। कुण्डलका २। इति त्रिकाण्डशेषः।
सामलता नाम इत्यादि भाषा।

आरग्वधः, पुं, (आरग्वे वधः। आरग्व+वध्+अ
चातौ वस्तुभिः कमलादयः।) आरग्वानामवृक्षः।
स च समया यथा। मन्थिका १ रामरा २ चक्र
३ वटीका ४ दन्त ५ एकला ६ मरा ७। इति
शिक्षादिशनो वैदिकः।

आरग्वकुशा, स्त्री,(आरग्वकुशाम्बे पराकार पर्वे मनाः।
मता आर्ते च।) मुद्गपर्णी। मुगानो इति
भाषा। इति राजनिघण्टः।

आरग्वशात्र्यादि, पुं, (आरग्वे मत आरग्व पथ निव
पर च पर याति।) विंशदात्रि। मधुरपथ
मात्र। मीनकेवलकरालक। इति वैद्यकम्।

आरति, स्त्री, (आङ्+रम्+क्तिन्।) विरति। निवृत्ति। इत्यमरः। (उपरामः, वैराग्यम्।)

आरनाल, स्त्री, (आरन्ति आप्+ऋ+अण् आर।
तत्र अन्ये भवतीति का भाषा। आरा नाम्नी
नन्दी चक्र।) कांजिकं। इति हेमचन्द्रः।
"आरनालम् सौवीरके काञ्जिकवाहने।
पदेषु अभिवेचन सौवीरकपूर्वं मते।
इति राजनिघण्टः।
("आरना इति रामझिका चलनेर्य द्विरावकम्
स्वल्पकालाशन रामबीजलाश।
कार्यादिचे। ० इति भावप्रकाशः।)

आरनालक, स्त्री, (आरना न पर नादेव च।)
कांजिकं। इत्यमरः। कांजि इति भाषा।

आरब्ध, त्रि (आङ्+रभ्+क्त) प्रारब्धं। प्रारब्धे
सौ। यथा,—
"आरब्ध मपनायात् पापं वपु यथा न मवामिवि।
भवन्नन्ति मपना आदि वपु यथायो न वंशक।
इति भगवद्गीता। । आरब्धकाण्डवीजा
माओ यथा,
"समयस्तिरतम् आरब्ध वालनाम पद।
आरब्ध भूत न आरभ्य न भूत।
इति विद्वानिरूपणम्।

आरम्भ पुं (आङ्+रभ्+घञ्) उद्यम इति
प्रथमारम्भः प्रयत्न। उद्यम। यथा आदि।
[illegible]

यथा,—
"मीनादिको रविर्वैशाखानारम्भमयत्ने।
मण्डेऽन्ये चाम्रमासावैसाधा वारम्भ ध्रुवम्"।
आरम्भपदमपये आपदमापदमने। इति मल-
मासतत्त्वम्। पारिमाषिकारम्भो यथा,—
"आरम्भो दत्त वर्षे बहुको वन्मपयो।
नाम्नीमानं विधाता भागे मानवरिम्भिका"।
इति तिथ्यादितत्त्वम्। (यथा मेघदूते। १०।—
"वलारम्भे परर मङ्गलेदारनायाभिनेचाम्"।
आदिमपर्वे। प्रथमपरिच्छेदे।
"प्रारम्भे विशिष्टमय पारिप्लवपरिक्रमादि
कालः"। रघुवंशे। ११।१।
"आरम्भो बहुभारत्न आरम्भप्रभोरमा"।)

आरव, पुं, (आङ्+रु+अप्।) शब्दः। इत्यमरः।
(यथा रामायणे। "चापरावबलारव"।)

आरवी, स्त्री, आरवनामकपेचकरोतीविभाषा। यथा
"अश्राद्धया मना यथा देवी मरवीहवे"।
विज्ञानामश्वापाढ्मवये पापकारे।
वधे विरे वधने च आरवीमारवी पठेत्"।
इति मलयविन्नकः।

आरा स्त्री, (आङ्+ऋ+अच्+टाप्।) चर्म
भेदकास्त्रं। अलमाल। चर्मप्रभेदिका २। इत्य
मरः।
"उपमानामपथामोक्षितस्य"। इति माघः।)

आरात्, स्त्री, (आरादक पर्वे स्तोकम्।) बहुधा
पाककुर्यं।
"बहुधा नरमारिवाराणं मुकनुषवे"।
"आरादस्तु मुनयोऽया सम्यग्भावितवैरिवा"। इति
हलायुधः।

आरात् अ (आ याति। रा दाने वाक्यबारादि
प्रत्ययः।) दूरं। निकटं। इत्यमरः।
(यथा, उत्तरचरि ते।
मेघमाले रथा आरादपि विजयं"। इति
सन्मतारादनिवसमानम्"। इति रघौ ५।१।)

आराति, पुं, (आङ्+रा+क्तिन्।) अराति।
शत्रु। इति भरत द्विरूपकोषः।

आरात्रिक क्ली (आङ्+रात्रि+ठक्।) नीराजन
विधिविशेषः। [illegible] नीराजनपद्धतिः।
आरति इति भाषा। अथास्य प्रमाणविधिः।
अथवा मूलमन्त्रेण दत्त्वा पुष्पाञ्जलिं ततः।
महानीराजनं कुर्यात् महावाद्यजयस्वनैः।
प्रज्वालयेत् तदर्थं च कर्पूरेण घृतेन वा।
आरात्रिकं शुभे पात्रे [illegible]"।
[illegible]
"आरती च आर च च विमो
[illegible]
[illegible]
[illegible] च भूमौ"।

आ [illegible] आङ्+राध्+ल्युट्।) आराधन।
[illegible] इति
[illegible]
[illegible]

उत्तरचरिते। प्रथमाङ्के।
"केर्ष दशाय कौसल्य यदि वा मातरीमति।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा"।
कुमारसम्भवे १।५८।
"आराधनायास्य सखीसमेतां
समादिदेश प्रयतां तनूजाम्"।)

आराधना, स्त्री, (आङ्+राध्+णिच्+युच्+
स्त्रीत्वात् टाप्।) साधना। अलमाल। सेवा १
भक्ति २ परिचर्या ३ प्रसादना ४ शुश्रूषा ५
उपास्ति ६ वरिवस्या ७ परीष्टि ८ उपचार
९। इति हेमचन्द्रः।

आराम, पुं, (आरमन्तेऽत्र, आङ्+रम्+आधारे
घञ्।) उपवनं। इत्यमरः। बागान् इति भाषा।
(यथा, मनु —८।२६२।८।२६४।
"देवसुरवणग्रामानामारामस्य च".
"सर्वं सकामार्थं चार्थं वा वौघवा भवत्"।)

आरामशीतला, स्त्री,(आरामात् शीतला विचरं।)
सुगन्धिपर्णिकाशेषः। तत्पर्यायः। शिशिरा।
अलम्बुसा। चापनी २ शीतला ३ सुगन्धी ४
रामा ५ मदानन्दा ६ सुगन्धा ७ रक्तशीतला
८। अस्या गुणाः। शिशिरं। शीतलत्वं। पित्त-
हारित्वं। दाहशोषश्रमध्नत्वं। विस्फोटकदोष
नाशित्वं। इति राजनिघण्टः। (यथा वैद्ये।
"आरामशीतला शिशा शीतला पित्तहारिणी"।)

आरालिक त्रि (अरालं कुटिलं चरति इति ठक्।)
सूपकारः। पाचकः। इत्यमरः।

आराव पुं, (आङ्+रु+घञ्।) शब्दः। इत्यमरः।
(यथा महाभारते।
आरावं माधवस्य मधुकी चापितेषाम्"।
"आराव दुन्दुभीनाञ्च"।)

आरु पुं, (ऋ+उण्) कर्कटः। वराहः। शूकरः।
इति मेदिनी।

आरुक पुं, (आरुति अवैतेऽवा। ऋ+उ+किन्।)
पितृगणः। भद्रक त्रि। इत्यादिकोषः।

आरुष स्त्री, (आरु+कन्।) हिमालयोद्भवौ
षधिविशेषः। आरु इति भाषा। तत्पर्यायः।
शीतलम् २ वीरं ३ पो पर्णं ४। अस्य गुणाः।
मधुरं चक्षुष्यं। कफं दुष्टं। मधुरं। पि-
त्तघ्नं। अस्य नवीनपुष्पधारणमित्यनेन। इति
राजनिघण्टः। (यथा चरके।
"आरु मधुरं शीतं चक्षुष्यं कफपित्तनुत्"।)

आरुह, त्रि, (आरु+रह्+क्विप्।) चढ़ा
रोहक। चढ़ाइत उठा चढ़ा। आदि इति
भाषा। यथा,—
"आरुह दक्षिणे बालेनि पुष्पमालाम्"।
आरुह अविनाशम् दक्षिणे कोलिवर्षम्"।
इति रामायणे सुन्दरकाण्डे।
(आ ह्यपि
"आरुहं [illegible]
[illegible]"।
[illegible]
[illegible]

आरेवतं, क्ली, (आरेवयति निस्सारयति मल सारकत्वात्। रेव्ट प्लवगतौ। णिच्+विच्। अतति। अत+अच्। तत आरेव् चासौ अतश्चेति।) पारावतवृक्षफल। इति राजनिर्घण्टः॥ (“मूलक शुष्कमाषञ्च वर्षाभू पञ्चमूलक।
आरेवतफलञ्चाम्लु पक्वा तेन घृत पचेत्”॥
इति सुश्रुत वैद्यकचक्रपाणिसंग्रहश्च॥)

आरेवत, पु, (आरेवयति रेचयति मल सारकत्वात् आङ्+रेव्+णिच्+विच्+अतच्।) आरग्वधवृक्षः। इत्यमरः॥

आरोग्य, क्ली, (अरोगस्य भावः। ष्यञ्।) व्याध्यभाव। तत्पर्य्याय। अनामय २। इत्यमरः॥ पाटव ३ लाघव ४ वार्त्त ५। इति राजनिर्घण्टः॥ (“आरोग्य तत् सुखावह”। इति शार्ङ्गधरः॥
“धर्म्मार्थकाममोक्षाणामारोग्य मूलमुत्तमम्”।
“सुखसञ्ज्ञकमारोग्यम्,”
“विद्याध्ययनशब्दाश्च सुखो वायु प्रदक्षिण।
पथि वेश्मप्रवेशे तु विद्यादारोग्यलक्षणम्॥”
इति चरकः।
“सुखमात्र समासेन सद्वृत्तस्यैतदीरित।
आरोग्यमायुरर्थो वा नासद्भि प्राप्यते नृभि”॥
इति सुश्रुतः॥)

आरोग्यशाला, स्त्री, (आरोग्यार्थं शाला। मध्यपदलोपिकर्म्मधारयः।) आरोग्यदानस्थान। चिकित्सालयः। यथा,—
“धर्म्मार्थकाममोक्षाणामारोग्य साधन यतः।
अतस्त्वारोग्यदाता च नरो भवति सर्व्वदः॥
आरोग्यशाला कुर्व्वीत महौषधपरिच्छदा।
विदग्धवैद्यसयुक्ता सङ्गन्नरससयुता॥
वैद्यस्तु शास्त्रवित् प्राज्ञो दृष्टौषधपराक्रम
ओषधीमूलतत्त्वज्ञ समुद्धरणकालवित्॥
मलवीर्य्यविपाकज्ञ शालिमांसौषधीगणे।
त्यागिवद्देष्टिना तद्वदनुकूल प्रियवदः”॥
इति वैद्यक॥

आरोपः, पु, (आङ्+रुह्+णिच्+घञ्।) मिथ्याज्ञान। यथा। “असर्पभूते रज्जौ सर्पारोपवत् वस्तुन्यवस्त्वारोप अध्यारोप”। इति वेदान्तसारः॥ मिथ्याविष्करण। यथा। “असूया तु दोषारोपो गुणेष्वपि”। इत्यमर॥
(यथा साहित्यदर्पणे। १०म परिच्छेदे।
“आरोपाध्यवसानाभ्या प्रत्येक ता अपि द्विधा”।
“रूपित रोपितारोपो विषये निरपह्नवे”॥
“यत्र कस्यचिदारोप परारोपणकारण”।)

आरोपण, क्ली, (आङ्+रुह्+णिच्+ल्युट्।) न्यास। सस्थापन॥ (शस्यादीना रोपण। शरसन्धानादौ ज्यादीना संयोजन, उन्नमन, समुत्थापन, यथा साहित्यदर्पणे। १०म परिच्छेदे।
“यत्र कस्यचिदारोप परारोपणकारणम्”
रामायणे। आदिकाण्डे।
“यद्यस्य धनुषो राम कुर्य्यादारोपण मुने”।)

आरोपित, त्रि, (आङ्+रुह्+णिच्+क्त।) कृतारोपण। निक्षिप्त। न्यस्त। इति हलायुध॥ कल्पित॥ (यथा कुमारसम्भवे ३। ३५।
“त देशमारोपितपुष्पचापे”। काव्यप्रकाशे।
“समस्तवस्तुविषय श्रौता आरोपिता यदा”।)

आरोहः, पु, (आङ्+रुह्+घञ्।) दैर्घ्य वरस्त्रिया श्रोणि। इत्यमर॥ (यथा माघे “आरोहैर्निविडबृहन्नितम्बबिम्बैः”।) अवरोह। आरोहण। गजारोह। समुच्छ्रय। इति मेदिनी॥ (“आरोहमिव रत्नाना प्रतिष्ठानमिव श्रियः”। इति रामायणे।) परिमाणविशेष। नितम्बः। इति हेमचन्द्र॥ (आरोहति यः। आङ्+रुह्+अच्। निषादी। यथा, हरिवंशे,—
“अश्वाश्च पर्य्यधावन्त हतारोहा दिशो दश”।)

आरोहकः, त्रि, (आङ्+रुह्+ण्वुल्।) आरोहणकर्त्ता॥

आरोहण, क्ली, (आरुह्यतेऽनेन। आङ्+रुह्+ल्युट्।) सोपान। सिंडि इति भाषा। (भावे ल्युट्।) समारोहः। नीचादूर्द्ध्वगमनमिति यावत्। (यथा कुमारसम्भवे १। ३९।
“आरोहणार्थं नवयौवनेन
कामस्य सोपानमिव प्रयुक्तम्”।)
प्ररोहण। अङ्कुरादिजननमिति यावत्। इति मेदिनी॥

आर्किः, पुं, (अर्कस्यापत्य। अर्क+इञ्।) अर्कपुत्रः। शनैश्चरः। इति ज्योतिःशास्त्र॥ (वैवस्वतमनु, सुग्रीवः, कर्णश्च।)

आर्गलः, पु स्त्री, (अर्गल एव स्वार्थे अण्।) अर्गल। इति हिरूपकोष॥ खिल इति भाषा।

आर्गवधः, पु, आरग्वधवृक्ष। इति शब्दचन्द्रिका॥ (“आरग्वधशब्देऽस्य गुणादयो ज्ञातव्याः”।)

आर्घा, स्त्री, (आङ्+अर्घ्+अच्।) पीता दीर्घतुण्डा षट्पदसन्निभा मक्षिका। इति राजनिर्घण्ट॥

आर्घ्य, क्ली, (आर्घया मक्षिकया विहितम्। आर्घा+यत्।) आर्घानाममक्षिकोत्पन्नमधु। तस्य गुणा। अतिशयचक्षुर्हितकारित्व। कफपित्तास्रदोषनाशित्वञ्च। इति राजनिर्घण्ट॥ (यदुक्त,—
“मधूकवृक्षनिर्यास शरत्काले श्रमोद्भवा।
स्रवन्त्यार्घ्य तदाख्यात श्वेतक मालवे पुन॥
तीक्ष्णतुण्डास्तु याः पीता मक्षिका षट्पदोपमा।
आर्घास्ताभिस्तु कृत यत् तदार्घ्यमित्यपरे जगु”॥
यथा सुश्रुते,—
“आर्घ्य मध्वतिचक्षुष्य कफपित्तघ्न पर।
कषाय कटु पाके च बल्य तिक्तमवातकृत्”॥
इद हि अष्टविधमधुजातिमध्ये परिगणितम्।
“मौक्तिक भ्रामर क्षौद्र माक्षिक छात्रमेव च।
आर्घ्यमौद्दालिक दालमित्यष्टौ मधुजातयः”॥)

आर्त्त, त्रि, (आङ्+ऋ+क्त।) पीडित। असुस्थ। यथा,—
“आर्त्ताना मार्गमाणाना प्रायश्चित्तानि ये द्विजाः।
जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिन”॥
इति प्रायश्चित्ततत्त्व॥ (दुःखित, कातर, शोकाभिभूत, उद्वेजित, विरक्त, अपकृत, उत्पीडित। यथा शाकुन्तले, प्रथमाङ्के।
“आर्त्तत्राणाय वः शस्त्र न प्रहर्त्तुमनागसि”।
“द्वेष्योऽपि सम्मत शिष्टस्तस्यार्त्तस्य यथौषधम्”।
इति रघौ। १। २८। (तथा च चरके॥
“नाश्विनावार्त्त भेषजेनोपपादयेताम्”। इति॥

आर्त्तगल, पुं, (आर्त्त इव गलति पचाद्यच्।) नीलझिण्टी। तत्पर्य्याय। बाण २ बाणा ३ दासी ४ आर्त्तगलः ५। इत्यमरस्तट्टीका च॥
(“दासे आर्त्तगलश्च स.”। इति भावप्रकाश॥)

आर्त्तव, क्ली, (ऋतुरस्य प्राप्तः, अण् यद्वा ऋतुरेव। प्रज्ञादिभ्यश्चेत्यण्।) स्त्रीरज। इत्यमरः॥ पुष्प। इति मेदिनी॥ (यथा मनुः, ३। ४८।
“तस्मात् युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रिय”।
“नोपगच्छेत् प्रमत्तोऽपि स्त्रियमार्त्तवदर्शने”॥
अथार्त्तवस्य स्वरूपमाह।
स्त्रीणा रस एव मासेनार्त्तवं भवतीत्युक्ता पुनराह सुश्रुत एव।
“मासेनोपचित काले धमनीभ्यस्तदार्त्तव।
ईषत्कृष्णविवर्णञ्च वायुर्योनिमुख नयेत्”॥
गर्भग्रहणयोग्यस्यार्त्तवस्य लक्षणमाह।
“शशासृक्प्रतिम यच्च यद्वा लाक्षारसोपम।
तदार्त्तव प्रशसन्ति यद्वासो न विरञ्जयेत्”॥
आर्त्तवस्य वर्णद्वयाभिधानं। वातादिप्रकृतिभेदेन वर्णभेदात्। यद्वासो न विरञ्जयेत्। यद्वासो मल प्रक्षालित तदासत्यजति न तु विकृतरङ्ग कुर्य्यात्”।
इति भावप्रकाशः॥
“मासान्निष्पिच्छदाहार्त्ति पञ्चरात्रानुबन्धि च।
नैवातिबहुलात्यल्पमार्त्तव शुद्धमादिशेत्॥
गुञ्जाफलसवर्णञ्च पद्मालक्तकसन्निभ।
इन्द्रगोपकसङ्काशमार्त्तव शुद्धमेव तत्”॥
इति चरक,—
“शशासृक्प्रतिम यत्तु यद्वा लाक्षारसोपम।
तदार्त्तव प्रशसन्ति यद्वासो न विरञ्जयेत्॥
विधिमुत्तरवस्त्यन्त कुर्य्यादार्त्तवशुद्धये॥
स्त्रीणा स्नेहादियुक्ताना चतस्रष्वार्त्तवादिषु।
कुर्य्यात् कल्कान् पिचूंश्चापि पथ्यान्याचमनानि च॥
ग्रन्थिभूते पिबेत् पाठा भूषण वृक्षकाणि च।
दुर्गन्धे पूयसङ्काशे मज्जतुल्ये तथार्त्तवे॥
पिबेद्भद्रश्रियः क्वाथचन्दनक्वाथमेव च”।
“आर्त्तव शोणितन्त्वाग्नेयमग्नीषोमीयत्वाद्गर्भस्य पाञ्चभौतिकञ्चापरे जीवरक्तमाहुराचार्य्याः”॥
“एव मासेन रस शुक्रीभवति स्त्रीणाञ्चार्त्तवमिति”। इति सुश्रुत॥)

आर्त्तव, त्रि, (ऋतुः प्राप्तोऽस्य। अण्।) ऋतूद्भव। इति मेदिनीकरहेमचन्द्रौ॥ यथा रामायणे,—
“आर्त्तवान्युपसङ्गाना पुष्पाणि च फलानि च”
रघौ ८। ३६।
“अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिशयेन वीरुधाम्”।)

आर्त्तवी, स्त्री, वाजिनी। घोटकी। इति राजनिर्घण्टः॥

आर्त्ति, स्त्री, (आङ्+ऋ+क्तिन्।) पीडा। धनुष्कोटि। इत्यमरटीकायां भरत॥ रोगः। इति

राजनिर्घण्टः । (यथा मेघदूते, पूर्व्वमेघे । ३० ।
"आसाद्यविमलमनश्च कम्पदेवा सुमनसाम्" ।
रघुः,—
"आर्द्रनिशाकरनिकरवृषोपमधृतिमारिषु" ।)
आर्द्र, त्रि (आर्द्र + रक् दीर्घश्च ।) नक्षत्रविशेषः । भिजा इति भाषा । तत्पर्य्यायः । आर्द्रं १ क्लिन्नं २ क्लिन्नं ३ तिमितं ४ स्तिमितं ५ समुन्नं ६ उत्तं ७ । इत्यमरः ।
(अस्य विविधं वर्णनं,—
"आर्द्रं मर्द्दं त्रिधा प्रोक्तं वरणं नीरदं तथा ।
मधुरं तुल्यवर्णं त्रिधा नीरदमुच्यते ।
सम्पूर्णं बाधनं प्रार्थं त्रिगुणैर्मलमार्द्रकम् ।
मुक्तादपरमिदं तस्मात् स्वरमुच्यते ।
मतान्तरमपरीतमसमर्णं तु नीरदं ।
मधुरं तु त्रिधा प्रोक्तं मधु नीरदमिति क्रमात् ।
मध्यम वचनीयकमौ रित्यमपान नीरदकाः ।
दुग्धिकार्द्रवीरित्यमपा मधुदुग्धा मध्यीर्बिकाः" ।
यथा रामायणे "आर्द्रामलपायिमसमन्वता" ।
मेघदूते पूर्व्वमेघे ४१ ।
"यमीमानां वसनकपिरे चारक्षित्य कथचित्" ।)
आर्द्रा स्त्री, (आर्द्रयति वर्षं आर्द्र । णिच्‌ । अच् । यद्वा आर्द्रमिति निजन्तां । क्विप् ।) नक्षत्रविशेषः । आर्द्रा इति भाषा । तत्पर्य्यायः । रौद्री २ । इत्यमरः । मधुमर्त्तं १ बहुलार्द्रं ३ । इति केचित् । अस्यमूर्त्तिः मूर्त्तं ६ कन्दरं ७ हरं ८ शशीम ८ वेमवेरं १ बमूवर्णं ११ वपानसार्णं १२ नालार्णं १३ राज वर्णं १४ हरावर्णं १५ बाद्य १६ आद्रार्णं १७ कञ्चार्णं १८ । इति राजनिर्घण्टः । अस्य कथा । वनपारविनयमालावर्णविमपाश्रिते । कपाल यष्टिकुन्मालितमः । इति रामवल्लभः । अपिच । प्रचार्णं । बहुले । विहाय भीमलं । अलर्णं । अपिनीमिपर्णं । शोचकरस्मयमकारितम । इति राजनिर्घण्टः । वपलपचकारः । ओमनासे मार्द्रं । पिङ्गलकर्णिपीवचार्ण । वलिमन्त्रीकवर्णं । वचनं,—
"आर्द्राचिवकरवीसनां मरीचमवाचिसां ।
यथ यथ विनमचाचि समाधार्द्रकवरी" ।
इति सप्तशुल्कः,—
"आर्द्रायां मधुरैर्वर्णं ताप् वधुकर्णं वचादिका ।
आर्द्रिका वेदिनी मर्णी नीतलोकं शीतनी तथा ।
कटुका मधुरा तस्मै कफवातनाशकाः ।
न मवेत् वर्जिता शुक्लन्तोऽपि कन्धावत्प्रविचाम ।
ओमवाचे यदा मर्द्दं वचनार्द्रकनाद्रं ।
अपिवन्नीवर्णं यर्थं त्रिवाकन्नविचोवर्णं ।
कुचे वातुवाते यसौ राशिपेवे मसौ भवेत् ।
तात् नितावमरं तन्मैव पूर्णिमासध्यं ।
इति भावप्रकाशः ।
(मेरवादकौकैव, इति वाक्यः ।
देवनं दीवनं वचनामृतं त्रिनयनं ।
तामयेदरिवचरं रक्तामनोनविवदं ।
इति चरकः ।
"अनुपानं तत्र विनमातामनुयम् ।
मधूनां रोचनं यर्थं तमर्पंताद्रंच वचनम्" ।

इति सुश्रुतः ।)
आर्य्यपदी, [न्] पुं, (आर्य्यपद + इनि ।) आर्य्यशब्दवाच्यजनपदवासी आर्य्यावर्त्तदेशविशेषः । यथा । "आर्य्यावर्त्तपदी । मध्ये यत्र वसति आर्य्ये रत्नाकरे आर्य्यवित्तकरनदारामे अमुकस्थान विधिवत् प्रतिष्ठापना । आर्य्यावर्त्तपदेशास्तु अमुकग्रामीयपरीणते उत्तरपश्चिमे वा दक्षिणा पूर्व्व पश्चिमेषु नामनु तत्र गुणाति वासनु भाषा यवनपि कृतो" । इति वचनात् ।
आर्य्यपदविशिष्टे, त्रि ।
आर्य्यमाषा, स्त्री, माषवर्णी । इति राजनिर्घण्टः ।
माषाणी इति भाषा ।
आर्य्यमार्ग, स्त्री, (आर्य्यं मार्गमत्र ।) आर्य्यवेषा । इति राजनिर्घण्टः ।
आर्य्य, स्त्री, (आर्य्य + टाप् ।) अभिमतादिविशेषार्थकश्रवणपरायणार्थमवशक्तार्थं । यथा कथं । स्वर्णादि अनेकादरार्थमर्थं । यथा वनिकाणी विया किया । इति जातिमालाः । मनिवुद्धेमचरावार्णं । इति केचित् । तत्र वानार्यं ।
"कथाचिदो यवनादरीवार्यिका
काचिदिका कोऽपयुक्तेऽगीनीका ।
मदनिधात च गौत्य् विवाह
यथायदेशार हरन्याने‌ऽपि" ।
इति कोकीमरीकः ।
आर्य्यगुणस्य, पुं, (आर्य्यायां मातृमा प्रतिष्ठप्रयचे पुत्रस्य इव ।) मैथुनकः । इति रत्नाकरः ।
आर्य्यिका स्त्री (आर्य्यक + टाप् ।) आर्य्यवेषा । इति भारतमाला ।
("आर्य्यिका विरामनदा मृगया च च विचारम्" ।
इति वाक्य ।)
आर्य्य त्रि, (अर्तुं प्राप्तुमाचरितुं योग्यः । अर्य्यते वा । ऋ + ण्यत् ।) सत्कुलोद्भवः । इत्यमरः । पूज्यः । श्रेष्ठः । धृष्टः । इति शब्दरत्नावली । साधुः । इत्यमरः । (आर्य्य, उदारचरित्र, शान्तचित्त । यथा, रामायणे, ३ काण्डे ।
"नोहमार्य्येण परत भाषा बन्धेन वानिमिं" ।
आर्य्यवरायणी, महाभारतीये, शब्दकल्पत्यर्थाध्यायः । बहुर्षे,
"कर्त्तव्यमाचरन् कामनकर्त्तव्यमनाचरन् ।
तिष्ठति प्राकृताचारे स तु आर्य्य इति स्मृतः" ।
धार्म्मिकः । सर्व्वमौकः । यथा, मनुः, १ । ७० ।
"आर्य्यरूपमिवानार्य्यं कर्म्मभिः स्वैर्विभावयेत्" ।
पण्डितः । यथा, रामायणे —
"आर्य्यमार्ग गमन्त मातुमन्येव वा पुमान्" ।
नाट्योक्तौ पत्नीमिरदेवकथिर्यां पाप ज्येष्ठ भ्रातृ महाजने सम्बोधने । यथा, वाणिमारतीये, स तरिन्धरे ।
"आर्य्यपुत्र नार्ण विभिर्विमंतिस वत्सौ यस्मैरि" ।
"आर्य्ये नदीम्सपायत्र गमनाचा मनारक" ।)
आर्य्य, पुं, (अर्तुं यथार्चितुं योग्यः । ऋ + ण्यत् ।) स्वामी । गुरुः । इति जटाधरः । सुहृत् । इत्यमरः । (महाकुल । वैश्यकरमपादि । बहुषु महाभारते ।

"मोक्षाघाने सकलविधा पूर्वं ये विप्रा हर्षे ।
आर्य्याव प्रतिदीपावा" । इति । तपामवाना मातृसमेतो यज्ञा । यथा हरिवंशे ।
"पतीव्रतावरीयांश्च यमेन प्रथितान् यदा ।
परिचारथाँ समुद्र राजा पुमपिरेव च ।
आर्य्यसिद्ध मनाक् समाज मविमा यत्र मारत ।")
आर्य्यकं स्त्री, पितामहपितृपितृकार्य्यं । इति त्रि-काण्डशेषः ।
आर्य्यकः, पुं (आर्य्य + स्वार्थे कन् ।) पितामहः । मा-तामहः । इति शब्दमाला । (यथा रामायणे,—
"अथ ते वलितिमाक्षत्कर्षामयनेष्यकः" ।
"आर्य्यकस्तु तुमती यथाभिमतमुक्तवान्" ।
महाभारते —
"आर्य्यकेण च पुत्रा च प्रजाना पत्नीय च ।
सत्र सौतिकसौतिका प्रतिमाक्ष प्रतीक्षितम्" ।
पूज्यवाचिनामा । तपामणारो मानवेषु, यथा महाभारते —
"आर्य्यकपोषपद्येषु भाषा मतापरोक्ष्य" ।)
आर्य्यका, स्त्री, (आर्य्यक + टाप् । पत्नीनामेव इति यस्ये हस्वाभावः ।) मैथुन स्त्री । इति चोदरीका ।
आर्य्यपुत्रः, पुं, (आर्य्यस्य गुरोः । पतिरितुल्य ।) भर्त्ता । स्वामी । इति हेमचन्द्रः । (यथा रामायणे,—
"आर्य्यपुत्र ! पिता माता भ्राता पुत्रस्तथा सखा ।
यानि पुत्राणि हृतानि च च नाम्नभृगानवे" ।)
गुरुपुत्रः । मान्यस्य पुत्रः ।
आर्य्यमिश्र, त्रि, (आर्य्यं मेवो मिश्रः ।) गौरविक । इति त्रिकाण्डशेषः । (मान्यानि, पूज्या । यथा रामायणे, ४ काण्डे ।
"कल्पनामन्वमिमाचवी कामूपा हृष्यविधम्" ।
उत्तरचरिते प्रथमाकाले ।
"जाव जनु भवता आर्य्यमिश्राणा वायका-मार्गमिपाम् तिव्रापचपत्रि" ।)
आर्य्या स्त्री, (ऋ + ण्यत् + स्त्रियां टाप् ।) पार्वती । इति त्रिकाण्डशेषः । छन्दोविशेषः । यथा वाचस्पतः
"यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्या" ।
इति श्रुतबोधः । अपिच ।
"लक्ष्मैतत् सप्तगणा गोपेता भवति नेह विषमे जः ।
षष्ठोऽयञ्च न लघु वा प्रथमेऽर्द्धे नियतमार्य्यायाः ।
षष्ठे द्वितीयलात्परके न्ले मुखलाच्च सयतिपदनियमः ।
चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठो लः" ।
वा यथा ।
"यस्याः पिङ्गल यवया तृषापाया भायतस्वया च ।
शीतापत्तीमविहित आर्य्यागीतिरिव गायन्ती" ।
इति छन्दोमञ्जरी । मैथुन स्त्री ।
आर्य्यावर्त्त, पुं, (आर्य्या आवर्त्तन्तेऽत्र । आर्य्य + आ + वृत् + आधारे घञ् ।) विन्ध्यहिमालय-योर्मध्यदेशः । तत्पर्य्यायः । पुण्यभूमिः २ । इत्यमरः । यथा,—
"आसमुद्रात्तु वै पूर्व्वादासमुद्रात्तु पश्चिमात् ।
तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं विदुर्बुधाः" ।
इति मनौ २ । २२ । अपि च स्मृतौ ।—

"आर्य्यावर्त्तं पुण्यभूमिर्मध्यं विन्ध्यहिमागयोः"।

आर्य्यिका, स्त्री, (आर्य्या + स्वार्थे कन् + अत इत्वं।) श्रेष्ठा स्त्री। इति वोपदेवः॥

आर्षः, पुं, (ऋषेरिदं। ऋषि + अण्।) विवाहविशेषः। यत्र वरात् गोद्वयं गृहीत्वा तेनैव सह कन्यादानं। यथा, याज्ञवल्क्यः,—
"यज्ञस्थायर्त्विजे दैवं आर्षं आदाय गोयुगं।
चतुर्द्दश प्रथमजः पुनात्युत्तरजश्च षट्"॥
(यथा मनुः, ३। २९।
"एकं गोमिथुनं द्वे वा वरादादाय धर्म्मतः।
कन्याप्रदानं विधिवदार्षो धर्म्मः स उच्यते"॥)
ऋषिप्रणीते त्रि॥ (यथा मनुः १२।१०६।
"आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतरः"॥

आर्षभिः, पुं, (ऋषभस्यापत्यम्। ऋषभ + इञ्।) ऋषभपुत्रः। स तु भरतराजचक्रवर्त्ती। इति हेमचन्द्रः॥

आर्षभी, स्त्री, (ऋषभस्य इयम् प्रिया। ऋषभ + अण् + ङीप्।) कपिकच्छुवृक्षः। इति राजनिर्घण्टः।
(मध्यममार्गे नक्षत्रविशेषयोः सञ्ज्ञाविशेषः यथा,
"तथा द्वे चापि फल्गुन्यौ मघा चैवार्षभी मता"।
कपिकच्छुशब्देऽस्या गुणादयो ज्ञातव्याः॥)

आर्षभ्यः, पुं, (ऋषभस्य प्रकृतिः। ऋषभ + ण्यः।) षण्डोपयुक्तवृषः। तत्पर्य्यायः। षण्डतायोग्यः २। इत्यमरः॥ साँडेर उपयुक्त एँड़े इति भाषा॥

आर्हतः, पुं, (अर्हन् जिन एव। अर्हत् + अण्।) जिनविशेषः। तत्पर्य्यायः। वादवादी २। इति हेमचन्द्रः॥

आलं, क्ली, (आलयति भूषयतीति। आ + अल् + अच्।) हरितालं। इत्यमरः॥ अनर्थे त्रि। इति हेमचन्द्रः॥ (यथा वैद्यकरसेन्द्रसारसंग्रहे॥)
("हरितालं तालमालमालं शैलूषभूषणम्।
पिञ्जकं रोमशरणं तालकं पीतमित्यपि"॥)

आलगर्द्दः, पुं, (अलगर्द्द एव। स्वार्थे अण्।) अलगर्द्दः। जलसर्पः।

आलम्बः, पुं, (आङ् + लवि + घञ्।) अवलम्बः। आश्रयः॥ (शरणं। गतिः। "इह हि पततां नास्त्यालम्बो न चापि निवर्त्तनम्"। इति शान्तिशतके ३। २१।) अधोलम्बनम्। यथा, रामायणे,—
"शोभते किञ्चिदालम्बे शालय कनकप्रभाः"॥)

आलम्बनं, क्ली, (आङ् + लम्ब + ल्युट्।) अवलम्बनं। रसविभावविशेषः। यथा,—
"आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ।
आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमात्"॥
इति साहित्यदर्पणे ३य परिच्छेदः।

आलम्भः, पुं, (आङ् + लभि + घञ्।) मारणं। वधः। इत्यमरः॥ (यथा स्मृतिः, "अश्वालम्भं गवालम्भं"। मेघदूते पूर्व्वमेघे। ४६।
"व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्"।
छेदनम्। कर्त्तनम्। मनुः ११। १४४।
"कृष्टजानामोषधीनां जातानां च स्वयं वने।
वृथालम्भेऽनुगच्छेत् गां दिनमेकं पयोव्रतः"॥
स्पर्शः। आलिङ्गनम्। यथा मनुः २। १७९।
"द्यूतञ्च जनवादञ्च परिवादं तथाऽनृतं।
स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च"॥)

आलभ्या, स्त्री, (आङ् + लभि + ण्यत्।) वधार्हा। घ्ननीया। इति वोपदेवः॥

आलयः, पुं, (आलीयतेऽस्मिन्। आ + ली + आधारे अच्।) गृहं। इत्यमरः॥ (यथा कुमारे १। १।) "हिमालयो नाम नगाधिराजः" नैषधे, "तथा-मरालयमरालमरालकेशी"। रामायणे ३ काण्डे।
"न हि दुष्टात्मनामार्य्या निवसन्त्यालये चिरं"।
क्षयपर्य्यन्ते, क्ली। भागवते १ अध्याये ५। "पिबत भागवतं रसमालयम्")॥

आलवालं, क्ली, (आ समन्तात् जलस्य लवमालाति आ + लव + ला + क।) तरुमूलसेचनार्थस्वल्पजलाधारः। चारमादा इति भाषा। तत्पर्य्यायः। आवालः २ आवापः ३। इत्यमरः॥ (रघुवंशे १। ५२।
"विश्वासाय विहङ्गानामालवालाम्बुपायिनाम्"।
माघे। "विपुलालवालभृतवारिदर्पणः"।)

आलसः, त्रि, (अलस + स्वार्थे अण्।) अलसः। आलस्ययुक्तः। इति दिरूपकोषः॥

आलस्यं, क्ली, (अलस + ष्यञ्।) अलसस्य भावः। अलसता। तत्पर्य्यायः। तन्द्रा २ कौसीद्यं ३। इति हेमचन्द्रः॥ मन्दता ४ मान्द्यं ५ कार्य्यद्वेषः ६। इति राजनिर्घण्टः॥ (यदुक्तं। "आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत्" इत्युक्तलक्षणो व्यभिचारिभावभेदः। सुश्रुते।
"सुखस्पर्शप्रसङ्गित्वं दुःखद्वेषणलोलता।
शक्तस्य चाप्यनुत्साहः कर्म्मस्वालस्यमुच्यते"॥)

आलस्यः, त्रि, (अलस एव। अलस + स्वार्थे ष्यञ्।) अलसयुक्तः। तत्पर्य्यायः। मन्दः २ तुन्दपरिमृजः ३ शीतकः ४ अलसः ५ अनुष्णः ६। इत्यमरः॥

आलातं, क्ली, (अलातमेव। अलात + स्वार्थे अण्।) अलातं। अङ्गारः॥

आलानं, क्ली, (आलीयतेऽत्र। आङ् + ली + ल्युट्। विभाषा लीयतेरित्यात्त्वम्।) गजबन्धनस्तम्भः। इत्यमरः॥ गजबन्धनरज्जुः। इति नीलकण्ठः॥ (रघुवंशे १। ७१।
"अरुन्तुदमिवालानमनिर्वाणस्य दन्तिनः"।
कादम्बरी। "इममदमलिनमालानस्तम्भयुगलमुपहसन्तमिवोरुदण्डद्वयेन"।
रघुवंशे ४। ६९, ४। ८१।
"गजालानपरिक्लिष्टैरक्षोटैः सार्द्धमानताः"।
"तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः"॥)
बन्धनं। इति रायमुकुटः॥ रज्जुः। इति मेदिनी॥

आलापः, पुं, (आङ् + लप् + घञ्।) कथोपकथनं। सम्भाषणं। तत्पर्य्यायः। आभाषणं २। इत्यमरः। (साहित्यदर्पणे, प्रथमपरिच्छेदः।
"कायालापाश्च ये केचित् गीतकाव्यखिलानि च"।)

आलाप्यः, त्रि, (आङ् + लप् + कर्म्मणि ण्यत्।) आलापयोग्यः। आलापनीयः॥

आलावर्त्तं, क्ली, (आलामत्यर्थमावर्त्तते इति आल + आ + वृत् + अच्।) वस्त्रनिर्म्मितव्यजनं। इति हेमचन्द्रः॥ कापड़ेर पाखा इति भाषा।

आलावु, स्त्री, अलावु। इति शब्दरत्नावली॥ लाउ इति भाषा। (अलावुशब्देऽस्या विशेषो ज्ञेयः॥

आलावूः, स्त्री, अलावु। इति शब्दरत्नावली॥

आलास्यः, पुं, (आलं पर्य्याप्तं आस्यं मुखं यस्य सः।) कुम्भीरः। इति हेमचन्द्रः॥

आलिः, स्त्री, (आलयति भूषयति। आ + अल भूषणे। अच् इ।) वयस्या। (यथा कुमारसम्भवे। ५।८३।
("निवार्य्यतामालि किमप्ययं वटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः"।)
(आलति निवारयति जलं। अल वारणे। सर्व्वधातुभ्य इन्।) सेतुः। (अल्यतेऽनया। अल् + इञ्।) पङ्क्तिः। इति मेदिनी अमरश्च॥ सन्ततिः। इति शब्दरत्नावली॥

आलिः, पुं (आलति दंशने समर्थो भवति। आ + अल् + बाहुलकात् इण्।) वृश्चिकः। भ्रमरः। इति हारावली अमरटीका च॥

आलिः, त्रि, (आङ् + अल् + इण्।) विशदाशयः। निर्म्मलान्तःकरणः। इति मेदिनी॥ अनर्थः। इति हेमचन्द्रः॥

आलिङ्गनं, क्ली,(आङ् + लिङ्ग + ल्युट्।) प्रीतिपूर्व्वकपरस्पराश्लेषः। कोलाकोलि इति भाषा। तत्पर्य्यायः। अङ्कपालिः २ श्लिषा ३। इति त्रिकाण्डशेषः॥ परिरम्भः ४ परीरम्भः ५ परिष्वङ्गः ६ संश्लेषः ७ उपगूहनं ८। इत्यमरः॥ तत्प्रभेदा यथा। आमोदालिङ्गनं १ मुदितालिङ्गनं २ प्रेमालिङ्गनं ३ आनन्दालिङ्गनं ४ सद्यालिङ्गनं ५ नन्दनालिङ्गनं ६ विनोदालिङ्गनं ७। इति कामशास्त्रम्॥
("आलिङ्गनान्यधिगता स्फुटमाधवेन"।
इति माघः। यथा मेघदूते उत्तरमेघे ८।
'यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानां"।)

आलिङ्गी, [न्] पुं,(आ + लिङ्ग + इनि।) आलिङ्ग्यः। मृदङ्गविशेषः। इत्यमरटीकायां स्वामी शब्दरत्नावली च॥

आलिङ्ग्यः, पुं, (आ + लिङ्ग + ण्यत्।) यवाकृतिमृदङ्गः। इत्यमरः॥ मादोल इति भाषा। यथा शब्दार्णवे॥
"चतुरङ्गुलवक्त्रीनोऽङ्गान्मुखे चैकाङ्गुलेन यः।
यवाकृतिः स आलिङ्ग्य आलिङ्ग्य स हि वाद्यते"॥

आलिञ्जरः, पुं, (अलिञ्जर + अण्।) अलिञ्जरः। इति त्रिकाण्डशेषः॥ जाला इति भाषा।

आलिन्दः, पुं, (अलिन्द + अण्।) अलिन्दः। बहिर्द्वारप्रकोष्ठः। गृहान्तरशय्यार्थवेदिका। इति रायमुकुटः शब्दरत्नावली च॥ गृहैकदेशः। इत्यमरमाला॥

आलिन्दकः,पुं, (आलिन्द एव स्वार्थे कः।) आलिन्दः। इति शब्दरत्नावली॥

आलिम्पनं, क्ली, (आङ् + लिम्प + ल्युट्।) मङ्गलालेपनं। आलिपना इति भाषा। तत्पर्य्यायः। आतर्पणं २ आदीपनं ३ मण्डोदकं ४। इति त्रिकाण्डशेषः॥

आली, स्त्री, (आलि + ङीप् ।) सखी । पङ्क्तिः । इति शब्दरत्नावली । (सेतुः । यथा कुमारे ६।७८ ।
"सोपानमार्गेष्वपि येषु मुनिवराणाम्" ।)
आलीढं, क्ली, (आ + लिह् + क्त ।) धन्विनां स्थितिविशेषः । वामपादं प्रसार्य्य दक्षिणपादाकुञ्चनम् । इत्यमरः । (यथा, रघौ ३ । ५२ ।
"अतिप्रबन्धप्रहितास्त्रवृष्टिभि-
स्तमाश्रयं दुष्प्रसहस्य वेश्मनः" ।
(तल्लक्षणं यथा, चिन्तामणिकोषे ।
"दक्षिणा पूर्वभङ्गा च वामिका प्रसृता भवेत् ।
यस्मिन् तत्स्थानकं प्रोक्तमालीढं सुलक्षणम्" ।)
आलीढः, त्रि, (आ + लिह + क्त ।) भक्षितः । पूर्णः । इति मेदिनी । (यथा, रघुवंशे ११।१० ।
"तेनाश्वमालीढमिवात्मनस्त्रैः" ।)
आलीढ्यं, क्ली, (आलीढ इव कार्य्ये यत् ।) सर्व्वावस्था आसीनं भोजनं । इति भारतम् । आलुरित्येव इति भाषा । आलीढ्यमिति कश्चित् पठति ।
आलीनत्वं, क्ली, (आलीन + त्व ।) रङ्गः । इति हेमचन्द्रः । रां इति भाषा ।
आलु, स्त्री, (आ + लू + डु ।) भेलकः । कन्दविशेषः । इति मेदिनी । तस्य गुणाः । शीतलत्वं । गुरुत्वं । रूक्षत्वं । कफदोषकारित्वम् इति राजवल्लभः ।
आलुः, स्त्री, (आलाति । आ + ला + उ ।) जलधारिपात्रविशेषः । गाडू झारी इत्यादि भाषा । तत्पर्य्यायः । गलन्ती १ कलशिका २ । इत्यमरः ।
आलुः, पुं, पेचकः । इति शब्दरत्नावली । आलूकः । इति राजनिर्घण्टः ।
आलुकं, क्ली, (आलु + स्वार्थे कन् ।) कन्दविशेषः । आलु इति भाषा । इति राजवल्लभः । तद्विवरणं यथा, —
पिण्डालुकं मधु रक्तं च श्वेतालुकम् ।
काष्ठालुकं शङ्खालुकं हस्त्यालुकं च कथ्यते ।
निकुञ्चालुकमालुकं रक्तालुकानि चत्वारि" ।
काष्ठालुकं वातपित्तनाशकं । शङ्खालुकं शीतल-पुष्टिदायकं । हस्त्यालुकं दीर्घायुष्करं बलकारकं । पिण्डालुकं मधुररसदायकं । मध्यालुकं मधुरत्वगुणं श्लेष्मणि पित्तवर्द्धकं । रक्तालुकं रक्तस्य वर्द्धकम् इति च । तथा च ।
"आलुकं शिशिरं सर्व्वं विष्टम्भि मधुरं गुरु ।
सृष्टमूत्रमलं रूक्षं दुर्ज्जरं रक्तपित्तनुत् ।
कफानिलकरं बल्यं वृष्यमल्पाग्निवर्द्धनम्" ।
इति भावप्रकाशः ।
("आलुकानि च सर्व्वाणि तथा शुष्काणि चाप्यथ ।
किञ्चित् विष्टम्भिजनकं वेतालं नातिरोचकम्" ।
इति चरकः ।
"शिरीषपिण्डालुकशीतलवाराहीकन्दकन्दपलाण्डुप्रभृतीनि
चतिक्तकुलकालुकसर्पच्छत्रकाखाश्वबलाशाणा-
दुम्बरशाकभेदीनि शिरोगणप्रभृतीनि" ।
"रक्तालुकमहाकन्दाः शीतानि मधुराणि च ।
गुरूणि स्तन्यानि शुक्रवर्द्धनानि च" ।
आलुकः, पुं, (आलाति शम्भौ शयनकाले या आ + ला + उ + स्वार्थे कन् ।) शेषनागः । इति राजनिर्घण्टः । प्रेमनागः । इति हेमचन्द्रः ।
आलुकी, स्त्री, रोगोत्पादकशूककीटविशेषः । कुलटै इति नाम । यथा भावप्रकाशे ।
"रक्तामुलेषु वा शोथो वली च सविपालुकी ।
आलुकी कथ्यते विज्ञा जनैः शूकपाकिनी ।
विक्लवकारिणी वेगे तत्कालविनाशिनी" ।
आलेख्यं, क्ली, (आ + लिख् + ण्यत् ।) चित्रं । इति हेमचन्द्रः । (यथा माघे, ३।५७ ।
"इति संरम्भिणो लोकपालैरिवेरिताः" ।
"चित्रार्पितारम्भ इवावतस्थे
तद्गुणालेख्यसमर्पिता इव" इत्यादौ ९९ ।)
आलेख्यशेषः, त्रि, (आलेख्यं चित्रमेव शेषो यस्य सः) मृतः । इति हेमचन्द्रः । (यथा रघुवंशे, १४।१५ ।
"आस्वादवद्भिः कवलैस्तृणानां
आलेख्यशेषस्य पितुरवेक्ष्य" ।)
आलोकः, पुं, (आ + लुक् + घञ् ।) दर्शनं । देखा इति भाषा । शोभा । आलो इति भाषा । शान्ति शतके ७ । ६ ।
"आलोकाय दिशासु चन्द्रकिरणास्तन्वन्ति कुञ्जे
स्वं" । मेघदूते पूर्व्वमेघे ७२ ।
"तवालोके नयनविषये सन्निपेतुः कमोऽपि" ।
यथा शाकुन्तले प्रथमाङ्के ।
"तवालोके सहसा दृष्टं तत्तथा नवितृष्णा" ।
(यथा, रामायणे । काण्ड ।८९ । २० ।
"आलोकं स्वर्गतीरे नीराजना नीरिवे यथा" ।
प्रतिभातत्वं । शुभ्रदीप्ति शास्त्रम् । इति मेदिनी ।
(रघुवंशे । २ । ८ ।
"वसीरवासासमरितोषकाया
मालोकमार्गं सहसा विरावैः" ।)
आलोचनं क्ली, (आ + लोच् + ल्युट् ।) दर्शनं । इत्यमरः । (रघुवंशे ७ । ५ । "तत्क्षणालोक-नतत्पराणां" कुमारसम्भवे । २ । ४६ ।
"भवत्यालोकनमीषत् कर्णविलम्बिलूपने" ।
माघे, ११ । ११ ।
"दधति हि जयवन्तं पतनालोकनेन" ।)
आलोचनं, क्ली, (आ + लुच् + ल्युट् ।) दर्शनं । विवेचनं । (यथा हैमचन्द्र, "रजसालोचनं मतम्" । सांख्यमते निर्विकल्पकं ज्ञानं निर्विकल्पं सुखाद्यनुभवस्य प्राथमिकं ज्ञानं । तदुक्तं ।
"अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ।
ततः परं पुनर्वस्तु धर्म्मैर्जात्यादिभिर्यया" ।
"बुद्धावरोहितं बाल्यं प्रमाणमनेन लक्षणा" ।
"कल्पनीयम् यथाभासात्मचयमानभिन्ने च हि" । तत्त्वकौमुदी ।)
आलम्बः, पुं, (आलम्ब्यते आलम्ब आली + हन् ।) मत्स्यः । इति ज्योतिस्तत्त्वं । (यथा काशीखण्डे । १० अध्याये ।
"अभवि भाद्र रजतो भ्रमतोऽयं सुधामयम् ।
इव यक्षास्य दुग्धोदधिरिवोर्मिवत् । तत्स्नानामायादीमायापि मैनाकरूपम् ।
मात्राम्बुधिगृहतो दोसिनाकृतिः सरस्वतिमा ।
यथा कुमारा संगमे योगिवरायो मदीयानां ।
योगमर्पित योऽत्र साक्षा साक्षीकरात्म ।
मार्ज्जिनं स्वर्गं आलिं प्रतमङ्गवर्षसः" ।)
आवपनं, क्ली, (ओप्यते अस्मिन् । आ + वप् + आधारे ल्युट् ।) भाण्डपात्रं । भाण्डं । इत्यमरः । वपनमुण्डने । अस्मीयमनुष्यं । (यथा महाभारते, आदिपर्व्वणि ।
"महरपि सप्तवे भूमिरावपने मता ।
मनुष्या ऋक्षा प्रजापितेः कुशां आदस्या यः" ।
"आविर्भिन्नेव धेनुः भूमिरावपनं महत्" ।)
आवरणं क्ली, (आ + वृ + ल्युट् ।) वस्त्रं । इति हेमचन्द्रः । ढाक इति भाषा । आच्छादनं । ढका इति भाषा । (यथा महाभारते, आदिपर्व्वणि ।
"विविधानि च शास्त्राणि प्राकारावरणानि च" ।
"पूर्व्वं प्रकाशावरणाय पृष्ठे
प्रलेप योजनं वर्षं भविष्ये" । इति रघु ।
५ । ११ । मनुः । ३ । १६१ ।
"वीणिता मेदनो यत्र सेनावरणे रता" ।)
आवरणशक्तिः स्त्री, (आवरणे शक्तिः ।) अज्ञा-शक्तिः । यथा । "अल्पोऽपि मेघो नयनपथ-पिधायकतयाऽनेकयोजनायतमादित्यमण्डलम् अवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाऽज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणम् अवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यं" । इति वेदान्तसारः ।
आवर्त्तः, क्ली, (आ + वृत् + घञ् ।) गर्भिकधातुः । इति राजनिर्घण्टः । (आवर्त्तं । प्रावारकि-धमन ।)
आवर्त्तः, पुं, (आ + वृत् + घञ् ।) अम्भसां भ्रमः । इत्यमरः । घूर्णी इति भाषा । (रघुवंशे ६ । ५२ ।
"यस्य समावर्त्तमनोज्ञनाभिः" ।)
चिन्ता । आवर्त्तनं । इति मेदिनी । देवानां पञ्चाशत्पदवर्त्तकं मेघाधिपपतीनामिति इत्यर्थः कोषवचनं । (यथा मेघदूते पूर्व्वमेघे ६ ।
"जातं वंशे भुवनविदिते पुष्करावर्त्तकानाम्" ।)
राजावर्त्तकमणिविशेषः । इति राजनिर्घण्टः ।
आवर्त्तकी, स्त्री, (आवर्त्त इव आवर्त्तः प्रकाशते । आवर्त्त + कै + क + ङीप् ।) क्षुपविशेषः । भग-वती इति लोके प्रसिद्धा । तत्पर्य्यायः । विष्णु-क्रान्ता १ विष्णुमायी २ विष्णुकन्दा ३ रक्तपुष्पा ४ मनोज्ञा ५ लक्ष्मी ६ भगवती ७ शीतलता ८ मधुरसा ९ । अस्या गुणाः । कषायत्वम् । मधुरत्वम् । शीतवीर्य्यत्वम् । पित्तपित्तनाशित्वं । रक्तपित्तनाशकत्वं । इति राजनिर्घण्टः ।
आवर्त्तनं क्ली, (आ + वृत् + ल्युट् ।) सुवर्णादि-शोधनं । गलाइया इति भाषा । धातुद्रव्य-मर्द्दितत्वं । इत्यमरटीका । अप्राप्त इति भाषा । दूर्म्मेण धावितदिवसपरिच्छेदात्मकता पूर्व्वदिनाद परदिवसायत्त । "आवर्त्तनासु पूर्णानो प्रवराज्य भवनमा" इति स्मृतिः ।

आवर्त्तनी, स्त्री, (आङ्+वृत्+ल्युट्+ङीप्।) धातुद्रवकरणार्थयन्त्रपात्रं। मुछी इति भाषा। तत्पर्य्याय। तैजसावर्त्तनी २ मूषा ३ मूष ४। इति शब्दरत्नावली॥

आवर्त्तमणि, पु, (आवर्त्तनाकारो मणिः।) राजावर्त्तमणिपरत्न। इति राजनिर्घण्ट॥

आवर्त्तिनी, स्त्री, (आवर्त्त+इनि+ङीप्।) अजशृङ्गीवृक्ष। इति रत्नमाला॥

आवर्हित, त्रि, (आङ्+वृह्+क्तः।) उन्मूलित। उत्पाटितः। इति हेमचन्द्र।

आवलि, स्त्री, (आङ्+वल+इन्।) श्रेणी। पंक्ति। इत्यमरः॥

आवली, स्त्री, (आङ्+वल्+इन्+ङीप्।) आवलि। इत्यमर॥ (यथा अमरशतके ३॥ "आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं"। "दिशावलीयासनिशाकरांशुभिः"। इति माघे १।२५।)

आवल्य, स्त्री, (अवल+ष्यञ्।) अवलस्य भाव दौर्बल्य॥

आवश्यक, त्रि, (अवश्य+मनोज्ञादित्वाद्वुञ्। अवश्यानां भमात्र इति टिलोप।) अवश्यकर्त्तव्य। नैयमिक। उचित। यथा। "अचोरावश्यके। उवर्णान्तादावश्यकेऽर्थे ण्यत् स्यात्"। इति मुग्धबोधव्याकरण॥ किञ्च। आवश्यकपञ्चादिक्रियमाणस्य नित्यनैमित्तिकत्व। इति तिथ्यादितत्त्व॥ (यथा साहित्यदर्पणे, "आवश्यकानां कार्य्याणां अविरोधादिनिर्म्मितं"।)

आवसथ, स्त्री, (आवसन्ति आगत्य वसन्ति यस्मिन्। आङ्+वस+अथच्।) गृह। इति हेमचन्द्र॥ (वसतिस्थान। विश्रामस्थान। अग्निगृह। अग्निहोत्रस्थान।

रघुवंशे, ८।१४ 'निवसन्नावसथे पुराद्बहिः'। मनु। ३।१०७।

"आवासावसथौ प्रश्यामनुव्रज्यामुपासनाम्"।)

आवसथः, पु, (आवसन्त्यत्र। आ+वस+अधिकरणे अथच्।) गृह। (यथा, द्वितीयपदेश्ये मिश्रनामे "अस्ति चम्पकाभिधानाया नगर्य्यां परिव्राजकावसथ"।) आर्य्याकोषः। आर्य्याच्छन्दसा ग्रन्थभेदः। व्रतविशेष। इत्युणादिकोषः॥

आवसित, त्रि, (आवस्यते आच्छाद्यते आङ्+वस् आच्छादने+क्तः।) परिपक्वमर्द्दितधान्य। इति भरतः॥ बहुर्वितधान्य। इति सुभूतिः॥ सम्पन्नधान्य। इत्यन्ये॥ तत्पर्य्यायः प्लाक्ष २। इत्यमर॥

आवह, पु, (आभिमुख्येन वहतीति। आङ्+वह्+अच्।) सप्तवायुस्कन्धान्तर्गतवायुविशेषः। स च भूवायुः। इति पुराणज्योतिषे॥ (यथा, मनु, ८।३४७। "स्त्री मुख्यज्योतिरादित्यो मन्दो धरित्रपाकथा। पितृज्योतिः सत्यज्योतिर्ज्योतिष्मान् स्कन्ध आवहः"॥ इति प्रामाशः। जनक यथा मनुः,— "समुत्पन्नमेलाक्षरिकान् सर्व्वभूतभयावहान्"। रघुवंशे। १।४५, "सोऽयावहा भर्त्तुरलङ्घ्ययाच"।)

आवह्मान, त्रि, (आङ्+वह्+शानच्।) क्रमागत॥ (परम्परागत, धारावाहि।)

आवाधा, स्त्री, (आ सम्यक् बाधा।) दुःख। पीड़ा। इति शब्दरत्नावली। भूखण्ड। त्रिकोणक्षेत्रमध्यरज्जुनिक्षेपेण यत् खण्डद्वयं भवति तत्। इति लीलावती॥

आवाप, पु, (आ वपन्ति सलिलमत्र। आङ्+वप्+घञ्।) आलवाल। इत्यमरः॥ वलय। (यथा महाभारते १४ पर्व्वणि। "मौढ्यात् पपात गाण्डीवमावाप च करादपि"।) प्रभुचिन्तन। (परराष्ट्रचिन्तनम्। यथा, माघे। २।८८। "तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता"।) पानभेद। इति हेमचन्द्र॥ भाण्डवपन। परिक्षेप। इति मेदिनी॥ निम्नोन्नतभूमि। इत्यजय॥ पात्र। इति शब्दरत्नावली॥ प्रधानहोम। इति स्मृति॥

आवापक, पु, (आ उप्यते इति। आङ+वप्+कर्म्मणि घञ्+स्वार्थे कन् वा।) वलय। इत्यमरः॥

आवापन, स्त्री, (आवाप्यतेऽनेनेति आङ्+वप्+णिच्+करणे ल्युट्।) सूत्रयन्त्र। इति शब्दमाला॥ ताँत् इति भाषा।

आवारि, स्त्री, (आङ+वृ+इ।) घट्टवेश्म। इत्युणादिकोष॥ दोकान शाट्धालि इत्यादि भाषा।

आवाल स्त्री, (आङ+वल्+घञ्।) आलवाल। इत्यमर॥ (बालकमभिव्याप्य इत्यर्थे।) बालकपर्य्यन्तम्॥

आवाल्य, स्त्री, (बाल्यात् आ आवाल्य पर्य्यन्तार्थे अव्ययीभाव।) बाल्यावस्थापर्य्यन्त॥ (यथा धर्म्मविवेके,—"आवाल्यादसतो सती सुरपुरीं कुन्ती समारोहयत्"।)

आवास,पु, (आ वसन्ति अत्र इति। आङ्+वस्+अधिकरणे घञ्।) गृह इति हेमचन्द्र॥ (यथा गीतगोविन्दे। ४।१०। "आवासो विपिनायते प्रियसखीमालापि जालायते"।)

आवाहन, स्त्री, (आङ+वह्+णिच्+ल्युट।) आह्वान। निमन्त्रण। यथा,— "प्रतिमास्थानेष्वप्सुमौ नावाहनविसर्ज्जने"। इति। विनायकादीना आह्वतिभिरावाहनमाह मत्स्यपुराण। "विनायक तया दुर्गा वायुमाकाशमेव च। आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ"॥ इति च तिथ्यादितत्त्व॥ आवाहनीमुद्रा मुद्राशब्दे द्रष्टव्या॥

आवाहनी, स्त्री, (आवाह्यतेऽनया। आङ्+वह्+णिच्+करणे ल्युट् ङीप्।) मुद्राविशेषः। यथा, "हस्ताभ्यामञ्जलिं बद्ध्वानामिकामूलपर्व्वणोः। अङ्गुष्ठौ नि क्षिपेत् सेय मुद्रा त्वावाहनी स्मृता"॥ इति तन्त्रशास्त्र॥

आविः, [स्] य, (अवते। उच्शब्दे+इस्।) प्राकाश्यम्। प्रस्फुटत्व। तत्पर्य्याय। प्रादुः २। इत्यमर॥

आविक, पु, (अविना मेषलोम्ना कृतम् इति अवि+ठक्।) कम्बल। इति हलायुध॥ (त्रि, मेषलोम्ना निर्म्मित, । २।४१, "वसोरत्नानुपूर्व्येण शाणक्षौमाविकानि च"। मेड़ीदुग्ध। यथा वैद्यके,— "आविक लवणं स्वादु स्निग्धोष्णं चाश्मरीप्रकृत्। अहृद्यं तर्पणं केश्य शुक्रपित्तकफप्रदम्॥ गुरु कासेऽनिलोद्भूते केवले चानिले वरम्"। इति।)

आविग्न, पु, (आङ्+विज्+क्त।) आविग्न। करमर्द्दक। इति शब्दरत्नावली॥ पानि आमला इति ख्यातः। इत्यमरटीकासारसुन्दरी॥ (उद्विग्न उत्कण्ठित)

आविर्भाव, पु, (आविस्+भू+घञ्।) प्रकाश। देवावतरण। प्रादुर्भाव। यथा,— "यदा ते मनसा ध्यातो दयासिन्धुर्जनार्द्दनः। भक्तानामनुकम्पार्थं यत्राविर्भावनिच्छति"॥ इति जैमिनिभारते आश्वमेधिके पर्व्वणि २ अध्याय॥

आविर्भूत, त्रि, (आविस्+भू+क्त।) प्रकाशित। अधिष्ठित। आगमयुक्त। अवतीर्ण। प्रादुर्भूत। आविर्भावविशिष्ट। यथा,— "उपक्ते ग्रहपक्षके सरगुरौ सेन्दौ नवम्यां तिथौ। लग्ने कर्कटके पुनर्व्वसुदिने मेष गते पूषणि। निर्द्दग्धुं निखिला पलाशसमिधो नध्यादयोध्यारवेराविर्भूतनभूदपूर्व्वविभव यत्किञ्चिदिक मह"॥ "तथाष्टम्या भद्रकाली दक्षयज्ञविनाशिनी। आविर्भूता महाघोरा योगिनीकोटिभिः सह"॥ इति च तिथ्यादितत्त्वम्॥

आविष्कार, पु, (आविस्+कृ+घञ्।) प्रकाश॥ (यथा साहित्यदर्पणे, २ परिच्छेदे। "आविष्कारातिशयमभिधेयवत् स्फुटप्रतीयते"।)

आविष्कृत, त्रि, (आविस्+कृ+क्त।) प्रकाशित। तत्पर्य्यायः। प्रकटित २। इति हेमचन्द्र। (यथा उत्तरचरिते, प्रथमाङ्के। "आविष्कृतकथाप्रावीण्य वत्सेन"।)

आविष्ट, त्रि, (आ+विश+क्त।) प्रेतवाधित। भूतादिग्रस्त। इति त्रिकाण्डशेष॥ आवेशयुक्त। निविष्ट॥ (उपप्लुतः। यथा कामन्दक, "आविष्टइव दुःखेन तद्गतेन गरीयसा"।)

आवीरचूर्ण, स्त्री, (आवीरमेव चूर्णम्।) फल्गु। फागु इति बङ्गभाषा। आवीर इति हिन्दीभाषा। यथा,— "चन्दनागुरुकस्तूरीकुङ्कुमद्रवसंयुत। आवीरचूर्णं रुचिर दत्त्वा परमेश्वर"॥ इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्याय॥

आवुक, पु, (अवति रक्षतीति। अव+बाहुलकादुक्+कन्।) नाट्योक्तौ पिता। इत्यमर॥

आवृत्, स्त्री, (आङ्+वृत्+क्विप्।) अनुक्रम। परिपाटी। इत्यमरः॥ (प्रकारः। जातकर्म्मादिक्रियाकलाप। यथा मनुः ३।२४८। २।६६। "अमन्त्रिकातु कार्य्येयं स्त्रीणामावृदशेषतः"।)

"एकस्मिन् तु सार्द्धं वीणामादरणीयता" ।)

आविष्ट, त्रि, (आङ्+विश्+क्त ।) क्रोधाविष्टः । तत्पर्य्यायः । वेष्टितम् २ वलयितम् ३ संवीतम् ४ रुद्धम् ५ । इत्यमरः । (आच्छादितं, व्याप्तं व्यापितं । "सर्वैरेव, न च ज्ञातव्यानुपमादिकायां" भरत ।)

आवृत्त, त्रि, (आङ्+वृत्+क्त ।) कृतावर्त्तः । आवृतः । इत्यमरटीका । (आवृत्तः, यथैव पौनः आवर्तितः, प्रतिनिवृत्तः, पराङ्मुखः, पठ धर्मितः, परिवर्त्तितः । यथा कुमारसम्भवे,
"न स्वयं स च स्वर्ज्ञोऽप्यासामरणत्" ।)

आवेश, पुं, (आङ्+विश्+घञ् ।) त्वरा । इति हेमचन्द्रः । (यथा रघुवंशे —
"आवेशः कश्मलोऽपि भिषगित्यविदिते पञ्चमा- द्विभीषणो मायाम् पांशुपरित्यक्तपरिजनपरवति संसारे निश्चिताकृ" । यथा शकुन्तलायां ५, १ ।
"आवेशावशीकृतः विस्मयमाकृत्तिमयम् कथायाम्" ।)

आवेशनी, स्त्री, (आङ्+विश्+ल्युट्+ङीप् ।) वस्त्र- धारणकला । इत्यमरः राजनिर्घण्टश्च ।
(यथा शुकसप्तती प्रकाशाप्तरात्रे मतङ्गा ।)

आवेष्टनं स्त्री, (आङ्+विष्+ल्युट् ।) शिल्पशालं । (शिल्पासनम् ।)

आशंस, पुं, (आङ्+शन्स्+घञ् ।) कायशस्त्र विशेषः । कलस्वोक । कटका २ आवेष्ट ३ । पुरःसरटीका । इति हेमचन्द्रः । कृतापिका शोभा । अस्वर्णक । भूमकामर २ भूकामिका ३ प्रतापक ४ । इति राजनिर्घण्टः । आयनिका । कचिन्निबद्धा । (यथा रघुवंशे, ६।४ ।
"यस्मै सफलेऽवधानिर्भिः" ।)

आशंसा, स्त्री, (आङ्+शंस्+अ+टाप्) इच्छा । आकाङ्क्षा । इति हेमचन्द्रः । (मनु, ४।२८ ।
"अभ्युत्थानानिरस्तानि काम्यानि तेषामिति च" ।
(भावे कुङ् ।) पूजाविधि । (यथा शाकिनर्तनके २ परिच्छेदे ।
"नमः प्रेषितपरिवारः पदसाधेनसाधितं" ।)
कथित । इति मेदिनी । शोक । इति धरणी । परिदेवन । इति हेमचन्द्रः ।

आशंसित, त्रि, (आशंसा अस्य जाता । आशंस+ इतच् ।) आशंसायुक्तः । कथितम् । इत्यमरः । शीघ्रं । शब्दार्थानुरोधे । ... ... २ कार्य्यविशेषे १ । इति विश्वप्रकाशः ।

आशंसन, पुं, (आङ्+शंस्+ल्युट् ।) आशीर्वादः । इति शब्दरत्नावली । शुश्रूष ऐश्वर्य इत्यादि भाषा ।

आशंसिनी स्त्री, (आङ्+शंस्+णिनि ।) कामना । पुष्टि ।

आशंका, स्त्री, (आङ्+शन्स्+अच्+टाप् ।) इच्छा । आकाङ्क्षा । इति हेमचन्द्रः ।
(रघुवंशे, १२।७० ।
"दिष्ट्या विकारोऽस्या पारे सीतायाः दर्शनम्" ।)

आशंसितृ, [ऋ] त्रि, (आङ्+शन्स्+तृच् ।) आशंसाकर्त्ता । आकाङ्क्षितः । इत्यमरः ।

आशक्त, त्रि, (आङ्+शक्+क्त ।) आसक्तिः । इत्यमरः ।

आशङ्कित, त्रि (आङ्+शक्+क्त ।) सन्देहविशिष्टः ।

आशङ्का स्त्री, (आङ्+शकि+अ+टाप् ।) भयं । शङ्का । इति हेमचन्द्रः । (संशयः, वितर्कः ।) शाकुन्तले प्रथमाङ्के ।
"महात्मना शङ्कितहृदयो मन्मथं भजति" ।
कथासरित्सागरे, १० तरङ्गे ।
"तत् कथा विस्मयाद्रूपामनन्तरमुपितम्" ।)

आशक, पुं, (आशय+आर्ये कन् ।) आशयकः ।
इति भरतः द्विरूपकोषश्च ।

आशय, पुं, (आङ्+शीङ्+अच् ।) अभिप्रायः । स्थानमात्रं । आधारः । इति त्रिकाण्डशेषमेदिनी । विभवः । विश्रामः । वैरः । पनसः । कोष्ठ स्थानं । इत्यमरपाठ । धर्मविशेषः । चाटक । इति कुसुमाकरः । (अभिप्रायार्थे यथा, कथासरित् सागरे, १९ तरङ्गे ।
"तथापि कस्य पुनः तत्र कोऽपि सन्ततम्" ।
विश्रामे यथा, भगवद्गीतायां १ ।१८ ।
"वायुर्गन्धानिवाशयात्" इति ।
"आशयस्य सद्" । "आशयास्त यान्ताशया विस्तारस्य केशयतो रक्ताशय आमाशयः पक्वाशयो मूत्राशयः जीवस्य समाशयोऽष्टम" इति । सुश्रुतः ।)

आशयाश, पु, (आशये स्थितं अश्नाति । अश्+अण् । आधारः । समन्तात् । आश्रयाशः ।) आशयाश अग्नि । इत्यमरटीकायां भरतः ।

आशर पुं, (आ समन्तात् शृ हिंसायां+अच् ।) अग्निः । राक्षसः । इति मेदिनी ।

आशा, स्त्री, (आ समन्तात् अश्नुते व्याप्नोतीति । आङ्+अश्+अच्+टाप् ।) दीर्घाकाङ्क्षा । आकाङ्क्षा । तृष्णा । (यथा शान्तिशतके १।२८ ।
"आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला" ।)
दिक् । इत्यमरः ।
"आशावश्यं ... ..." ।
इति शान्तिशतके २ परिच्छेदे । आशामुखा प्रकरणानि विषयान्तरा । यथा, हरिवंशे —
"कीर्त्तिर्हतविषया कीर्त्तिरेव मेधा च दक्षता" ।)

आशाढ़, पुं, आषाढ़मासः । अविनी दण्डविशेषः । इत्यमरटीका त्रिकाण्डशेषश्च ।

आशाढ़ा, स्त्री, पूर्वाषाढ़ानक्षत्रं । उत्तराषाढ़ा च ।

आशाधरकेसर पुं, (आशाधरात् कस्मिन् कस ।) श्रुतिवनकृत । इति राजनिर्घण्टः ।

आशाबन्ध, पु, (आशायाः बन्धः । षष्ठीतत् ।) आशा भाषा । (मेघदूते,—
"आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां ।
सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि ।)
सम्बन्धः । सर्वसम्बन्धः । आशाप्रकार भाव इति भाषा । इति शब्दः ।

आशित त्रि, (आङ्+अश्+क्त) भक्षित । भुक्तं । इति महाभारतः ।

आशितम्भव, त्रि (आशिता भोजिता आरो यस्य पुरुषावाद्भवमिति पुं । विकाशनात् पूर्वेण खश् ।) भक्षितम्भवम् । आशो भ्रमिता पुत्रः । इत्यमरः । (यथा भट्टिकाव्ये ४र्थ सर्गे ।
"विश्रान्तोपभुक्तानि पर्येषमाशितम्भवम्" ।)
यस्मै ते भक्ते यत परितृप्तिरिति भाषा ।

आशितम्भवं, क्ली, (आशित+भू+खच्+मुम् आगम ।) भक्षादि । अन्नं च । इति मेदिनी । (आश्वा- सनेन अतिशयादि भोजिता तृप्तोभवति यस्य तत् भक्षादिकम् । यथा, भट्टिकाव्ये ४र्थ सर्गे —
"विश्रान्तिकानीयानि पर्येषमाशितम्भवम्" ।)

आशितृ [ऋ] त्रि (आ समन्तात् अश्नातीति । आ+अश्+ तृच् ।) भक्षकः । अतिभोजनशीलः । इति हेमचन्द्रः ।

आशिर, पुं (आ+अश्+किरच् ।) राक्षसः । अग्नि । इति त्रिकाण्डशेषोणादिवृत्तिः । (सूर्य्यः ।)

आशिस्, [स्] स्त्री, (आङ्+शास्+क्विप्+उप- धाया इत्वम्) आशीर्वादः । अभीष्टसाधनम् । इत्यमरः । सर्पदंष्ट्रेति । इति राजनिर्घण्टः । (हित- प्रार्थने अभीष्टप्रार्थनेच । यथा,—
"शत्रुकृतात् तव मार्गेण प्रतिकृत्याभिधीयते । उपनययार्थं वाल्मीकिना परिकीर्त्तितम्" ।
यथा, कुमारे ७।७० ।
"सर्व्वे मनोरथा वर्द्धे हरस्याद्" ।)

आशी, स्त्री, (आङ्+अश्+अच्+ङीप् ।) सर्प- दंष्ट्रा । अहिदंष्ट्रा । सर्पविषं । इति शब्दरत्ना- वली । [इति विश्वः ।
"आशी कालकूटा तीक्ष्णा यथा रक्षेत न भीयते" ।

आशीर्वाद,पुं, (आशिषो वादः कथनम् ।) आशीर्- वचः । मङ्गलप्रार्थना । (यथा, मनु । ४।२२ ।
"मङ्गलं दीर्घस्वरान्तमाशीर्वादाभिधानवत्" ।)

आशीविष, पुं, (आशिषि दंष्ट्रायां विषमस्य पृषोदरादित्वात् साधु ।) सर्पः । इत्यमरः ।
रघुवंशे —१२।५ ।
"तपस्वापविषमभिवर्द्धन" ।

आशु, पुं, क्ली, (अश्+उण् ।) प्रावृट्कालसम्भव धान्यं । आउश इति भाषा । तत्पर्य्यायः । व्रीहिः २ पाटलः ३ । अथ गुणाः । मधुरत्वम् । वात- पित्तघ्नत्वम् । पित्तकारित्वम् । गुरुत्वं च । इति राजवल्लभः ।

आशु, क्ली, (अश्नुत इति । अश्+उण् व्याप्तौ उण् ।) शीघ्रम् । द्रुतम् । (यथा शाकुन्तले १ अङ्के ।
("अस्मिन् भवभयानां प्रतिकारकं साधनम् ।)
तद्वयादि चेत् त्रि । इत्यमरः ।

आशुग, पुं, (आशु शीघ्रं गच्छतीति । आशु+गम् +ड ।) बाणः । वायुः । (रघुवंशे, १२।९१ ।
"राक्षसानि रामाख्यं निशा चरवधाशुगाः" ।)
शीघ्रगामिनि, त्रि । इत्यमरः । मनु ७।८० ।
("पिबो च अनेकशास्त्रमिवाशुगामिनी" ।)

आशुतया, स्त्री, प्रसारिणीलता । इति राजनिर्घण्टः ।

आशुव्रीहि, पुं, (आशु व्रीहिः ।) आशुधान्यं । इत्यमर- टीकायां भरतमल्लिकः ।

आशुशुक्षणिः, पु, (आ समन्तात् शोष्टुमिच्छति । आङ्+शुष्+सन्+अनि ।) अग्निः । इत्यमरः ॥ (यथा कादम्बर्य्याम्,—"मन्त्रपूतानि हवींषि प्रतिगृह्णाति एतत्प्रीत्या आशुशुक्षणिः" ।) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

आश्मकूटी, [न्] पु, पर्व्वतः । इति शब्दमाला ॥

आश्चर्य्यं, क्ली, (आङ्+चर्+ण्यत्+सुट् निपातनात् ।) अपूर्व्वं । तत्पर्य्यायः । विस्मयः २ अद्भुतः ३ चित्रम् ४ । इत्यमरः ॥ (यथा, रघौ १६।८७ ।
"गन्धोदग्रं तदनु ववृषुः पुष्पमाश्चर्य्यमेघाः" ।)

आश्मनः, पु, (अश्मन्+अण् ।) अरुणः । सूर्य्यसारथिः । इति त्रिकाण्डशेषः ॥ (अश्मनि प्रस्तरे भवमित्यर्थे अश्मन्+अण् । शिलाभववस्तुनि त्रि । यथा भट्टौ ४ । २६ ।
"यस्यापमाश्मनप्रख्यं सेषु धत्तेऽन्यदुर्व्वहम्" ।)

आश्रमः, पु,क्ली, (आङ्+श्रम+घञ् ।) शास्त्रोक्तधर्म्मविशेषः । आश्राम्यन्ति स्व स्व तपश्चरन्त्यत्र । स चतुर्विधः । ब्रह्मचर्य्यं १ गार्हस्थ्यं २ वानप्रस्थं ३ सन्न्यासः ४ । इति स्मृतिः ॥ ब्रह्मचारी । गृही । वानप्रस्थः । भिक्षुः । इत्यमरः ॥ मुनीनां वासस्थानं । वनं । मठः । इति मेदिनी ॥ (कलियुगे तु ब्रह्मचर्य्यवानप्रस्थौ न स्तः केवलं गृहस्थभिक्षुकाश्रमावेव, यदुक्तं । महानिर्व्वाणतन्त्रे ।
"गार्हस्थ्यो भैक्षुकश्चैव आश्रमौ द्वौ कलौ युगे" ।
रघुवंशे, १।४८ ।
"स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः" ।)

आश्रमिकः, त्रि, (आश्रम+ठक् ।) आश्रमयुक्तः । इति शब्दरत्नावली ॥

आश्रयः, पु, (आङ्+श्रि+अच् ।) राज्ञां सन्ध्यादिषड्गुणान्तर्गतगुणविशेषः । इत्यमरः ॥ व्यपदेशः । (यथा, मनुः २।११ ।
"योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः" ।)
सामीप्यं । आधारः । इति जटाधरः ॥ (यथा, शान्तिशतके ४।६ । 'वासो वल्कलमाश्रयो गिरिगुहा शय्या लतावल्लरी" ।)
गृहं । इति हेमचन्द्रः ॥ ननुवयः । अवलम्बनं । (यथा, मनुः ७।७२ ।
"श्रीण्याद्यान्याश्रितास्त्वेषां मृगगर्त्ताश्रयाप्सराः" ।)
राज्ञां तन्निर्णयो यथा,—
"अस्थितौ यदि कल्याणं भवेत् सम्श्रयणं तथा ।
भवति श्रेयसे राज्ञां विपरीतं न कर्हिचित् ॥
उच्छिद्यमानो बलिना आश्रयेत् बलवत्तरं ।
विनीतवत्तत्र कालं नयेदिति मतिर्ध्रुवा ॥
ददत् वसु वा कोषं वा भूमिं वा भूतिसम्भवां ।
आश्रयेदभियोक्तारं समाश्रयगुणान्वितं ॥
वीतव्यसनमश्रान्तं महोत्साहं महामतिं ।
प्रविशन्ति महाराजमपांपतिमिवापगाः ॥
अव्यवसायिनमलसं दैवपरं साहसाच्च परिहीनं ।
प्रमदेव वृद्धपतिं नेच्छन्त्युपगूहितुं कमला ॥
उत्साहात् श्रियमाप्नोति उत्साहाच्च महद्यशः ।
तस्मात् सर्व्वोपधाशुद्धमुत्साहं नित्यमाचरेत् ॥
अमर्षश्चैव शौर्य्यञ्च शीघ्रकारित्वमेव च ।
तत्कर्म्मणि प्रवीणत्वमित्युत्साहगुणा मताः ॥
व्यसनस्यागमद्वारमनुत्साहो महीपतेः ।
सामदानदण्डभेदा इत्युपायचतुष्टयं ।
सामसिद्धं प्रशंसन्ति सर्व्वतत्त्वविपश्चितः ॥
स्तवनैरमृतैर्वाचा सामोपायं समाचरेत् ।
लुब्धं चौर्य्यप्रदानेन सत्कृत्य वशमानयेत् ।
भेदं कुर्व्वीत यत्नेन मन्त्रामात्यपुरोधसां ॥
यथाबलं प्रकुर्व्वीत दुष्टदण्डनिपातनं" ॥
इति युक्तिकल्पतरौ १ अध्यायः ॥

आश्रयाशः, पु, (आश्रयमाधारमपि अश्नाति यः । आश्रय+अश्+कर्म्मणि उपपदे अण् ।) अग्निः । (यथा, हितोपदेशे । २ ।
"दुर्वृत्तः क्रियते धूर्त्तैः श्रीमानात्मविवृद्धये ।
किं नाम खलसंसर्गः कुरुते नाश्रयाशवत्" ।)
चित्रकवृक्षः । इत्यमरः ॥

आश्रयाशः, त्रि, (आश्रयं स्वालम्बनस्थानमपि अश्नाति यः । आश्रय+अश्+अण् ।) आश्रयनाशकः । आश्रयध्वंसी । इति मेदिनी ॥

आश्रवः, त्रि, (आ सम्यक् शृणोति वाक्यं यः । आङ्+श्रु+पचाद्यच् ।) वचनस्थितः । इति मेदिनी ॥ कथार बाध्य इति भाषा ।
("दृष्टदोषमपि तन्न सोऽत्यजत्
सङ्गवस्तु भिषजामनाश्रवः" ।)
इति रघुवंशम् । १९।४८ ।)

आश्रवः, पु, (आङ्+श्रु+अच् ।) अङ्गीकारः । क्लेशः । इति मेदिनी । दोषः । इति हेमचन्द्रः ॥

आश्रिः, स्त्री, (अश्रिरेव । अश्रि+इन् ।) अश्रिः । कोणः ॥

आश्रितः, त्रि, (आङ्+श्रि+क्त ।) आश्रयप्राप्तः । शरणागतः । न्यायमते गगनाद्याकाशादिनित्यद्रव्यभिन्नसर्व्वद्रव्याणां आश्रितत्वं साधर्म्म्यं ॥ (अवलम्बितः, अनुगतः, आधेयः, अधीनः, वशवर्त्ती ।)

आश्रुतः, त्रि, (आङ्+श्रु+क्त ।) अङ्गीकृतः । स्वीकृतः । इत्यमरः ॥ आकर्णितः । कृतश्रवणः ॥

आश्लेषः, पु, (आङ्+श्लिष्+घञ् ।) आलिङ्गनं । इति हलायुधः ॥ (मेघदूते, पूर्व्वमेघे ३ ।
"कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे" ।)
एकदेशसम्बन्धः । यथा । कानने रेमे । इति व्याकरणं ॥ (अश्लेषा एव । अश्लेषा+अण् । स्त्रियां टाप् ।) अश्लेषा । अश्लेषानक्षत्रसम्बन्धिनि, त्रि । (यथा, तैत्तिरीयसंहितायां ।४।४।१०।१ ।
' अश्लेषानक्षत्रं सर्पा देवता" ।)

आश्वं, क्ली, (अश्वानां समूहः । अश्व+अण् ।) अश्ववृन्दं । घोटकसमूहः । इत्यमरः ॥ (अश्वस्य भावः कर्म्म वा ।)

आश्वत्थं, क्ली, (अश्वत्थस्य इदम् । अश्वत्थ+अण् ।) अश्वत्थवृक्षफलं । इत्यमरः ॥

आश्वपालिकः, पु, (अश्वपालस्यापत्यम् । अश्वपाल+ठक् ।) अश्वपालस्य पुत्त्रः । इति व्याकरणं ॥

आश्वयुजः, पु, (आश्वयुजी पूर्णिमा विद्यतेऽस्य । आश्वयुजी+अण् ।) आश्विनमासः । इत्यमरः ॥ आश्विनसम्बन्धिनि त्रि ॥ (मनुः, ६।१५ ।
"त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्व्वसञ्चितम् ।
जीर्णानि चैव वासांसि शाकमूलफलानि च" ॥)

आश्वयुजी, स्त्री, (अश्वयुजा युक्ता पौर्णमासी । अश्वयुज्+अण्+ङीप् ।) आश्विनी पूर्णिमा । इति शब्दरत्नावली ॥

आश्वासः, पु, (आङ्+श्वस्+घञ् ।) निर्वृतिः । आख्यायिकापरिच्छेदः । इति मेदिनी ॥ आशाप्रदानं ॥ (आश्वासनं, भीतस्य भयनिवारणार्थं सान्त्वनं । उत्तरचरिते, षष्ठाङ्के ।
"आश्वासस्नेहभक्तीनामेकमालम्बनं महत्" ।)

आश्विनः, पु, (अश्विनीनक्षत्रयुक्ता पौर्णमासी यत्र मासे सः । अश्विनी+अण् ।) वैशाखादिद्वादशमासान्तर्गतषष्ठमासः । रवेः कन्याराशिस्थितिकालः । तत्पर्य्यायः । इषः २ आश्वयुजः ३ । इत्यमरः ॥ शारदः ४ । इति राजनिर्घण्टः ॥ तत्र जातफलं ।
"राज्ञः प्रियः काव्यकलाविदग्ध-
स्त्वादृग्भगर्नाग्रसतीक्ष्णबुद्धिः ।
सुखी वदान्यो बहुमानशाली
भक्तो भवेदाश्विनमासजन्मा" ॥
इति कोष्ठीप्रदीपः ॥

आश्विनेयौ,पु, (अश्विन्या अपत्ये । अश्विनी+ढक् ।) अश्विनीकुमारौ । इत्यमरः ॥ (पाण्डुपुत्त्रौ नकुलसहदेवनामानौ, अश्विनीकुमारजातत्वात् तयोस्तथात्वम् ।)

आश्वीनं, त्रि, (अश्वेनैकाहेनातिक्रम्यते । अश्वस्यैकाहगम इति खञ् ।) दवीयः अश्वेनाश्वेन एकेन दिनेन गम्यते तत् । इत्यमरः ॥ एक घोडाय एक दिने यावार पथ इति भाषा ।

आषाढः, पु, (आषाढया नक्षत्रेण युक्ता पूर्णिमा यस्मिन् । आषाढा+नक्षत्रेण युक्तः कालः इति अण् । पलाशदण्डपक्षे आषाढः प्रयोजनमस्य इति विशाखाषाढादण् मन्थदण्डयोरित्यण् ।) वैशाखादिद्वादशमासान्तर्गततृतीयमासः । रवेर्मिथुनराशिस्थितिकालः । पूर्व्वोत्तराषाढान्यतरनक्षत्रयुक्ता पौर्णमासी यत्र मासे सः । तत्पर्य्यायः । शुचिः २ । इत्यमरः ॥ तत्र जातफलं ।
' अगम्यजल्पी प्रमदाभिलाषी
प्रमादशीलो गुरुवत्सलश्च ।
बह्वन्ययो मन्दरुजाधन स्या-
दाषाढमासप्रभवो मनुष्यः" ॥
इति कोष्ठीप्रदीपः ॥ व्रतिनां पलाशदण्डः ।
("अथाजिनाषाढधरः प्रगल्भवाक्
ज्वलन्निव ब्रह्ममयेन तेजसा" ।
इति कुमारे । ५।३० ।)
मलयपर्व्वतः । इति मेदिनी ॥

आषाढकः, पु, (आषाढ एव+आषाढ+स्वार्थे क ।) आषाढमासः ॥

आषाढभवः, पु, (आषाढ+भू+अच् ।) मङ्गलग्रहः । इति हारावली ॥ आषाढमासजाते त्रि ॥

आषाढा, स्त्री, पूर्व्वाषाढानक्षत्रं । उत्तराषाढानक्षत्रं । इति शब्दरत्नावली ॥

आषाढाभूः, पुं, (आषाढा + भू + क्विप्।) मङ्गलग्रहः। इति हेमचन्द्रः।

आषाढी, स्त्री, (आषाढस्य इयं। आषाढ + अण् + ङीप्।) आषाढमासस्य पूर्णिमा। इति मेदिनी।

आस, व्यो (अश्नुते व्याप्नोतीति अश् + असुन् बाहुल्य।) आसनार्थं। इत्युणादिकोषः।

आस, ङ ङ उपवेशने। (अदा०-आत्म० अक०-सेट्।) इति कविकल्पद्रुमः। निषसनार्थः। इति तट्टीका।

(आस्ते भवनमाक्रम्य वीरमिमुखिनिश्च्ये।

इति रामायणे १ काण्डे) नि ङ्‌ आशिषोर्दृष्टि। च ण

आस्ते सिंहासने चम। विपमाननामयार्णं।

आयासमासे। इति दुर्गादासः। (सम् + अधि)

सम्भुगुपवेशने। भाषी। यथा रघुवंशे ११।६९।

"वीरासनैर्धानमुजामृषीणा-

ममी समध्यासितवेदिमध्याः"।

(अनु) यथानुपवेशने। यथा रघौ २।२४।

"तामन्तिकन्यस्तबलिप्रदीपा-

मन्वास्य गोप्ता गृहिणीसहायः"। इति।

उपासनायां। यथा रामायणे,—

"अन्वासितोऽरुन्धत्या स्वाहयेव हविर्भुजम्"।

इति।

(अति) अन्यासे। (उप) उपवेशनं। यथा माघे।

२।४९।

"तिष्ठन्ति वेदे कार्यान्ते प्रत्येकं च उपासते"।

इति।

(उप) समीपोपवेशने। यथा मनु ७।१४७।

"कृतान्जलिमुपासीत मध्यन्दिने पश्चोऽभिवादन्"।

इति।

पञ्चाञ्जलिम् मुपसमीपमासीत इति तट्टीका।

उपासनायां। यथा,—

"सध्यायेदुपासीत मा चिन्तयेदुपासते"।

इति गीतायां १२।८। सेवने। यथा,—

"उपासते ये गृहस्थाः परपाकमबुद्धयः"।

इति मनुः ३।१०४। परपाकानुपासते सेवन्ते इति तट्टीका। (निर्) निरासने। अपवारणे। (प्रति + अस्) प्रतिपत्तिनिराकरणे। "कोऽप्यत्र प्रति समासते चाचाल्यवलमागते"। इति भारतम्। इत्यादि।)

आस, पुं, (असनं अस्यतेऽनेनेति। अस + करणे घञ्।) धनुः। इति हेमचन्द्रः।

आसक्त, त्रि, (आ + सञ्ज + क्त।) आसक्तिविशिष्टः। तत्परः। तत्पर १ अभिरत २। इत्यमरः। (विषयासक्तपरिहारेण कर्मणा निर्मितः। यथा किराते ११।१४।

"असक्ता आसक्तिः शुभा समाधीर्ण निर्मलाः"।)

आसक्ति, स्त्री, (आङ् + सञ्ज + क्तिन्।) निष्ठा। प्रेम। अभिनिवेशः। इति जटाधरः।

आसङ्ग, स्त्री, (आङ् + सञ्ज + क्तिन्।) आसक्तिः। आसक्तः।

आसङ्ग, पुं, (आङ् + सञ्ज + घञ्।) आसक्तिः। सङ्गः। सक्तिः। नित्ये। इति मेदिनी।

(यथा, कुमारे ३।४१।

"न षट्पदश्रेणिभिरेव पङ्कजं

सशैवलासङ्गमपि प्रकाशते"।) ।

तुणरी। वीरणमूलविशेषः इति भरतः। इतिराज निघण्टुः। आसक्तिः। (यथा गीतायां २।६२

"सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते"।)

आसङ्गिनी, स्त्री, (आसङ्ग + इनि + ङीप्।) चक्रवातः। वातगुल्मः। इति त्रिकाण्डशेषः। धूम किया वात्याच इति भाषा।

आसत्ति, स्त्री, (आङ् + सद् + क्तिन्।) सङ्गमः। लाभः। इति मेदिनी। (अविच्छेदः। निरन्तरं। यथा, साहित्यदर्पणे २ य परिच्छेदे।

"वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः"।

"आसत्तिर्बुद्ध्यविच्छेदः" इति तट्टीका।)

न्यायमते पदानामव्यवधानेन। अन्वयार्थेन यस्य पदस्य योऽन्वयस्तयोरव्यवधानेनोपस्थितिः आसत्तिः। इति सिद्धान्तमुक्तावली।

आसन, क्ली, (आस्यते उपविश्यतेऽस्मिन्। आस् + अधिकरणे + ल्युट्।) पीठं। पिंडि चौकि इत्यादि भाषा। इत्यमरः। तच्च सहासनादौ निषिद्धम्। निर्मितं सिंहादौ पुष्पादौ तद्वस्त्रं विनिर्मितं। इत्यमरः। आसनादिवर्त्तनं। इति मेदिनी। अवस्थानम्। तच्च योगशास्त्रोक्त-चतुरशीतितमाद्यासनम्। अनु यथायोग्यान्यासनं वामाद्यासनविशेषः। यथा,—

"पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनं तथा।

वीरासनमिति प्रोक्तं क्रमादासनपञ्चकम्"॥

तेषां लक्षणम्।

"ऊर्वोरुपरि विन्यस्य सम्यक् पादतले उभे।

अङ्गुष्ठौ च निबध्नीयात् हस्ताभ्यां व्युत्क्रमात्ततः॥

पद्मासनमिति प्रोक्तं योगिनां हृदयङ्गमम्। १।

जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे।

ऋजुकायो विशेदासीनं स्वस्तिकं तत् प्रचक्षते॥

सीवन्याः पार्श्वयोर्न्यस्य गुल्फयुग्मं सुनिश्चलम्।

वृषणाधः पादपार्ष्णी पाणिभ्यां परिबन्धयेत्।

भद्रासनं समुद्दिष्टं योगिभिः परिकीर्त्तितम्॥ २॥

ऊर्वोः पादौ क्रमान्न्यस्य जानू प्रत्यङ्मुखाङ्गुली।

करौ निदध्यादाख्यातं वज्रासनमनुत्तमम्॥ ३॥

एकपादमधः कृत्वा विन्यस्योरौ तथोत्तरम्।

ऋजुकायो विशेदासीनं वीरासनमितीरितम्"॥४॥

इति तन्त्रसारः। अन्यच्च।

"आसनानि कुर्वीताऽपि शक्तौ धीसन्धकः।

अनुरक्तविशेषाणि चैवैर्व्व चतुरशीतिकम्।

आसनेषु आसनेषु आसनं दण्डपूर्व्वके।

इत्य विवादानं यस्य द्वितीयं आसनपञ्चकम्"।

इति तिरुशासनम्।

अष्टाङ्गयोगानि यमादीनि नत्वाणि।

यमनियमासनप्राणायामादि। तथा।

गोरक्षसंहितायाम्।

"आसनानि समस्तानि यावन्तो जीवजन्तवः।

चतुरशीतिलक्षाणि शिवेन कथितानि च॥

तेषां मध्ये विशिष्टानि षोडशोनं शतं कृतम्।

आसनं पद्मकं प्रोक्तं गोमुखं स्वस्तिकं तथा।

आसनं वा पार्श्वकं वीरं नवचक्रेति कथ्यते।

गोमुखाख्यं तदिति वक्ष्ये यथावद्धि नमेति च।

निषेधेऽप्यस्य यत्रे विशेषं वामि चोरभवेत्।

पौष्ण इयमीदृशं कुक्कुटासनमुत्तमम्।

पादिकोऽस्तिवदन् देवा समानं नामासनं भवेत्।

गजासनमुदूरमासनं मयूरं तुरगम्।

गोपृष्ठं व्याघ्रविशीर्षमासनं विविधोपवेत्।

कम्पासनमूर्धपादं दण्डासनमनुत्तमम्।

एकपादं पद्मलं शवकापरिवर्त्तितम्।

चेमकदासनयुक्तं सर्व्वसिद्धिविधायकम्।

शाल्मलं कोमलं पार्श्वं मत्स्यमेकाख्यं मतम्।

योगमर्कं मत्स्यवेव धनुषैव चतुष्कम्।

पञ्चव रथिकं पद्मासनं भद्रकासने।

सिंहपादासनपूर्वा कमठं मणिपद्मं च।

मयासी कुक्कुटासन कम्भलासनं कर्कम्।

कमलासन रामस्य मत्स्या मतवेदिपम्।

चर्मेष्टि सर्व्वरेतसामासनं पीठिका स्मृतम्।

भाद्रव कमलं ब्रजमासनं देवपूजने।

पद्मं पार्श्वं योगं रत्नं ज्ञानयोगद्वयम्।

यदाश्च कुसुमं पद्मासनमनुत्तमम्।

सर्व्वेषामपि देवानामीशार्थ व्यासनम्।

योगपीठञ्च कूर्म्मासनं आत्मपूजने।

आसनञ्च प्रयत्नेन पौष्टाय कुक्कुटासनम्।

कमले पीठिके चात्र कमले स्वस्ति च।

सर्व्वेकारिकायोगे मन्त्रं नवविधं मतम्।

हरिश्चापि विशेषं यज्ञेषोऽपि मेरव।

चक्र मूर्त्ती दण्डं एकक मत्स्यम्।

पृष्ठे वचिमण्डपेषु कर्म्मदाने च कीर्त्तिता।

सर्व्वेषां वशकायाय आसनं प्रोच्यते।

आसनं मध्यमिका तु पार्श्वं वीरासनमेव वा।

विचामणं अग्निमणं यथा स्वामनं मतम्।

आसनं विशामस्तु हंसे कूर्म्मे वसुधृकैस्।

वर्णेन तानवादाय आसनं मनु मेरव।

यस्माद्दीक्षा समस्तं कर्म्मसिद्धिप्रदायकम्।

मैत्रं चार्हेयं चार्ध्यं मैत्रक चतुष्कम्।

आसनं यात्रकाय यत्रं परिकीर्त्तितम्।

पूर्व्वोक्तं मम देवेश आसनं परिकीर्त्तितम्।

स्वस्तिकासनं यन्त्रं पूजाकर्म्मणि चाचरेत्।

न कर्म्मरहितो युक्तम् पूजाकर्म्मणि कारयेत्।

आसनादिमासनं कुर्य्यात् निजमेव यथा गुरु॥१०॥

चतुर्भिरङ्गुलैः दीर्घे चासनं मतम्।

मोक्षमार्गप्रतिष्ठितं सुखमेव चतुरङ्गुलम्।

मङ्गलं वा कुर्य्यात् नेमिकं नाम चासनम्।

पूर्व्वोक्तं सर्व्वदेवानामासनं पूजनेषु हि।

पार्श्वे स्थितकायो दीर्घे चार्द्धकाय विभूषणम्।

न चतुःसमवोक्तं पूजाकर्म्मणि कारयेत्।

वर्णेन चार्म्मणं कुर्य्यात् पूर्व्वोक्तं विनिश्चितम्।

मत्स्यपुच्छं कुर्य्यात् रोगिणामु भवन्ति।

आसनं चार्म्मणं देवि मयातवानपूजने।

महत्त्वमासनं मोक्षं कामसिद्धिप्रदायि च॥

निरन्तरं सर्व्वं विश्वमपि पुष्टासनम्।

स्वर्णेषु रजतासने चैव धर्म्मविमुक्तम्।

दारुणासनं मोक्षसम्पत्तिं सर्व्वकर्म्मणि।

पृथक् पृथक् कल्पयेच्च शोभनं तादृशासनम् ।
न पद्मासनं कुर्य्यात् कदाचिदपि पूजने ॥
न प्राण्यङ्गसमुद्भूतमस्थिजं द्विरदादृते ।
मातङ्गदन्तसञ्जातमासनं कामिके चरेत् ॥
चर्म्मपूर्व्वोदितं ग्राह्यं तथा गन्धमृगस्य च ॥"
सलिले यदि कुर्व्वीत देवतानां प्रपूजनम् ॥
तत्राप्यासनमासीनो नोत्थितस्तु समाचरेत् ।
तोये शिलामयं कुर्य्यादासनं कौशमेव वा ॥
दारवं तैजसं वापि नान्यदासनमाचरेत् ।
आसनारोपणस्थानं स्थानाभावे तु पूजकः ॥
आसनं कल्पयित्वा तु मनसा पूजयेज्जले ॥
यद्यासनस्य संस्थानं तोयमध्ये न विद्यते ॥
अन्यत्र वा तदा स्थित्वा देवपूजां समाचरेत् ।
इत्येतत् कथितं पुत्त्र पूज्यपूजकसङ्गतम् ॥
आसनं पाद्यमधुना शृणु वेतालभैरव" ॥
इति कालिकापुराणे ६७ अध्यायः ॥

आसनः, पुं, (अस क्षेपणे + ल्यु + प्रज्ञाद्यण् ।) जीवकवृक्षः । इति मेदिनी ॥ (जीवकवृक्षशब्देऽस्य विशेषो ज्ञेयः ।)

आसना, स्त्री, (आस्यतेऽस्याम् । आस + ण्यासश्रन्थो युच् ।) स्थितिः । इत्यमरः ॥

आसनी, स्त्री, (आस्यतेऽस्मिन् । आस + अधिकरणे ल्युट् + स्त्रियां ङीप् ।) विपणिः । (आस + भावे + ल्युट् + ङीप्) स्थितिः । इति मेदिनी ॥

आसन्द, पुं, (आसं ददातीति । आस + द ।) वासुदेवः । इति मेदिनी ॥

आसन्दी, स्त्री, (आस्यतेऽस्याम् । आस् । अन्दादयश्चेति साधुः ।) क्षुद्रखट्वा । इति मेदिनी । (यथा, शतपथब्राह्मणे ५।४।४।१। "तस्मादस्मा आसन्दीमाहरन्ति सैषा खादिरी वितृण्णा भवति येयं वध्रव्युता भरतानाम्" ।)

आसन्न, त्रि, (आङ् + सद् + क्तः ।) निकटम् । इत्यमरः ॥ (समीपवर्त्ती, कुमारसम्भवे, ३।४४। "आसीनमासन्नशरीरपातः" । अस्ताभिमुखः सूर्य्यः ।)

आसवः, पुं, (आङ् + सु + अप् ।) मद्यविशेषः । तत्पर्य्यायः । मैरेयः २ शीधुः ३ । इत्यमरः ॥
"शीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् ।
मैरेयं धातकीपुष्पगुडधानाम्लसंहितम्" ॥
इति माधवेन भेदः कृतस्तथापि सूक्ष्ममनादृत्येदमुक्तम् । इति भरतः ॥ मद्यमात्रम् । इति राजनिर्घण्टः ॥ (यथा मनुः ११।९५ ।
"यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम् ।
तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः" ।)
("यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः" ।
इति शार्ङ्गधरः । यथा भावप्रकाशे ।
"आसवस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः" ।)
आसवभेदेन गुणभेदो यथा ॥
"छेदी मध्वासवस्तीक्ष्णो मेहपीनसकासजित्" ।
"शार्करः सुरभिः स्वादुर्हृद्यो नातिमदो लघुः" ।
इति च वाग्भटः ।
"सुखप्रियः सुखमदः सुगन्धिर्बस्तिरोगनुत् ।
जरणीयः परिणतो हृद्यो वर्ण्यश्च शार्करः" ॥
"रोचनो दीपनो हृद्यः शोषशोफार्शसां हितः ।
स्नेहश्लेष्मविकारघ्नो वर्ण्यः पक्वरसो मतः" ॥
"जरणीयो विबन्धघ्नः स्वरवर्णविशोधनः ।
लेखनः शीतरसिको हितः श्लेष्मविकारिणाम्" ॥
"सृष्टो भिन्नशकृद्वातो गौडस्तर्पणदीपनः ।
छेदी मध्वासवस्तीक्ष्णो मैरेयो मधुरो गुरुः" ॥
इति चरकः ॥ तथा च सुश्रुते ॥
"तीक्ष्णः सुरासवो हृद्यो मूत्रलः कफवातनुत् ।
मुखप्रियः स्थिरमदो विज्ञेयोऽनिलनाशनः ।
लघुर्मध्वासवश्छेदी मेहकुष्ठविषापहः ॥
तिक्तः कषायः शोफघ्नस्तीक्ष्णः स्वादुरवातकृत् ।
तीक्ष्णः कषायो मदकृद्दुर्नामकफगुल्महृत् ॥
कृमिमेदोऽनिलहरो मैरेयो मधुरो गुरुः ।
बल्यः पित्तहरो वर्ण्यो मृद्वीकेक्षुरसासवः" ॥)

आसवद्रुः, पुं, (आसवस्य द्रुः ।) तालवृक्षः । इति राजनिर्घण्टः ॥

आसादित, त्रि, (आङ् + सद् + णिच् + क्त ।) प्राप्तः । लब्धः । इत्यमरः ॥ (सन्निधापितः, आयोजितः, सम्पादितः ।)

आसार, पुं, (आङ् + सृ + घञ् ।) धारासम्पातः । वेगवद्वृष्टिः । (मेघदूते, "त्वामासारप्रशमितवनोपप्लवं साधु मूर्द्ध्ना" । प्रसरणम् । सैन्यानां सर्व्वतो व्याप्तिः । इत्यमरः ॥ (यथा पञ्चतन्त्रे ।३।४९।
"तस्मात् दुर्गं दृढं कृत्वा सुभटासारसंयुतः" ।)
सुहृद्बलम् । इति मेदिनी ॥ (यथा पञ्चतन्त्रे ३।२९।
"अज्ञातवीर्य्यधासारतोयप्रस्थो व्रजेत्तु यः" ।)

आसीन, त्रि, (आस् + शानच् ।) उपविष्टः । इति जटाधरः ॥ वसा लोक इत्यादि भाषा ।

आसीनप्रचलायित, क्ली, (आसीनेन उपविष्टेन प्रचलवदाचरितम् ।) उपविश्य निद्रावशेन दोलनम् । इति राजवल्लभः ॥ ढोला इति भाषा ।

आसुति, पुं, (आसूयते + आङ् + सुञ् + क्तिन् ।) मद्यसन्धानम् । इति हेमचन्द्रः ॥ मद चोयान इति भाषा ।

आसुतीवल, पुं, (आसुतिरस्यास्ति रजःकृष्यासुतिपरिषदो वलच् । वलेति दीर्घः ।) यज्वा । शौण्डिकः । इति हेमचन्द्रः ॥ (कल्यापालः, शूद्रजातिविशेषः ।)

आसुरः, पुं, (असुर + प्रज्ञाद्यण् ।) असुरः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
"ब्राह्माद्यष्टधाविवाहान्तर्गतविवाहविशेषः ।
"आसुरो द्रविणादानात्" ॥ इति याज्ञवल्क्यः ।
"ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः ।
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म्म उच्यते" ॥
इति मनुः ३।३१।

आसुरं, क्ली, विड्लवणम् । इति राजनिर्घण्टः ॥ असुरस्य भावः । (यथा गीतायाम् ७।१५।
"न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः" ।)
असुरसम्बन्धीये त्रि । इति व्याकरणम् ॥

आसुर, त्रि, (असुरस्येदम् । असुर + अण् ।) असुरसम्बन्धि । यथा —
"यस्मिन् भवे पुराणे च विश्वे देवा न चेमिरे ।
आसुरं तद्भवेत् श्राद्धं हवषं मन्त्रवर्जितम्" ॥
इति श्राद्धतत्त्वे ऋग्वेदीयवृषपरिशिष्टम् ॥
अपि च ।
"स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने ।
आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्ज्जयेत्" ॥
इति श्राद्धतत्त्वधृतयमवचनम् ॥* आसुरसर्गो यथा ।
"द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥
प्रवृत्तिञ्च निवृत्तिञ्च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥
असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत् कामहैतुकम् ॥
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्म्माणः क्षयाय जगतोऽहिताः ॥
काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहात् गृहीत्वा सद्ग्राहान् प्रवर्त्तन्तेऽशुचिव्रताः ॥
चिन्तामपरिमेयाञ्च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥
आशापाशशतैर्ब्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥
इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥
असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ॥
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥
अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥
आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्व्वकम् ॥
अहङ्कारं बलं दर्पं कामं क्रोधञ्च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥
तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्" ॥
इति श्रीभगवद्गीतायां १६ अध्यायः ॥

आसुरी, स्त्री, (असुरस्य इयम् । असुर + तस्येदमित्यण् ततः ङीप् ।) राजिका । राइ सर्षा इति भाषा । इति राजनिर्घण्टः ॥ त्रिविधचिकित्सान्तर्गतचिकित्साविशेषः । सा च छेदभेदाद्यात्मिका । इति वैद्यकशब्दचन्द्रिका च ॥

आसेचन, त्रि, (न सिच्यते मनोऽत्र । नञ् + सिच् + अधिकरणे ल्युट् । ततः स्वार्थे अण् ।) यस्य दर्शने तृप्तेरन्तो न जायते सः । तत्पर्य्यायः । अदृष्टमिव २ । इति हारावली ॥ (आ + सिच् + करणे + ल्युट् । आसेचनपात्रम् । यथा, ऋग्वेदे १।१६२।१३ । "या पात्राणि यूष्ण आसेचनानि" ।)

आसेचनक, त्रि, (आसेचन एव संज्ञायां कन् ।) असेचनकः । आसेचनः । इत्यमरटीकायां रायमुकुटः ॥ (यथा, साहित्यदर्पणे १०म परिच्छेदे । "नयनयुगासेचनकं मानसवृत्त्यापि दुष्प्रापम्" ।)

आस्कन्दन त्रि (आङ्+स्कन्द+भावे ल्युट्।) तिरस्कार। रण। शोषण। इति मेदिनी। (यथा किराते ६।३१। "परवाक्यस्कन्दनमाभिजात्य वर्तेत्" ।)

आस्कन्दित क्ली (आङ्+स्कन्द+भावे+क्त।) अश्वगतिविशेष। स च धाराभवति। इत्यमरः।

आस्कन्दितक क्ली, (आस्कन्दितमेव स्वार्थे कन्।) आस्कन्दितं। अश्वानां गमनगति। तत्पर्यायः। धौरितं १ उपकण्ठं २। इति हेमचन्द्रः। ("पञ्चरिमुपकण्ठमास्कन्दितकमित्यपि। अतुरगोत्तुङ्ग गमन कोपादिनाशिनी गते"। हेमचन्द्रः।)

आस्तर, पुं, (आस्तीर्यतेऽसौ। आङ्+स्तृ+अप्।) परिच्छदः। इति हेमचन्द्रः। हस्त्यादिपृष्ठास्तरणं। (यथा शान्तिशतके ७।२६। "रागो यस्य मानसः शिष्यप्रायोजनस्य अयम्" ।)

आस्तरण क्ली (आस्तीर्यते अनेन येन वा आङ्+स्तृ+कर्मणि करणे वा ल्युट्।) हस्तिपृष्ठस्थित चित्रकम्बल। झुल इति भाषा। तत्पर्यायः। प्रवेणी १ वर्णः २ परिस्तोम ३ कुथा ४ कुथ ५। इत्यमरः। प्रवेणिः ० परिस्तोमः ० कुथः ६। इत्यमरटीका। (शय्या। कुथास्तरणं। यथा रामायणे, २ काण्डे। "राजधान्यां पूर्णमनोज्ञामिवावने"। महाभारते आदिपर्वणि। स्त्रीरत्नस्यास्तरणं निपत्य स्वपादुका" ।)

आस्तिक, पु, (अस्त्यस्य। अस्ति+ठन्।) मुनिविशेषः। स तु जरत्कारुमुनिपुत्रः। वसुकिभगिनी तं जरत्कारोर्यस्य माता अस्य स्तम्भकारणिका (यथा,— "आस्तीकस्य मुनो यस्मात् पिता मातामहोऽपि च। तत्र जाता इदं तस्य नाम आस्तीकमिति स्मृतम् ।) इति महाभारतम्।" ("आस्तीकस्य मुनेर्माता भगिनी वासुकेस्तथा।" इति मनसापूजाप्रमाणम्।)

आस्तिक, त्रि, (अस्ति ईश्वर इति मतिर्यस्य। अस्ति+ठन्।) आस्तिकमतिः। ईश्वरोऽस्तीति वादी। वेदप्रमाणवादी। तत्पर्यायः। श्रद्धालुः १। इति जटाधरः। ("अस्माच्छ्रेयस्करं धर्म्यमायुष्यं कीर्तिवर्धनम्। आस्तिकेभ्योऽनुपृच्छन्ते यच्च किं कृत्यादिकम्"। इति महाभारते आदिपर्वणि।)

आस्तिकार्त्तिक, पुं, (आस्तिकस्य मुनेः आर्त्तिकम् निवृत्तिकारणशास्त्रं पर्वादि वा। जनमेजयो राजा आस्तिकमुनिवचनात् सर्पसत्रात् विरराम इति कीर्त्तिस्तस्य अस्ति।) जनमेजयो राजा। इति शब्दरत्नावली।

आस्तीक पुं, आस्तिकमुनिः इति त्रिकाण्डशेषः।

आस्तीकजननी, स्त्री, (आस्तीकस्य जननी माता, षष्ठीतत्पुरुषः।) आस्तिकमाता। मनसा देवी। इति शब्दरत्नावली।

आस्था, स्त्री, (आङ्+स्था+अङ्+टाप्।) यत्नः। आलम्बनं। आस्थानं। अपेक्षा। इति मेदिनीकारहेमचन्द्रौ। (आस्था। आदरः। प्रतिष्ठा। यथा रघौ १।६१। "ऐश्वर्यं वर्णाश्रमसंस्थानं मर्यादाप्रमाणमुक्तम्। पितृपदे विरक्ताश्च यत्र आस्था मिथ मे"। इति त्रिकाण्डशेषः।)

आस्थान, क्ली, (आस्थीयतेऽस्मिन् इति। आङ्+स्था+ल्युट्।) सभा। इत्यमरः। (यथा किराते १।१६। "अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम्" ।) यत्नः। इत्यमरः। (आस्था। आसनम्।)

आस्थानी, स्त्री, (आस्थान+ङीप्।) सभा। इत्यमरः। ("आस्थान्यां समये वर्णे वचसा वाञ्छते यत्न मे"। इति हलायुधः।)

आस्पदं, क्ली, (आपद्यतेऽस्मिन् इति। आस्पदं प्रति आपत्तिमिति निपातनात् सुट्।) प्रतिष्ठा। कर्म। इत्यमरः। पदम्। इति धरणी। स्थानं। इति हेमचन्द्रः। ("राजन्नाभवदिन्द्रियैर्न हि मे अप्रीतिं च प्रस्खलः"। इति भरतमल्ले। यथा च रघौ ३।२८। "परैरमुष्याष्टकपालम् परास्पदं वीर्यवताम्यविकम्" ।)

आस्फालनं क्ली, (आङ्+स्फल+ल्युट्।) स्पन्दः। कम्पनम्।

आस्फाल, पुं, (आङ्+स्फुल्+घञ्।) हस्ति कर्णास्फालनं। तद्विद कान्तः चाड़ा इति भाषा। तत्स्फालन। अवस्फालन। इति शारदातनोऽपि आस्फालितौ। (आस्फालनं। पताकानं।)

आस्फालनं क्ली (आङ्+स्फुल्+णिच्+ल्युट्।) आटोप। प्रसारणम्। (यथा रघौ ९।७२। "वेलायामास्फालितकर्णा वाहूपधानमहारैः ।)

आस्फोजित् पुं (आस्फा+जि+क्विप्।) गन्धमार्जारः। इति त्रिकाण्डशेषः।

आस्फोट, पुं, (आङ्+स्फुट्+अच्।) आस्फोत वृक्षः। इति शब्दरत्नावली। आकन्द इति भाषा। भूपदीर्णपारिजातः। इति भावप्रकाशः। ("अर्के वज्रो विषभारावास्फोटं सम यमन"। इति महाभारते अनुशासनपर्वणि।)

आस्फोटक, पुं, (आङ्+स्फुट्+ण्वुल्।) अक्षमर्दनकः। इति शब्दमाला। आकटोट इति भाषा।

आस्फोटनं क्ली, (आङ्+स्फुट्+ल्युट्) विकासः। कम्पनं। इति धरणी। बाहुविस्फालनं। ताल ठोका इत्यादि भाषा। (यथा रामायणे ६ काण्डे "आस्फोटनविनादांश्च वानराणां सम जीवताम्। धन्वानिनादांश्चैवाऽपरम्)

आस्फोटनी, स्त्री, (आस्फोट्यतेऽनया। आङ्+स्फुट्+करणे ल्युट्+ङीप्।) वेधनिका। इत्यमरः। तुरपुण भ्रमर इत्यादि भाषा।

आस्फोटा स्त्री (आस्फोटयतीति। आङ्+स्फुट्+अच्+टाप्।) नवमल्ली। वनमल्ली। इति शब्दरत्नावली। (नवमल्लिकायां मल्लिका विशेषो ज्ञेयः।)

आस्फोत, पुं (आस्फोटयतीति। आङ्+स्फुट्+अच्+पृषोदरादित्वात् साधुः।) अर्कवृक्ष। कोविदारवृक्षः। इति मेदिनी। यूथिकावृक्षः। इति शब्दचन्द्रिका। (यथा, माघे। ("मुखं शशाङ्कात् स्तनवृत्तिरीप्सितमारा- त्तस्याः प्रभावादिव तस्या भ्रमोहिताम्। वीर्ये कार्ये कार्य मानावार्ये नैव मनुष्य मूर्ध्ने दे हरिते"।))

आस्फोतक, पुं, (आस्फोत एव स्वार्थे कन्।) अर्कवृक्षः। इति राजनिर्घण्टः।

आस्फोता स्त्री (आस्फोत+टाप्।) वनमल्लिका। नवमल्लिका। इति मेदिनी। अपराजिता। इति राजनिर्घण्टः। सारिविशेषः। शालपर्णीति भाषा। यथा हृते। कृष्णविषरोधनमहितम्। इति राजवल्लभ।

आस्य, क्ली (अस्यते ग्रासोऽस्मिन् इति अस् क्षेपे अस्मिन् इति यत्। यद्वा आस्यन्ते वर्णा अनेन प्रकारेण इति अस् प्रक्षेपे+ण्यत्।) मुखं। मुखमध्यम्। (यथा मनुः १।८१।) ("स्वायम्भुवस्य हव्यानि पितरोऽन्नानि ।) (आस्ये भवमास्यं।) मुखभवे त्रि। इति मेदिनी।

आस्यपत्र, क्ली, (आस्यमिव पत्राणि यस्य तत्।) पद्मं। इति शब्दचन्द्रिका।

आस्यपाटल, पुं, (आस्यं पाटलं रक्तिमाविशिष्टं यस्य सः।) सूर्यः। इति हेमचन्द्रः।

आस्यलोम [न्] क्ली, (आस्यस्य लोम।) श्मश्रु। इति हेमचन्द्रः।

आस्या स्त्री, (आस्+क्यप्।) स्थितिः। उपवेशनं मेदिनी च। (आसनं इति हैमचन्द्रोक्तवाक्ये विनिश्चयपदे। यथा — "आस्यासन शयनं भ्रमीनि हन्येऽन्नं भुक्ता यथा, "आस्या तस्य वनसमागमो विकुम्भाकरो हयः" ।)

आस्यासव, पुं, (आस्यस्य मुखस्य आसव इव।) लाला। इति हेमचन्द्रः। थुथु लाल इत्यादि भाषा।

आस्राव, पुं, (आस्रवं स्रवतीति। आङ्+स्रु+ण।) मूत्रातिसार। इति हेमचन्द्रः। (रोगभेदः।)

आस्राव, पुं, (आङ्+स्रु+घञ्।) क्लेशः। व्रणः। इत्यमरः।

आह अ, (उपाय इत्यर्थे आनयति विकल्पार्थे।) क्षेप। नियोग। इति मेदिनी। प्रकृत्यर्थे। इति शब्दरत्नावली।

आहचम्बर, पुं, (आहवो नानाधौम इव स्वरः।) नानारोगविशेष। नानाम्बर इति भाषा। तस्य लक्षणम्। "प्रपुण्य गन्धौषधेन युक्तो नानाप्रकारादि। नाभ्यधोत्तरतः वसन्ता प्राणका कृतः। इति वैद्यकम्। (आहव इति अविचिन्त्ये पाठः। अतएव, आहवाम्बरस्य लक्षणम्। "शोणितपाती नानार्था बलानां वदन्त्वा। नानापदानुरूपेण आहवाम्बर विनिर्दिशेत्"।)

अस्य चिकित्सा यथा, वैद्यकचिकित्सासारे ॥
"दूर्व्वापथ्या फला माषकुलत्थौ वशपत्रिका ।
जलस्थलभवौ कर्णमोरटाखरमञ्जरी ॥
दण्डोत्पलस्य मूलानि क्वाथ्यादष्टगुणेऽम्भसि ।
तत्पादशेषिते तैल तुला कृत्वा विपाचयेत् ।
तत्तैल प्रतिमर्षेण आहवाख्य ज्वर जयेत्" ॥
॥०॥ दूर्व्वाद्य तैल ॥०॥)

आहत, क्ली, (आ + हन् + क्त ।) पुरातनवस्त्र । नूतनवस्त्र । इति मेदिनी ॥ मृषार्थकवाक्य । इत्यमर ॥

आहत, त्रि, (आ + हन् + क्त ।) गुणित । ताडित । इति मेदिनी ॥ ("प्रति दिवस याति लय वसन्तवाताहतेव शिशिरश्री"। इति पञ्चतन्त्रम् । ज्ञात । मिथ्योक्त । इत्यजय ॥ निहत । "हूना विशतिराहताक्षौहिणीनाम्")। इति महाभारतम् ।)

आहत पु, (आहन्यते य + आङ् + हन् + कर्म्मणि + क्त ।) आनक । ढक्का । इति मेदिनी ॥

आहतलक्षण, त्रि, (आहत अभ्यस्त लक्षण यस्य ।) गुणै प्रतीत । गुणेन ख्यात । तत्पर्याय । छतलक्षण २ । इत्यमर ॥

आहर, पु, (आङ् + हृ + अच् ।) उच्छ्वास । अन्तर्मुखश्वास ॥ इति हेमचन्द्र ॥ (आहरणशीले वाच्यलिङ्ग एव । यथा, रघौ १।४९ ।
"वनान्तरादुपावृत्तै समित्कुशफलाहरै" ।)

आहरण, क्ली, (आङ् + हृ + भावे ल्युट् ।) द्रव्यादानयन । आसादनम् । यथा । देवीपुराणे ।
"नदाहरणवधहृप्रतिष्ठाज्ञानमेव च ।
शयन पूजनञ्चैव विसर्जनमत पर" ॥
इति तिथ्यादितत्त्वम् ॥

आहव, पु, (आह्वयते अरिर्यस्मिन् । आङ + ह्वे + अप् ।) युद्ध ।
("यदाश्रौष भीष्ममत्यन्तशूरम्
हत पार्थेनाहवेष्वप्रधृष्यम्" ॥
इति महाभारते आदिपर्व्वणि १।१८२ ।
आह्वयते आर्य्यादिक यत्र । आङ् + ह्वे + अप ।) यज्ञ । इति शब्दरत्नावली ॥

आहवनीय, पु, (आहूयते आन्यादिरस्मिन् । आङ् + हु + अनीयर् ।) यज्ञाग्निविशेष । इत्यमर । गार्हपत्यादुद्धृत्य होमार्थ य संस्क्रियते स । इति भरत ॥ (यथा, मनौ २।२३१ ।
"गुरुराहवनीयस्तु साग्नित्रेता गरीयसी" ।)

आहार, पु, (आङ् + हृ + घञ् ।) द्रव्यगलाध करण । तत्पर्याय । जग्धि २ भोजन ३ जेमन ४ लेप ५ निघस ६ न्याद ७ । इत्यमर ॥ जमन ८ विघस ९ इति तट्टीका ॥ प्रत्यवसान १० भक्षण ११ अशन १२ ॥ इति रत्नमाला ॥ अभ्यवहार १३ खदन १४ निगर १५ । इति राजनिर्घण्ट ॥ अस्य गुणा । सद्यस्तृप्तिजनकत्व । बलकारित्व । देहधारकत्वञ्च । इति राजवल्लभ ॥
("तमुवाच भगवानात्रेय । हिताहारोपयोग एक एव पुरुषस्याभिवृद्धिकरो भवति । अहिताहारोपयोग पुनर्व्याधिनिमित्तमिति" ।
"तमुवाच भगवानात्रेय । यदाहारजातमग्निवेश । समांश्चैव शरीरधातून् प्रकृतौ स्थापयति, विषमांश्च समीकरोतीत्येतद्धित विद्धि तद्धित विपरीत इत्येतद्धिताहितलक्षणमनपवादम्भवति एव वादिनञ्च भगवन्तमात्रेयमग्निवेश उवाच । भगवन्न त्वेतदेवमुपदिष्ट भूयिष्ठकल्पा सर्व्वभिषजो विज्ञास्यन्ति । तमुवाच भगवानात्रेय । येषा विदितमाहारतत्त्वमग्निवेश । गुणतो द्रव्यत कर्म्मत सर्व्वावयवतो मात्रादयो भावास्तत्र तदेवमुपदिष्ट विज्ञातुमुत्सहेरन् यथा तु खल्वेतदुपदिष्ट भूयिष्ठकल्पा सर्व्वभिषजो विज्ञास्यन्ति तथैतदुपदेक्ष्याम । मात्रादीन् भावानुदाहरन्त स्तेषा हि बहुविधविकल्पा भवन्ति । आहारविधिविशेषास्तु खलु लक्षणतश्चावयवतश्चानुव्याख्यास्याम । तद्यथा, आहारत्वमाहारस्यैकविधमर्थाभेदात् । स पुनर्द्वियोनि स्थावरजङ्गमात्मकत्वात् । द्विविध प्रभावो हिताहितोदर्कविशेषात् । चतुर्विधोपयोग पानाशनभक्ष्यलेह्योपयोगात् । षडास्वादो रसभेदत षड्विधत्वात्" । इति चरक ॥
"यदाहारगुणै पान विपरीत तदिष्यते ।
अन्नानुपान धातूनां दृष्ट यन्न विरोधि च" ॥
इति च चरक ॥
"प्राणिना पुनर्मूलमाहारो बलवर्णौजसाञ्च षट्सु रसेष्वायत्तो रसा पुनर्द्रव्याश्रया" ॥
"स च तन्नौदकैर्गुणैराहार प्रक्लिन्नो भिन्नसङ्घात सुखपरश्च भवति" ।
"आहार प्रीणन सद्यो बलकृद्देहधारक ।
आयुस्तेज समुत्साहस्मृत्योजोऽग्निविवर्द्धन" ॥
इति सुश्रुत ॥) स त्रिविध । सात्त्विक १ राजसिक २ तामसिक ३ । सात्त्विकाहारो यथा,— ८ श्लोक ।
"आयु सत्त्व बलारोग्य सुख प्रीति-विवर्द्धना ।
रस्या स्निग्धा स्थिरा हृद्या आहारा सात्त्विकप्रिया" । राजसिकारो यथा, ९ श्लोक ।
"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिन ।
आहारा राजसस्येष्टा दु खशोकामयप्रदा" ॥
तामसिकाहारो यथा, १० श्लोक ।
"यातयाम गतरस पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्य भोजन तामसप्रियम्" ॥
इति श्रीभगवद्गीता १७ अध्याय ॥ आहरण । इति मेदिनी ॥
("स पुनर्देवयान्योक्त पुण्याहारो यदृच्छया" ।
इति महाभारतम् । आदिपर्व्वणि ७६ । सम्भवपर्व्वणि ७६।२५ ।)

आहारसम्भव, पुं, (आहारात् सम्भवो यस्य ।) शरीरस्थरसधातु । इति हेमचन्द्र ॥

आहार्य्य, त्रि, (आङ् + हृ + ण्यत् ।) आगन्तुक । इति त्रिकाण्डशेष ॥
("आहार्य्यैर्नीयमान हि न च दु खेन हृष्यताम्" इति कामन्दक ।) आहरणीय ॥ (यथा, मनु ८।२०२ । "अथ मूलमनाहार्य्य प्रकाशक्रयशोधित" ।) (शस्त्रकर्म्मभेद । यथा सुश्रुते "तच्च शस्त्रकर्म्माष्टविध, तद्यथा,—छेद्य भेद्य, लेख्य वेध्य एष्यम्, आहार्य्य, विस्राव्य, सीव्यमिति" ।
"आहार्य्याशर्करास्त्रिखो दण्डकर्णमलाश्मरी" ।)

आहार्य्य पु, नाट्योक्तौ व्यञ्जकविशेष । स तु भूषादिना रचित । इति हेमचन्द्र ॥ (यथा साहित्यदर्पणे । षष्ठाङ्के ।
"भवेदभिनयोऽवस्थानुकार स चतुर्व्विध ।
आङ्गिको वाचिकश्चैवमाहार्य्य सात्त्विकस्तथा" ॥)

आहार्य्यशोभा, स्त्री, (आहार्य्यात् या शोभा ।) कृत्रिमशोभा । चित्रभूषादिना कृतद्युति । इति जटाधर ॥ (यथा, भट्टिकाव्ये २य सर्गे,—
"आहार्य्यशोभारहितैरमायै
रैक्षिष्ट पुम्भि प्रचितान् स गोष्ठान्" ।)

आहाव, पु, (आङ् + ह्वे + अप् ॥ निपातनात् वृद्धि ।) कूपसमीपे पश्वादिजलपानार्थकृतस्वल्पजलाशय । इत्यमर ॥ चौवाचा इति भाषा । (आह्वयतेऽरिरत्र इति व्युत्पत्त्या ।) युद्ध । आह्वान । इति धरणि ॥ (आहूयतेऽत्र इति आ + हु + अधिकरणे घञ् ।) अग्नि ।)

आहिक, पु, (अहिरिव आकृतिर्यस्य । अहि + ठक् ।) पाणिनिमुनि । इति त्रिकाण्डशेष ॥ केतुग्रह । इति हेमचन्द्र ॥

आहित, त्रि, (आङ् + धा + क्त ।) न्यस्त । अर्पित । स्थापित । इति हलायुध ॥
(यथा, किराते ।
"आवर्त्तने रश्मिपतेरयमाहिताग्नि" ।)

आहितलक्षण, त्रि, (आहित लक्षण यस्य ।) आहतलक्षण । इत्यमरटीकाया रमानाथ । गुणादिद्वारा ख्यात ।

आहिताग्नि, पु, (आहित स्थापितोऽग्निर्येन ।) साग्निक । अग्निहोत्री इति स्मृति ॥
("न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मन" ।
इति मनु ३।२८२ । तथा च रघौ २ ४४ ॥
"गुरोरपीद धनमाहिताग्ने" ।)

आहितुण्डिक, पु, (अहितुण्डेन दीव्यति । अहितुण्ड + ठक् ।) व्यालग्राही । सापुडिया इति भाषा । इत्यमर शब्दरत्नावली च ॥ (यथा पञ्चतन्त्रम् ।
"वैद्यसांवत्सराचार्य्या स्वपक्षेऽधिकतास्वरा ।
यथाहितुण्डिकोन्मत्ता सर्व्व जानन्ति शत्रुम्" ।)

आहुत, क्ली, (आङ् + हु + क्त ।) गृहस्थाना पञ्चमहायज्ञान्तर्गतयज्ञविशेष । स तु नृयज्ञ । इति जटाधर ॥

आहुति, स्त्री, (आ + हु + क्तिन् ।) देवोद्देशे मन्त्रोच्चारणपूर्व्वकोऽग्नौ हविर्निक्षेप । तत्पर्याय । देवयज्ञ २ होम ३ होत्र ४ वषट्कार ५ । इति हेमचन्द्र ॥ (यथा, रघौ १।५३ ।
"पुनान पवनोद्धूतैर्धूमैराहुतिगन्धिभि" ।
धर्म्मात् मरुद्वत्या जात स्वनामख्यातो मरुद्भेद । यथा हरिवंशे,—
"मरुद्वती मरुत्वन्तो देवानजनयत् सुतान् ।
नक्षत्रमाहुति चैव चारित्र नक्षपन्नगम्" ।)

आहुल्य, क्ली, (आङ् + हुल + क्यप् ।) क्षुपविशेष तरवट इति काश्मीरादौ ख्यात । तत्पर्याय ।

प्रथमाद्य २ प्रहरं। तत्रार्द्धं। द्वितीयार्द्धं ३। तृतीयं ४ पीठपूजनं ५ आवाहनपूजनं ६ भगमा पूजनं ८ प्रदक्षिणं १०। तस्य पूजाफलं। दिवार्द्धं। द्वितीयकृत्य। चतुर्थीयकम्। दिनरात्रपुराणोक्त पुरुषसूक्तमनुस्मृत्यपनादिकमिदं। इति दक्ष निर्णयः।

आहूतं, क्ली, (आ+ह्वे+क्त।) मनुष्ययज्ञः। यथा,—
"अहुतानि महोत्रानि दन्तानामविद्यानि च।
न भवेत् नार्सिषि नापि वारस्त्राग्निसन्निधौ"।
"आहुतानि प्रभुतानि प्रमादकर्मतापीडि वा
यत्"। इति विष्णुधर्मोत्तरम्।

आहूत, त्रि (आङ्+ह्वे+क्त।) कृताह्वानः। यथा —
"प्रयाणक ततोऽपि तीर्थयात्रा पितृकृता।
आहूत इव मे शीघ्र दर्शनं याति केशव"।
इति श्रीभागवते १ स्कन्धे ६। ३१।

आहूति, स्त्री, (आङ्+ह्वे+क्तिन्।) आह्वानम्। इति शब्दरत्नावली।

आहृत त्रि, (आहो मम। आहृ+ल्यप्।) आहि- तमिव। आनीतमादि। इत्यमरः।

आहो, अ, (आ ईषत् जहातीति। आङ्+हा+डो।) विकल्पः। इत्यमरः। प्रश्नः। (यथा शाकुन्तले प्रथमाङ्के।
"तदाकारो मुनिपत्नीन पतंगोऽयमपीडित"।)
विचारः। इति मेदिनीहेमचन्द्रौ।
("आहो निवत्स्यति समं हरिणाङ्गनाभिः"।
इति शाकुन्तले प्रथमाङ्के।)

आहोपुरुषिका, स्त्री, (अहो अहमेव पुरुषः। मयूर- व्यंसकादित्वात् समासः। अहोपुरुषस्य भावः। अहोपुरुष+यम+कोपधात् वुञ्।) दर्पात् आत्मनि शक्त्यारोपः वा। इत्यमरः। अविद्यमान- वचनेन शक्तिप्रतिपादनमित्यर्थः। आत्मविकत्थ- नार्थमित्यर्थमात्मश्लाघार्थम्। इति भरतः। (यथा, भट्टौ ५।३६।
"आहोपुरुषिकां पश्य मम सद्रत्नकान्तिभिः"।)

आहोस्वित् अ, (आहो च स्वित्।) आहो। वि कल्पः। इत्यमरटीका।

आह्न, पुं, (अह्नां समूहः।) दिनसमूहः। इति व्याकरणम्।

आह्निकं, त्रि (अह्ना निर्वृत्तं। अहन्+ठञ्।) दिननिष्पन्नः। दिनसाध्यं। इति मेदिनी। त्रि- काण्डशेषश्च।

आह्निकं क्ली, (अह्ना निर्वृत्तम्। अहन्+ठञ्।) भोजनम्। नित्यकर्म। प्रत्यहकृत्यम्। नित्यक्रिया। इति मेदिनीहेमचन्द्रौ।

अथ स्मृत्युक्त दुर्गोत्सवार्द्धप्रहरानुसारेणोक्त कर्माणि क्रमेण लिख्यन्ते।

अथ प्रथमयामार्द्धकृत्यम्।

"ब्राह्मे मुहूर्ते चोत्थाय सर्वचिन्ताविवर्जितः।
स्मृत्वा सुरगणान् कृत्वा आचम्य प्रतीक्ष्य प्रभात
देववन्दनादिकर्माणि विधायेत्।
तत आवश्यकं पवित्रकं कृत्वा दक्षिणी

मलमूत्र दक्षिणस्याम् भूमौ विधाय वर्जयेत् अभावे तस्य तत्र गुह्यस्थानादिकं शुद्धिपूर्वक स्नात्वा देवगुरून् प्रणम्य विधायेत्।
तदा देवेभ्यो दक्षिणस्यां वा दिशि मूत्रपुरीषयोः अन्ते आचम्य शिष्टाचारेण कृत्वा विधाय हरिं स्मृत्वा दिवा दक्ष रात्रौ चान्ते वारि वा तत्पश्चात् वारिं पिबेत्।
ततो दन्तधावनं। दन्तकाष्ठाभावे विधिप्रतिषेधे च द्वादशगण्डूषैः पर्वसु मुखं शोधयित्वा विधायेत्।
ततः प्रातः स्नानं विधाय सन्ध्यावन्दनं कृत्वा सूर्योपस्थानं गायत्रीं जपेत्। सायाह्ने पश्चिमस्यां गायत्र्यादि मन्त्र जपं कृत्वा सन्ध्योपासनं कुर्यात्।
तत आचार्यादिदर्शनं दधिदूर्वादिमङ्गलद्रव्य- दर्शनं कुर्यात् इति।

अथ द्वितीययामार्द्धकृत्यम्।
वेदविद्याभ्यासः। समित्पुष्पाद्याहरणं।

अथ तृतीययामार्द्धकृत्यम्।
कुटुम्बार्थमुद्योगः। कुटुम्बभरणार्थमीश्वरी- पासनादि च।

अथ चतुर्थयामार्द्धकृत्यम्।
मध्याह्नस्नानं। तत्र नद्यादौ देवे पितृ तथा तत्र तत्र तीर्थे वा अविच्छिन्नां तीरे स्थित्वा नाभि- मात्रोदके कुशहस्ता पवित्रपाणिः स्नात्वा पित्रा- र्थ तर्पणं यथाविधि विधिवज्जपेत्।
तत आवश्यकपवित्रविधिरेव मध्याह्नसन्ध्यां विधाय सर्वेषां कुर्यात्।
ततः पञ्चमुहूर्ते मध्याह्नसन्ध्या समाप्य ब्रह्मयज्ञं विधाय देवपूजनं कृत्वा वाचोदेवं वैश्वदेवं बलि- कर्म समाचरेत्।

अथ पञ्चमयामार्द्धकृत्यम्।
अतिथिभिरेकाकिनो भोजनविधिर्न्यायतः सामर्थ्याभावे मातापितृपूजा च। कि बहुना सार्द्धकालमध्यमध्ये अतिथ्यादिकमचितो भवेत्।
अतिथ्यादिकमात्रमतिथिविभागार्थं मुखं प्रक्षाल्य भोजनं कार्यं वा भस्मोपलेपनं कृत्वा। ततो गृहेऽपि भिक्षा- दिकं दत्त्वा भुञ्जीत्। तदादौ मनसा यज्ञेश्वरं नि- मन्त्र्य अप्रमत्त मनसा पञ्च प्राणाहुतिं दत्त्वा। भोजनपात्रस्यादौ किंचिदन्नं दत्त्वा। अतिथिभ्यो भोजनान्ते पात्रस्थे अन्ने तत्र शेषं निःक्षिपेत्।
ततो निवृत्ताश्च। सायंप्रातः सायंप्रातर्वा भूमौ निश्चल पठेत्। भिक्षाभावादप्यामयं भक्ष्यं भाषां निर्दिश्य विधिवत्। ततो भोजनानन्तरं गो- मयलेपनं कुर्यात्। ततो यथाविधि भोजनं। दिङ्मुखोपवेशनादिकं पुरुषसूक्तं जपेत् तदानीं सर्वमेतत्। ततः स्नानादिकं न कुर्यात् अयुग्मसंख्ये मुखाम्बुधौतं कृत्वा भक्षयित्वा दन्तशोधनादिकम् अन्यनियमपालनेन तत्राभिनवेन्द्रिया शयनं समाचरेत्।
ग्रामे च ग्रामे दर्शनेन सूर्योदये संध्यां विधाय विरा- मं मुखं गुरुदर्शनाय पूर्वाह्ने दक्षिणपार्श्व-

मुखे पश्चिमदक्षिण मनोऽन्यत्र न दद्यात्।
ततो मध्याह्नात्पराह्ने पश्चिमे दिक्षु त्रिभागविभक्तमेव दो- षभावस्तस्यैव पश्चिमे चेत् वाचि मास्य भोजनो- त्तरान्ते विनेत्।
ततः सायं प्रातश्च विधिना हरिहरादीनां स्नात्वा परिधीयमानं भोजनं कर्माप्यसन्ध्यासन पूर्व विधि भक्त्या सायंसन्ध्यासमापनान्तरं ब्राह्मणेन विविध कार्यं कृत्वा नमस्कृत्य मुखप्रक्षालनं भोजनम् इति।

अथ षष्ठसप्तमयामार्द्धकृत्यम्।
इतिहासपुराणादिश्रवणम्।

अथाष्टमयामार्द्धकृत्यम्।
लौकिकविद्याकरणम्। सायंसन्ध्योपासनम्।
हरिहरस्मरणकीर्तनादिकञ्च कुर्यात्।

अथ रात्रिकृत्यम्।
सन्ध्याभ्यन्तरमग्निहोत्रादिकमनभिवादनादिकम् पाठपञ्चमहायज्ञादि कुर्यात्।
ततो प्रदोषे यामे पूर्वाह्णप्रतिबन्धेनैव हरिहरपूजां कृत्वा अतिथिविभागेऽर्चनं नक्तं रात्रौ भोजनं नरकीटे वर्ज्यं श्राद्धमवरोधान्तरेऽपि तत्र न इष्टम्। आचमनोत्तराणि आचमनादिकं भोजनम्। प्रथमयामाभ्यन्तरे विद्याभ्यासं कुर्यात्। तत शयनं। गृहविदेशे खट्वोपरि शय्यां कृत्वा शिरो देशे पूर्णकुम्भं निधाय रक्षितस्थले परिधाय प्रक्षा- लितपादाभिवादी विद्याभ्यासं पूर्वशिरा दक्षिण- शिरा वा पञ्चाशन् स्मृत्वा भगवन्नामान्तरे स्वपेत्।

अथ दारोपगमनम्।
ऋतौ विधिवद्दारान् स्त्रीसम्भोगं कृत्वा यो दक्षिणपार्श्वेन शाययेत्।
तत्र पश्चिमेन मूत्रपुरीषोत्सर्गम् स्नानार्थं च विहितो रात्रौ च स्नानात् विरताम् अमावास्याम्।
ऋतुकालमध्ये तु विशेषात्मनश्चाप्यमनः प्राप्तायां कुर्यात्। निषिद्धा अमावास्यादयो वेदादिषु पर्वमध्यमानन्तरमालस्यतायां न चापि। अन्यत्रा- पूर्वे मूत्रपुरीषोत्सर्गं न कुर्वीत। सन्ध्योपासनं यथा रात्रौ न स्नायात् न भोजनम्। अन्यथा यदि सम्भवेऽपि आत्मशुद्धिमुपेयात्।
स्वकार्यविशेष मासर्तुमिदिवसानुरूपमर्थं कु- र्वीत।
ऋतुसमये प्रजोत्पत्तिधर्मेण समासादनम्। इत्या- ह्निकाचारतत्त्वोक्तकर्म समाप्तं। *।

आह्लाद, पुं, (आङ्+ह्लद+घञ्।) आनन्दः। हर्षः। यथा। श्रीभागवते १।९।१।
"सच्चिदानन्द तत्त्वे भक्ताह्लादो मनोमयः।
आह्लाद विधान् स्तवान् यान् परिपृच्छताम्"।

आह्लादित त्रि आनन्दितः। हृष्टः। आनन्दः। इत्यादि भावे इत्यनेन आह्लादितमप्यस्य। इत्यम- रेण निरुक्तः।

आह्वय पुं, (आङ्+ह्वे+अच्। यद्वा आह्वेयते आह्वय इति। आङ्+ह्वा+क्यच् वा।) नाम। इत्यमरः। (यथा, रामायणे, सप्तकाण्डे०।०।

"कृत्वा तु तन्महाप्राज्ञ काव्यं रामायणाश्रयम्" ।)
अष्टादशसु व्यवहारपदान्तर्गतो व्यवहारविशेषः ।
यथाह मनुः अष्टमे । ८।४।६।७। "तेषामाद्यमृणा-
दानं" इत्युपक्रम्य । "स्त्रीपुंधर्म्मो विभागश्च द्यूत-
माह्वय एव च" ।)
आह्वा, स्त्री, (आह्वानमिति । आङ् + ह्वे + अङ् ।)
नाम । संज्ञा । इत्यमरः ॥
आह्वान, क्ली, (आङ् + ह्वे + भावे ल्युट् ।) आवा-
हनं । डाका इति भाषा । तत्पर्य्यायः । हूति २
आकारणा ३ । इत्यमरः ॥ (यथा मनुः ८।१२६ ।
"जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम्" ।)
(आह्वयतेऽनेन । करणे ल्युट् ।) नाम । इति शब्द-
रत्नावली ॥

इ

इ, इकारः । तृतीयस्वरवर्णः । अस्योच्चारणस्थानं
तालु । स च ह्रस्वो दीर्घः प्लुतश्च भवति ।
(अयञ्च उदात्तानुदात्तस्वरितभेदात् त्रिविधः ।
अनुनासिकाननुनासिकभेदाच्च प्रत्येकं द्विविधः
एतेन षड्विध एव ।)
"इकारं परमानन्दसुगन्धकुसुमच्छविम् ।
हरिब्रह्ममयं वर्णं सदा रुद्रयुतं प्रिये ॥
सदा शक्तिमयं देवि गुरुब्रह्ममयं तथा ।
सदाशिवमयं वर्णं परं ब्रह्मसमन्वितम् ॥
हरिब्रह्मात्मकं वर्णं गुणत्रयसमन्वितम् ।
इकारं परमेशानि स्वयं कुण्डली मूर्त्तिमान्" ॥
इति कामधेनुतन्त्रम् ॥ (वङ्गीयभाषायां ।)
तस्य लेखनप्रकारो यथा,
"ऊर्द्ध्वाधः कुञ्चिता मध्ये रेखा तत्कुञ्चिता भवेत् ।
लक्ष्मीर्वाणी तयेन्द्राणी क्रमात्तास्वेव संवसेत् ॥
शीर्षाध कुञ्चिता रेखा दक्षोर्द्ध्वा कामरूपिणी ।
मात्राशक्तिः कोणयुता ध्यानमस्य प्रचक्ष्यते" ॥
इति वर्णोद्धारतन्त्रम् ॥ * ॥ (यद्यपि सिद्धान्त-
कौमुद्यां "इचुयशानां तालु" इति सामान्यत
उक्तं तथापि ‹ ख्येन्दुशेखरादिष्वस्य विस्तरतो
विवृतिरुक्ता । यथा,—"तुल्यास्य प्रयत्नमिति
सूत्रेण शब्देन विवक्षयत्नबोधेऽपि लोके
यत्नप्रयत्नयोः पर्य्यायतेति ध्वनयन्नाह प्रयत्नो
हि द्विधा इति क्वचित् यत्नो द्विधेत्येव पाठः ।
एतेषां आभ्यन्तरत्वं वर्णोत्पत्तेः प्रागभावित्वात् ।
तथाहि नाभिप्रदेशात् प्रयत्नप्रेरितः प्राणो
नाम वायुः ऊर्द्ध्वमाक्रमन् उरःप्रभृतीनि स्था-
नान्याहन्ति ततो वर्णस्य तदभिव्यञ्जकध्वनेर्वो-
त्पत्तिरुत्पत्ते । प्राक् जिह्वाग्रोपाग्रमध्यमूलानि
वर्णोत्पत्तिस्थानं ताल्वादि यदा सम्यक् स्पृशन्ति
तदा स्पृष्टतां ईषत्स्पर्शे ईषत्स्पृष्टता समी-
पावस्थाने संवृतता दूरावस्थाने विवृतता अतएव
इचुयशानां तालव्यत्वाविशेषेऽपि चवर्गे उच्चा-
रयितव्ये जिह्वाग्रादीनां तालुस्थानेन सम्यक् स्पर्शः
यकारे ईषत् स्पर्शः शकारेकारयोः समीपदू-
रावस्थानं । स्पृष्टं प्रयतनमिति यतेर्नपुंसके भावे
ल्युट् । प्रयत्नमित्यपपाठः नडन्तस्य पुंस्त्वात् ।

"एषां स्पृष्टा इत्युक्ता" इत्यादि । यथा,
शिक्षायां शब्देन्दुसारे । तथाहि "अचोऽस्पृष्टा
यणस्त्वीषत् नेमस्पृष्टाः शलः स्मृताः । "शेषाः
स्पृष्टा हलःप्रोक्ताः" इत्यादि । अत्र अच
अस्पृष्टा स्पर्शाभावरूपविवृतत्ववन्तः यणस्त्वीषत्
अस्पृष्टा इत्यनुमन्यते तेन ईषदस्पृष्टा ईषद्विवृता
इत्यर्थः । नेम इत्यर्द्धे तेन शल ईषत् विवृता
यणामपेक्ष्याधिकविवृतत्ववन्त इत्यर्थः । अपि च—
"अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । हो-
तारं रत्नधातमम्" । ईळे इत्येतत् समस्तमपि
पदमनुदात्तम् "तिङ्ङतिङः" इति सूत्रेण अति-
ङन्तादग्निशब्दात् परस्य ईळे इति तिङन्तस्य
निघातविधानात् अग्निमीळे इति पदयोः सं-
हिताकाले तु धातुगतस्य ईकारस्य स्वरितत्वम्
"उदात्तादनुदात्तस्य स्वरितः" इति सूत्रेण उदात्तात्
परस्यानुदात्तस्य स्थाने स्वरितः स्यात् इत्यर्थकेनानु-
दात्तस्य ईकारस्य स्थाने स्वरितादेशात् ततःपरस्य
ले इत्यत्र एकारस्य तिङ्प्रत्ययरूपस्य स्वरितात्
संहितायाम् पूर्व्वस्यैकारस्य नितरां उदात्तत्वम् ।
अपरञ्च ताल्वादिस्थानमाभ्यन्तरप्रयत्नइति सुध-
ते । अत्र मूलम् पाणिनीयशिक्षाग्रन्थे । यथा,—
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू" ।
"स्वराणामुष्मणाञ्चैव विवृतं करणं मतम्" ।)
तस्य नामानि यथा,—
"इः सूक्ष्मा शाल्मली विद्या चन्द्रः पूषा सगुह्यकः ।
सुमित्रः सुन्दरो वीरः कोटरः काटरः पयः ॥
भूमध्यो माधवस्तुष्टिर्दक्षनेत्रञ्च नासिका ।
शान्तः कान्तः कामिनी च कामो विघ्नविनायकः ॥
नेपालो भरणी रुद्रो नित्या क्लिन्ना च पावकः" ।
इति वर्णाभिधानतन्त्रम् ॥ (मातृकान्यासेऽस्य
दक्षिणचक्षुषि स्थानम् । यथा, मातृकान्यास-
प्रकरणे "इं नमो दक्षिणचक्षुषि ईं नमो
वामचक्षुषि" । इति ।)
इ, } गतौ । (भ्वादि-इदनुबन्ध-अदा-पर-सक-अनिट् ।)
इन, } अयति । स एति । एथक्पाठसामर्थ्यात् पूर्व्वो
न लित् । शेषस्तु इन गतावित्ति प्रसिद्ध । यिणो-
ऽयणावित्यादिषु ग्रहणमस्यैव । इति दुर्गादासः ॥
(उत् ।) उदये । समुन्नतौ । यथा,—
"उदयति यदि भानुः पश्चिमे दिग्विभागे" इति ।
(अभि + उत् ।) अभ्युदये । समुन्नतौ । सर्व्वे गत्यर्था
ज्ञानार्थाः प्राप्त्यर्थाश्च इत्यनेन प्राप्त्यर्थेऽप्यस्य वङ्कल
प्रयोगः । यथा,—मनुः ।
"श्रद्धया श्रेष्ठतामेति प्रत्यवायेन शूद्रताम्" ।
"अयमेति मन्दं मन्दं कावेरीवारिपावनः पवनः" ।
इति साहित्यदर्पणम् । (अति) अतिक्रमे । परा-
भवे । यथा, हितोपदेशे । १ ।
"अतीत्य हि गुणान् सर्व्वान् स्वभावो मूर्द्ध्नि वर्त्तते" ।
"ततः परं ब्रह्मस्थानं क्रोशत्रयमतीत्य वै" ।
इति रामायणे । (अनु) अनुकरणम् ।
"धातुरादेशमन्वेति तद्यथा हि तदर्थिनः ।
नामाधीनो मनुष्योऽयं कामं भजति काञ्चन" ॥
इति महाभारते । (अप) अपगमने । पलायने ।

"प्रत्यादिश्यन्त्यलीकमपैतु ते" । इति शाकुन्तले ।
(सम् + आ) सम्मिलने । "देवान्वितान् समभ्यो-
पूर्व्याय च शिशुसत्तावान्" । इति मनुः । २ ।
१५२ । इत्यादयो ज्ञेया ।)
इ, ल, स्मृत्या । (अदा- परं-सक-अनिट् ।) अधि-
पूर्व्वोऽयं । अधिग्रहणं अन्यपूर्व्वस्य केवलस्य च
प्रयोगनिरासार्थं । एवं सर्व्वत्र । स अध्येति तव
लक्ष्मणः । इक स्मरणे इति प्रसिद्धोऽयं । इन्व-
दिक इत्यत्रास्यैव ग्रहणम् । इति दुर्गादासः ॥
इ ङ ल अध्ययने । (अदा०-आ०-सक०-अनिट् ।)
अधिपूर्व्वोऽयं । अध्ययनमर्थतः शब्दतश्च गुरुतो
ग्रहणं । ङ ल वेदमधीते विप्रः । इति दुर्गादासः ॥
("य स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः"
इति मनुः । २।१०७ ।)
इ, व्य, भेदे । क्रोधोक्तौ । अपाकरणे । अनुकम्पा ।
इति मेदिनी ॥ खेदे । इति हेमचन्द्रः ॥ ।
इरेश, पु, लङ्कादेशजातस्त्रीच्छजातिविशेषः । यथा,—
"अधिपा मण्डलानाञ्च संग्रामेष्वपराजिता ।
इरेशा नव षट् पञ्च लङ्काञ्चापि भाविनः" ॥
इति मेरुतन्त्रे २३ प्रकाशः ॥
इः, [स्] व्य, कोपे । सन्तापे । दुःखभावनायां । इति
शब्दरत्नावली ॥
इः पु, (अस्य विष्णोः श्रीकृष्णस्यापत्यम् पुमान् ।
अ + इञ् ।) कामदेवः । इति पुरुषोत्तमहला-
युधौ ॥ यथा, आग्नेये एकाक्षराभिधानम् ।
"इः कामे रतिलक्ष्म्योरी उः शिवे ब्रह्मकाय ऊः" ।
इक्कट, पु, तृणविशेषः । तत्पर्य्यायः । वज्रमूलः २ ।
इति त्रिकाण्डशेषः । कोशाक्षः ३ इत्कटः ४ । इति
हारावली ॥ (इत्कटशब्देऽस्य विशेषो ज्ञेयः ॥)
इक्षु, पु, (इष्यतेऽभिलष्यतेऽसौ इति । इष् + क्सु ।)
स्वनामख्याततृणं । आक् इति भाषा । तत्पर्य्यायः ।
रसालः २ । इत्यमरः ॥ कर्कोटकः ३ वंशः ४
कान्तारः ५ सुकुमारकः ६ अधिपत्रः ७ मधुतृणः ८
वृष्यः ९ गुडतृणः १० । इति राजनिर्घण्टः ॥
मृत्युपुष्पः ११ मधुरसः १२ असिपत्रः १३ को-
शकारः १४ इक्षवः १५ । इति शब्दरत्नावली ॥
पयोधरः १६ । इति जटाधरः ॥ * ॥ तस्य भेदा ।
वंशकः १ कान्तारः २ भीरुः ३ पौण्ड्रः ४ । इति
रत्नमाला ॥ सामान्येक्षुगुणाः । रक्तपित्तनाशित्वं ।
बलवृद्धिकफकारित्वं । पाके मधुरत्वं । स्निग्धत्वं ।
गुरुत्वं । शीतलत्वं । मूत्रवृद्धिकारित्वञ्च । तस्य
मूले अतिमधुरत्वं । मध्ये मधुरत्वं । ग्रन्थिलग्न-
शमाग्रेषु लवणरसत्वञ्च । इति राजवल्लभः ॥
मूलादूर्द्धं मधुरत्वं । मध्ये अतिमधुरत्वं । अग्र-
क्रमाल्लवणत्वं नीरसत्वञ्च ॥ अनुक्ते इक्षुभक्षणगुणाः
पित्तदाहत्वं । भुक्ते वातप्रकोपणत्वं । भुक्तिमध्ये
गुरुत्वं च ॥ इति राजनिर्घण्टः ॥ दन्तनिष्पी-
डितेक्षुरसगुणाः । हिमत्वं । शुक्रकारित्वं । तृप्ति-
जनकत्वम् । जीवनहितकारित्वम् । वायुरक्तपित्त-
नाशित्वं । स्वादुत्वं । स्निग्धत्वं । प्रीतिदायकत्वं । रक्त-
वर्द्धकत्वं । सुखप्रह्लादकारित्वं । धातुवर्द्धकत्वञ्च ।
इति राजवल्लभः ॥ अपि च । रक्तदोषघ्नश्रमघ्न-

कारिणं । कमलेष्वसमानं । कमलं । पविमयत्न । मूलगतिकारिणं । वैशस वालिसाधन । पच कारिणं । शीघ्रपोषण । निशोषक्षमयन । इति राजनिर्घण्टः । वज्रविम्बौक्तिकरत्नगुणाः । रक्तवर्त्मारिता । शीतयन । वासवल । पवि वर्णं । राजयक्ष्मनाशन । इति राजवल्लभः । अपि च । रक्तपित्तौक्तिकरत्नगुणगुल्म । विविध विषवालामारिता । वर्णोत्तम । जयागुर्म । वीर्यविक्रमरावकारिता । यकृत्विकारगुणा । वाचिकरणं । रावणकर्णं । मायगतिवारवरोध हयभं । कफवातुकारिता । इति राजनिर्घण्टः । सत्त्वाद्यगुणा । गुरुत्वं । मधीप्रगतं । कफवात नाशिनम । इति राजवल्लभः । विमलं । पवि प्रगुणं । कफिवात्ते विरादृतं । शिलाकरोत कारितम । इति राजनिर्घण्टः ।

अथ विभागः ।

"कलोत्तमादिमत्स्यवसमानप्रतिकारिता ।
विक्रमस्य कमलो चेता शीतवीर्या कलोत्तरम्" ।
इति राजवल्लभः । कपिञ्जलं । कलेवरौर्ण्यमापि प्रभाव ।

"रत्नौषधीश्वरः मौक्तिकमणिर्विद्रुमोऽपि च ।
गरुत्मतोऽपि कथा मधुरा मता ।
हयश्च राजमिषुः कमला रुक्मा कवयाः ।
वाडवा नरता विमला मरकतो मूलका विमा" ।*।

अपेक्षया ।

"मौक्तिको भीमवाणि वंशजा प्रवालेरका ।
वात्मारवायवेष्व वारोषा पविकाता ।
वरावो रोवनय मीलगोमेदक वोडशम् ।
इमेता नायकास्मां कथयामि यथाविधि ।*।

अथ मौक्तिकभीमकोर्मुका ।

"कामविमलाम्बर्मो मधुरो रक्तपाकतो ।
रवीतो वंशजो यथा मौक्तिको शीतवच्चा" ।*।

अथ गोमेदकगुणा ।

"गोमेदको गुरु हिमो रक्तपित्तनाशक ।*।

अथ वात्यादिगुणाः ।

"वात्याद्यैर्गुणैर्वर्णेन देवको वंशज वरः" । ।

अथ दीर्घमौक्तिकगोमेदुका ।

"दीर्घोत्रा रुचिरा मधुरो वंशजा मता" ।*।

अथ प्रवालेरगुणाः ।

"प्रवालस्य गुणैः विविध गोमेदारम्भणिका ।
विविधम् विविध्यत्व मधुरा प्रभावतः" ।*।

अथ मनोगुणाख्या

"मनोगुणा मायुरी ह्रास्यस्वरपाशिनी ।
रुचिरा मधुराति रक्तविकारविनाशिनी" ।*।

अथ वातविकुरुणा ।

"वातवपुर्गीत् यदी मधुरा वेत्ताशेषा ।
प्रवेगा वर्धिकमादि यथा च मधुरादिकी" । ।

अथ वातदुरन्तोपमाः ।

"वात रक्त कर्मं कुर्वन्तोऽमैदरायन च ।
गुरु तु मायवत् वात्यरीकचीरमम विमलम् ।
रक्तपित्तावरो हता यथावत् नवीनमम्" ।*।

अथावमैव च ।

"मुक्ते तु मकरौऽमर्षे मत्वेऽपि मधुरा स्मृता ।
कार्ये प्रविष्टु च वेर्ये हता महस्तो मते" ।*।

अथ रक्तमौक्तिकगुणाः ।

"रक्तमिस्रौक्तिकरत्नो रक्ता विरावकारक ।
सर्वरोगमनीषा मायविनाशी कथमपि" ।*।

अथ नवरत्नोपकरणस्य प्रभा ।

"मुक्ताफलम् रक्तादिनीलमाणिक्यवैदूर्यात् ।
विविध कार्यं विशेष विहर्ति वाति वाचिक ।
ज्ञानविनाशी विषघ्नी प्रथमा वास्थानिको रसः ।

अथ मधुविषघ्नोपकरणे प्रभा ।

"रक्ता मधुविषो वैदो क्वचो वाताशो प्रभा ।
कफपित्तहर गोमी मेदवासिसूचक" ।*।

अथ मरकतोपरत्न प्रभा ।

"मरो रक्तो प्रभा विमला रुचिरत्ना कफवातनुत् ।
मुक्तामाणिक्यमना विविधविषहरा स्मृता" ।*।

अथैवोपरत्न विकाराणां गुणा ।

"रक्तौषधकारादुर्धातुर्द्योतिवादनाशका ।
गुरवो मधुरा यथा विमला वातपरा वरा ।
रक्ता मोक्षदरा शीता वक्ता विषयारिका" ।
इति भावप्रकाशः ।

(अथ भेदेषुगुणा ।

"रक्तवर्णोत्तमो मणो रोचवातप्रयुक्ता ।
विमल वर्णको रक्तो वंशजय शशीयक ।
वादृशमामिवतमावादविषयहारित्वम् ।
रक्तोऽत्यन्तविनाशी स्यात् विशेषात् वचनान्तः ।

अथ प्रवोधगुणाः ।

"यदत् शुक्लो मधवं प्रभावं
रक्तो मरैवनवर्दनय ।
वनीयर्न स्याम्बुरो रक्तेन
गोमावरसा मलोत्कारी" । ।

अथ सर्वोपरत्नगुणाः ।

अनेन मौक्तिकरत्नं वज्रितो मरच
रक्ता यवच गुरवेऽपि प्रतीपकच ।
वातो विषादिमथनय वज्रोमलय
पवित्रितो पविरिगिवयं विचर्चित" । ।

अथ रक्तमौक्तिकरत्नगुणाः ।

"अनेन मौक्तिकरत्नो वजिताद्रयय
कफन्नो मधुरा कमलामल ।
विमलाशोऽपि पवित्र रवैव विर्भ
रोगं विरमति मधुरा च हिमो वरच" । ।

अथ नवरत्नकथा ।*।

"मरो प्रवाहा विमला रुचिरता कफवातजा ।
विमलोऽपि विविधेन प्रभविकारवालवत्" । ।
इति वार्तिक । यथा च वाग्भट वार्धक्यस्य ।
"रक्तो रक्तो गुरु हिमो वंशजा कफकृतश्च ।
रक्ता शीतोऽपविमल वातुवातरक वरा ।
मोऽत्ये कफघ्नो रक्तमौक्तिका सर्वरोगा ।
मुक्तामाणिक्यादिवीक्ष्णानामलाभात् ।
विविक्ताथें विरता च विहर्ति वाति वाचिका ।
विरती मुर्तिकापी वेगावो वच मौक्तिका ।
वैमलवावरूपैरपचयगुणादिभ ।
प्रावनवरवाप्ता वैमायादावा प्रभात् ।

कवरा वनयाय गोमा विविधविरामिका"।
"रक्ता शीता सिता विमलो वंशजो मधुरो रसा ।
मैद्यो पविकमोमेदलिकष्णु विराजते ।
विमाय् प्रवारत्नादुर्धाद् मौक्तिकारंगयो वरः"
इति चरका । यथा च सुश्रुते ।
"रक्तो मधुरा विपाका गुरवा शीता क्रिम-
नता रक्ता मुक्ता रक्तपित्तहरमप्रमित
कराचेति है वारेविका । तद्यथा,—
"मौक्तिको शीतवीर्यं वंशजा प्रवालेरका ।
वात्सारवायवेषु वाडेषु कविमता ।
वैजयो वीर्यवत्व मौक्तिकोऽपि गोमेदम् ।
इमेता नायका मौक्तिकादगुणात् प्रवालका वरम् ।
रवीतो मधुरा विमला वंशजा मेयका वरा ।
कविरावो तुर्कमा मौक्तिको शीतवचा ।
वार्त्ता मुक्ताफला विविधवधादीर्घको मता ।
वरावकावरेषु विविधुभ्य च वावरा ।
वात्सादवावरात्विक् वंशजाभुवी मती ।
प्रवंशकृत् वारेषु न तु वाडवरोगा ।
रवीतमो मौक्तिको वैमायो दीर्घवक ।
वाडवाय कपवित्व कवलाय विराधित ।
गोमेदको गुरु हीमो रक्तपित्तप्रणाशक ।
कथीतमगुरो मुके मभे मधुर वर तु ।
कफोवातिवु विवेन रक्तता कवचो रस ।
मविरावो कपकरो वातविवरिचारका ।
वाम्ब्रमावमो रक्तो रक्तमिम्रौक्तिको रस ।
कुर्वविरावो विमयी कविनवकुपमौक्तिका ।
मरो गुरा वरा विमला रुचिरता कफवातजुत्" ।
वेविकारवरता । इति राजनिर्घण्टः ।

रत्नाकल,पुं (रत्नस्य आकर इव आकरो यस्य ।) मुक्ता । प्रवाल इति ख्याता । इति शब्द चन्द्रिका । (यथा रामायणे २।८२।१।
"कदाचनोत्तमं शीतमिव मुक्ताकरगोदम्" ।)
वाडवम् । इति राजनिर्घण्टः ।

रत्नकम्, पुं, (रत्नमयम् अव इव अस्मो यस्य ।) वाडवम् । इति भावप्रकाशः । कुमारोवनक- रवा । इति राजनिर्घण्टः ।

रत्नमाला, स्त्री, (रत्नमयं + टाप् ।) गोमुकरकक । मौक्तिकी इति भाषा । मुक्ताप्रविहुमाला । को विरावरकरा । कुचिका माला इति भाषा । वाडवम् । इत्यपरे मेदिनी च । वार्तिका इति भाषा ।

रत्नमालिका, स्त्री, (रत्नमय + अन् + टाप् ।) इति- मुक्तामा । इति शब्दरत्नावली । (वनितुभाव- रूपेरका मुक्तावी वेयम् ।)

रत्नमुखा, स्त्री, (रत्नोमुखा ।) वनविशेष । प- माल इति ख्याता । रत्नवर्णा । रत्नाविका २ पविकृ २ रत्नाविका ३ । इति रत्नमाला ।

रत्नरता, स्त्री, (रत्नमयान रते यस्य इव रते- यस्या ।) वनविशेष । रत्नवर्णा । कुन्ती २ वचाकु २ रत्नमालिका ३ । परवा गुणाः । कफ- रत्न । विकर्णं । वैरमावावलं । वसविरदणं । रविवरतलं । पर्णं । वरवहविनाशित ।

इति राजनिर्घण्टः ॥

इक्षुनेत्र, क्ली, (इक्षोर्नेत्रं ।) इक्षुमूलं । इति राजनिर्घण्टः ॥

इक्षुपत्र, पु, (इक्षोः पत्रमिव तीक्ष्णं पत्रं यस्य ।) यावनालनामधान्यविशेषः । इति राजनिर्घण्टः ॥ जोयार इति भाषा ।

इक्षुर, पु, (इक्षुरिव पूर्य्यते । इक्षु+पृ+क ।) शरवृण । इति राजनिर्घण्टः ॥ (शरवृणशब्देऽस्य गुणादयो ज्ञातव्याः ।)

इक्षुबालिका, स्त्री, (इक्षोर्बालिकेव तदाकृतित्वात् ।) इक्षुतुल्या । इति रत्नमाला ॥ खनाखु इति ख्याता । काशः । इति राजनिर्घण्टः ॥ काशिया इति भाषा ।

इक्षुमूल, क्ली, (इक्षोः मूलमिव मूलं यस्य ।) वृक्षविशेषः । तत्पर्य्यायः । इक्षुनेत्र २ मोरटक ३ वंशनेत्र ४ वंशमूल ५ मोरट ६ वंशपूरक ७ । इति राजनिर्घण्टः ॥ ("अतीव मधुरो मूलः" इति सुश्रुतः ।)

इक्षुयोनिः, पु, (इक्षोर्योनिरुत्पत्तिकारणं ।) पुण्ड्रकेक्षुः । इति राजनिर्घण्टः ॥ (तत्र पौण्ड्रकः । "शैत्यप्रसादमाधुर्य्यैर्वरः", इति वाभटः । पौण्ड्रकशब्दे चास्य विशेषो ज्ञेयः ॥)

इक्षुरः, पु, (इक्षुमिक्षुवत् गन्धं राति ददातीति । इक्षु+रा+क ।) कोकिलाक्षवृक्षः । इति रत्नमाला ॥ कुलिया खारा इति भाषा । इक्षुः । गोक्षुरकवृक्षः । इति शब्दरत्नावली ॥ काशः । इति राजनिर्घण्टः ॥

इक्षुरकः, पु, (इक्षुर+स्वार्थे+कन् ।) कोकिलाक्षवृक्षः । स्थूलशरः । काशतृणं । इति राजनिर्घण्टः । ("स्वयङ्गुप्तेक्षुरकयोः फलचूर्णं सशर्करम् । धारोष्णेन नरः पीत्वा पयसा न क्षयं व्रजेत्" ॥ इति सुश्रुतः ॥)

इक्षुरसः, पु, (इक्षोरिव रसो यस्य ।) काशतृणं । इति भावप्रकाशः ॥ (इक्षुवृक्षस्य रसः । अस्य गुणाः क्रमेण यथा, दन्तपीडितेक्षुरसगुणाः । जीवनहितकारित्वं, हिमत्वं, शुक्रकारित्वं, तृप्तिजनकत्वं, वायुरक्तपित्तनाशित्वं, स्वादुत्वं, रक्तवर्द्धकत्वं धातुवर्द्धकत्वञ्च यथा भावप्रकाशे ।

"दन्तनिष्पीडितस्येक्षो रसः पित्तास्रनाशनः ।
शर्करासमवीर्य्यः स्यादविदाही कफप्रदः" ॥

यन्त्रनिष्पीडितरसगुणाः, रक्तशुक्रकारित्वम्, शीतलत्वं, सारकत्वं, दाहजनकत्वं, किञ्चित् पित्तवायुनाशित्वं, क्षीरविष्टम्भदाहकारित्वञ्च यथा, भावप्रकाशे,—

"मूलाग्रजन्तुजग्धादिपीडनात् मलसङ्करात् ।
किञ्चित्कालं विधृत्याथ विकृतिं याति यान्त्रिकः ॥
तस्मात् विदाही विष्टम्भी गुरुः स्यात् यान्त्रिको रसः ।

पर्य्युषितेक्षुरसगुणाः । वान्तिहरत्वं, वातजनकत्वं, आस्यप्रतिश्यायरोगदातृत्वं, कफवायुकारित्वञ्च । यथा भावप्रकाशे ।

"रसः पर्य्युषितो नेष्टो ह्यम्लो वातापहो गुरुः ।
कफपित्तकरः शोषी भेदनश्चातिमूत्रलः" ॥ * ॥

पक्वेक्षुरसगुणाः । गुरुत्वं । सतीक्ष्णत्वं । कफवातनाशित्वं । स्निग्धत्वं । अतिपाके विदाहत्वं । पित्ताल्पगोषशोषकारित्वञ्च । यथा भावप्रकाशे ।

"पक्वो रसो गुरुः स्निग्धः सुतीक्ष्णः कफवातनुत् ।
गुल्मानाहप्रशमनः किञ्चित् पित्तहरः स्मृतः" ॥ ॥

इक्षुरसविकारगुणाः । यथा भावप्रकाशे ।

"इक्षोर्विकारास्तृड्दाहमूर्च्छापित्तास्रनाशनाः ।
गुरवो मधुरा बल्याः स्निग्धा वातहराः सराः ।
वृष्या मोहहराः शीताः वृंहणा विषहारिणः" ॥)

इक्षुरसक्वाथ, पु, (इक्षुरसस्य क्वाथः ।) गुडः । इति हेमचन्द्रः ॥ (गुडशब्देऽस्य गुणादयो व्याख्येयाः ।)

इक्षुरसोद, पु, (इक्षुरसवत् उदकं यस्य उदकस्य उदभावः ।) इक्षुसमुद्रः । इति जटाधरः ॥

इक्षुवल्लरी, स्त्री, (इक्षुरिव सुस्वादा वल्लरी ।) क्षीरविदारी । क्षीरकन्दः । इति राजनिर्घण्टः ॥

इक्षुवल्ली, स्त्री, (इक्षुरिव सुस्वादा वल्ली लता ।) क्षीरविदारी । इति राजनिर्घण्टः ॥

इक्षुवाटिका, स्त्री, पुण्ड्रकः । इति राजनिर्घण्टः । पुड़ि आक् इति भाषा ।

इक्षुवाटी, स्त्री, (इक्षोर्वाटीव ।) पुण्ड्रकः । इति राजनिर्घण्टः ।

इक्षुवेष्टन, पु (इक्षोरिव वेष्टनं यस्य ।) भद्रमुञ्जः । इति राजनिर्घण्टः ॥

इक्षुशाकट, क्ली, (इक्षोः क्षेत्रं । इक्षुशब्दात् क्षेत्रे शाकटशाकिनौ इति शाकटप्रत्ययः ।) इक्षुक्षेत्रम् । इति व्याकरणम् ॥ इक्षुर भूमि इति भाषा ।

इक्षुशाकिन, क्ली, (इक्षोर्भवनं क्षेत्रं वा । इक्षु+शाकिन ।) इक्षुक्षेत्रं । इति व्याकरणम् ॥

इक्षुसार, पु, (इक्षोः सारः ।) गुडः । इति राजनिर्घण्टः ॥

इक्ष्वाकु पु, (इक्षुमाकरोतीति । इक्षु+आङ्+कृ+मितद्र्वादित्वात् डुः । यद्वा इक्षु इति शब्दं आकतीति अक गतौ वाहुलकादुण् ।) वैवस्वतमनुपुत्रः । स तु सत्ययुगे अयोध्यायां सूर्य्यवंशीयादि राजः । इति पुराणम् ॥ (गीतायाम् । ४ । १ । "विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्" । इक्ष्वाकोर्गोत्रे जाता इति व्युत्पत्त्या वाच्यलिङ्गः । इक्ष्वाकुवंशोद्भवः । यथा रघुः । १।७२।

"इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" ।)

इक्ष्वाकु, स्त्री, (इक्षु+आङ्+कृ+डु ।) कटुतुम्बी । इत्यमरो मेदिनी च ॥ तितलाउ इति भाषा । ("इक्ष्वाकुकुसुमचूर्णं वा पूर्व्ववदेव क्षीरेण काशश्वासच्छर्द्दिकफरोगेषूपयोगः"। इति सुश्रुते । "सिद्धं वक्ष्याम्यथेक्ष्वाकुकल्पं येषां प्रशस्यते" । अस्याः पर्य्यायो यथा ।

"लम्बाऽथ कटुकालावुस्तुम्बी पिण्डफला तथा ।
इक्ष्वाकौ फलिनी चैव प्रोच्यते तस्य कल्पना" ॥

अस्या रोगविशेषे प्रशस्तता यथा ।

"कासश्वासविषच्छर्द्दिज्वरार्त्ते कफकर्षिते ।
प्रतान्ते नरे चैव वमनार्थं तदिष्यते" ॥

अवस्थाभेदेनास्या व्यवहारो यथा ।

"अपुष्पस्य प्रवालाना मुष्टिं प्रादेशसम्मिताम् ।
क्षीरप्रस्थे शृतं दद्यात् पित्तोद्रिक्ते कफज्वरे ॥
पुष्पादिषु च चत्वारः क्षीरे जीमूतके यथा ।
योगाहरितपाण्डूनां सुरामण्डेन पञ्चमः ॥
फलस्य रसभागश्च त्रिगुणक्षीरसाधितम् ।
उरःस्थिते कफे दद्यात् स्वरभेदे सपीनसे ॥
शृतमध्ये फलेऽशोर्णे स्थितं क्षीरं यदा दधि ।
जातं स्यात् कफजे कासे श्वासे वम्याञ्च तत्पिबेत् ॥
मस्तुना वा फलान्मध्यं पाण्डुकुष्ठविषार्द्दितः ।
तेन तक्रं विपक्वं वा सक्षौद्रलवणं पिबेत् ॥
अजाक्षीरेण वीजानि भावयेत् पाययेत च ।
विषगुल्मोदरग्रन्थिगण्डेषु श्लीपदेषु च ॥
तुम्ब्याः फलरसैः शुष्कैः सपुष्पैरवचूर्णितम् ।
छर्द्दयेन्माल्यमाघ्राय गन्धसम्पत्सुखोचितः ॥
भक्षयेत्फलमध्यं वा गुडेन पललेन च ।
इक्ष्वाकुफलतैलं वा सिद्धं वा पूर्व्ववद्घृतम् ॥
पञ्चाशद्द्वादशार्द्धानि फलादीनां यथोत्तरम् ।
पिबेद्दिमस्तु वीजानि कषायेष्वासुतं पृथक् ।
यष्ट्याह्वकोविदाराद्यैर्मुष्टिमन्तर्नखं पिबेत् ॥
कषाये कोविदाराद्यैर्मात्राञ्च फलवत् स्मृता ।
गुल्ममेहे प्रसेके च कल्कं मांसरसैः पिबेत् ॥
नरः साधु वमत्येव न च दौर्ब्बल्यमश्नुते" ॥
"इक्ष्वाकुमूलं मदनं विशल्यातिविषे वचा ।
कुष्ठं किण्वामिको चापि पिबेत्तुल्यानि पूर्व्ववत्" ॥)

इति चरकः ॥)

इक्ष्वारि, पु, (इक्षुवृक्षस्य अरिः ।) काशतृणं । इति राजनिर्घण्टः ॥ (काशशब्देऽस्य गुणादयो ज्ञातव्याः ।)

इक्ष्वालिक, पु, (इक्षुरिव अलति व्याप्नोतीति ।) काशतृणं । इति भावप्रकाशः ॥

इक्ष्वालिका, स्त्री, (इक्ष्वालिक+टाप् ।) इक्षुतुल्या । इति रत्नमाला ॥ खानाखु इति भाषा । खागड़ा इति केचित् ॥

इख, गतौ । (भ्वादि-पर-सक-सेट् ।) इति कविकल्पद्रुमः ॥ तृतीयस्वरादिः । एखति । इति दुर्गादासः ॥

इखि, इ, गतौ । (भ्वादि-पर-सक-सेट्-इदित् ।) इति कविकल्पद्रुमः ॥ तृतीयस्वरादिः । इ, इङ्खते । इति दुर्गादासः ॥

इगि, इ, गतौ । (भ्वादि-पर-सक-सेट्,इदित् ।) इति कविकल्पद्रुमः ॥ तृतीयस्वरादिः । इ, इङ्गति इङ्गितः । इति दुर्गादासः ॥ (यदुक्तं भारते । "त्वया सृष्टमिदं विश्वं यच्चेङ्गं यच्च नेङ्गति" ।

इङ्ग, त्रि, (इगि+क ।) अद्भुतः । जङ्गमः । इति मेदिनीकरहेमचन्द्रौ ॥ (यथा, भारते । ("त्वया सृष्टमिदं विश्वं यच्चेङ्गं यच्च नेङ्गति" ।)

इङ्ग, पु, (इङ्ग+घञ् ।) इङ्गितं । ज्ञानं । इति मेदिनीकरहेमचन्द्रौ ॥

इङ्गित, क्ली, (इगि+क्त ।) अभिप्रायानुरूपचेष्टाविष्करणं । ठार सङ्केत इत्यादि भाषा । तत्पर्य्यायः । आकारः २ इङ्गः ३ । इत्यमरः ॥ गमनं । चेष्टा । इति हेमचन्द्रः ॥ ("आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च । नेत्रवक्त्रविकारेण लक्ष्यतेऽन्तर्गतं मनः" ॥ हितोपदेशे सुहृद्भेदः । (तथाच रघुः १।२० ।)

"यस्य शाखान्तरालस्य गुच्छान्तरेणेव च"।)

इङ्गुदः, पुं, (इङ्गं इति चलनमप्यस्तीति। इङ्ग+उ+द। यद्वा पुंस।) इङ्गुदीवृक्षः। इत्यमरटीकायां भरतः।

("इङ्गुदीफलमज्जानं विलनिर्यासमावपेत्"। इति चरकः।। विशेषोऽस्य इङ्गुदीशब्दे ज्ञेयः।)

उद्वाह, पुं, (उत् + वह + घञ् ।) विवाहः । इत्यमरः । तस्य लक्षणं भार्य्यात्वसम्पादकग्रहणम् । तस्य स्वी-काररूपज्ञानविशेषस्य समवायविषयतयोर्भेदात् वरकन्ययोर्विवाहकर्तृत्वकर्म्मत्वे । स तु अष्ट-विधः । वरमाहूय यथाशक्त्यलङ्कृता कन्या यत्र दीयते स ब्राह्मः १ । यत्र यज्ञस्यार्त्विजे कन्या-दानं स दैवः २ । यत्र वरात् गोद्वयं गृहीत्वा तेनैव सह कन्यादानं स आर्षः ३ । यत्र अनया सह धर्म्मं चरता इति नियमं कृत्वा कन्यादानं स कायः ४ । यत्र धनं गृहीत्वा कन्यादानं स आसुरः ५ । यत्र कन्यावरयोरन्योन्यानुरागात् त्वं मे भार्य्या त्वं मे पतिरिति निश्चयः स गान्धर्व्वः ६ । यत्र बलात्कारेण कन्याहरणं स राक्षसः ७ । यत्र सुप्ताया मत्ताया प्रमत्ताया वा कन्याया निर्ज्जने गमनं स पैशाचः ८ । तस्य निर्णयः । सगोत्रासमानवरवयस्का समानप्रवरा पितृपितृ-योर्द्ध्वतनपञ्चपुरुषाणां पुत्त्रकन्यासन्ततिपरम्प-रया प्रत्येकसप्तमीपर्य्यन्ता अधस्तने तदपेक्षया सप्तमीपर्य्यन्ता पितृबन्ध्वपेक्षयोर्द्ध्वतनपञ्च प्रत्येका-पेक्षया सप्तमीपर्य्यन्ता अधस्तने तदपेक्षया सप्तमी पर्य्यन्ता मातामहसमानोदका मातामहापेक्ष-योर्द्ध्वतनचतुर्णां पुरुषाणां पुत्त्रकन्यासन्तति-परम्परया प्रत्येकापेक्षया पञ्चमीपर्य्यन्ता अधस्तने तदपेक्षया पञ्चमीपर्य्यन्ता मातृबन्ध्वपेक्षयोर्द्ध्वतन-चतुर्णां प्रत्येकापेक्षया पञ्चमीपर्य्यन्ता अधस्तने त-दपेक्षया पञ्चमीपर्य्यन्तास्च कन्या परित्यज्य उद्वाहः कर्त्तव्यः ॥ पितृबन्धुमातृबन्धुविरहेऽपि तयोर्योग्य-तामवलम्ब्य सप्तमीपर्य्यन्तायाः पञ्चमीपर्य्यन्तायास्च कन्यायाः परिहारः । वर्ज्जनीयानां कन्यानां मध्येऽपि या त्रिगोत्रान्तरिता सा विवाह्या । अत्र सप्तमगणनप्रतियोगिपितृपितृबन्धुपञ्चमगणनप्र-तियोगिमातामहमातृबन्धुगोत्रमादायैव त्रिगोत्र-गणनम् । शूद्रस्य सगोत्राविवाहे दोषाभावः । मातृसपत्नीभ्रातृकन्यां सहोदरीं आश्वापयितृ-कन्यां शिष्यकन्यां मन्त्रदगुरुकन्याञ्च परित्यज्य विवाहः कर्त्तव्यः ॥ अथ कन्यादानाधिकारिणः । आदौ पिता । तदभावे पितामहः । तदभावे भ्राता । तदभावे पितृज्ञातिः । तदभावे मातामहः । तद-भावे मातुलः । तदभावे माता । तदभावे माता-महज्ञातिः । एतेषामप्यभावे कन्या स्वयं वरं कुर्य्यात् ॥ अथ विवाहपूर्व्वकर्त्तव्यकर्म्म । अवश्य-भावि शुभाशुभग्रहादिदोषशान्त्यर्थं होमो हि-रण्यगोवस्त्रदानम् । ततो नान्दीश्राद्धम् । लग्न-समये वरे उपस्थिते स्वस्तिवाचनादिना विधाय वरणम् । स्त्र्याचारादि । ततः कन्यादानं यथाशक्ति धनदानञ्च । ततः स्वगृह्योक्तविधिनाग्निं संस्थाप्य कुशण्डिकां समाप्य पाणिग्रहणं सप्तपदीगमनञ्च कर्त्तव्यम् ॥ ० ॥ ज्येष्ठेऽकृतविवाहे विवाहकर्त्ता कनिष्ठः परिवेदनदोषविशिष्टो भवति । ज्येष्ठः परिवित्तः । सा कन्या परिवेदनीया । कन्यादाता परिदायी । तत्पुरोहितः परिकर्त्ता । ते सर्व्वे पतिताः । किन्तु देशान्तरस्थक्लीवैकवृषणासोदर्य-वेश्यासक्तशूद्रतुल्यातिरोगिजडमूकान्धबधिरकु-ब्जवामनकुण्ठातिवृद्धनैष्ठिकब्रह्मचारिवानप्रस्थनि-त्याद्युपसत्कन्यसक्तधनवृद्धिप्रसक्तकामकारिदत्त-कौमत्तचौरेषु ज्येष्ठेष्वनूढेष्वपि कनिष्ठविवाहे न दोषः । एवं विकृतरूपानूढा ज्येष्ठा कनिष्ठाया सोदराया ऊढायाः परिवेदनाय न भवति । इत्यु-द्वाहतत्त्वम् ॥

उद्वाहन, क्ली, (उत् + वह + णिच् + ल्युट् ।) वि-वाहः । तत्पर्य्यायः । रथरणं २ । इति त्रिकाण्ड-शेषः ॥ द्वितीयम् । द्विवारकर्षणम् । इति हेम-चन्द्रः ॥

उद्वाहनी, स्त्री, (उद्वाहन + ङीप् ।) वराटकः । इति हेमचन्द्रः ॥ कड़ि इति भाषा ॥

उद्वाहिक, त्रि, (उद्वाहस्यायम् । उद्वाह + ठक् ।) उद्वाहसम्बन्धी ॥ (यथा, मनुः । ९ । ६४ ।) "नोद्वाहिकेषु मन्त्रेषु विधवावेदनं क्वचित्" ॥)

उद्वाहित, त्रि, (उत् + वह + णिच् + क्त ।) उद्-र्षितः । उद्धृतः । विवाहितः । यथा । राजमार्त्तण्डे देवलः ।

"बाले वृद्धे तथैवास्ते कुरुते दैत्यमन्त्रिणि ।
उद्वाहितायां कन्यायां दम्पत्योरेकनाशनम्" ॥

इति ज्योतिषतत्त्वम् ॥ (कलिकाले आगमोक्ता-न्यमार्गेण विवाहिता गर्हिता भवति । यथा,— "उद्वाहितापि या नारी आनीयात् चातु गर्हिता" इत्यागमसिद्धान्तः ॥)

उद्वाहिनी, स्त्री, (उद्वहति उद्धरतीति । उत् + वह + णिनि + ङीप् ।) रज्जुः । इति मेदिनी ॥

उद्वाहुः, त्रि, (उद्दूर्द्धे बाहुर्यस्य ।) ऊर्द्ध्वबाहुः । उद्वेग शब्दार्थे हेमचन्द्रेण लिखितः ॥ (यथा, रघुः । १।३। ("प्रांशुलभ्ये फले लोभादुद्वाहुरिव वामनः" ॥)

उद्वाहुकः, त्रि, ऊर्द्ध्वक्षिप्तबाहुः । उद्वेगशब्दार्थे मेदिनीकरेण लिखितम् ॥

उद्विग्नः, त्रि, (उत् + विज + क्त । ओदितश्चेति तस्य नः । श्वीदित इति नेट् ।) उद्वेगयुक्तः । यथा,—

"तैरंशुमत्सुतसुमत्तुरभिन्नविपन्नकैः ।
निमग्नोद्विग्नसंक्षीणैः पप्रे दीनैश्च मेदिनी" ॥

इति भट्टिकाव्ये ४ । ४२ ॥ (तथा च भारते,—
"नोद्विग्नश्चरते धर्म्मं नोद्विग्नश्चरते क्रियाम्" ॥)

उद्विवर्हण, क्ली, (उत् + वि + वृह + ल्युट् ।) उद्धा-रकरणम् । यथा,—

"कः अन्यधीतान्यतमस्तव प्रभो
रसाकृताया भुव उद्विवर्हणम्" ।

इति श्रीभागवते ११।४२ ॥ उद्विवर्हणं उद्धरणम् । इति तट्टीकायां श्रीधरस्वामी ॥

उद्वृत्त, त्रि, (उत् + वृत् + क्त । उत्साधिक्याद् उत्क्रान्तो वा ।) उत्तोलितः । उत्क्षिप्तः । परि-मुक्तोज्झितः । उद्वान्तः । इति हेमचन्द्रो मेदिनी च ॥ दुर्वृत्तः ॥ (यथा, महाभारते,—
"उद्वृत्तान् सततं शोतान् राजा धर्मेण शास्ति वै" ॥)

उद्वेग, क्ली, (उद्विजतेऽनेन इति । उत् + विज् + घञ् ।) गुवाकफलम् । इत्यमरः ॥

उद्वेग, पुं, (उत् + विज् + भावे घञ् ।) उद्वेजनम् । तत्पर्य्यायः । उद्भ्रमः २ । इत्यमरः ॥ चमत्कारः । इति भरतः ॥ चिरहन्नादुःखम् । इति रसमञ्जरी ॥ भयम् । इति हेमचन्द्रः । उद्वाङ्गनाम् । उद्गमनम् । इति मेदिनी ॥

("त्वत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छाम् ।
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या" ॥

इति मेघदूते पूर्व्वमेघे ३५ श्लोकः ॥

"सदयं बुभुजे महाभुजः
सहसोद्वेगमियं व्रजेदिति" ।

रघुः ८ । ७ ।

"सर्व्वाभिस्वप्यनुद्वेगो माधुर्य्यं परिकीर्त्तितम्" ।
इति साहित्यदर्पणे ३य परिच्छेदः ॥)

उद्वेग, त्रि, (उद्गतो वेगो यस्मात् ।) स्तिमितः । शीघ्रगामी । ऊर्द्ध्वबाहुः । इति हेमचन्द्रः ॥

उद्वेजन, क्ली, (उत् + विज + ल्युट् ।) उद्वेगः ॥

("परदाराभिमर्षेषु प्रवृत्तान् नॄन् महीपतिः ।
उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत्" ॥

इति मनुः ॥ ८ । ३५२ ॥)

उधः, [स्] क्ली, (वहति उनत्ति वा । वह प्रापणे उन्द क्लेदने वा + असुन् ।) ऊधः । इत्यमरटीकायां रमानाथः ॥ गवार माधान् इति भाषा ॥

उध्रस ग उञ्छे । इति कविकल्पद्रुमः ॥ (क्र्यादि-पर-सक-सेट् ।) एतस्यादौ पञ्चमस्वरः । मध्ये केवल-धकारस्याधो रेफः । क्र्यादावुध्रस उञ्छ इत्यय-मुदित्त्वौरादिकः पठ्यते तस्य ध्रासयतीति रूपं अपरं भवति । येषां मते उत्पूर्व्वस्य गणद्वयेऽपि पठनं तेषां मते श्नाविधायुध्रश्नाति निगद्यते णिचि कृतेऽप्युध्रासयत्यपि च । अत्र उत्पूर्व्वस्येति तु उत् उपसर्गः नतूपसर्गः । स उध्रस्नाति शस्यं दीनः । इति दुर्गादासः ॥

उध्रस क उत्क्षेपे । उञ्छे । इति कविकल्पद्रुमः ॥ (चुरा-पर-सक-सेट् ।) क उध्रासयति धूलिं वायुः । इति दुर्गादासः ॥

उन्द, ई ध क्लेदे । इति कविकल्पद्रुमः ॥ (रुधा-पर-सक-सेट् ।) रुधादिः । क्लेद आर्द्रभावः । ध उनत्ति वस्त्रं पयसा । ई उन्नः उत्तः । उन्दिदिषति । इति दुर्गादासः ॥

उन्दरु, पुं, उन्दुरु इति द्विरूपकोषः ॥

उन्दुरः, पुं, (उन्द + उर ।) मूषिकः । इति भरतो द्विरूपकोषश्च ॥ इन्दुर इति भाषा ॥

उन्दुरुः, पुं, (उन्द + ऊरु ।) जन्तुविशेषः । इन्दुर इति [illegible] । तत्पर्य्यायः । मूषिकः २ आखुः ३ । क्षुद्र

चेद्। मिश्रिका ७ नाम्नमूषिका ५। घेण्टे हर्युर इति भाषा। इत्यमरः। मूषका ६ मूषा ७ मूषीका ८ उन्दुरु ८ मत्सका १० सभ ११ खना १२ खा- खनिका १३ खरा १४ रोमा १५ मुषीका १६। मूषा १७ मूषिका १८ मूषिका १९। इति शब्दरत्नावली। गिरिकका २ खनिका २१ उन्दुरु २२। इति भरतः। वृषस्य वसा पर्यान्त- शिखा २३ वेधायकुक २४ शिखा २५। इति च शब्दरत्नावली। वायावसा २६ खाखनिका २७। इति भरतः।

उन्दुरु, पुं, (उन्द+वाहुलकात् उरः।) मूषिकः। इति हेमचन्द्रः।
("उन्दुरुभासमदितं येन भावमुपसन्नम्"।
इति वामदे चिकित्सास्थाने मरमेदाध्याय।)

उन्दुरुकर्णी स्त्री, (उन्दुरो मूषिकस्य कर्ण इव कर्णं यस्याः। उन्दुरुकर्ण+ङीष्।) आखुकर्णिका। इति राजनिर्घण्टः।

उन्न, त्रि, (उन्द+क्त। नुदविदेति पक्षे नत्वम्।) क्लिन्नः। आर्द्रः। इति हेमचन्द्रः।

उन्नत, त्रि (उद्+नम+क्त।) उच्छ्रितः। तत्पर्यायः। उच्चः २ प्रांशुः ३ उदग्रः ४ उच्छ्रितः ५ तुङ्गः ६। इत्यमरः। उच्चैः ७। इति शब्दरत्नावली। तुङ्गः। इति जटाधरः। (यथा रघुः। १। १४। "शिरसा वक्षसा चैव उन्नतेनातिरिच्यते"। स्त्री, हिमवच्छिखराकारत्वात् उन्नता। यथा शिवा उन्नतिरोमश्री। "शिवस्य मध्ये तत्र शैलं तथोर्ध्वं एवं बहुधावर्णितं चेत्यम्। (पुं, बालुकयमनन्तरे प्रतिष्ठितः। यथा, मार्कण्डेय ५८।३८।
"दृष्टेषु शिरसा चैव उपविश्वासुतो भुवा।
उन्नितयामा परिवृत्य सप्तर्षिरिति वर्तते"।)

उन्नतानति, त्रि, (उन्नतो नाभि यस्य।) उन्नताभि पुरुषः। तत्पर्यायः। तुन्दिः २। इति हेमचन्द्रः।

उन्नतानतं, त्रि, (उन्नतं च तत् आनतं चेति।) उच्चनीचस्थानादि। तत्पर्यायः। बन्धुरम् २। इत्यमरः।

उन्नति, स्त्री, (उद्+नम+क्तिन्।) उच्चभावः। स्फीतिः। ("उन्नतो महिमा विश्वभवदीनत- हरि उन्नता"। इति सांख्यदर्शने १४ परिच्छेदे।) गरुडपत्नी। इति हेमचन्द्रः। (यथा, विष्णुपदरोमश्री।
"मातापिता मरुतः स्मृतो
नाहरसौ चैतिरिद्धेसतया।
यशो बलं बिभ्रति वा प्रवाहाः
प्रत्युर्विधो चोदितमादिकालिनी"।)

उन्नतीश, पुं, (उन्नताख्यायाः गरुडपत्न्या ईशः स्वामी।) गरुडपक्षी। इति त्रि- काण्डशेषः।

उन्नमित, त्रि, (उद्+नम्+णिच्+क्त।) उन्नो- चितः। उत्थितः। इति भीमरथानी।
("बन मसाद्योतमितानमने-
हे नमयितुं पतितं नरेन्द्रः"।
इति माघे। १। १०।)

उन्नय, पुं, (उन्नयनम्। उद्+नी+भावकरणयोः विशेषेण अभ्युत्पत्त्यनिविश्यते इति करणम्।) ऊह- मननम्। इत्यमरः।

उन्नयनं, क्ली, (उद्+नी+ल्युट्।) वितर्कः। इति हेमचन्द्रः। ऊर्ध्वनयनम्। उत्तोलनम्। तोलन उठान इत्यादि भाषा।
(यथा भागवते। ११।१।५।
"यमायोनयनमपि बोनाहुग्रमजीति मुने,"।
ऊर्ध्वं नयनं नयति यस्ये याच्ञिकः"।)

उन्नाय पुं, (उन्नयनं इति। उद्+नी+घञ्।) उन्नयनम्। इत्यमरः। (यथा भट्टिः। ७। १०।
"उन्नायान्विनयनन्ता प्रतरीवहुपात्यासम्"।)

उन्नाहं स्त्री (उद्+नह+घञ्।) उद्बन्धनम्। इति हेमचन्द्रः।

उन्निद्र त्रि (उद्गता निद्रा यस्मात् पुष्पादिर्वा दलनात्।) प्रफुल्लः। विकसितः। इति हेमचन्द्रः।
("उन्निद्रपुष्पनयनत्यमद्रममालाः"।
इति माघः। प्रभृत। प्रफुल्लिताः।
"कामुकिनामदविमलानां मौक्तिकमालाभरणा"।
इति मेघदूते। ८८। यथा, प्राकृते मलरे।
"प्रमाणाम्बविदग्धैर्विदमसमुद्रिकसम यथा")

उन्मथ वधे। (चुरा+पर+पर्व+सेट्।) प्रभाति। मम उन्मथति गुणं मनेन योऽपि प्रभातात्। इति दुर्गादासः।

उन्मत्त, त्रि, (उद्+मद्+क्त।) उन्मादयुक्तः। मानसनिपातभ्रमविशिष्टः। पागल इति भाषा। तत्पर्यायः। उन्मादवान् २। इत्यमरः। तस्यौ वधम्, यथा,—मात्स्ये १९९ अध्यायः। ७।
"कृष्णमत्स्याङ्गर्भविन्यासभवात्य गतरा।
विद्वान्यविवादाच परात्मेनूकृष्णकुला।
यव दयाव विपुल मांसं वा रोमकोविदम्।
मूल दशाञ्जनलोचन कमलेश्वर ज्ञानते।
बलात्मीविवसाति भूमिमाति महेश्वर।
निवसति अनपुनाई ऋषिनिकामविषया"।
("उमनमन्तो सम्मुखम्भो देवाक्त कुर्वन्तु- मनम्"। इति निदानस्थाने वाग्भटस्थाने।
"देवर्षिपितृगन्धर्वैरुन्मत्तस्य च बुद्धिमान्।
सर्वेतप्राणानीनि योग्यानि कुर्यात् च।
सर्पिष्पानादि दयेन मधुमिष्टानमाचरेत्"।
इति च चिकित्सास्थाने १० अध्याये चरकेणोक्तम्।
अन्यविधरक्षमन्त्रोन्मादलक्षणे चेत्यम्।)
तदन्यप्रभावं यथा,—भगवत्पाठे।
"उन्मत्तानाम् या माता क्रिमुता वेदितं च यत्।
शिवो यत्र प्रमादस्यो नास्ति तत्र पतितमा।
यातौ गच्छति दैवेषु यथात् गच्छति मानुषात्।
मनिशिवा गच्छति तथा ज्ञेया वरमनी"।

उन्मत्त, पुं, (उन्मत्तयति। उन्माद+णिच्+अच्।) धुस्तूरः। यथा —
("चेतोऽसमश्लोकपरिस्फुरदिवन्दु भासा।
मुखाम्बुजन्मो रुचिर कर्णोन्मादाय योषिनाम्"।
इति वैद्यकरसायनविवदादे उन्मादाधिकारे।)
मुचुकुन्दकः। इति मेदिनी।

उन्मत्त, त्रि, (मदयो मत्तो यत्र।) उन्माद

गतः। उद्भ्रमरः। अन्यान्यर्थकः। उन्मदिष्णु ३। इत्यमरः। ("उदीरितमाधुरिसमुन्मत्तानाम्"। इति रघुः। ९। ८। यथा, माघे ६।५८।
"मधुकरोन्मत्ता भुजगस्य
भ्रमिनता विमलाशरपुष्पके"।)

उन्मदिष्णु त्रि (उद्+मद्+इष्णुच्।) उन्मत्तः। उन्मादशीलः। इत्यमरः।

उन्मना, [स्] त्रि, (उद्गतं उत्कण्ठितं मनो यस्य।) उत्कण्ठितचित्तः। अन्यमनस्कः। उत्का २। इत्यमरः।
("उन्मना प्रथमजन्मचेष्टिता-
न्यस्मरन्नपि ययौ राघवः"।
इति रघुः। ११। २२। "नवोदयेऽपि कार्यं सुमनाः"। इति किराते। ८। १८।)

उन्मन्थ, पुं, (उद्+मथि+घञ्।) मारणम्। वधः। इति हेमचन्द्रः।

उन्माथ, पुं, (उन्मथ्यतेऽनेनेति। उद्+मथ+घञ्। मारणार्थकवधे भावे घञ्।) कूटयन्त्रम्। मृग- पक्ष्यादिबन्धनम्। फांदि इत्यादि भाषा। अमरविशेष मात्रे तत् बन्धनयन्त्रं विशेषार्थे च। इत्यमरः। मारणम्। यातनाः। इति मेदिनी।
(यथा मत्स्यपुराणे।
"मत्तो महाजन्य च इव कूपोन्माथविषम्"।)

उन्माद, पुं, (उद्+मद्+घञ्।) (मनोविकारः। यथा महाभारते। कर्णादिपर्वाध्याये ११ १०। ९८। "उन्मादो मदनं कामो ह्यतापीन- वातो वाम")। चित्तविभ्रमविशेषः। तत्पर्यायः। चित्तविभ्रमः २। इत्यमरः। मतिभ्रंशः ३ उन्माद ४। इति राजनिर्घण्टः। (त्रिलोकिका १९२१४। इति हेमचन्द्रः।) मानसरोगविशेषः।
तल्लक्षणं यथा,—
"यथा त्रिदशजन्येव यातां दैवतं च
सहितेन त्रिपता चैतद् त्रिदिवो दशयोतम्।
त्रिविधुरितनिविष्ट मोमूर्च्छावसानम्।
समास्वेदयन्त्रैव आमदृष्टयम् यथा।
भयसादिविमोहास्वादोनावलीव्यवसायम्।
प्रत्येकं सर्वं पश्चि रामगति च ज्ञानम्"।
इति मात्स्ये १९९ अध्यायः। ७। तत्र उन्मत्ता निदानः। तत्र उन्मादस्य निर्दिष्टानि।
"मदयन्तुरसना लोका वसाहुन्मादविकरा।
मानवोऽनुमतो वाधिकरणार इति कीर्तितः"।
चरकः। यस्मात्मोहका मदश्च दोषा- उन्मादंसाधिका मदयन्ति चित्त विविधान्- लिङ्गं। कथोऽनुप्रमाद इति कौर्तिकम्। च उन्मत्ता मानवो व्याधि मनोरोगकारणात्। यत्नेनाथसामर्थेन नामामुद्यनात्। न चाप्यत- यतो मत्यस्य निवर्ति च। च उन्मादकारणे पठितः। ७। उन्मादस्य विप्रकर्षनिरापमाद।
"विपदद्रुमसदृशिनोन्मादि
मदनं देवपरिपानात्।
उन्मादरोगुपरमरूर्णा
मनोऽभिघाती विषमाच वेगम्"।
दुष्टं यथाप्रीमादिविधिवत्। चापि रुचकादि

सृष्टम्। प्रधर्षणमभिभवः। विषमाश्च चेष्टाः मलवदियश्चादयः ॥ * ॥ सन्निकृष्टं निदानमाह।

"एकैकशः सर्व्वशश्च दोषैरत्यर्थमूर्च्छितैः।
मानसेन च दुःखेन स पञ्चविध उच्यते ॥
विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजम्" ॥ * ॥

तस्य सम्प्राप्तिमाह।

"तैरल्पसत्त्वस्य मलाः प्रदुष्टा
बुद्धेर्निवासं हृदयं प्रदूष्य।
स्रोतांस्यधिष्ठाय मनोवहानि
प्रमोहयन्त्याशु नरस्य चेतः" ॥

अल्पसत्त्वस्य अल्पसत्त्वगुणस्य। मलाः वातादयः। बुद्धेर्निवासं हृदयं प्रदूष्येति। एतेनाश्रयस्य दुष्ट्या तदाश्रिताया बुद्धेरपि दुष्टिरुक्ता। मनोवहानि स्रोतांसि हृदयाश्रितानि दश। एतानि विशेषतो बोद्धव्यानि। यतस्त्वकेवलं सकलशरीरस्रोतांस्येव मनोऽधिष्ठानत्वेनोक्तानि। प्रमोहयन्ति विकृतं कुर्व्वन्ति ॥ * ॥

उन्मादस्य सामान्यं रूपमाह।

"धीविभ्रमः सत्त्वपरिप्लवश्च
पर्य्याकुला दृष्टिरधीरता च।
अबद्धवाक्त्वं हृदयञ्च शून्यं
सामान्यमुन्मादगदस्य लिङ्गम्" ॥

धीविभ्रमः शुक्तिकायां रजतज्ञानम्। सत्त्वपरिप्लवः सत्त्वं मनस्तस्य चाञ्चल्यम्। अबद्धवाक्त्वं असम्बद्धभाषितम्। शून्यं सर्व्वशून्यम् ॥ * ॥

वातिकोन्मादस्य निदानपूर्व्विकां सम्प्राप्तिमाह।

"रूक्षाल्पशीतान्नविरेकधातु-
क्षयोपवासैरनिलोऽतिवृद्धः।
चिन्तादिदुष्टं हृदयं प्रदूष्य
बुद्धिं स्मृतिं चाप्युपहन्ति शीघ्रम्" ॥

प्रदूष्य प्रकर्षेण दूषयित्वा ॥ * ॥

तस्यैव रूपमाह।

"अस्थानहासस्मितनृत्यगीत-
वागङ्गविक्षेपणरोदनानि।
पारुष्यकार्श्यारुणवर्णताश्च
जीर्णे बलञ्चानिलजस्य रूपम्" ॥

अस्थाने अनवसरे। हास्यादीनि रोदनान्तानि। जीर्णे आहारे। बलं व्याधेः ॥ * ॥

पैत्तिकस्य निदानपूर्व्विकां सम्प्राप्तिमाह।

"अजीर्णकट्वम्लविदाह्यशीतै-
र्भोज्यैश्चितं पित्तमुदीर्णवेगम्।
उन्मादमत्युग्रमनात्मकस्य
हृदि स्थितं पूर्व्ववदाशु कुर्य्यात्" ॥

हृदि स्थितं पित्तं चितं सञ्चितम्। पुनः अजीर्णकट्वम्लविदाह्यशीतैर्भोज्यैरुदीर्णवेगं सत् उन्मादं कुर्य्यात् पूर्व्ववत् हृदयं प्रदूष्य इत्यर्थः ॥ * ॥

तस्य रूपमाह।

"अमर्षसंरम्भविनग्नभावाः
सन्तर्जनाभिद्रवणौष्ण्यरोषाः।
प्रच्छायशीतान्नजलाभिलाषाः
पीता च भाः पित्तकृतस्य लिङ्गम्" ॥

अमर्षोऽसहिष्णुता। संरम्भः आरभटी आडम्बरइति यावत्। सन्तर्जनं परभासनम्। अभिद्रवणं पलायनम्। औष्ण्यं गात्रे। रोषो दाहविशेषः। प्रच्छाय इत्यादि छायायां शीतयोरन्नजलयोरभिलाषः ॥ * ॥

श्लैष्मिकस्य निदानपूर्व्विकां सम्प्राप्तिमाह।

"सम्पूरणैर्मन्दविचेष्टितस्य
सोष्मा कफो मर्म्मणि संप्रवृद्धः।
बुद्धिं स्मृतिं चाप्युपहन्ति चित्तं
प्रमोहयन् सञ्जनयेद्विकारम्" ॥

सम्पूरणैर्भोजनादिभिः। मन्दविचेष्टितस्य व्यायामरहितस्य। सोष्मा कफ इति कफोऽप्युन्मादं करिष्यन् पित्तं सहायमपेक्षते व्याधिस्वभावात्। मर्म्मणि यत्र मर्म्मशब्देन हृदयमुच्यते। विकारमुन्मादरूपम् ॥ * ॥

तस्य रूपमाह।

"वाक्चेष्टितं मन्दमरोचकश्च
नारीविविक्तप्रियता च निद्रा।
छर्द्दिश्च लाला च बलञ्च भुक्ते
नखादिशौक्ल्यञ्च कफात्मके स्यात्" ॥

वाक्चेष्टितं मन्दं वचनमल्पम्। नारीविविक्तप्रियता नारीप्रियता विजनप्रियता च। भुक्ते सति बलं व्याधेः ॥ * ॥

सान्निपातिकस्य निदानपूर्व्वकं लक्षणमाह।

"यः सन्निपातप्रभवोऽतिघोरः
सर्व्वैः समस्तैः स तु हेतुभिः स्यात्।
सर्व्वाणि रूपाणि बिभर्त्ति तादृ-
ग्विरुद्धभैषज्यविधिर्व्विवर्ज्यः" ॥

स सान्निपातिक उन्मादः। सन्निपातप्रभवत्वेनैव सर्व्वात्मकत्वं लब्धम्। पुनः सर्व्वैरिति यत्कृतं तद्रजस्तमःप्रापणार्थम्। तेन रजस्तमोभिर्मिलितैरित्यर्थः। तेन वातादयो रजस्तमोभिर्गुणैर्दोषैर्म्मिलिता। समस्तैरेव निदानैः कुपिता उन्मादं जनयन्ति। सर्व्वैर्हेतुभिः समस्तैर्म्मिलितैः स्यात्। यतोऽन्यो व्याधिः सर्व्वैर्हेतुभिर्मिलितैरेव भवतीति नियमो नास्ति। अयन्तु व्याधिप्रभावात् सर्व्वैर्हेतुभिर्म्मिलितैः स्यात्। तादृगुन्मादः विरुद्धभैषज्यविधिः। विरुद्धभैषज्यविधिरिति कोऽर्थः। त्रिदोषजे प्रत्येकं वातादिप्रत्यनीका कार्य्या। सा च परस्परविरोधिनी त्रिदोषं हन्ति किञ्चिदेव त्र्यम्लामलकादि यथाम्नायौगिकम्। अतएव विवर्ज्यो न चिकित्स्य इत्यर्थः ॥ * ॥

मनोदुःखजस्य विप्रकृष्टं निदानमाह।

"चौरैर्नरेन्द्रपुरुषैररिभिस्तथान्यै-
र्व्वित्रासितस्य धनबान्धवसंक्षयाद्वा।
गाढं क्षते मनसि च प्रियया रिरंसो-
र्जायेत चोत्कटतरो मनसो विकारः" ॥

अन्यैर्हिंस्रादिभिः। गाढमतिशयेन। क्षते अभिहते। प्रियया प्राप्तुमशक्यया रिरंसोः पुरुषस्य विकारः उन्मादरूपः ॥ * ॥

तस्य रूपमाह।

"चित्रं ब्रवीति च मनोऽनुगतं विसंज्ञो
गायत्यथो हसति रोदिति चातिमूढः"।

चित्रमाश्चर्य्यं। मनोऽनुगतं गोप्यमपि। विसंज्ञो विगतज्ञानः। अतीवमूढः अतीवज्ञानशून्यः। अत्र विकल्पो बोद्धव्यः ॥ * ॥

विषजस्य रूपमाह।

"रक्तेक्षणो हतबलेन्द्रियभाः सुदीनः
श्यावाननो विषकृते तु भवेत् परासुः"।

परासुः मृत इव ॥ * ॥

असाध्यमाह।

"अवाङ्मुखस्तून्मुखो वा क्षीणमांसबलो नरः।
जागरूको ह्यसन्देहमुन्मादेन विनश्यति" ॥ * ॥

अथ देवादिग्रहजोन्मादस्य सामान्यलक्षणमाह।

"अमर्त्यवाग्विक्रमवीर्य्यचेष्टो
ज्ञानादिविज्ञानबलादियुक्तः।
उन्मादकालो नियतस्य यस्य
देवादिजन्मा स मनोविकारः" ॥

अमर्त्यवाग्विक्रमवीर्य्यचेष्टः न मर्त्यस्येव मनुष्यस्येव वागादयो यत्र सः। विक्रमः पराक्रमः। वीर्य्यं शौर्य्यम्। ज्ञानादिविज्ञानबलादियुक्तः। ज्ञानं बुद्धिः। आदिपदेन तद्भेदा मेधा-विचारणा-स्मृत्यादयो गृह्यन्ते। विज्ञानं शिल्पादिविषयकं ज्ञानम्। चेष्टा पाटवम्। आदिपदेनाभिमानादि गृह्यते। नियतः वक्ष्यमाणतिथ्यादिभिः। मनोविकारः उन्मादः ॥ * ॥

तत्र देवाविष्टस्य लक्षणमाह।

"सन्तुष्टः शुचिरतिदिव्यमाल्यगन्धो
निस्तन्द्रोऽवितथसंस्कृतप्रभाषी।
तेजस्वी स्थिरनयनो वरप्रदाता
ब्रह्मण्यो भवति नरः स देवजुष्टः" ॥

अतिदिव्यमाल्यगन्धः अतिशयो दिव्यमाल्यस्येव गन्धो यस्य सः। निस्तन्द्रः निद्रारहितः। अवितथं सत्यम्। ब्रह्मण्यः ब्राह्मणभक्तः ॥ * ॥

दैत्याविष्टमाह।

"सस्वेदो द्विजगुरुदेवदोषवक्ता
जिह्माक्षो विगतभयो विमार्गदृष्टिः।
सन्तुष्टो भवति न चान्नपानजातै-
र्दुष्टात्मा भवति स देवशत्रुजुष्टः" ॥

विमार्गदृष्टिः कुमार्गरतः। दुष्टात्मा दुष्टस्वभावः।

गन्धर्व्वाविष्टमाह।

"हृष्टात्मा पुलिनवनान्तरोपसेवी
स्वाचारः प्रियपरिगीतगन्धमाल्यः।
नृत्यन् वै प्रहसति चारु चाल्पशब्दं
गन्धर्व्वग्रहपरिपीड़ितो मनुष्यः" ॥

हृष्टात्मा हृष्टजीवात्मा। पुलिनं तोयोत्थितं तटम्। वनान्तरं वनमध्यम्। तयोः सेवी। स्वाचारः अनिन्दिताचारः। प्रियाणि परि समन्ततो भावेन गीतगन्धमाल्यानि यस्य स तथा। चारुचाल्पशब्दमिति हसनक्रियाया विशेषणम् ॥ * ॥

यक्षाविष्टमाह।

"ताम्राक्षः प्रियतनुरक्तवस्त्रधारी
गम्भीरो द्रुतगतिरल्पवाक् सहिष्णुः।
तेजस्वी वदति च किं ददामि कस्मै
यो यक्षग्रहपरिपीड़ितो मनुष्यः" ॥ * ॥

पिण्डादिक्रमाह ।
"पैतामां च विशति वरारेषु पिब्बाम्
द्राक्षसमा मधुमति धारणाक्षरा ।
मालाचुतिश्मश्रुयमालाभिधाम
अङ्कुशो भवति सिध्मयाभिधा" ।
पैतायां मत्ताणां पिबताम् । विशति रमति ।
धारकाक्षरा इतिमक्षराणायेत्यर्थः । ।

मालादिक्रमाह ।
"चतुर्मुखं भवति वर्धयन् धरातिन्
धनयो मुकति विक्रमावधीति ।
कोषानुर्बुधमनुमपायधीषु-
रिवैक च बहु सम्भृषेण युक्ता" ।
धनवति वर्धयन् धरस्य चयति । धनयो बोध
मान्यो । * ।

राजवादिक्रमाह ।
"मांसावशुचिविषदरातिकार्येषु
विवेक्षो मयमविनिद्रुपोऽसिनृत ।
कोषानुर्मितवतो विज्ञाविचारी
क्षोचविद् भवति स राजवेर्मदीक्षा" ।
चतिनिद्रयोऽतिनिर्दयः । * ।

मधुराक्षयादिक्रमाह ।
"देविमित्रदेशो वैरवैराद्रिदुधि ।
काम्यमीद्याचरोऽधिको मधुराक्षयदेविता" ।
धविक्ष धविताधीक । ।

शिवाचादिक्रमाह ।
"परस्य प्रणयतो विचक्षमाणी
पूर्वेन्द्रो भामनश्चिदाचारविवेक ।
मत्यादी विशयतामर्वोपयेती
धावेद्यम् क्षमति वरम् शिवाचयुक्ता" ।
परस्य मत्त । शिवम् इति निरेशवचनात् ।
प्रभा सिमता । परतो ब्रह्म । धधिशीत वर्त्ते
स्थित् ध्यायमाने शेतुपा । धावेदम् शिवक्षमावि
क्षम् । प्रता शिबा बोधा पूनाचे माह्यि । चत
स्थोकम् ।
'चतुर्थि शिवमस्वीरं धर्व या भवि धाक्षम् ।
सिंहधिवाविशराणे धमावार्धमवानि या" । * ।

अन शिववे मत्तीयस्य चक्रमाह ।
"कूलायो गुणमता कवेषामी
शिवाशु भवति च बाभ्यते च वैद्धवि ।
वधाविनिदिवामाविनिषुषा धाव
बेऽव्यायो भवति तथा चयोरधेऽम्बे ।"
दचादीनादि दा धर्मादिपविदा धम् धरिवर्धव
इयर्थ । धारिनमेन निविमाधाराचेत मखाले ।
चयोरस्तेऽमे वर्ण चर दैरादिनदरिरोऽवाह्य । ।

दैरादिमावदक्रमचमाह ।
"दैववता यौजमाश्चमहता समुद्दोरपि ।
प्रम्पो माश्चोत्थो यसाव प्रविपदति ।
विवर्त प्रयवरे च वष्मानादि चोरमा ।
रथविहाया रामौ च चतुरम्बा विवादि हि" ।
प्रवरे चमादाम् । प्रमादरवरामादि ।
विर्जनिचापचोरर्थ चयाव प्रम जिनौ धवि-
दानार्थव । * । चनु वदि दैरादसो निर्माण वदा

निश्चये रमन्ते वर्ण पेचम बाह ।
"रमबादीन् वधा दाका बीवेदांमाविनो यथा ।
धर्मार्थं माश्चरावित्र वधा दैवच दैवतम ।
विमन्ति च च रमन्ते मयाचारसृरीरियम्" ।
रमबादीन्मादिशब्देनाम्बरति निर्मेचवावर्ध म-
मये । काका प्रतिविम्बम् । धर्मार्थं धर्ममविम् ।
दैवतम् पीताम्बा । । ।

चयोम्मादस्य निविक्ता ।
"वातिवि चेमधार्थ माक विदिमा विचक्षमरे ।
कमये वमव धायं मते चत्वादिवाधम
चयोवदेवाने विविवदमादि विविविलम् ।
पम्मादि बच मत्वर्ध सामान्याचोमहूचयो ।
मवादिश्रमोदैन्यो निमित्तेषाव वं वदा ।
रचेत्तुभवरिन वमात् चपा मामवरा चि वे" ।
वे मवारमा । ।
'माद्वीकुमन्थीपवधरूपमाशा मधुरम्भिकाधरमा ।
मुदा चम्मारबक रवमेदे कुसुमवमिता" ।
चच माद्वीति पर माद्वीकारणवरम् । कुमाची
पर्ण दरीपवरम् । मधूमबे तु वजावचानेव ।
वेमाश्चर्या । वरमीचरववोरा । भूरमपूर्व
मात्वा २ मबमाचा प येवा । रचेवो बोवा ।
योवयबे वीम्बपूर्वमाला २ मूरमपूर्वमाला २
मवना वंगीवादवेवम् । विदेमो वेवा । मधु
मदीवचवपूर्वमाला २ भूरमपूर्वमाला २ मधु
माचवेचम् । दमीवो बोवा । मधुदर्मीचरव
बोरा । भूरमपूर्वमाला २ मधुमाला ८ पेवा ।
चतुर्ववोवा । ।
"विक्रार्वयो विद् मवावस्त्रो विरतव च ।
मत्रिका निपया मोवा वक्षीमव् वटनिवम् ।
वनाजावि विपवच विदीयो रमीवनम् ।
वषमूषेव विहोऽभ्यमवा धाममन्नवम् ।
मधमावेमवेव धामुददेन तथा ।
चपमारविपोन्मादक्षमाचयीमरायवम् ।
पूतेम्बच नव वमित रामचारे च मवचे ।
वविरेवेन वंचिव चवोमूत चपार्थवम्" ।
विक्रार्पवादि । ।
"मूत्रादिक्षविनाशम रविविवरसबाबि च ।
मध्ये धर्मवचेयाह रवेत्तुरमुमावरी ।
वविचमावथा वर्णोवदेवमचे चूबित् ।
चक्षामिवाव्येचं वा दवम विमने मधौ ।
वर्ग्योवकरकेन रंटे विचेतैनेच वं ।
माचवेचधरतेव दर्भिनवदेवचा ।
चपमा रामवचा पविर्वाना दर्वचवम् ।
माचवेवर्वदेवं वन्वेचयो चवाचमा ।
देवदुवनवेयो हि चवा माववर्व मवत् ।
बवचाम्म प्रम धाविवमंगो विवव मवा ।
दचमवविपाचेन मवो दम्पाविवचके ।
प्रम मवदूचवाभा चाम्मामाचे प्रमं चवेत् । ।
मूमर्थ विच चार्य दचा मधुचरोतिषी ।
विदैविम्य चरवम वीर्यं मौराप चवचमा ।
मोमूचविदोविच वविभौवाजने विवा ।
वन्मुम्मारनमपवारं वथा चानुर्वर्व मवम्" ।

भुजगावक्रमम् । * ।
"कुसमधवने मदयावमोरे
दे मीरवे भीति वधूमि वाम ।
मधूव्यापमी च चमायमूपि
वर्णे वमापाय यधा विपूर्वे ।
माद्वीरवेशाविवचेव धार्य
वारपम वन्याविरं दि पूर्णम् ।
चपमामार्थं मधमा हवेन
विक्रादारा धव विवापि वावद् ।
धारवर्धमिदं पूर्वं प्रयचा निर्मितं दरा ।
दिवाय धर्मयोवामा पूर्वोचार्य विविधवम् ।
रमपावचवक देवं मूविम्मेवा इति चमि ।
वम्बाचि धविवादिवा मवर्धोचवेवरम्" ।
मधूव्यापमी भधूवी इति वेवे । चरवर्ष
पूर्वम् । * ।
"विवायमेवारमगीदवेवयोपा-
मधाबमृदमववोमूदमीदवायाम् ।
पूर्वं मपावचमवे विरदा वर्जवि-
वीरदेवता निरवति चायेन मधे" ।
विवाचर्पूर्वम् । * ।
"दावे विवूविवि विक्रा मधूमोरमधुर्व चवम् ।
पावयेर्य पचवंचयेव धामविवि धाम ।
रचमूवी यथा राज वाचादिविवचा यथा ।
मूर्भो मवावरी वैवि धावेषु भ्रूवी पवद् ।
दवे धावे दर्व मवादर्व मवविना चवेत् ।
धम्बीवमोर्वधाममाचरे मम्बर दम धवेत् ।
विवाय विमवा चौम्बी देवार्वचाशुचम् ।
विवापचा रम्मवे दे विवकु धारिवारम् ।
वीचोवचेवाममिवपवचीवदिमचेवरम् ।
विवरं प्राविपवी च कुदं चम्मरचवे ।
धावीवपर्व दरवी माम्बीकुवर्व चवम् ।
पपार्विविविवि वम्बोविवे चर्वमिचो पवद् ।
चतुर्मुख मव रमा विवेम्बादिवपेवयम् ।
मवाचेववमावेदं वर्वयेवोविवादवम् ।
चपचारे मवेम्मारे मम्बोऽपी मरपाम्बो ।
वामदवे मविवाये चोवे चार्यो प्रविवचे ।
मूवचवे वदिमूचे विवचापिवदेन च ।
वागुस्मवे वधा चवद्रा विवे मेवे मदीप्रि च ।
देवादिवचविवादि मधुरामामेवचाम् ।
वर्व वमिवाय वम्बाया चववमर्वचपरम् ।
चवपीपावरचोर्ध वर्चमवविवारमम् ।
चवि चर्म वर्द मूवो वेवाधामिवविपरम्" ।
पविवादी चविमवीवि योवे चविवा इवि च ।
मवाधिवं रमम् । * ।

चथ दैवादिवमयनिविचा ।
"मूवामधुवादिवोममवान्नपावीविवि ।
चवेरामधुमारं वचावििवि मुविविधम् ।
मवामविविवमूप्रामधुवोरोपवानम् ।
चम्बर्ध वम देवाविप्रयोमारवदं मवम्" ।
मवायमनम् । * ।
"चरवमधुवचोमवि प्रवचो मदर्व वचा ।
विधु मूवय मचम मूयचव मवोचवेत् ।

एतेन शाम्यति क्षिप्रं बलवानपि यो ग्रहः” ।
अथ लोमादिधूपः ॥ * ॥
“कल्याणकञ्च युञ्जीत महद्वा चैतसं घृतम् ।
तैलं नारायणं चापि महानारायणं तथा ॥
भूते पिशाचादन्येषु प्रतिकूलं न चाचरेत् ।
रोगिणं भिषजं यस्ते क्रुद्धा घ्नन्त्युन्मदिष्णवः” ॥
इत्युन्मादाधिकारः । इति भावप्रकाशः ॥
(आत्रेय उवाच ॥
“अथ मानसको व्याधिरुन्माद इति कीर्त्तितः ।
प्रमत्ता ऊर्द्ध्वगा दोषा ऊर्द्ध्वं गच्छन्त्यमार्गताम् ॥
उन्मादो नाम दोषोऽयं कष्टसाध्यो भिषग्वरैः ।
सोऽपि पृथग्विधैर्दोषैर्द्वन्द्वजोऽन्यः प्रकीर्त्तितः ।
अथान्यः सन्निपातेन त्रिधा भवति चापरः ॥
अशुचिविपथशून्यागारकेऽरण्यमध्ये
समयगहनवीथीदेवतागारके च ।
अथ कथमपि भीत्या शङ्कया खिन्नचेत-
स्त्विव मनसमार्गं त्वाज्यमुन्मार्गयेति ॥
चिन्ताव्यथासुभयधर्मविमर्षलोभात्
देवातिथिद्विजनरेन्द्रगुरोर्विमानात् ।
प्रेमाधिकाद्युवजनादपि विप्रयोगात्
उन्मादहेतुं च त्वया कथितं वरिष्ठैः ॥
तत्र गायति वा रौति विलपन् पठते यदा ।
लोलयेच्छर्दते वापि कम्पते प्लवते तथा ॥
धावते हसते चैव तथा जिह्वां विनश्यति ।
नरो वा भ्रमतेऽत्यर्थं पश्येद्गगनमथातुरः ॥
तस्यापस्मारकं कर्म कर्त्तव्यं भिषगवरैः ।
विशेषेण भूतविद्यां मध्ये वक्ष्यामि चायत” ॥
इति महर्ष्यात्रेयभाषिते हारीतोत्तरे तृतीय-
स्थाने उन्मादनिदाननामा विंशोऽध्यायः ॥
अस्य सम्प्राप्तिसहित-निदानलक्षण-चिकित्सिता-
न्याह वाग्भटः ॥
“उन्मादाः षट् पृथग्दोषनिचयाधिविषोद्भवाः ।
उन्मादो नाम मनसो दोषैरुन्मार्गगैर्मदः ॥
शारीरमानसैर्दुष्टैरहितादन्नपानतः ।
विकृतासात्म्यसमलाद्विषमादुपयोगतः ॥
विषमस्याल्पसत्त्वस्य व्याधिवेगसमुद्भ्रमात् ।
क्षीणस्य चेष्टावैषम्यात् पूज्यपूजाव्यतिक्रमात् ॥
आधिभिश्चित्तविभ्रंशाद्विषेणोपविषेण च ।
एभिर्विहीनसत्त्वस्य हृदि दोषाः प्रदूषिताः ॥
धियो विधाय कालुष्यं हत्वा मार्गान् मनोवहान्
उन्मादं कुर्वते तेन धीविज्ञानस्मृतिविभ्रमात् ॥
देहो दुःखसुखभ्रष्टो भ्रष्टसारथिवद्रथः ।
भ्रमत्यचिन्तितारम्भम्”—
वातादिभेदेन लक्षणं यथा ॥
“तत्र वातात् कृशाङ्गता ॥
अस्थाने रोदनाक्रोशहसितस्मितनर्त्तनम् ।
गीतवादित्रवागङ्गविक्षेपास्फोटनानि च ॥
असाम्ना वेणुवीणादिशब्दानुकरणं मुहुः ।
आस्यात् फेनागमोऽजस्रमटनं बहुभाषिता ॥
अलङ्कारोऽनलङ्कारैरयानैर्गमनोद्यमः ।
गृद्धिरभ्यवहार्य्येषु तल्लाभे चावमानता ॥
उत्पिण्डितारुणाक्षित्वं जीर्णे चान्ने गदोद्भवः ॥ १ ॥
पित्तात् सन्तर्ज्जनं क्रोधो मुष्टिलोष्टाद्यभिद्रवः ।
शीतच्छायोदकाकाङ्क्षा नग्नत्वं पीतवर्णता ।
असत्यज्वलनज्वालातारकादीपदर्शनम् ॥ २ ॥
कफादरोचकश्छर्द्दिरल्पेहाहारवाक्यता ।
स्त्रीकामता रहः प्रीतिर्लालासिङ्घाणकस्रुतिः ॥
बैभत्स्यं शौचविद्वेषो निद्राश्वयथुराननें ।
उन्मादो बलवान् रात्रौ भुक्तमात्रे च जायते ॥ ३ ॥
सर्व्वायतनसंस्थानसन्निपाते तदात्मकम् ।
उन्मादं दारुणं विद्यात् तं भिषक् परिवर्ज्जयेत् ॥ ४ ॥
धनकान्तादिनाशेन दुःसहेनाभिषङ्गवान् ।
पाण्डुर्दीनो मुहुर्मुह्यन् हाहेति परिदेवते ॥
रोदित्यकस्मान् म्रियते तद्गुणान् बहु मन्यते ।
शोकक्लिष्टमना ध्यायन् जागरूको विचेष्टते ॥ ५ ॥
विषेण श्यावबदनो नष्टच्छायाबलेन्द्रियः ।
वेगान्तरेऽपि संभ्रान्तो रक्ताक्षस्तं विवर्जयेत्” ॥ ६ ॥
चिकित्सा यथा ॥
“अथानिलज उन्मादे स्नेहपानं प्रयोजयेत् ।
पूर्व्वमावृतमार्गे तु सस्नेहं मृदुशोधनम् ॥
कफपित्तभवेऽप्यादौ वमनं सविरेचनम् ।
तथास्य शुद्धदेहस्य प्रसादं लभते मनः ॥
इत्थमप्यनुवृत्तौ तु तीक्ष्णं नावनमञ्जनम् ।
घर्षणाश्वासनोद्भासभयताडनतर्ज्जनम् ॥
अभ्यङ्गोद्वर्त्तनालेपधूमान् पानञ्च सर्पिषः ।
युञ्ज्यात्तानि हि शुद्धस्य नयन्ति प्रकृतिं मनः” ॥ ७ ॥
“द्वौ प्रस्थौ स्वरसाद्ब्राह्म्या घृतप्रस्थञ्च साधितम् ॥
व्योषश्यामात्रिवृद्दन्तीशङ्खपुष्पीनृपद्रुमैः ।
ससप्तलाकृमिहरैः कल्कितैरक्षसम्मितैः ॥
पलवृद्ध्या प्रयुञ्जीत परं मात्राचतुष्पलम् ।
उन्मादकुष्ठापस्मारहरं वन्ध्यासुतप्रदम् ॥
वाक्स्वरस्मृतिमेधाकृद्धन्यं ब्राह्मीघृतं स्मृतम्” ॥
इति ब्राह्मीघृतम् ॥ * ॥
“वरा विशाला भद्रैला देवदार्व्वेलबालुकैः ।
द्विसारिवा द्विरजनी द्विस्थिरा फलिनी नतैः ॥
बृहतीकुष्ठमञ्जिष्ठानागकेशरदाडिमैः ।
वेल्लतालीशपत्रैलामालतीमुकुलोत्पलैः ॥
सदन्तीपद्मकहिमैः कर्षांशैः सर्पिषः पचेत् ।
प्रस्थं भूतग्रहोन्मादकासापस्मारपाप्मसु ॥
पाण्डुकण्डुविषे शोषे मोहे मेहे गरे ज्वरे ।
अरेतस्यप्रजसि वा दैवोपहतचेतसि ॥
अमेधसि स्खलद्वाचि स्मृतिकामेऽल्पपावके ।
बल्यं मङ्गल्यमायुष्यं कान्तिसौभाग्यपुष्टिदम् ॥
कल्याणकमिदं सर्पिः श्रेष्ठं पुंसवनेषु च” ॥
इति कल्याणघृतम् ॥ * ॥
“एभ्यो द्विसारिवादीनि जले पक्त्वैकविंशतिम् ।
रसे तस्मिन् पचेत्सर्पिर्गृष्टिक्षीरं चतुर्गुणम् ॥
वीराद्विमेदाकाकोलीकपिकच्छूविषाणिभिः ।
शूर्पपर्णीयुतैरेतन्महाकल्याणकं परम् ॥
बृंहणं सन्निपातघ्नं पूर्व्वस्मादधिकं गुणैः” ॥
इति महाकल्याणघृतम् ॥ * ॥
“जटिला पूतना केशी चारटी मर्कटी वचा ॥
त्रायमाणा जया वीरा चोरकः कटुरोहिणी ।
कायस्था शूकरीच्छत्रा अतिच्छत्रा पलङ्कषा ॥
महापुरुषदन्ता च वयस्था नाकुलीद्वयम् ।
कटम्भरा वृश्चिकाली शालिपर्णी च तैर्घृतम् ॥
सिद्धं चातुर्थिकोन्मादग्रहापस्मारनाशनम् ।
महापैशाचकं नाम घृतमेतद्यथामृतम् ॥
बुद्धिमेधास्मृतिकरं बालानाञ्चाङ्गवर्द्धनम्” ॥
इति महापैशाचकघृतम् ॥ * ॥
“अवपीडाश्च विविधाः सर्षपाः स्नेहसंयुताः ।
कटुतैलेन चाभ्यङ्गो ध्मापयेच्चास्य तद्रजः ॥
सहिङ्गुस्तीक्ष्णधूमश्च सूत्रस्थानोदितो हितः ॥ * ॥
शृगालशल्यकोलूकजलूकावृषवस्तजैः ॥
मूत्रपित्तशकृल्लोमनखचर्म्मभिराचरेत् ।
धूपधूमाञ्जनाभ्यङ्गप्रदेहपरिषेचनम् ॥
धूपयेत् सततञ्चैनं श्वगोमत्स्यैश्च पूतिभिः ।
वातश्लेष्मात्मके प्रायः पैत्तिके तु प्रशस्यते ॥
तिक्तकं जीवनीयञ्च सर्पिः स्नेहश्च मिश्रकः ।
शिशिराण्यन्नपानानि मधुराणि लघूनि च ॥
विध्येच्छिरां यथोक्तां वा तस्य मेद्यामिषस्य वा ।
निवाते शाययेदेव मुच्यते मतिविभ्रमात्” ॥
“भूतानुबन्धमीक्षेत प्रोक्तालिङ्गाधिकाकृतिम् ॥
यद्युन्मादे ततः कुर्य्याद्भूतनिर्दिष्टमौषधम् ।
बलिञ्च दद्यात् पललं यावकं सक्तुपिण्डिकाम् ॥
स्निग्धं मधुरमाहारं तण्डुलान् रुधिरोक्षितान् ।
पक्वामकानि मांसानि सुरामैरेयमासवम् ॥
अतिमुक्तस्य पुष्पाणि जात्याः सप्तच्छदस्य च ।
चतुष्पथे गवां तीर्थे नदीनां सङ्गमेषु च ॥
निवृत्तामिषमद्यो यो हिताशी प्रयतः शुचिः ।
निजागन्तुभिरुन्मादैः सत्त्ववान्न स युज्यते ॥
प्रसाद इन्द्रियार्थानां बुद्ध्यात्ममनसान्तथा ।
धातूनां प्रकृतिस्थत्वं विगतोन्मादलक्षणम्” ॥ * ॥
इति वाग्भटे उत्तरस्थाने सप्तमोऽध्यायः ॥
अस्य सनिदानसम्प्राप्तिर्यथा ।
“इह खलु पञ्चोन्मादा भवन्ति । तद्यथा,—
वातपित्तकफसन्निपातागन्तुनिमित्तास्तत्र दोष-
निमित्ताश्चत्वारः ।
पुरुषाणामेवंविधानां क्षिप्रमभिनिर्वर्त्तन्ते तद्यथा,
“भीरूणामुपक्लिष्टसत्त्वानामुत्सन्नदोषाणाञ्च
मलविकृतोपहितानि अनुचितान्याहारजातानि
वैषम्ययुक्तेनोपयोगविधिनोपयुञ्जानानां तन्त्रप्रयोग
वा विषममाचरतामन्या वा चेष्टां विषमां समा-
चरतामत्युपक्षीणदेहानाञ्च व्याधिवेगसमुद्भ्रमि-
तानामुपहतमनसां वा काम-क्रोध-लोभ-हर्ष-भय-
शोक-चिन्तोद्वेगादिभिः पुनरभिघाताभ्याहतानां
वा मनस्युपहते बुद्धौ च प्रचलितायामभ्युदीर्णाः
दोषाः प्रकुपिताः हृदयमुपसृत्य मनोवहानि
स्रोतांस्यावृत्य जनयन्त्युन्मादम् । उन्मादं पुनर्मनो-
बुद्धि-संज्ञा-ज्ञान-स्मृति भक्ति-शील-चेष्टाचार-
विभ्रमं विद्यात्” ॥
तस्येमानि पूर्व्वरूपाणि । तद्यथा,—
“शिरसः शून्यभावः चक्षुषोः व्याकुलता स्वनः कर्ण-
योरुच्छ्वासस्याधिक्यमास्यसंस्रवणमनन्नाभिलाषो-
ऽरोचकाविपाकौ हृदयग्रहो ध्यानायास-सम्मो-
होद्वेगाश्चास्थाने सततं लोमहर्षो ज्वरश्चाभीक्ष्ण-

[illegible]

[illegible]

[illegible]

सत्त्व-वल-रूप गर्व्व शौर्य्य युक्त माल्यानुलेपन हास्यप्रियमतिवाक्करञ्च प्राय शुक्लोत्कादस्ता सप्तम्याञ्च यक्ता ,स्वाध्याय तपोनियमोपवासव्रतचर्य्या-देव-यति-गुरु पूजारति भ्रष्टशौच व्राह्मणमव्राह्मण वा व्रह्मवादिन शूरमानिन देवतागार-सलिल-क्रीड़नरति प्राय शुक्लायचम्या पूर्णचन्द्रदर्शने च व्रह्मराक्षसाः, रक्ष पिशाचास्तु हीनसत्त्व-पिशुन-स्त्रैन-लुब्ध प्रायो द्वितीयातृतीयाष्टमीषु पुरुष छिद्रमवेक्ष्याभिधर्षयन्तीत्यपरिसंख्येयाना ग्रहाणामाविष्कृततमा ह्यष्टावेते व्याख्याता" ॥

अथ ये असाध्यास्तेषा लक्षणानि यथा ।

"सर्व्वेष्वपि तु खल्वेषु यो हस्तावुद्यम्य रोष-सरम्भो निःशङ्कमन्येष्वात्मनि वा पातयेत् स ह्यसाध्यो ज्ञेयस्तथा साश्रुनेत्रो मेढ्रप्रवृत्तरक्त स्तवजिह्वः प्रस्रुतनासिकश्छिद्यमानमर्म्मा प्रतिहन्यमानपाणि सतत विकूजन् दुर्व्वर्णस्तृषार्त्त पूतिगन्धिश्च हिसार्थी उन्मत्तो ज्ञेयस्त परिवर्ज्जयेत । रत्यर्च्चनाकामोन्मादिनौ तु भिषगभिप्रायाचाराभ्या वुद्ध्वा तदङ्गोपहारवलिश्रमेण मन्त्रभैषज्यविधिनोप क्रमेत्" ॥

अस्य चिकित्सा यथा ।

"लशुनाना शत त्रिंशदभयाञ्च्यूषणात्पलम् ।
गवा चर्म्मसमी प्रस्थो द्वाढ़क चौरमूत्रयोः ॥
पुराणसर्पिष प्रस्थमेभिः सिद्ध प्रयोजयेत् ।
हिङ्गुचूर्णं पल शीते दत्त्वा च मधुमाणिकाम् ॥
तद्दोषागन्तुसम्भूतानुन्मादान् विषमज्वरान् ।
अपस्माराश्च हन्त्याशु मानाभ्यञ्जननावनै" ॥

लशुनाद्य घृतम् ॥ * ॥

"विशेषत पुराणञ्च घृत त पाययेद्भिषक् ।
त्रिदोषघ्न पवित्रत्वाद्विशेषाद्ग्रहमोचणम् ॥
गुणकर्म्माधिक स्वानादास्वादात् कटुतिक्तकम् ।
उग्रगन्ध पुराण स्याद्दशवर्षस्थित घृतम् ॥
लाक्षारसनिभ शीत तद्धि सर्व्वग्रहापहम् ।
मेध्य विरेचनेष्वग्र्य प्रपुराणमत परम् ॥
नाषाध्य नाम तस्यास्ति यत्स्यात् वर्षशत स्थितम् ।
दृष्ट स्पृष्टमथाघ्रात तद्धि सर्व्वग्रहापहम् ॥
अपस्मारग्रहोन्मादवता शस्त विशेषत" ॥
"एतैरौषधवर्गैर्व्वा विधेयत्व स गच्छति ।
अञ्जनोन्मादनालेपान्नावनादींश्च योजयेत् ॥
शिरीषो मधुक हिङ्गु लशुन तगर वचाम् ।
कष्ठञ्च वस्तमूत्रेण पिष्ट स्यान्नावनाञ्जनम्" ॥

इति नस्याञ्जनम् ॥ * ॥

"प्रसेके पीनसे गन्धैर्धूमवर्त्ति कृताम्पिवेत् ।
वैरेचनिकधूमोक्ते श्वेताद्यैर्व्वासहिङ्गुभि" ॥

इति धूमपानम् ॥ * ॥ [शिराम् ।

"मस्तके प्रान्तसन्धौ वा मोचयेत्कुशलो भिषक्
उन्मादे विषमे चैव ज्वरेऽपस्मार एव च" ॥
"कामशोकभयक्रोधहर्षेर्य्यालोभसम्भवान् ।
परस्परप्रतिद्वन्द्वैरेभिरेव शम नयेत्" ॥
"देवर्षिपितृगन्धर्व्वैरुन्मत्तस्य तु वुद्धिमान् ।
वर्ज्जयेदञ्जनादीनि तीक्ष्णानि क्रूरकर्म्म च ।
सर्पिःपानादि तस्येह मृदुभैषज्यमाचरेत् ।
पूजा वल्युपहाराश्च मन्त्राञ्जनविधींस्तथा ॥
शान्तिकर्म्मेष्टिहोमाश्च जपस्वस्त्ययनानि च ।
वेदोक्तान् नियमाश्चापि प्रायश्चित्तानि चाचरेत् ॥
भूतानामधिप देवमीश्वर जगत प्रभुम् ।
पूजयन् प्रयतो नित्य जयत्युन्मादज भयम् ॥
रुद्रस्य प्रमथा नाम गणा लोके चरन्ति ये ।
तेषा पूजाञ्च कुर्व्वाण उन्मादेभ्यो विमुच्यते" ॥

इति च चरके चिकित्सास्थाने चतुर्द्दशोऽध्याय ॥

अस्य विशिष्टपूर्व्वरूप यथा ।

"मोहोद्वेगौ स्वन श्रोत्रे गात्राणामपकर्षणम् ।
अत्युत्साहोऽरुचिश्चान्ने स्वप्ने कलुषभोजनम् ॥
वायुनोन्मथनञ्चापि भ्रमश्च क्रमतस्तथा ।
यस्य स्यादचिरेणैवमुन्माद सोऽधिगच्छति" ॥

वातजादिभेदेन रूपाणि यथा ॥

"रूक्षच्छवि परुषवाक् धमनीततो वा
श्वासातुर कृशतनु स्फुरिताङ्गसन्धि ।
आस्फोटयन् पठति गायति नृत्यशीलो
विक्रोशति भ्रमति चाप्यनिलप्रकोपात् ॥ १ ॥
तृट्स्वेददाहवहुलो वहुभुग्विनिद्र-
श्छायाहिमानिलजलान्तविहारसेवी ।
तीक्ष्णो हिमाम्बुनिचयेऽपि स वह्निशङ्की
पित्ताद्दिवा नभसि पश्यति तारकाश्च ॥ २ ॥
छर्द्द्यग्निसादसदनारुचिकासयुक्तो
योषिद्विविक्तरतिरल्पमतिप्रचार ।
निद्रापरोऽल्पकथनोऽल्पभुगुष्णसेवी
रात्रौ भृश भवति चापि कफप्रकोपात् ॥ ३ ॥
सर्व्वात्मके त्रिभिरपि व्यतिमिश्रितानि
रूपाणि वातकफपित्तकृतानि विद्यात् ।
सम्पूर्णलक्षणमसाध्यमुदाहरन्ति
सर्व्वात्मक क्वचिदपि प्रवदन्ति साध्यम्" ॥ ४ ॥

अपरयोर्लक्षणानि प्रथमतोऽस्योक्तानि ।

अस्य चिकित्सा यथा ।

"स्निग्ध खिन्नन्तु मनुजमुन्मादार्त्त विशोधयेत् ।
तीक्ष्णैरुभयतो भागै शिरसश्च विरेचन ॥
विविधैरवपीडैश्च सर्षपस्नेहसयुतैः ।
योजयित्वा च तच्चूर्णं घ्राणे नस्यन्तु योजयेत् ॥
सतत धूपयेच्चैन श्वगोमासै सुपूतिभि ।
सर्षपाणाञ्च तैलेन नस्याभ्यङ्गौ हितौ सदा ॥
दर्शयेदद्भुतान्यस्य वदेन्नाश प्रियस्य च ।
भीषाकारैर्नरैर्नागैर्दान्तैर्व्यालैश्च निर्विषै ॥
भीषयेत् सतत पाशै कशाभिर्व्वाथ ताड़येत् ।
यन्त्रयित्वा सुगुप्त वा त्रासयेत्तृणवह्निना ॥
प्रतुदेदारयेच्चैन मर्म्माघात विवर्ज्जयेत् ।
सापिधाने जरत्कूपे सतत वा निवासयेत्" ॥
"वर्हिष्ठकुष्ठमञ्जिष्ठाकटुकैलानिशाद्वये ।
तेनेद त्रिफलाहिङ्गुवाजिगन्धामरद्रुमैः ॥
वचाजमोदाकाकोलीमेदामधुकपद्मकै ।
सशर्कर हित सर्पिः पक्व चीरचतुर्गुणम् ॥
वालाना ग्रहजुष्टाना पुसा दुष्टाल्पमेधसाम् ।
स्यात फलघृत स्त्रीणा वन्ध्यानाञ्चाशु गर्भदम्" ।

इति फलघृतम् ॥ * ॥

"उरोऽपाङ्गललाटेषु शिराश्चास्य विमोचयेत् ।
अपस्मारक्रियाञ्चापि ग्रहोद्दिष्टाञ्च कारयेत् ।
शान्तदोष विशुद्धञ्च स्नेहवस्तिभिराचरेत् ॥
शोकशल्य व्यपनयेदुन्मादे पञ्चमे भिषक् ।
उन्मादेषु च सर्व्वेषु कुर्य्याच्चित्तप्रसादनम् ॥
मृदुपूर्व्वं मदेऽप्येव क्रिया विद्वान् प्रयोजयेत् ।
विषजे मृदुपूर्व्वाञ्च विषघ्नीं कारयेत् क्रियाम्" ॥

इति सुश्रुते उत्तरतन्त्रे द्विषष्टितमोऽध्याय ॥ * ॥

"तपासि तीव्राणि तथैव दान
व्रतानि धर्म्मो नियमश्च सत्यम् ।
गुणास्तथाष्टावपि तेषु नित्या
व्यस्ता समस्ताश्च यथाप्रभावम् ॥
न ते मनुष्ये सह सविशन्ति
न वा मनुष्यान् क्वचिदाविशन्ति ।
ये वा विशन्तीति वदन्ति मोहात्
ते भूतविद्याविषयादपोह्याः ॥
तेषा ग्रहाणा परिचारका ये
कोटीसहस्रायुतपद्मसङ्ख्या ।
असृग्वसामासभुज सुभीमा
निशाविहाराश्च तमाविशन्ति" ॥
"निशाचराणा तेषा हि ये देवगणसस्थिता ।
ते तु तत्सत्त्वससर्गाद्विज्ञेयास्तु तदञ्जनाः ॥
देवग्रहा इति पुन प्रोच्यन्ते शुचयश्च ये ।
देववच्च नमस्यन्ते प्रार्थ्यन्ते च देववत् ॥
स्वामिशीलक्रियाचाराः क्रमश्च सुरादिषु ।
नैर्ऋतैतेषा दुष्टितरस्तासा स प्रभव स्मृत ॥
सत्यलादप्रवृत्तेषु वृत्तिस्तेषा गणे कृता ।
हिंसाविहारा ये केचिद्दिव्य भावमुपाश्रिता ॥
भूतानीति कृता सज्ञा तेषा सज्ञाप्रवक्तृभि ।
ग्रहसज्ञाभिभूतानि यस्माद्वेत्त्यनया भिषक् ॥
विद्यया भूतविद्यात्वमतएव निरुच्यते ।
तेषा शान्त्यर्थमन्विच्छन् वैद्यस्तु सुसमाहित ॥
जप्यै सनियमैर्होमैरारभेत चिकित्सितम् ।
रत्नानि गन्धमाल्यानि वीजानि मधुसर्पिषाम् ॥
भक्ष्याश्च सर्व्वे सर्व्वेषा सामान्यो विधिरुच्यते ।
वस्त्राणि मद्यमासानि चीराणि रुधिराणि च ॥
यानि तेषा यथेष्टानि तानि तेभ्य प्रदापयेत् ।
हिनस्ति मनुजान् येषु प्रायशो दिवसेषु च ॥
दिनेषु तेषु देयानि तद्भूतविनिवृत्तये ।
देवग्रहे देवगृहे जुहोति प्राशयेद्वलिम् ॥
कुशस्वस्तिकपूपाज्यच्छत्रपायससम्भृतम् ।
असुराय यथाकाल विदध्याच्चत्वरादिषु ॥
चतुष्पथे राक्षसस्य भीमेषु गहनेषु वा ।
शून्यागारे पिशाचस्य तीव्रं वलिमुपाहरेत् ॥
पूर्व्वमाचरितैर्मन्त्रैर्भूतविद्यादिदर्शितै ।
न शक्या वलिभिर्जेतु योगैस्तान् समुपाचरेत्" ॥
"नक्तमालफल योष मूल शोणाकविल्वयो ।
हरिद्रे च कृतावर्त्तिं मूत्रैर्नयनाञ्जनम्" ॥
"न चायक्त प्रयुञ्जीत प्रयोग देवताग्रहे ।
ऋते पिशाचादन्येषु प्रतिकूल न चाचरेत् ॥
वैद्यातुरौ निहन्युस्ते भुव क्रुद्धा महौजस ।
हिताहितविधानञ्च नित्यमेव समाचरेत् ॥
तत प्राप्स्यति सिद्धिञ्च यशश्च विपुल भिषक्" ॥

इति च सुश्रुते उत्तरतन्त्रे षष्टितमोऽध्यायः ॥ * ॥
"ध्यानाभ्यासारम्भण मुक्ता भाति सर्वं तमम् ।
उन्मत्तोऽचिन्त्यं सर्वं भावं सर्वं समन्वितम् ॥
तुल्यं दद्यात्तु पुरुषमिश्रितेन विचक्षणम् ।
यथामां बलमाप्य प्रतिपद्य सर्वोऽपितम् ।
मधुराद्यमिषतमोदुग्धेनापि निःसरेद्वैद्य ।
दिनान्ते विधिवत् क्षमा यथा सम्पूर्णे पचेत् ।
ध्रुवमतो रसो नाम विर्य मुद्गाद्यं विचरन् ।
धान्यस्य रसेनापि भूतोन्मादपनायनम् ।
निम्बस्यार्द्धं पिबेत्तु रसमूलकमापनम् ।
बेरवेत् मधुगुप्ता च वीतमसुम्भव सम्वेत् ।
मादिरस्य एवं चीरं सर्वोन्मादे मनवेत् ।
अपस्मारे मधुवेन शिरो भूतपुरो रसः" ।
इति भूतभैरवो रसः ॥ * ॥ उन्मादभञ्जिनीवटी यथा ।
"तुल्यं मनःशिलापूर्वं वेमर्द मधुरोपिनी ।
यथा शिरोधरीयमिव शिशुस्य मेघसर्वंसम् ।
कस्तुरीप विमलु सर्वं मारायणस्य च ।
तथापि समभागानि गोमूत्रेणाष्टिका कुरु ।
शिरिमसाहीनमकलं कारयम्भाव कारयेत् ।
मायात्माधिभागाये मधुनोऽर्द्धं दिनम् ।
मधुना दिवसे चाल्यं रात्रौ चैव भवेत च ।
वटिकेयं समाख्याता नाम्ना चोन्मादभञ्जिनी ।
चातुर्थकादमारस्य सर्वोन्मादविनाशिनी" ।
इति वैद्यकरसेन्द्रसारसंग्रहे उन्मादाधिकारे ।

अथ यमानि यथा ।

"पेषो दिरेयो ममनस्य पूर्णं
मनमाप्यमुपिनकलो धूयेतु ।
तथा परं गतिविधिस्य पथम्
सन्नर्मने वाङ्मनकामनय ॥ १ ॥
चाचात्मकचापथकमापि
मनानि दत्तानि च सर्वमानि ।
भूतो तमो विवर्द्ध मरेता
शिराम्बक गन्धमनय वेक्ष ॥ २ ॥
आयमयक्षोदि च भूमपायं
धीवेर्दमयापविनेयगापि ।
अन्यद्भूयं कारणमाकस्य
विनाहनीनत्यनुवेषनापि ॥ ३ ॥
मोधूमदूषप्रमाण्य
चारोमधुन्नं मधुवीतवर्ति ।
एवं यदोषष दरामनय
चूर्णीमिदं समरेखा रसायनम् ॥ ४ ॥
प्रदलकुमुमाष्ट्यवर्णं पठोषं
मधीरवं रात्रुकमकधीतम् ।
सरायमूर्च्च मममम्मुपना
दूरनयूर्वेऽपि च नादिरेयम् ॥ ५ ॥
माञ्चनपतिबं सनवर्ष वैदे
दिनमुम्मारबरेयं पथम्" ॥ ६ ॥
"भूतादमुमकाभावोपतिश्रमो रामेरिकमननिदा
दरां चपकरणं भवति विमला यमहूतो महत्तम् ।
पापविदविदयानमागतिसंग्रीवयोगवरं
भूतानमुचरविनयवं मौसिनगरवम् ॥ ७ ॥
ये च भवति सूताथ प्रमपाकथं यमाराधं

दैवानामपूजनपच समवेदुन्मादमात्मनुतम्" ॥ * ॥

अपथ्यानि यथा ।

"मद्यं विरुद्धाशनमुष्णमोदनं
विमार्गमश्मद्गुरुपैत्तिकारकम् ।
जलावगाहमाद्यपथ्य कठिनं
मांसानि मत्स्यमभ्यादि सर्वथा ।
निद्रादि दिनी च विमल् समाचिते
दुन्मादरोगोपचयेषु वर्जितम्" ।
इति वैद्यकपथ्यापथ्यविधौ उन्मादाधिकारे ॥)
चौमुखलम्पापादिकारिकापोविस्मोचकयुक्त
विनाविनतववाचापार । इति रत्नमञ्जरी ।
(अविचारितमायभेदः । यथा, शाकुन्तले
१ । १९९ ।
"गीतश्रुवोन्मादयाय प्रवृत्तिनिवर्तिता चा-
हिलाल्यमतपच्या" । इति । चच यथच चीरः
चरक्माय वर्षे १ । ११५ ।
"चित्तप्रमोह उन्मादः कामशोकभयादिभिः ।
वचानशब्दपरितम्भिमकमादिजम्" ।
उदाहरणम् ।
"मातरिदेव ! भवता समता समन्तात्
प्रामाधिका विकलता मम सीदिया किम् ?
प्रभुभ्रातामुतभूय बाष्पम्—
"भूपे विमोहिदि वर्षे ! वचनात् तन्मे
किं चिं वपचदि कुर्वोऽपि च वीसृतोऽयम्" ॥)
उन्मादः, त्रि (उत् + मद + घञ् ।) उन्मादरोग-
युक्तः । क्षिप्तः । उन्मत्तः । इत्यमरटीकायां भरत-
क्षेमः । पागल इति भाषा ।
उन्मादनः, पुं, (उन्मादयत्येन इति । उत् + मद +
णिच् + ल्युट्) कामदेवस्य पञ्चबाणान्तर्गतबाण-
विशेषः । इति त्रिकाण्डशेषः ।
उन्मादवान्, त्रि (उन्मादो विद्यते यस्य । उन्माद
+ मतुप् । मस्य वः ।) उन्मादरोगविशिष्टः ।
उन्मत्तः । इत्यमरः ।
उन्मानं, क्ली, (उत् + मा + ल्युट् ।) तोलपरिमाणम् ।
इति वैद्यकपरिभाषा ।
("उन्मानस्य च तो परिमितौ यस्यार्द्धवर्द्धितः" ।
इति पूर्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम् ।
"न तत् तथाच मानो यस्कूमानमेव च" ।
इति तत्रैवाध्याये शारीऽध्याये चरकेणोक्तम् ॥)
उन्मिषितः, त्रि, (उत् + मिष + क्त ।) प्रफुल्लः ।
विकसितः । इति हेमचन्द्रः । यथा कुमारे ।
"तत्रोपरसुरिन्दिवेन्दुसमके
महाबलाक्रान्तर क्षिप्ता चरणम् । ५ । २८ ।
उन्मीलनं क्ली, (उत् + मील + ल्युट् ।) उन्मेषः ।
इति हेमचन्द्रः । चक्षुर्मेलन इति भाषा । विकाशः ।
("अनामविधिविधावेन लोकस्य तु विवेकतः ।
वालयशमपत्वाविर्जनोन्मीलनकारकः" ।
इति महाभारते । १ । १ । ८० ॥)
उन्मीलितः त्रि (उत् + मील + क्त ।) विकसितः ।
प्रकाशितः । इति शब्दचुक्रः । ("उन्मीलितं
तूलिकयेव चित्रम् । इति कुमारे । १ । ३२ ।
"ये सोन्मीलितनयनोत्पलयुतमना मोहं गरवा

चिताः" । इति कादम्बर्यां १म परिच्छेदे ॥)
उन्मुखः, त्रि, (ऊर्द्ध्वं मुखं यस्य ।) ऊर्द्ध्वमुखः । उद्-
ग्रीवः । उत्सुकः २ । इति हेमचन्द्रः ।
("मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः" ।
इति रघुः १ । ३९ ।) उत्सुकः । यथा कुमारे ।३।५४
"तस्मिन् मवमिमामाये भाव परिकरोन्मुखे" ।
"पतिं प्रबोधा प्रभवोन्मुखी स्थिताम्" । इति
रघु । ३ । १२ ।
"पाते मन्दं वहति पवनः विं विदितमुन्मीलि" ।
इति मेघदूते । पूर्वमेघे १० ।
"दृष्टा चक्षे वसनवनं मैथिलोपोन्मुखी वा" ।
इति च मेघदूते उत्तरमेघे ९८ श्लोकः ॥)
उन्मुद्रः, त्रि (उद्गता मुद्रा यस्मात् ।) प्रफुल्लः ।
विकसितः । इति त्रिकाण्डशेषः ।
उन्मूलितं, त्रि, (उत् + मूल + क्त ।) उत्पाटितम् ।
इति हेमचन्द्रः । (यथा रामायणे । ५।८ ।
"धराशुम्मूलितां क्षमा भत्ता भवति मां प्रति" ॥)
उन्मेषः, पुं (उत् + मिष् + घञ् ।) चक्षुरुन्मीलनम् ।
इति हेमचन्द्रः । चक्षु मेला इति भाषा ।
("अपोहापीतिविच्छिन्नविद्धं विद्युदुन्मेषदृष्टिम्" ।
इति मेघदूते उत्तरमेघे २ । स्फुरणम् । यथा,
"अविरतपरिमेयोन्मेषभाज कनीनाः" ।
इति रघुः । ५ । ७४ । विकाशः २ । प्रकोटनम् ।
यथा,—
"दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते" ।
इति कुमारे । २ । ३३ ॥)
उप अ मादिविशमुख्यवर्णाचर्मवर्जवर्गविशेषः ।
उत्साहे । अनुगते । सदाहृतः । अनुकम्पा ।
आधिक्यम् । (यथा भागवते ९।१४। "उप परार्द्धं
हरिर्गृहिता । महाद्वीपविता इत्यर्के ।) हीनः । (यथा
मुग्धबोधे कारके ४। "विशुद्धत्वैर्वे सर्वे द्रा-
मत्र उपाधिकम् ।) सामीप्यम् । (यथा, मुग्धबोधे
समासप्रकरणे ६० । "उपनगरिं उपवनिम् ।
उपनदं । उपनदि ।) सामर्थ्यम् । इति दुर्गा-
दासः । दाक्षिण्यम् । व्याप्तिः । आरक्षः ।
पूजनम् । दोषाख्यानम् । निदर्शनम् । कार्यं
करणम् । दानम् । मारणम् । शक्तिः । विश्वा ।
प्रत्यासन्नम् । भूषा । अत्ययः । इति शब्द-
रत्नावली ।
उपकण्ठं, क्ली, (उपगतः कण्ठम् । कण्ठस्य इति
समासः । उपगतः कण्ठः सामीप्यमत्रेति वा ।)
ग्रामान्तम् । उपशल्यम् । उपकण्ठम् २ । इति त्रि-
काण्डशेषः । सान्निध्यम् । समीपम्
इति हेमचन्द्रः । उपसमीपम् । (यथा, माघे ।
"मेघोदयं मुखरपक्षिणो
रुपमकिरन्मुवितपञ्च" ॥)
उपकण्ठः त्रि, (उपगतः कण्ठः सामीप्यमस्य ।)
निकटः । इत्यमरः । (यथा कुमारे । ७ । ५१ ।
"तस्योपकण्ठे घननीलकण्ठः
कुतूहलादुन्मुखपौरदृष्टः" ॥)
उपकरणं, क्ली, (उप + कृ + ल्युट् ।) प्रधानाङ्गी-
भूतोपकारकवस्तु । तत्पर्यायः चामरादिः ।

तत्पर्य्यायः । परिच्छदः २ परिवर्हः ३ तन्त्रम् ४ । इति हेमचन्द्रः ॥ भोजनादौ व्यञ्जनादि ॥ यथा । "तस्मादन्न प्रधानं पूजादिकन्तु उपकरणत्वेन ग्राह्यानामावश्यकम्" । इति श्राद्धतत्त्वम् ॥ पूजादौ नैवेद्यादि । मृगवन्धनादौ जालादि ॥

उपकार, पु, (उप + कृ + घञ् ।) उपकृतिः । ("उपकारापकारौ हि लक्ष्य लक्षणमेतयोः" । इति माघः । २।३७॥ "कृतोपकारेव रतिर्बभूव" । इति कुमारे । ३ । ७३ ॥) विकीर्णपुष्पादिः । इति हेमचन्द्रो मेदिनी च ॥

उपकारिका, स्त्री, (उपकरोतीति । उप + कृ + ण्वुल् + टाप् + इत्वम् ।) उपकारकर्त्री । पिष्टभेदः । इति मेदिनी ॥ राजसद्म । इत्यमरः ॥ कुसूल । मराथि इति भाषा । इति केचिदाहुरिति भरतः ॥

उपकारी, स्त्री, (उपकारयतीति । उप + कृ + णिच् + अण् + ङीष् ।) राजसद्म । इति भरतधृतद्विरूपकोषः ॥

उपकारी, [न्] त्रि, (उपकरोतीति । उप + कृ + णिनि ।) उपकारविशिष्टः उपकारकर्त्ता । ("उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम्" इति हितोपदेशे मित्रलाभे ॥)

तत्र दानादानविधिर्यथा । हारीतः । अथासद्भ्यदानमसत्यं यच्च दत्त्वा परितप्यते तद्वृथादानमफलं यच्चोपकारिणे ददाति ॥ उपकारिणे यच्च नोपकारिणे । तदितरोपकारिणे तु दद्यात् ।

"मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणे । दीनानाथविशिष्टेभ्यो दत्तन्तु सफलं भवेत्" ॥ इति शुद्धितत्त्वम् ॥ किञ्च ।

"उपकारिषु यः साधुः साधुः स सद्भिरुच्यते । समवृत्तिर्भवात्र त्वं सर्व्वभूतेषु केशव" ॥ इति जैमिनीये आश्वमेधिके पर्व्वणि ११ अध्यायः ॥

उपकार्य्य, त्रि, (उप + कृ + ण्यत् ।) उपकारोचितः । इति मेदिनी ॥

उपकार्य्या, स्त्री, (उपक्रियते इति । उप + कृ + ण्यत् + टाप् ।) राजसद्म । इत्यमरः ॥ (पटभवनम् । यथा, रघौ ५ । ४१ ।

"तस्योपकार्य्यारचितोपचारा
वन्येतरा जानपदोपदाभिः" ॥

"प्रशुश्रुषुः प्रतिविहितोपकार्य्यमार्य्यं, साकेतोपवनमुदारमध्युवास" । इति च १३ । ७९ ।)

कुसूलः । मराथि इति भाषा । इति केचिदाहुरिति भरतः ॥

उपकुञ्चि, स्त्री, (उप + कुञ्च + कि ।) सूक्ष्मकृष्णजीरकः । इति रत्नमाला ॥ (कृष्णजीरकशब्देऽस्य गुणादयो बोध्याः ॥)

उपकुञ्चिका, स्त्री, (उप + कुञ्च + ण्वुल् + टाप् ।) कृष्णजीरकः । सूक्ष्मैला । इत्यमरः ॥ ("कारवी करवी तद्वद्विज्ञेया सोपकुञ्चिका । भक्ष्यव्यञ्जनभोज्येषु विविधेष्ववचारिता" ॥ इति सूत्रस्थाने ४६ अध्याये सुश्रुतेनोक्तम् ॥)

उपकुम्भ, स्त्री, (कुम्भस्य समीपे ।) कुम्भसमीपम् ।

इति व्याकरणम् ॥

उपकुर्व्वाण, पु, (उप + कृ + शानच् ।) ब्रह्मचर्य्यानन्तरं यो गृहस्थो भवति सः । इति पुराणम् ॥ (कृतोपकारः । यथा हितोपदेशे सुहृद्भेदे,— "यतोऽनुपकुर्व्वाणो न कस्यापि उपायनं गृह्णीयात्" ॥)

उपकुल्या, स्त्री, (उपकूलति । कूल सन्ताने वन्धने च । अघ्न्यादि ।) पिप्पली । इत्यमरः ॥ पिपुल इति भाषा । ("कृष्णोपकुल्या मगधी" इति वैद्यकरत्नमाला ॥ "उपकुल्योषणा शौण्डी" इति भावप्रकाशे पूर्व्वखण्डे प्रथमभागे ॥ गुणादिकमस्य पिप्पलीशब्दे ज्ञातव्यम् ॥) (उपगता कुल्यामिति वाक्ये वाच्यलिङ्गः । कृत्रिमसर समीपम् ॥)

उपकूपजलाशयः, पु, (उपकूपं कूपसमीपे यो जलाशयः ।) कूपसमीपे शिलादिनिवद्धमशुपानार्थं कृतकूपोद्धृताम्बुस्थानम् । इत्यमरः ॥

उपक्रन्ता, [ऋ] त्रि, (उप + क्रम + तृच् ।) उपक्रमकर्त्ता । आरम्भकर्त्ता । इति व्याकरणम् ॥

उपक्रम, पु, (उप + क्रम + घञ् । नोदात्तोपदेशस्य इति न वृद्धिः ।) ज्ञात्वारम्भः । ययमस्योपाय अनेनैतत् सिध्यतीति ज्ञात्वा प्रथमारम्भः ॥ उपधा । राज्ञा धर्म्मकामार्थभयैः अमात्यादेर्यत् परीक्षणं भावतत्त्वनिरूपणम् ॥ प्रक्रमः । प्रथमारम्भः । इत्यमरः ॥ विक्रमः । चिकित्सा । इति मेदिनी ॥ पलायनम् । इति हेमचन्द्रः ॥ (उपायः । यथा,— "सामादिभिरुपक्रमैः" । इति मनुः । ७ । १०७ । आरम्भः । यथा,—"रामोपक्रममाचख्यौ रक्षःपरिभवं नवम्" ॥ १२ । ४२ । इति रघुः । "उपक्रम्यते इत्युपक्रमः कर्म्मणि घञ् । रामस्य कर्तुरुपक्रमः रामोपक्रमः रावणादौ उपक्रान्तमित्यर्थः । उपज्ञोपक्रमं तदाचिख्यासायामिति क्लीवत्वम्" । इति तट्टीका ॥)

उपक्रोश, पु, (उप + क्रुश + घञ् ।) निन्दा । इत्यमरः ॥ (यथा, रघुः । २ । ५३ ।

"राज्येन किं तद्विपरीतवृत्तेः
प्राणैरुपक्रोशमलीमसैर्व्वा" ॥)

उपक्रोष्टा [ऋ] पुं, स्त्री, (उप + क्रुश + तृच् ।) गर्द्दभः । इति श्रीभागवतम् ॥ निन्दकः ॥

उपक्षयः, पु, (उप + क्षि + अच् ।) प्रक्षयः । नीवाशब्दः । इत्यमरटीकायां रायमुकुटः ॥

उपक्षेपणधर्म्मः, पु, (उपक्षेपणरूपो धर्म्मः ।) शूद्रस्वामिकान्नस्य पाकार्थं ब्राह्मणगृहे समर्पणम् । इति शुद्धितत्त्वे कल्पतरुः ॥

उपगत, त्रि, (उप + गम् + क्त ।) अङ्गीकृतः । स्वीकृतः ॥ इत्यमरः ॥ (यथा रघौ ९ । १५ ।

"उपगतोऽपि च मण्डलनाभिता-
मनुदितान्यसितातपवारणः" ।) कृतमैथुनः ॥

उपगम, पु, (उप + गम् + अप् ।) अङ्गीकारः । निकटगमनम् । इति मेदिनी ॥ (यथा रघौ ६।६९ ।

"तं प्राप्य सर्व्वावयवानवद्य
व्यावर्त्ततान्योपगमात् कुमारी" ॥)

उपगूहन, क्ली, (उप + गुह + ल्युट् ।) आलिङ्गनम् । इत्यमरः ॥ ("अरम्भकुन्दाद्व्यपगाहन प्र-

इति भागवते १ । ५ । १९ ॥ तथा च साहित्यदर्पणे ६ परिच्छेदे ।

"कृति प्रमाद आनन्द समयोऽप्युपगूहनम्" ॥)

उपग्रह, पु, (उपगृह्यते इति । उप + ग्रह + घञ् ।) वन्दी । इत्यमरः ॥ वंदुयान् इति भाषा । उपयोगः । अनुकूलः । इति मेदिनी ॥ (ग्रहसदृशो ज्योतिः पदार्थभेदः । यथा महाभारते ९ । स्कन्दप्रसूसमागमे २२६ । २ ॥

"ग्रहाः सोपग्रहाश्चैव ऋषयो मातरस्तथा । हुताशनमुखाश्चैव दीप्ताः पारिषदां गणाः" ॥)

उपग्रहण, क्ली, (उप + ग्रह + ल्युट् ।) उपाकरणम् । संस्कारपूर्व्वकश्रुतिग्रहणम् । इत्यमरटीकायां रायमुकुटः ॥ (स्वीकारः । यथा, रामायणे १।४।४ । "वेदोपग्रहणार्थाय तावग्राहयत प्रभुः" । वेदोपवृंहणार्थाय इति पाठान्तरम् ॥)

उपग्राह्य, पु, (उपगृह्यते इति । उप + ग्रह + ण्यत् ।) उपढौकनम् । इत्यमरः ॥ भेटी डालि इत्यादि भाषा ॥

उपघात, पु, (उपहन्यते अनेन । उप + हन + करणे घञ् ।) रोगः । इति राजनिर्घण्टः ॥ (भावे घञ् । विनाशः । यथा,— "तथात्वस्येन्द्रियाणामुपघाते कथं स्मृतिः" । इति भाषापरिच्छेदे । ४८ । अपकारः । "स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च" ॥ इति मनुः । २ । १७९ ॥)

उपघ्न, पु, (उप + हन + क ।) निकटाश्रयः । इत्यमरः ॥ (यथा, रघुः । १४ । १ ।

"छेदादिवोपघ्नतरोर्व्रतत्यौ" ॥)

उपचक्र, पु, (चक्रेण चक्रनाम्ना तुल्यः ।) चक्रवाकपक्षिविशेषः । अस्य मांसगुणाः । लघुत्वम् । रूक्षत्वम् । उष्णवीर्य्यत्वम् । कटुपाकित्वम् । वस्तिमरुच्छ्लेष्महरत्वञ्च । इति राजवल्लभः ॥ ("चकोरैरुपचक्रैश्च पक्षिभिर्जीवजीवकैः" ॥ इति महाभारते ३ भीमसाजगरग्रहणे १७८।७ ॥)

उपचक्षु, [स्] क्ली, (उपगतं चक्षुषोर्दर्शनार्थम् ।) दिव्यचक्षु । चश्मा इति पारस्यभाषा । इति लोकप्रसिद्धम् ॥

उपचय, पु, (उप + चि + अच् ।) वृद्धिः । उन्नतिः । ("स्वशक्त्युपचये केचित् परस्य व्यसने परे" । इति माघः । २ । ५७ । "तत्तेषामस्मत्पुत्राणां नयोपचये भवन्तः प्रमाणम्" । इति हितोपदेशे कथामुखम् ।) लग्नात् तृतीयषष्ठदशमैकादशस्थानानि । इति ज्योतिषम् ॥

उपचरित, त्रि, (उपचर्य्यते स्म । उप + चर + क्त ।) उपासितम् । सेवितम् । इत्यमरः ॥

उपचर्य्या, स्त्री, (उप + चर + क्यप् + टाप् ।) चिकित्सा । इति हलायुधः ॥

उपचाय्य पु, (उपचीयते अग्निरस्मिन् इति । "अग्नौ परिचाय्योपचाय्यसमूह्याः" ३।१।१३१ । इति पाणिनिसूत्रेण निपात्यते । उप + चि + ण्यत् ।) यज्ञाग्निः । इत्यमरः ॥

उपचार, पु, (उप + चर + घञ् ।) लोकोपतिकारः ।

तत्पर्य्यायः। उपचर्य्या २ चिकित्सा ३ सपर्य्या ४ क्रिया ५ निग्रहः ६ प्रतीकारः ७ क्रिया ८ उपक्रमः ९ शमः १०। इति राजनिर्घण्टः। सेवा। ("चक्रे चिरान्नाथविकोपचारम्"। इति रघौ ५। २।) व्यवहारः। ("प्रणयजानितमनोरमोप चारैः"। इति कुमारे ७। ८६।) उत्कोचः। इति हेमचन्द्रः। परस्य राजसत्त्वात् उपचारमात्रम्। यथा कुमारे ७। ८८ "उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः"। "उपचारविधा रात्रौ" इति भट्टे द्वादशसर्गे अष्टमेऽध्याये।)

उपचार्य्यः, पुं, (उप+चर+ण्यत्।) चिकित्सा। इति हेमचन्द्रः।

उपचितः, त्रि, (उपचीयते स्म। उप+चि+क्त।) दिग्धः। समृद्धः। इति त्रिकाण्डशेषः। (यथा रघौ ८ स—सर्गे। "प्रलयस्योपचयोपचित वपुः"।) समाहितः। इति शिवा हेमचन्द्रश्च। चितिकः। सेवायितः वर्द्धितः। इत्यमरः। ("सवाय वासेन।

"प्रवालशोभोपचितमजस्रम् भावयतीति"।)

उपचित्रा स्त्री, (उपगता चित्राम्।) मूषिकपर्णी। इत्यमरः। इन्दुरकाणि इति भाषा। दन्तीवृक्षः। इति राजनिर्घण्टः। (रक्तार्थे यथा,—

"चित्रा दन्ती निकुम्भा स्यादुपचित्रा मुकूलका"। इति वैद्यकरत्नमाला।)

उपजापः, पुं, (उप+जप+घञ्।) भेदः। विश्लेषः। इत्यमरः।

("तेषु तेषु स्थानेषु गणपान् प्रतीक्षमाणाः"। इति दशकुमारे विश्रुतचरिते। यथा च माघे २। ९९।

"उपजापः कृतस्तेन तानाकोपवतस्त्वयि ।)

उपजिह्विका, स्त्री (उपगता जिह्वां यस्याः।) कीटविशेषः। तत्पर्य्यायः। उपदेहिका २ वम्री ३ वल्मीका ४। इति हेमचन्द्रः। आलजिह्वा इति ख्याता च। ("उपजिह्वा जिह्वौ वाक्"।

इति वाग्भटश्च।

"वाग्भटेनोपजिह्वस्तु जिह्वाया उपरि स्थिता"।

इति वाग्भटेनोत्तरस्थाने दशमेऽध्याये उक्तम्।

चिकित्सा यथा।

"उपजिह्वां परिस्राव्य यवक्षारेण घर्षयेत्"।

इति च वाग्भटे उत्तरस्थाने द्वाविंशेऽध्याये उक्तम्।)

उपजिह्विका, स्त्री (उपजिह्वा+स्वार्थे कन्।) उपजिह्वा। आलजिह्व इति भाषा। तत्पर्य्यायः। प्रतिजिह्वा २। इति शब्दचन्द्रिका। (ऋग्वेदे ८। ६१। १३। "सरस्वत्युपजिह्विका उपमा यदि वर्द्धते"।) कीटभेदः। तत्पर्य्यायः। उपदेहिका २ वम्री ३ उपदीका ४ दिही ५। इति शब्दरत्नावली। ("यस्य मेखा मधुचिह्वो मिश्रस्वेदोपजिह्विके। बाह्यं कण्वेन् कोषं मांसेऽप्युपजिह्विका"। इति चरके सूत्रस्थाने १७ अध्याये।

"जिह्वाग्रभवः श्वयथुर्हि जिह्वा-

मुन्नम्य जातः कफरक्तयोनिः।

प्रसेककण्डूपरितापवान्

मध्यमानसमेयमुपजिह्विकेति"।

इति निदानस्थाने मोक्षकोऽध्याये सुश्रुतेनोक्तम्।

अस्य चिकित्सा यथा।

'उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत्।

शिरोविरेचनगण्डूषधूमैश्चैनमुपाचरेत्।

विस्रावणार्थं कर्त्तव्यं वमनं वाग्यतान्वितः"।

इति सुश्रुते चिकित्सितस्थाने २२ अध्याये।)

उपजीविका स्त्री (उपजीव्यतेऽनया। उप+जीव +ण्वुलटापौ। टापि अत इत्वम्।) उप जीवनम्। जीवनोपायः।

उपजोषम् अ, (उपजोषणम्। उप+जुष+अम्।) आनन्दः। इत्यमरः। (यथा, महाभारते १।

"तवोपजोषं सततं भवाप्सीह भारत"।

सुखं। यथा, रामायणे २। ७८। १९।

"आत्मानमुपजोषं च सुखं ह्यास्ते

विनेष्यसि न भयोपजोषम्"।)

उपज्ञा, स्त्री, (उपज्ञायते। ज्ञा अवबोधने। आत उपसर्गे इति कर्म्मणि अङ्।) आद्यज्ञानम्। इत्यमरः। अनुपदिष्टैव प्रथमज्ञानम्। यथा वाल्मीकेः श्लोकनिर्म्माणे ज्ञानम्।

("आद्य प्राचेतसोपज्ञं रामायणमित्यसौ"।

इति रघौ १५। ६३। "शब्दोऽन्यूनप्रयत्नमेव विदुषा पौरुषनमन्वे शब्दा" इति भाष्यकारटीका पुण्यम्।)

उपढौकनं क्ली, (उप+ढौक+ल्युट्।) पारितोषिकद्रव्यम्। भेट डाली इत्यादि भाषा। तत्पर्य्यायः। प्राभृतम् १ प्रदेशनम् २ उपायनम् ३ उपग्राह्यम् ४ उपहारः ५ उपदा ६। इत्यमरः।

उपतप्ता, [ऋ] पुं, (उप+तप्+तृच्।) उपतापक मात्रम्। तत्पर्य्यायः। उष्णो २ उष्म ३। इत्यमरः। उष्मा ४ घर्म्मो ५। इति जटाधरः। रौद्रम्। इति भरतः।

"उपातिष्ठन्महाबाहुः पर्य्यङ्कं सोपसंग्रहम्" ॥)

उपसंग्राह्य, त्रि, (उपसंगृह्यते इति । उप + सम् + ग्रह + ण्यत् ।) उपसंग्रहणीयम् । अभिवाद्यम् । पादे ग्रहीतव्यम् । इति हलायुधः ॥
(यथा मनुः । २ । १३२ ।
"भ्रातुर्भार्य्योपसंग्राह्या सवर्णाऽहन्यहन्यपि" ॥)

उपसंव्यान, क्ली, (उपसंवीयतेऽनेन । उप + सम् + व्ये + करणल्युट् इति ल्युट् ।) परिधानवस्त्रम् । इत्यमरः ॥ (यथा मुग्धबोधे शब्दसंज्ञायाम् ।
"बहिर्य्योगोपसंव्याने" ॥)

उपसंहारः, पु, (उपसंहरणम् । उप + सम् + हृ + घञ् ।) अन्तः । शेषः । यथा ।
"उपक्रमोपसंहारयोः शुभत्वकीर्त्तनाच्च"।
इति सप्तमीप्रकरणे तिथ्यादितत्त्वलिखनम् ॥
(एकत्रीकरणम् । सम्यगाहरणम् ॥)

उपसत्ति, स्त्री, (उप + सद + क्तिन् ।) सङ्गमात्रम् । प्रतिपादनम् । सेवा । इति हेमचन्द्रः ॥

उपसद्, पु, (उप + सद + क्विप् ।) अग्निविशेष । यथा । वह्निपुराणे गणभेदनामाध्याय ॥
"गार्हपत्यो दक्षिणाग्निस्तथैवाहवनीयक ।
एतेऽग्नयस्त्रयो मुख्या शेषाश्चोपसदस्त्रयः" ॥
(स्त्री, यज्ञभेद । आश्वलायने ४ । ८ । १ "अथोपसद्भिः प्रचरति" । इति । समीपस्थिते त्याचष्टिस्म ॥)

उपसदन, क्ली, (सदनस्य गृहस्य समीपे । यद्वा, उप + सद + ल्युट् ।) गृहसमीपम् । (यथा रामायणे १ । ५० । १६ ।
"धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुङ्गव ।
यज्ञोपसदनं ब्रह्मन् प्राप्तोऽसि मुनिभिः सह" ॥
उपसेवनम् । प्राप्ति । यथा, महाभारते वनपर्ब्बणि ।
"तत्रोपसदनं चक्रे द्रौणस्येष्वस्त्रकर्म्मणि" ॥)

उपसन्न, त्रि, (उप + सद + क्त ।) उपगतः । उपस्थितः । इति हेमचन्द्र ॥ (यथा, महाभारते १२ । मोक्षधर्म्मपर्ब्बणि । २८७ । ११ ।
"ब्रवीतु भगवांस्तन्मे उपसन्नोऽस्म्यधीहि भो" ॥)

उपसम्पन्न, त्रि, (उप + सम् + पद + क्त ।) यज्ञार्थहतपशु । तत्पर्य्याय । प्रमीत २ प्रोक्षितः ३ । पाकेन स्वपरसादिसम्पन्नव्यञ्जनादिः । तत्पर्य्याय । प्रणीतः २ । इत्यमर । पर्य्याप्त । संस्कृत । प्राप्तः । मृत । इति हेमचन्द्रः ॥ (यथा, मनु । ५ । ८१ ।
"श्रोत्रिये तूपसम्पन्ने त्रिरात्रमशुचिर्भवेत्" ॥)

उपसरः, पु, (उप + सृ + अप् ।) स्त्रीगव्यादिषु पुङ्गवादीनां प्रथमगर्भाधानाय मैथुनाभियोग । तत्पर्य्यायः । प्रजनः २ । इत्यमरः ॥ (यथा, पाणिनिः ३ । ३ । ७१ । "प्रजने सर्त्तेः" । प्रजनं प्रथमगर्भग्रहणं गवामुपसरः" । निरवच्छेदगमनम् । यथा, भट्टिः । "वीनामुपसरं दृष्ट्वा"। अत्र जयमङ्गलव्याख्या । "वीना उपसरं नैरन्तर्य्येण निर्गमम्" ॥)

उपसर्गः, पु, (उप + सृज् + घञ् ।) रोगभेद । (यथा, सुश्रुते । "क्षीणं पन्नुपसर्गाः प्रभूताः" ।) उपद्रवः । इति मेदिनी ॥ (यथा, मार्कण्डेये ९२ । ७ ।
"उपसर्गानशेषांस्तु महामारीसमुद्भवान्" ।)
धातोः पूर्ब्बवर्त्तिविंशतिसंख्यकप्राद्यव्ययम् । यथा । प्र । परा । अप । सम् । नि । अव । अनु । निर् । दुर् । वि । अधि । सु । उत् । परि । प्रति । अभि । अति । अपि । उप । आङ् । अस्य प्रमाणम् ।
"निपाताश्चादयो ज्ञेयाः उपसर्गास्तु प्रादयः ।
द्योतकत्वात् क्रियायोगे लोकादवगता इमे" ॥
स त्रिधा । "धात्वर्थं बाधते कश्चित्" । यथा आदत्ते । "कश्चित्तमनुवर्त्तते" । यथा प्रसूते । "तमेव विशिनष्ट्यन्यः" । यथा प्रणमति । "उपसर्गगतिस्त्रिधा" । अपि च ।
"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
नीहाराहारसंहारप्रतीहारप्रहारवत्" ॥
इति मुग्धबोधटीकायां दुर्गादास ॥

उपसर्ज्जन, क्ली, (उप + सृज् + ल्युट् ।) प्रधानभिन्नम् । तत्पर्य्यायः । अप्रधानम् २ अप्राग्र्यम् ३ । इत्यमरः ॥
(यथा, मनु ९ । २११ ।
"उपसर्ज्जनं प्रधानस्य धर्म्मतो नोपपद्यते" ॥
(विशेषणम् । त्यागः । उपद्रव । यथा अनध्यायप्रकरणे मनु,—
"निर्घाते भूमिचलने ज्योतिषामुपसर्ज्जने" ॥)

उपसर्पक, त्रि, (उप + सृप् + ण्वुल् ।) उपसर्पणकर्त्ता । उपासक ॥

उपसर्य्या, स्त्री, (उप + सृ + उपसर्य्या काल्या प्रजने इति साधु ।) प्राप्तगर्भग्रहणकाला गौः । ऋतुमती गौः । तत्पर्य्यायः । काल्या २ । इत्यमरः ॥ कालप्राप्ता ३ स्वरता ४ । इति शब्दरत्नावली ॥

उपसार्य्य, त्रि, (उप + सृ + ण्यत् ।) समीपगमनीयः । (यथा, पाणिनि ३ । १ । १०४ । "प्रजने काल्येति किम् उपसार्य्या काशी प्राप्तव्या इत्यर्थः" ॥)

उपसूर्य्यक, क्ली, सूर्य्यमुपगत उपसूर्य्यं स्वार्थे कन् । चन्द्रपक्षे उपसूर्य्यमिव उपसूर्य्यक इवार्थे कन् ॥ चन्द्रसूर्य्यमण्डलम् । इत्यमरः ॥

उपसृष्ट, क्ली, (उपसृज्यते स्म इति । उप + सृज् + क्त ।) मैथुनम् । इति त्रिकाण्डशेषः । उपसर्गयुक्ते त्रि । तथा च याज्ञवल्क्य ।
"तेनोपसृष्टो लभते न राज्यं राजनन्दनः" ॥
(ग्रहोपग्रस्तचन्द्रादि । यथा मनु,
"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन ।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम्" ॥
व्याप्तम् । यथा, रघुः "रोगोपसृष्टतनुदुर्वसतिं मुमुक्षुः" ॥)

उपस्करः, पुं, (उप + कृ + अप् समवाये चेति सुट् ।) व्यञ्जनादिसंस्कारार्थधन्याकसर्षपपिष्टादिः । वेसार वाटना इत्यादि भाषा । तत्पर्य्याय । वेसवार २ । इत्यमरः ॥ (यथा रामायणे । २ । ६५ । ९ ।
"मङ्गलालम्भनीयानि प्राशनीयान्युपस्करान् ।
उपानिन्युस्तथा पुण्याः कुमारीबहुलाः स्त्रियः" ॥)
गृहवासोपकरणम् । तच्च दृषदुपलशूर्पादि । कनककुण्डलहारादि । इति श्रीकृष्णतर्कालङ्कार ॥
तथा च याज्ञवल्क्यः ।
"गृहोपस्करवाह्यानां दोह्याभरणकर्म्मिणाम् ।
मूल्यमष्टन्तु यत्किञ्चित् शुल्कं तत्परिकीर्त्तितम्" ॥
(तथा च मनु । ३ । ६८ ।
"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः" ॥
"सर्व्वोपस्करभेषजः" । इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशोऽध्यायः ॥)

उपस्त्री, स्त्री, (उपमिता स्त्रिया ।) उपपत्नी । ढेमिनी इति भाषा ॥

उपस्थ, पु, (उप + स्था + क ।) लिङ्गम् । भग । क्रोड़ः । इति मेदिनी ॥ ("रथोपस्थ उपाविशत्" । इति गीतायां १ । ४६ ।) गुह्यद्वारम् । इति हेमचन्द्रः ॥ (यथा, मनुः । ८ । १२५ ।
"उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्" ॥)
निकटे त्रि । इति शब्दरत्नावली ॥

उपस्थाता, [ऋ] त्रि (उप समीपे तिष्ठतीति। उप +स्था+तृच्।) भृत्यः। "प्रेष्यो मम उपस्थाता सेवकोऽमिततेजसः"। इति शब्दमाला। (ऋ क्लिबभेदे, पुं।
"विषयमप्युपस्थाता रोगी भारतपुङ्गव।
तुष्यत् पार्थ वैद्यं विकारस्योपशान्तये"।
इति चरके सूत्रस्थाने नवमोऽध्यायः।)

उपस्थित, त्रि, (उप समीपे तिष्ठति स्म। उप+स्था+क्त।) समीपस्थितः। तत्पर्य्यायः। उपगत २ उपगतम्। इति हेमचन्द्रः। (यथा, रघुवंशे २।७४
"उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव यत्"।
"सिद्धसीमारात्र योगक्षेमयुपस्थितात्"।
इति च रघु १। ८१।) भक्त। बोधिका। इति महापदा। (समार्थः। यथा पाणिनि। ६।१।८९।
"अक्षुल्लदुपस्थिते" अत्र सिद्धान्तकौमुदी। "उप स्थितोऽमार्गः"। इति।)

उपस्पर्श, पुं, (उप+स्पृश्+घञ्।) स्पर्शमात्रम् स्नानम्। आचमनम्। इति मेदिनी।

उपस्पर्शन, क्ली, (उप+स्पृश्+ल्युट्।) उपस्पर्शः। इति भरतः। (यथा रामायणे २।९५।२०।
"उपस्पर्शनकाले तु तां दृष्ट्वा रघूत्तम!")

उपस्वत्व, क्ली, (उपगतं स्वत्वम्।) उत्पन्नम्। धनम्। भूम्यादिभूतद्रव्यादिजन्यधनादि।

उपहत, त्रि, (उप+हन्+क्त।) नष्टः। दूषितः। अभिभूतः। ("दारुणस्योपहत एव ... शमम्"। इति किराते। "विभेभिरामोपहता-ममर्थितम्"। इति कुमारे। ५। ४८।)

उपहसित, क्ली,(उप+हस्+क्त।) हास्यभेदः इति। भरतः।(यथा साहित्यदर्पणे ३ परिच्छेदे २१८
"ईषद्गुणां किञ्चित्दर्शिते मध्यमा विहसिताप-हसिते च। नीचानामवहसितं तथाऽतिहसितं च षड्भेदाः। मधुरस्वरं विहसितं सांसशिरःकम्पमवहसितम्। अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितम्" ।) अवहसितमथ उपहसितम् इत्यपि पाठः।

उपहार, पुं, (उप+हृ+घञ्।) उपढौकनम्। तत्पर्य्यायः। प्राभृतम् २ प्रदेशनम् ३ उपायनम् ४ उपग्राह्यः ५ उपदा ६। इत्यमरः। (यथा,— रघौ ७। ६
"रत्नमौलिहारेण महामहोत्सवे पारती"।
"स्वच्छीभ्या वसतिविधिभिर्भक्त्योपहारम्"।
इति मेघदूते पूर्वमेघे ११ श्लोकः। यथा,— कुमारे। ६। ४२।
"स्त्रीणां मतिविभ्रमादि प्राभृतमुपहारयाम्"।
उपहारो नाम इति शास्त्रे शाम्भिकलक्षणम्। यथा,— नैषधे। १।८०।
"उरोभुवा कुम्भयुगेन जृम्भित
नवोपहारेण वयस्कृतेन किम् ।)

उपहारक, पुं, कृष्णचन्दनः। इति हेमचन्द्रः।

उपहास, पुं, (उप+हस्+घञ्।) परीहासः। निन्दापूर्वकहास्यादिः। निन्दुम शङ्का इत्यादि भाषा "उपहासाय किं न स्यात् धनयुक्तो मनीषिणाम्"।

इति मत्स्यपुराणम्। (यथा, रघु। १२। १०।
"भयमस्त्वोपहासस्य तथा प्राप्नवति भाय माम्"।)

उपह्वरं क्ली, (उपह्वरत्यत्र। उप+ह्वृ+अ।) विजनस्थानम्। (यथा कठोपे २।६।२८। "उपह्वरे गिरीणाम् ।) निकटम्। इत्यमरः।
("उन्मादितास्तीर्थगताः समीपोपह्वरम्"।
इति महाभारते।१। कृष्णाध्यायपर्व्वणि ९ प०।
"कर्म्मणाऽयं उपह्वरे देवाम्"। इति हरिवंशे रत्नोपाख्याने ।)

उपह्वर, पुं, (उप+ह्वृ+अ।) रथः। इत्युणादि कोषः। (शब्दमाला। यथा भट्टौ।१। ७०२।
"उपह्वरेषु वर्त्तिष्णं यदि सन् इव भवतः वेन भितवान्"।)

उपांशु पुं, (उपगता अंशवो यत्र।) जपभेदः। इति मेदिनी।
"जिह्वौष्ठौ चालयेत् किञ्चिद्देवतागतमानसः।
निजश्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः"।
इत्यागमः। (न ज्ञेहे आयकिञ्च। यथा महा-भारते।१।१३।२८। "तस्य मेधानुपांशुर्वा वदेत् अपिवत् मान्त्रस्य अविनश्यं अभिसारैस्तु तस्मै रथात्मकम्"।)

उपांशु अ, निर्जनम्। रहः। इत्यमरो मेदिनी च। (यथा, रघु ५।५८ "परिचेतुमुपांशु धारणां कुश-पूतं प्रवयास्तु विष्टरम्"।)

उपाकरणं क्ली, (उपाक्रियतेऽनेन। उप+आ+कृ+ल्युट्।) संस्कारपूर्व्वकवेदग्रहणम्। इत्यमरः। पशूनां संस्कारपूर्व्वकहननम्। इति स्वामी। (यथा, आश्वलायने १। ।५। "उपाकरणकालेऽध्य-यनीय ।)

उपाकर्म्म, [न्] (क्ली,उपाक्रियतेऽनेन। उप+आ+कृ+मनिन्।) उपाकरणम्। इत्यमरटीकायां रायमुकुटः। (यथा मनुः। ४। ११९।
"उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम्"।)

उपाकर्म्म त्रि (उप+आ+कृ+क्त।) उपकृतम्। इति मेदिनी।

उपाकृत, पुं, (उ+आ+कृ+क्त।) यज्ञे अभि-मन्त्र्य हतः पशुः। इत्यमरः।
("अनुपाकृतमांसानि देवान्नानि हवींषि च"।
इति मनुः।) उपकृतः। इति हेमचन्द्रः।

उपाख्यानं, क्ली (उप+आ+ख्या+ल्युट्।) पूर्व्ववृत्तकथनम्। आख्यानम्। वर्णनम्। विशेष कथनम्। यथा,—
"धर्म्मार्थकामं काम यथा सर्व्ववेदप्रमाणम्।
अनुना सौहृदभिक्षापि पुरोपाख्यानवृत्तम्"।
इति महाभारते महाभिषेके ४४ अध्यायः।
"अहं पारए रमामि तवोपाख्यानमुत्तमम्"।
इति च तत्रैव १५ अध्यायः।
("चतुर्विंशतिसाहस्री चक्रे भारतसंहिताम्।
उपाख्यानैर्विना तावत् भारतं प्रोच्यते बुधैः"।
इति महाभारते १।१।१०२।)

उपागम, पुं, (उप+आ+गम्+अप्।) स्वीकारः। निकटगमनम्। इत्यमरः।

उपाग्रहणं स्त्री, (उप+आ+ग्रह्+ल्युट्।) उपा-करणम्। संस्कारपूर्व्वकवेदग्रहणम्। इत्यमर-टीकायां रायमुकुटः।

उपाङ्ग पुं, (उपमितं अङ्गेन।) तिलकम्। इत्य-मरः। तत्पर्य्यायः। समालम्भी २ पत्रलेखा ३ तमालपत्रं ४ चित्रकम् ५ पत्रपाङ्गुलिः ६ पुण्ड्रः ७ समालम्भनम् ८ तिलकम् ९। इति शब्द-रत्नः। (पुराण-न्याय-मीमांसा-धर्म्मशास्त्राणि वेदस्य उपाङ्गानि।)

उपात्तं, त्रि, (उप+आ+दा+क्त।) प्राप्तम्। यथा,
"अयं वैविधवाक्यस्य दुरितस्य प्रयत्नतः।
अनुतापः तथा चान्ये प्रायश्चित्तं प्रयाचते।
निवर्त्तनं तथा चान्ये सकलस्यापि मुक्तिम्"।
इति प्रायश्चित्ततत्त्वधृतमिताक्षरावचनम्।

उपाधा, पुं (उप समीपे धाता।) निम्नपदी। इति शब्दार्थः।

उपात्यय, पुं, (उप+अति+इ+अच्। अत्ययस्य समीपम् अतिक्रमणं वा।) आचारो लोक व्यवहारस्य अतिक्रमः। अतिक्रमः। तयोपाद-नम्। तयोः पर्य्याया। पर्य्यायः २ अतिक्रमः ३। इत्यमरः। (यथा भट्टौ ५।६।२८। "सदा-चारेणापाय वजः"।)

उपादानं क्ली, (उप+आदा+दा+ल्युट्।) स्व-विषयेभ्य इन्द्रियाणां विरतम्। तत्पर्य्यायः। प्रत्याहार २। इत्यमरः। (ग्रहणम्। "आरम्भकोपादान-नात् सत्त्वोपादानमुच्यते"। इति सांख्यकारिकायां १ परिच्छेदे।) हेतुः। इति त्रिकाण्डशेषः। आत्म-मते। समवायिकारणम्। प्रकृतिविकारकारणम्।

उपादेय, त्रि (उप+आ+दा+यत्।) ग्राह्यः। उत्तमः। श्लाघ्यः। इति मेदिनी।
("अभी श्रीमान् विभाति प्रभवन्मुपादेयमुखम्"। इति शान्तिशतके। १। २१।) विशेषणम्। इति सिद्धान्तम्।

उपाधि, पुं (उप+आ+धा+कि।) धर्म्मचिन्ता। कुटुम्बव्यापृतः। इत्यमरः। छद्म। (यथा रामा-यणे २।१११।२८।
"उपाधिन मया कार्य्यो वनवासे जुगुप्सितः"।)
विशेषणम्। इति मेदिनी। ("पदार्थविभक्तो-पाधिमत्त्वम्"। इति मुक्तावली। ४।) भागविशेषम्।
इति शब्दरत्नावली। न्यायमते साध्यव्यापके सति हेतोरव्यापकः। यथा धूमवान् वह्नेरित्यत्र आर्द्रेन्धनसंयोगः उपाधिः। अस्य प्रयोजनम्। व्यभि-चारानुमानम्। अस्य विशेषणं भाषापरिच्छेद-मुक्तावल्यां द्रष्टव्यम्।

उपाध्याय, पुं, (उपेत्य अधीयतेऽस्मात्। उप+ अधि+इ+घञ्।) अध्यापकः। इत्यमरः। वेदै-कदेशाध्यापकः। यथा,—
"एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते"।
इति मनुस्मृतौ २ अध्यायः। मनुः २। १४१ श्लोके चापि च।

उपाध्याया स्त्री, (अधीयतेऽस्याः। इत्यर्थे स्त्रियां चापाधात् स्त्रियमुपगम्यार्थं अध्याय ॥

ङीषिति घञ्। टाप्।) अध्यापिका। विद्योपदेशिनी। इत्यमरः॥

उपाध्यायानी, स्त्री, (उपाध्यायस्य पत्नी॥ "मातुलोपाध्याययोरानुक् वा" इत्यानुक्।) उपाध्यायपत्नी। इत्यमरः॥ (यथा महाभारते १। ३। ९६। "स एवमुक्त उपाध्यायेनोपाध्यायानीमपृच्छत्"॥)

उपाध्यायी, स्त्री, (उपाध्यायस्य पत्नी। आनुगभाव पक्षे ङीष्।) अध्यापकभार्य्या। इत्यमरः॥

उपानत्, [ह्] स्त्री, (उपनह्यते पादावनया। उप+नह्+क्विप्। "नहिवृतिवृषीति"। ६।३।११६। पूर्व्वपदस्य दीर्घः।) चर्म्मादिनिर्म्मितपादकोषः। जुता इति भाषा। तत्पर्य्यायः। पादुका २ पादूः ३। इत्यमरः॥ पादव्यतिरेकेणात्मोपानद्वहननिषेधो यथा,—

"नाक्षैः क्रीडेत् कदाचित्तु स्वयं नोपानहौ वहेत्।
शयनस्थो न भुञ्जीत न पाणिस्थं न चासने"॥

इति मानवे ४। ७४॥ "स्वयं विना कदाचिदपि परिहासेनापि नाक्षादिभिः क्रीडेत्। स्वयमित्यभिधानात् आत्मोपानहौ पादव्यतिरिक्तेन हस्तादिना देशान्तरं न नयेत्। शय्यावस्थितश्च न भुञ्जीत हस्ते च प्रभूतमन्नं कृत्वा क्रमेण न खादेत्। आसने भोजनपात्रं निधाय न भुञ्जीत। इति तट्टीकायां कुल्लूकभट्टः॥ (यथा नैषधे।१।१२३।

"स्तनावद्योरस्य धयाद्युपानहौ"।
"अनारोग्यमनायुष्यं चक्षुर्घ्नं पादघातकृत्।
पादाभ्यामनुपानद्भ्यां सदा चक्रमणं नृणाम्"॥

इति सुश्रुते चिकित्सितस्थाने २४ अध्यायः॥)

उपान्त, त्रि, (उपगतोऽन्तात्।) निकटम्। इति हेमचन्द्रः॥ ("दिशामुपान्तेषु ससर्ज वृष्टिम्"। इति कुमारे ३।६६। "उपान्तवानीरगृहाणि दृष्ट्वा"। इति रघुः।१६।२१। "शय्योपान्तनिविष्टसस्मितसुखी"। इति साहित्यदर्पणे ३य परिच्छेदे॥)

उपायः, पुं, (उपायतेऽनेन। उप+अय+घञ्।) रामादीनां प्रवृत्तिफलहेतुचतुष्टयम्। यथा। साम १ दानम् २ भेद ३ दण्ड। इत्यमरः॥ उपगमः। इति मेदिनी॥ साध्यसम्पादकः। साधनम्। यथा,—

"उपायेन समारब्धाः सर्व्वे सिद्ध्यन्त्युपक्रमाः।
उपायं तस्य येन त्वं धारयेथाः प्रजां नृप"॥

इति वह्निपुराणे पृथूपाख्याननामाध्यायः॥

("उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः"। इति हितोपदेशे। तथा, माघः २।५४।

"चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया"।
"सर्व्वोपायैस्तथा कुर्य्यात् नीतिज्ञः पृथिवीपतिः"।

इति मनुः ७।१७७। चेष्टा। यत्न।

"यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः"।

इति मनुः ८।४८।

"अध्ययनमध्यापनं तद्विद्यासम्भाषेत्युपायाः"।
"उपायः पुनः कार्य्यादीनां सौष्ठवमभिधानं च सम्यक् कार्य्याकार्य्यपक्षानुबन्धवर्ज्जानां कार्य्याणामभिनिर्वर्त्तकः इत्यतोऽभ्युपाय इत्युक्तोपायोऽस्ति न च विद्यते तदात्वे कृताघोत्तरकालं फलं फलञ्चानुबन्ध इति आत दशविधम्"।

इति चरके विमानस्थाने ८ अध्यायः॥)

उपायन क्ली, (उपेयते उपायते वा। उप+इण् वा अय+ल्युट्।) उपहारः। उपढौकनद्रव्यम्। इत्यमरः॥ (यथा, कुमारे। २। ३७।

"तस्योपायनयोग्यानि रत्नानि सरितां पतिः"।)

व्रतादिप्रतिष्ठा। इति स्मृतिः॥ समीपगमनम्॥ (यथा ऋग्वेदे२।२८।२।

"उपायन उषसां गोमतीनाम्"॥)

उपार्ज्जन, क्ली, (उप+अर्ज्ज+ल्युट्।) अर्ज्जनम्। धनाद्याहरणम्। (यथा, रामायणे।५ काण्डे।

"शुश्रूषया सरथानाञ्च कृत्वा सम्यग्गुणार्जनम्"।)
"सत्त्वहेतुभूतव्यापारः"। इति स्मृतिः॥

उपालम्भ, पुं,(उप+आ+लम्+घञ्। "उपसर्गात् खल्घञोः" इति नुम्।) दुर्व्वाक्यम्। इति हेमचन्द्रः॥ स च गुणाविष्करणेन स्तुतिपूर्व्वकः। यथा, महाकुलस्य भवतः किमिदमुचितमिति। निन्दापूर्व्वकश्च। यथा बन्धकीसुतस्य भवतस्तदिदमुचितमिति भागुरिः। इत्यमरटीकासारसुन्दरी॥ ("उपालम्भो नाम हेतोर्दोषवचनं यथापूर्व्वमहेतवो हेत्वाभासा व्याख्याता"। इति चरके विमानस्थाने ८ अध्यायः॥)

उपावृत्त, त्रि, (उप+आ+वृत्+क्त।) श्रमघ्नान्यथ पुनः पुनर्भूमौ लुठिताश्व। इत्यमरः। निवृत्त। तथाचैकादशीतत्त्वे।

"उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह।
उपवासः स विज्ञेयः सर्व्वभोगविवर्ज्जितः"॥

उपासक, पुं, स्त्री, (उपास्ते सेवते य। उप+आस्+ण्वुल्। द्विजातिसेवकत्वादस्य तथात्वम्।) शूद्रः। इति राजनिर्घण्टः॥

उपासक, त्रि, (उपासते इति। उप+आस्+ण्वुल्।) उपासनाकर्त्ता। (यथा, वेदान्ते।

"चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः।
उपासकानां सिद्ध्यर्थं ब्रह्मणो रूपकल्पना"॥)

स च पञ्चविधः। वैष्णवः १ शाक्तः २ शैव ३ सौरः ४ गाणपत्यः ५। त्रिविधश्च यथा। दिव्य १ वीर २ पशु ३। इत्यागमः॥ अपि च। सात्त्विक १ राजसिक २ तामसिकश्च ३॥

उपासङ्ग, पुं, (उपासज्यन्ते शरा यत्र। उप+आङ्+सञ्ज+घञ्।) तूणीरः। इत्यमरः॥ (यथा, महाभारते ४। उत्तरस्य धनुर्दर्शने ४०। ६।

"इमे च कस्य नाराचाः सहस्रं लोमवाहिनः।
समन्तात् कलधौताग्राः उपासङ्गे हिरण्मये"॥)

उपासन, क्ली, (उपास्यन्ते क्षिप्यन्ते शरा यत्र। उप+अस् क्षेपे+अधिकरणे ल्युट्। शुश्रूषादपक्षे आस भावे+ल्युट्।) शराभ्यासः। (यथा रामायणे।२।६७।२१।

"श्रूयते तत्रनिर्घोषः इष्वस्त्राणामुपासने"।)

शुश्रूषा। इत्यमरः॥ ("नित्यनैमित्तिकप्रायश्चित्तोपासनेन"। "उपासनानि शाण्डिल्यविद्यादीनि"। इति च वेदान्तसारे।) विश्वसनम्। इति विश्व॥ आसनम्। इति मेदिनी॥

("मङ्गल्योपासनपरस्त्वष्टिव्यसनापहम्"। इति चक्रपाणिदत्तसन्ग्रहे गुणानां क्रियाभिधानादिवर्गे॥)

उपासना, स्त्री, (उपासनमिति। उप+आस्+युच्+टाप्।) सेवा। तत्पर्य्यायः। वरिवस्या २ शुश्रूषा ३ परिचर्य्या ४ उपासनम् ५। इत्यमरः॥

("न विष्णूपासना नित्या वेदेनोक्ता तु कुत्रचित्।
न विष्णुदीक्षा नित्यास्ति शिवस्यापि तथैव च॥
गायत्र्युपासना नित्या सर्व्ववेदैः समीरिता।
यया विना त्वधःपातो ब्राह्मणस्यास्ति सर्व्वथा॥
तावता कृतकृत्यत्वं नान्यापेक्षा द्विजस्य हि।
गायत्रीमात्रनिष्णातो द्विजो मोक्षमवाप्नुयात्॥
कुर्य्यादन्यन्न वा कुर्य्यात् इति प्राह मनुः स्वयम्।
विहाय तान्तु गायत्रीं विष्णूपास्तिपरायणः॥
शिवोपास्तिरतो विप्रो नरकं याति सर्व्वथा।
तस्मादाद्ययुगे राजन् गायत्रीजपतत्पराः॥
देवीपादाम्बुजरता आसन् सर्व्वे द्विजोत्तमाः"॥

इति श्रीदेवीभागवतम्॥

यद्यपि ईश्वरे न हि तस्य सर्व्वैश्वर्य्यवत्त्वात् सर्व्वतः पूर्णकामत्वाच्च उपासनयाफलमिति वाच्यम्। यतः सर्व्वेषामपि भूतजातानामविदिताभतत्त्वानामपि स्वसोत्पत्त्यादिकारणे यत्किञ्चिल्लेशापि प्रीतिरिति नैसर्गिकी वृत्तिरेव। परं यदि च रजस्तमोभ्यामन्धीभूतानां सुतरामात्मानामविवेकविहीनानामज्ञमनुष्याणामविद्याकामकर्म्मकलुषीकृते चित्ते नित्यशुद्धबुद्धमुक्तस्वभावः प्रज्ञा तथिमलज्योतिःस्वरूपः स सर्व्वभूतान्तरात्मा न सम्यक् प्रतिभाति। तथा च आत्मस्वरूपमजानन्नपि सर्व्वोऽपि जनः स्वमानन्दैव परमप्रीत्यात्मानं भजते नो चेत् कथमात्मज्ञानविमूढोऽपि यत्नेनैव मे श्रेयो भविता यस्मिन् कृतेऽहं सुखी भवेयम् इत्याकारेण सर्व्वथा आत्मसुखोत्पादनाय प्रयतते? तस्य सर्व्वान्तरात्मत्वात् सर्व्वैरपि जीवैः सह नित्यसम्बन्धवत्त्वाच्च। यद्यपि तस्मिन् नित्यानन्दस्वरूपे भगवति परमेश्वरे एकान्तप्रीतिरुचितमेव तदुपासना तथापि सर्व्वजीवानामोक्षप्रदायिन्या धानावरणकारिण्यामविद्यायां सत्यां युतः सा सर्व्वसुखप्रदा तापत्रयच्छेदिनी परमा प्रीतिरनुभवनीया? अतस्तस्या आत्मज्ञानविरोधिन्या मलिनसत्त्वगुणाया रजस्तमःप्रधानाया अविद्यायाः प्रणाशनार्थमेवावश्यमुपासना कर्त्तव्येति सर्व्वेषामपि शास्त्राणां सारमतमिति बोध्यम्। परन्तु स्वस्वदुर्व्वलाद्यधिकारिभेदेन उपासनाया अपि प्रभेद उपदिष्टस्तत्त्वदर्शिभिः। यदि च मनुष्याणां निःश्रेयसार्थं बहव पन्थानः स्वमतानुसारेण पूर्व्वसूरिभिरुपदिष्टास्तत्रापि आत्मध्यानमेवाविद्यानाशनायालमिति वेदान्त-भगवद्गीता-पातञ्जलसाङ्ख्यादिग्रन्थानामास्त्रोपदेशात् प्रधानतममित्येव दृश्यते। वस्तुतस्तु तद्ध्यानमेव मुक्तेः साक्षात्कारणमित्यत्र नैव केषाञ्चिदपि सन्देहावसरः। किन्तु नैव योगाभ्यासादृते प्रायेण तल्लाभ-

योगोत्पत्तिः । विशेषतः श्रीकृष्णोऽपि योगमाहात्म्यस्य सर्वं भगवता पाण्डवैस्तान्प्रतिदिष्टम् । यथा, भगवद्गीतायाम् । ६ । ४५, ४७ ।
“प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥
तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः” ।
तथा च श्रीमद्भागवते । ३ । २८ । ११ ।
“समाहर देवभूतिं प्रति कपिलोक्तिः । यथा,
“योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे ।
अत्यन्तोपरतिर्यत्र दुःखस्य च सुखस्य च” ।
योगाद्यपि क्रियाशक्तिज्ञानादिभेदेन बहुधा सन्ति तत्र प्रथमतः क्रियायोग एव समाधानोपयुक्तत्वादनुष्ठेयः सर्वारम्भसमये समाचरणीयः । ननु “ज्ञानादेव मुक्तिर्नास्ति” । “तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय” । “ज्ञानान्मुक्तिः” । इत्यादौ वर्णं सर्वं क्रियायोग प्रयोजनमेव स्वप्रतिपन्नं ? इति चेत् सत्यम् । किन्तु योगे हि मनसोऽभिनिवेशात्मकत्वेन सात्त्विक राजस तामसादिभेदाद्विभिन्नत्वात् देवतामभिधायिनो हि क्रियायां सर्वत्र गुणानुसारिणी प्रवृत्तिः क्रियाणां श्रौतस्मार्त प्रधानत्वात् तस्मात् अभिमानमोहराग द्वेषादिनिरसनेन सर्वे कर्मणो ज्ञानयोगस्य प्रधानत्वेऽपि ज्ञानलाभहेतुत्वात् क्रियायोगस्य हि सिद्धिः । योऽसौ सर्वेषां गुणानुसारिको भवत्येव सात्त्विकादिभेदेन सन्निबद्धानां चार्थं वा त्रिविधो भेदः स्यात् । यथा भगवद्गीतायाम् । १७ । ३—१३ ।
“सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥
यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥
अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥
कर्शयन्तः शरीरस्थं भूतग्राममचेतसः ।
माञ्चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान् ॥
आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥
आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः । [स्निग्धाः
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥
यातयामं गतरसं पूति पर्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥
अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥
अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते” ॥

“अनुद्वेगकराद्यैरपि न तपसोऽत्र कर्तव्यतापरिहारः” ।
तत्र “अविद्यानां बाह्यविषयसाधनानि समासेन येन चतुर्विधेनास्ति समयोऽधिकरणोऽन्यत्र प्रतिरूपसारितिरोभावात् मतिनाशि अनुजातापि प्रतिविरोधी तत्पापि” । इति स्वामी । यत्नेऽपि स्वर्गम् । यज्ञं समीप मनसीषिमिति भावः । तपसश्चित्तशुद्धिः तदेव तपः क्रियते इत्यर्थः । शास्त्रविहितो न सर्वे एतस्मात् सदा न निष्पादितमर्थं चतुर्मोक्षादि रिति यस्मिन् सर्वे सम् । विधिहीनं शास्त्रोक्त-विधिशून्यम् । अतोऽपि दक्षिणादिरहितमिति । यज्ञोऽपि चेत् यदि योग्योऽत्रानियुक्तानुष्ठेय क्रियायोगस्तस्य सम्यग्बोधनार्थं इति क्रियायामा मुख्या । यथा तत्रैव ।
“तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः” ।
तत्र शास्त्रान्तरोक्तानि चान्द्रायणादि वा तापः प्रायश्चित्तम् तपस्वी तथा । ईश्वरप्रणिधानं सर्वक्रियाणां तस्मिन् परमगुरौ सर्वार्पणं फलसंन्यासम् । एतानि क्रियायोग उच्यते । इति राजमार्त्तण्डः ।
तपस्यात्र सात्त्विकादीति तपसोऽपि शास्त्रात् किन्तु शारीरादि मनान्तरमपि वृष्टये तत्र सात्त्विकादिभेदेन त्रिविधम् । यथा, भगवद्गीतायाम् । १७ । १४—१६ ।
“देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत् ।
स्वाध्यायाभ्यसनञ्चैव वाङ्मयं तप उच्यते ॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते” ॥
एतेषां तपसामपि त्रिगुणानुसारिप्रकारादिभेदेन तपस्योपादानि त्रिविधानि परिकीर्त्तितानि । तत्रैव । १७ । १७—१९ ।
“श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥
सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥
मूढग्राहेणात्मनो यत् पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्” ॥
यदि च सर्वेषां कर्मणां त्यागः कदाचित् क्रियते तर्हि सात्त्विकं भवति तामसोऽयमर्जुनं प्रति भगवत उपदेशः । यथा, तत्रैव । १८ । ३—७ ।
“त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्त्तितः ॥
यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥
नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः ॥
दुःखमित्येव यत् कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥
कार्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः ॥
न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः” ॥
कार्यमिति । कार्यं कर्तव्यं नियतं नित्यमित्यर्थः । यस्मात् न हि देहधारिणामशेषतः कर्मफलत्याग सम्भवेत् यथा तत्रैव । १८ । ११ ।
“न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते” ॥
सर्वं परित्यागादिफलमत्यागिनामेव न हि त्यागिनां कदाचित् भवत्यतः । तत्रैव । १८ । १२ ।
“अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्” ॥
अतः सात्त्विकानां कर्मणां परित्यागस्तथा सम्यक् फलाभिसन्धानत्यागपूर्वकम् ईश्वरार्पणबुद्ध्या वा नियतानि कर्माणि कर्त्तव्यानि सत्त्वशोधनार्थं ज्ञायते । तथा ज्ञानञ्च सात्त्विकराजसतामसभेदेन त्रिविधं भवति । तत्र ज्ञानं त्रिविधम् सात्त्विकादिभेदेन दर्शयति यथा, तत्रैव । १८ । २०—२२ ।
“सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥
पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥
यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम्” ॥
सर्वाणि तेषां गुणभेदेन कर्माण्यपि त्रिविधानि । यथा, तत्र । १८ । २३—२५ ।
“नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत् सात्त्विकमुच्यते ॥
यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥
अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते” ॥
कर्त्तापि त्रिविधः । तत्रैव । १८ । २६—२८ ।
“मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते ॥
रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः ॥
अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते” ॥
एवं यदि कर्मणा हि चित्तशुद्धिः सम्यक् क्रियते तदा ज्ञानं योगश्च । चित्तशुद्धस्य हि ध्याने सम्यक् मनःसमाधानं क्रियाशक्तियोः क्रोधादिवैरस्यात्मनोऽवस्थानम् कालेन नात्र चैतन्यं विषयेषु नैव रमते । क्रियायोग-यमादिनियमाद्यनन्तरमपि कर्माणि सात्त्विकानि मनःस्थैर्यार्थमाचरणीयानि । सर्वकर्मान्तर-कालसमये यथा योगयुक्तो भवेत् । तथा योगं प्राप्य चित्तसंयमो भवेत् ।

अतएव सर्व्वसङ्गलोपायीभूतस्य सत्त्वगुणस्योद्रेकाय दुर्व्वलाधिकारिभिः प्रथमं निष्कामेणान्तःकरणेन क्रियायोगादिरूपेश्वरोपासना कार्य्येति मन्यते न हि सत्त्वभावेन परमेश्वरोपासनामृते रजस्तमोभावा केनापि विनाशयितुं शक्येरन् । तदभावे नितरां विशुद्धसत्त्वगुणोद्रेकाशा सुदूरपराहतैव । प्रबलरजस्तमोभ्यामस्याभिभूतत्वात् । एवं सति सर्व्वत्र सात्त्विकाहारं सात्त्विकानुष्ठानं सात्त्विकाचरणमित्यादिसत्त्वभावाश्रयेण क्रमशः रजस्तमोभावं विनाशयन् कैवल्याकाङ्क्षी परमात्मसाक्षात्काराभिलाषी वा साधकः कालेन परमसिद्धिं ध्रुवमाप्नुयादेव । परन्तु दुर्व्वलाधिकारिणः प्रथमतश्चित्तस्य स्थिरत्वापादनाय काञ्चित् स्वाभीष्टां भागवतीं मूर्त्तिमालम्व्यैवोपासना कर्त्तव्या अन्यथा तेषां सर्व्वरूपाद्युपाधिपरिवर्जिते निर्व्विकारे निरञ्जने गुणातीतेऽवाङ्मनसगोचरे परब्रह्मणि चित्तधारणा विडम्वनैव । परन्त्वित्यत्र न हि ईश्वरोपासनासु पक्षपातीकृत्य कथं पौत्तलिकारूपं प्रतिपादयितुं प्रयतसे इति वाच्यम् महात्मभिर्मुनिभिर्हि पूर्व्वाचार्य्यैर्हि कलुषितचित्तानां दुर्व्वलाधिकारिणाम् चित्तशुद्धौ प्रथमतश्चित्तस्थैर्य्यसम्पादनाय धारणाध्यानावलम्वनरूपायां प्रतिमायामुपासनायाः कर्त्तव्यतयोपदिष्टत्वात् । अयमर्थः यावत् न सत्त्वोद्रेकेण चित्तशुद्धिर्भवेत् यावन्न स्वहृदये निर्गुणपरमात्मधारणया समाधिशक्तिर्भवेत् यावन्न तत्कथादिषु दृढा भक्तिरतिश्च भवेत् तावदर्च्चादौ आदिपदेनात्र सूर्य्ये वह्नौ जले अभीष्टमूर्त्तौ वा उपासना कर्त्तव्येत्यर्थः । परमेवं मा मन्यध्वं यत् केवलं मृच्छिलादिनिर्म्मितप्रतिमूर्त्तिमाश्रित्यैव यावज्जीवं स्थूलोपासना कर्त्तव्येति ॥ “आसत्वशोधनात् क्रमेण स्वहृदये दृढतरधारणाध्यानप्रभावेन आचित्तसमाधानाच्च” । इति कालनिर्द्देशात् । फलतः आदौ नित्याद्यवश्यकर्म्म करणीयमेव । पुरा कर्म्मणैव हि वहव सिद्धिं गताः तथा हि भगवद्गीतायाम् । ३ । १९-२० ॥

“तस्मादसक्तः सततं कार्य्यं कर्म्म समाचर ।
असक्तो ह्याचरन् कर्म्म परमाप्नोति पूरुषः ॥
कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः” ॥

यदा तु रजस्तमोभावानां निवृत्तौ सत्यां वहुजन्मार्ज्जितसौभाग्यवशात् तस्मिन्नेव ऐकान्तिकी रतिरुत्पद्यते तादृशस्यात्मरतेरात्मतृप्तस्य योगिनः न तदा किञ्चिदपि कर्म्मणा प्रयोजनमस्ति यथा तत्रैव । ३ । १७-१८ ॥

“यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्य्यं न विद्यते ॥
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्व्वभूतेषु कश्चिदर्थव्यपाश्रयः” ॥

एवं प्राप्तविद्योऽपि साधारणवत् कर्म्माचरेत् चेत् तत्तु केवलं लोकशिक्षार्थमेव न तु तस्य स्वाभीष्टसिद्धये अविद्याकामकर्म्माद्यभावात् सुखदुःखादिद्वन्द्वनिर्म्मुक्तत्वाच्च । यथा तत्रैव ३ । २१,२५ श्लोके ।

“यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते ॥
सक्ताः कर्म्मण्यविद्वांसो यथा कुर्व्वन्ति भारत ।
कुर्य्याद् विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्” ॥

किन्तु यावदस्मिन् त्रिधातुके शोणितशुक्रपरिणामपिण्डे शरीरे कर्त्तृत्वाद्यभिमानवान् तावत् “ब्रह्मज्ञोऽस्मि अलं मे कर्म्मणा” इत्येवं मौढ्यात् संसारासक्तोऽतत्त्वज्ञपुरुषः कर्त्तव्यं कर्म्म परित्यजति चेत् उभयतो भ्रष्ट एव । तथाहि योगवाशिष्ठे मोक्षप्रकरणे ७४ । ४१ ।

“संसारविषयासक्तो ब्रह्मज्ञोऽस्मीति वादिनः ।
कर्म्मब्रह्मोभयभ्रष्टः तं त्यजेदन्त्यजं यथा” ॥

अतएव कर्म्मत्यागे प्रायशो दोष एव न तु क्वचित् विधिर्लभ्यते यतो विद्योदये तत्त्वज्ञानी विधिनिषेधसापेक्षो भवितुं नार्हति सर्व्ववासनाकामकर्म्मसम्यविद्याभावात् न हि विधिनिषेधाभ्यां सह विदुषः कोऽपि सम्वन्धः । किन्तु अदूरदर्शिनो मन्दस्य तत्त्वज्ञानोपदेशेन कर्म्मानुष्ठानाद् वुद्धिभेदो न कर्त्तव्य इत्यादिशति भगवान् वासुदेवः । यथा भगवद्गीतायां ३ । २६, २९ ॥

“न वुद्धिभेदं जनयेदज्ञानां कर्म्मसङ्गिनाम् ।
योजयेत् सर्व्वकर्म्माणि विद्वान् युक्तः समाचरन्” ॥
“प्रकृतेर्गुणसंमूढ़ाः सज्जन्ते गुणकर्म्मसु ।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्” ॥

भवतु अलं वहुना वाग्जालेन । योऽस्य विश्वस्य आकाशवत् सर्व्वदा सर्व्वत्र ओतप्रोतरूपेण अन्तर्वहिर्विराजते तस्य सर्व्वव्यापिनः सर्व्वान्तर्यामिनः परमपुरुषस्य स्वरूपभावे यावन्न साधकस्य स्वहृदये धारणाध्यानादिभिः स्थैर्य्यमापद्यते तावदर्च्चादावेवोपासना कार्य्या दुर्व्वलाधिकारिणेत्येव निष्कर्षः ॥ तथा हि कुलार्णवतन्त्रे ६ उल्लासे ।

“चिन्मयस्याप्रमेयस्य निर्गुणस्याशरीरिणः ।
साधकानां हितार्थाय ब्रह्मणो रूपकल्पना ॥
अरूपं रूपिणं कृत्वा कर्म्मकाण्डरता नराः ।
ब्रह्मध्यानामृतानन्दपराः सुकृतिनो नराः” ॥

किञ्च तत्रैव ९ उल्लासे ।

“निर्व्विशेषं परं ब्रह्म साक्षात् कर्त्तुमनीश्वराः ।
ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः” ॥

अधिकारिभेदेनावलम्वनीयोपास्यदेवस्यापि भेदः प्रदर्शितः । यथा । तत्रैव ९म उल्लासे ।

“अग्नौ तिष्ठति विप्राणां हृदि देवो मनीषिणाम् ।
प्रतिमास्वल्पवुद्धीनां सर्व्वत्र विदितात्मनाम्” ॥

अपि च कति दिनानि यावत् कर्म्माणि कर्त्तव्यानि अर्च्चाद्यधिष्ठानेऽर्च्चनं वा कर्त्तव्यमिति विवित्साया मूढ़ान् प्रत्यनुकम्प्य तदप्युपदिदिशुः पूर्व्वाचार्य्याः । यथा भागवते ११ । २० । ९ ॥

“तावत्कर्म्माणि कुर्व्वीत न निर्व्विद्येत यावता ।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते” ॥

तथा, तत्रैव ३ । २९ । २५ ॥

“अर्च्चादावर्च्चयेत्तावदीश्वरं मां स्वकर्म्मकृत् ।
यावन्न वेद स्वहृदि सर्व्वभूतेष्ववस्थितम्” ॥

ननु निःश्रेयसार्थिनां साधकानां यदि प्रथमतः क्रियायोग एव कर्त्तव्यः तर्हि अलं प्रमाणशतविस्तारेण तत्र परम्पराकर्त्तव्यमेव विधीयतामिति चेत् अवधेहि यत्प्रथावलम्वनेन सत्त्वे शोधिते सति दुर्व्वलाधिकार्य्यपि सत्वरं सवलाधिकारित्वं याति । यथा, भागवते ३ । २८ । १-५ ।

श्रीभगवानुवाच । (कपिलदेवः ।)

“योगस्य लक्षणं वक्ष्ये सवीजस्य नृपात्मजे ।
मनो येनैव विधिना प्रसन्नं याति सत्पथम् ॥
स्वधर्म्माचरणं शक्त्या विधर्म्माच्च निवर्त्तनम् ।
दैवाल्लव्धेन सन्तोष आत्मविच्चरणार्च्चनम् ॥
ग्राम्यधर्म्मनिवृत्तिश्च मोक्षधर्म्मरतिस्तथा ।
मितमेध्यादनं शश्वद् विविक्तक्षेमसेवनम् ॥
अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः ।
ब्रह्मचर्य्यं तपः शौचं स्वाध्यायः पुरुषार्च्चनम् ॥
मौनं सदासनजयः स्थैर्य्यं प्राणजयः शनैः ।
प्रत्याहारश्चेन्द्रियाणां विषयान्मनसा हृदि” ॥

सवीजस्य सकारणस्य योगस्य इत्यर्थः ॥ विधर्म्मात् लोकानिष्टकारित्वादिविरुद्धधर्म्मात् ॥ दैवाल्लव्धेन प्रारव्धलव्धेन ॥ आत्मविदिति । आत्मतत्त्वज्ञानिनां चरणसेवनम् ॥ ग्राम्यधर्म्मेति मोक्षपथं विहाय धर्म्मार्थकामादयः ग्राम्यधर्म्मत्वेनोच्यन्ते अतएव ग्राम्यधर्म्मस्त्रैवर्गिकधर्म्मस्तस्मान्निवृत्तिः ॥ मितमिति मितं स्वल्पं मेध्यादनं पवित्रद्रव्यभोजनम् विविक्ते निर्ज्जने क्षेमस्य मङ्गलस्य सेवनम् ॥ अस्तेयमचौर्य्यम् ॥ यावदर्थपरिग्रह इति । यावतार्थेन जीवेत तावन्मात्रस्य परिग्रहः ॥ ब्रह्मचर्य्यं योषित्सङ्गराहित्यम् ॥ स्वाध्याय इति स्वाध्यायः जपाध्ययनादि ॥ पुरुषार्च्चनं परमपुरुषस्य उपासनम् ॥ मौनमिति मौनं मुनेर्व्रताचरणं मननशीलत्वं वाचां संयमत्वं वा ॥ आसनानां स्वस्तिकादीनां विजयः ॥ स्थैर्य्यं दीर्घकालमवस्थातुं शक्तिः ॥ प्राणजयः प्राणायामैः प्राणनिरोधकरणसामर्थ्यम् ॥ प्रत्याहारेति ॥ मनसा सह इन्द्रियाणां शब्दस्पर्शादिविषयात् हृदि हृदये प्रत्याहारः प्रत्याकर्षणम् ॥ तत्रैव । ३ । २८ । ६—९ ॥

“स्वधिष्ठानामेकदेशे मनसा प्राणधारणम् ।
वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः ॥
एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथम् ।
वुद्ध्या युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः ॥
शुचौ देशे प्रतिष्ठाप्य विजितासन आसनम् ।
तस्मिन् स्वस्तिसमासीन ऋजुकायः समभ्यसेत् ॥
प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ।
प्रतिकूलेन वा चित्तं यथास्थिरमचञ्चलम्” ॥

स्वधिष्ठानामिति । मूलाधारादिचक्राणामेकस्मिन् स्थाने मनसा सह प्राणानां धारणम् ॥ वैकुण्ठेति । वैकुण्ठस्याकुण्ठितस्य सुखदुःखादिभिरपरामृष्टस्य परमपुरुषस्य लीलाभिध्यानं सृष्ट्यादिव्यापारसमालोचनम् । आत्मनो मनसः समाधानमेकाग्रसाधनम् ॥ जितप्राणो निरुद्धप्राणवृत्तिः । अतन्द्रितः निरलसः ॥ विजितासनः वशीकृतकरचरणादिसंस्थानविशेषः ॥ प्राणस्येति ।

शास्त्रशुद्धिः।

अथ यथाशास्त्रं निष्कृष्टसात्त्विककर्म्मभेदबुद्धिं प्रदर्श्य दुर्ब्बलाधिकारिणो भक्तियोगावलम्बिनः कर्त्तव्यमपि प्रदर्शयाम। यथा भागवते ३।२९।१०।

"कर्म्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्।
यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः"॥

दुर्ब्बलभक्तियोगाधिकारिकर्त्तव्यता च तत्रैव। ११।११।३४-४२।

"मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्च्चनम्।
परिचर्य्या स्तुतिः प्रह्वगुणकर्म्मानुकीर्त्तनम्॥
मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव।
सर्व्वलाभोपहरणं दास्येनात्मनिवेदनम्॥
मज्जन्मकर्म्मकथनं मम पर्व्वानुमोदनम्।
गीत-ताण्डव-वादित्र-गोष्ठीभिर्मद्गृहोत्सवः॥
यात्रा बलिविधानञ्च सर्व्ववार्षिकपर्व्वसु।
वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम्॥
ममार्च्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः।
उद्यानोपवनाक्रीड़पुरमन्दिरकर्म्मणि॥
संमार्ज्जनोपलेपाभ्यां सेकमण्डलवर्त्तनैः।
गृहशुश्रूषणं मह्यं दासवद्यदमायया॥
अमानित्वमदम्भित्वं कृतस्यापरिकीर्त्तनम्।
अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितम्॥
यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः।
तत्तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते॥
सूर्य्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलम्।
भूरात्मा सर्व्वभूतानि भद्र पूजापदानि च"॥

हे भद्र। एतानि मम पूजास्थानानि। अधुना कस्मिन् स्थले केन यजेत इत्याह तत्रैव ११।११।४३-४५।

"सूर्य्ये तु विद्यया त्रय्या हविषाग्नौ यजेत माम्।
आतिथ्येन तु विप्राग्र्ये गोष्वङ्ग यवसादिना॥
वैष्णवे बन्धुसत्कृत्या हृदि खे ध्याननिष्ठया।
वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः॥
स्थण्डिले मन्त्रहृदयैर्भोगैरात्मानमात्मनि।
क्षेत्रज्ञं सर्व्वभूतेषु समत्वेन यजेत माम्"॥

हृदि खे हृदयाकाशे। मुख्यधिया प्राणदृष्ट्या॥ जले जलाञ्जलिप्रदानकृपतर्पणपूर्व्वकैर्द्रव्यैः॥ स्थण्डिले भूमौ मन्त्रन्यासैः॥ भोगैरिति। देहे भोगैरात्मानं एवैरमादिभिर्देहस्थपरमात्मानं यजेदथ मत्वविद्याकर्म्मजनितं देहं बिभर्म्मीति चिन्तयेत्॥ क्षेत्रज्ञमिति। सर्व्वभूतेषु क्षेत्रज्ञरूपेणावस्थितं कूटस्थप्रज्ञाचैतन्यस्वरूपं मां समत्वेन यजेत॥०॥ एतेषु स्थानेषु तव कीदृग्रूपं ध्येयमित्यपेक्षायाह तत्रैव ११।११।४६-४७।

"धिष्ण्येष्वित्थिति मद्रूपं शङ्खचक्रगदाम्बुजैः।
युक्तं चतुर्भुजं शान्तं ध्यायन्नर्च्चेत् समाहितः॥
इष्टापूर्त्तेन मामेव यो यजेत समाहितः।
लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया"॥

यदा "मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्च्चनम्" इत्यारभ्य "लभते मयि सद्भक्तिम्" इत्यन्तैरेतैश्चतुर्दश श्लोकैर्धारणाध्यानायचभूतप्रतिमाद्याश्रयिण्या भक्तियोगोपयोगिक्रिययैव सद्भक्तिलाभः प्रदर्शयामास स्वयं भगवान्। सुतरां तदा दुर्ब्बलाधिकारिणा भक्तियोगाश्रयिणापि प्रथमं क्रियायोग एव कर्त्तव्य इति बोध्यतेऽन्यथा चित्तशुद्ध्यभावात् ज्ञानं न लभेत इति तात्पर्य्यार्थः॥

ननु मा भूत्तत्त्वज्ञानं किन्तु शास्त्रविहितक्रियायोगशून्यया भक्त्या क्रमेण निर्गुणाया भक्तेरुदयेनैव चरितार्थतेति चेन्न तयोस्तत्त्वज्ञाननिर्गुणभक्तियोगयोर्लक्षणे नैक्यदर्शनात् उभयोरेवात्मसाक्षात्काररूपचरमफलत्वेनोक्तत्वाच्च। यथा श्रीमद्भागवते ३।२९।११ १२।

"मद्गुणश्रुतिमात्रेण मयि सर्व्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे"॥

ईदृग्भक्तिर्यदि बहुजन्मार्जितसुकृतिवशात् कस्यापि कचिदुत्पद्येत तर्हि सालोक्यादिमुक्तिः साधकान्तरैः प्रार्थनीया भगवता स्वयं दीयमानामपि तादृग्भक्ता नेच्छतीति तन्निस्पृहता दर्शयन्नाह। तत्रैव ३।२९।१३।

"सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः"॥

अपि च तत्त्वज्ञानिनो निर्गुणभक्तस्य च तयोः शब्दत एव भेदः न तु लक्षणतः यत उभावेव लक्षणादिना सर्व्वत्र एकाचारौ एकनिष्ठाविकभावापन्नौ लक्ष्येते। यथा भागवते ११।११। २९-३२। भगवद्भक्तमस्य लक्षणमुपदिष्टवानुद्धवं प्रति भगवान्।

"कृपालुरकृतद्रोहस्तितिक्षुः सर्व्वदेहिनाम्।
सत्यसारोऽनवद्यात्मा समः सर्व्वोपकारकः॥
कामैरहतधीर्दान्तो मृदुः शुचिरकिञ्चनः।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः॥
अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः।
अमानी मानदः कल्पो मैत्रः कारुणिकः कविः"॥

कविः क्रान्तदर्शी सर्व्वज्ञ इत्यर्थः।

"आज्ञायैवं गुणान् दोषान् मयादिष्टानपि स्वकान्।
धर्म्मान् सन्त्यज्य यः सर्व्वान् मां भजेत स सत्तमः॥
ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः"॥

तथा, ज्ञानिनोऽपि लक्षणं प्रदर्शयामास। यथा, तत्रैव ११।११।१२ १७।

"न तथा बध्यते विद्वांस्तत्र तत्रादयन् गुणान्।
प्रकृतिस्थोऽप्यसंसक्तो यथा खं सविताऽनिलः॥
वैशारद्येक्षयाऽसङ्गशितया छिन्नसंशयः।
प्रतिबुद्ध इव स्वप्नान् नानात्वाद् विनिवर्त्तते"॥
यस्य स्युर्वीतसङ्कल्पाः प्राणेन्द्रियमनोधियाम्।
वृत्तयः स विनिर्मुक्तो देहस्थोऽपि हि तद्गुणैः॥
यस्यात्मा हिंस्यते हिंस्रैर्येन किञ्चिद् यदृच्छया।
अर्च्च्यते वा क्वचित्तत्र न व्यतिक्रियते बुधः॥
न स्तुवीत न निन्देत कुर्व्वतः साध्वसाधु वा।
वदतो गुणदोषाभ्यां वर्ज्जितः समदृङ्मुनिः॥
न कुर्य्यान्न वदेत् किञ्चिन्न ध्यायेत् साध्वसाधु वा।
आत्मारामोऽनया वृत्त्या विचरेज्जड़वन्मुनिः"॥

ननु भक्तिज्ञानयोश्चरमफलैकत्वेपि भक्तौ समधिकप्रसादर्शनात् भक्तिरेव गरीयसीति चेत् न भक्तिवत् ज्ञानस्यापि प्रशंसादर्शनात् आत्मसाक्षात्कृतौ साक्षात्कारणत्वाच्च। यथा श्रीमद्भागवते ११।१९।१—५॥

श्रीभगवानुवाच।

"यो विद्याश्रुतसम्पन्न आत्मवान्नानुमानिकः।
मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि सन्न्यसेत्॥
ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च सम्मतः।
स्वर्गश्चैवापवर्गश्च नान्योऽर्थो मदृते प्रियः॥
ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम।
ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बिभर्त्ति माम्॥
तपस्तीर्थं जपो दानं पवित्राणीतराणि च।
नालं कुर्व्वन्ति तां सिद्धिं या ज्ञानकलया कृता॥
तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव।
ज्ञानविज्ञानसम्पन्नो भज मां भक्तिभावितः"॥

किञ्च भगवद्गीतायां ४।३३-३९।

"श्रेयान् द्रव्यमयाद् यज्ञाज्ज्ञानयज्ञः परन्तप।
सर्व्वं कर्म्माखिलं पार्थ। ज्ञाने परिसमाप्यते॥
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥
यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव!।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥
अपि चेदसि सर्व्वेभ्यः पापेभ्यः पापकृत्तमः।
सर्व्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि॥
यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्ज्जुन।
ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथा॥
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥
श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति"॥

अतएव निर्गुणभक्तिज्ञानयोर्न कियदप्यन्तरं मन्यन्ते तत्त्वदृशः स्वरूपतस्तयोरेकात्मत्वात् अतत्त्वदर्शिनोऽज्ञा एवाविद्यामोहितत्वात् भिन्नदृशो भवन्ति॥ वरं भक्तियोगमुपदिश्यानुपसंहारे ज्ञानविज्ञानसम्पन्ना भक्तिरेव ब्रह्मलाभे सम्यक् हितसाधनीति प्रदर्शितवानुद्धवाय भगवान्॥ यथा भागवते ११।१९।४५-४६।

"भक्त्योद्धवानपायिन्या सर्व्वलोकमहेश्वरम्।
सर्व्वोत्पत्त्यप्ययं ब्रह्म कारणं मोपयाति सः॥
इति स्वधर्म्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः।
ज्ञानविज्ञानसम्पन्नो न चिरात् समुपैति माम्"।

निष्कामेनानुष्ठितभक्तिरेव शनैः शनैः सान्द्रत्वेन निर्गुणतां गच्छन्ती सती परमप्रेमानन्दरूपेण परिणमते सुतरां तदा स्वयं सान्द्रानन्दमयं तज्ज्ञानं प्रकाशते। तयोर्हि तत्स्वरूपत्वात् न क्वापि निर्गुणभक्तिज्ञानयोगयोर्भेदः श्रूयते। यथा छान्दोग्ये "सत्यं ज्ञानमनन्तं ब्रह्म। आनन्दरूपममृतं यद् विभाति शान्तं शिवमद्वैतम्"। इति ज्ञानानन्दयोर्ब्रह्मस्वरूपत्वात् अतएव क्वचित् केनापि न पूर्णानन्दत्वेन परिणतायाः निर्गुणस्वरूपाया भक्तेर्ज्ञानेन सह कियानपि भेदो दर्शयितुं शक्यते

चरमसाक्षात्कारोत्पत्तेः । परन्तु तत्त्वज्ञानो
त्पादनक्षमा भक्तिरेवाद्वैता न तु संसारबन्ध-
कारिणी भवरूपकामी कामभक्तिरत एवामा
भक्तिरेवाद्वैतोपयोगी तत्त्वदृष्टिरिति बोध्यम् ।
यथा भागवते १ । २ । ७ ।
"वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानञ्च यदहैतुकम्" ।
विशेषतः प्रकारतुल्योऽपि विशाविवरणादि
दर्शनात् । अहरहः श्रवणादिनापि भगवत्सिद्धाम-
भक्तियोगमाचरन् ततमापि प्रथमं विशयवर्त्म
रागाभिनिवेशाप्रवारकर्त्तं विषयानुभवर्त्तं
जीवन्मुक्तं यतो निर्माल्यमपरावयाम् । पुनः
पुनः ध्यानमनुसंधानयोऽपि विषयवासना
संस्कारवशात् यत् परमतत्त्वसारैर्विचारदर्शनम्
परेशं कश्चित् ज्ञानध्यानयोर्न परिहृतम् ततोर
तदपि तत्तत्पमभक्तियोगमनुसृत्य तत्तत्कालिक
तपश्चर्यायोगं कृत्वा यदा परमज्ञानमयानि
कस्यचित् ज्ञाननिर्वृते सम्पूर्णज्ञानादि मुक्तरूपात्मा
यत् । इदानीं तदर्थमाह यथाक्रमं ततो राज-
दृष्टयो तत्तत्तन्निर्माणमभक्तियोगानुसरणेन
विज्ञेयम् ।
यथा, श्रीमद्भागवते । ३ । ८ । २७–३१ ।
"सोऽपि ध्यानसं विश्वो वासुदेवोपवासितम् ।
प्राप्य तत्र तपित्रीयं गतिमीयोऽध्यगात् हरम् ।
विदुर उवाच ।
सुदुष्करं तु परमं परं यदि
मायाविमुक्तपरमार्थवार्त्तिकम् ।
यत्प्राप्यपि विधार्थमितीभवन्ति यत
सर्वं यत्तात्मानममवार्थवित् ।
मैत्रेय उवाच ।
मातृ तपसा तत्त्वार्थेऽपि विज्ञाय तान् परम् ।
मैत्रस् पुत्रिपवेर्मुक्ति यत्स्वत् भागवतेषिताम् ।
ब्रह्म उवाच ।
तमाश्रिता वैष्णवेन यत् परं
विदुः यत्तत्त्वतः स्वर्दवेषतः ।
मायोर्ध्वं मनुभिस्मुख यास्यो
ज्ञानाग्रवैशाम्यता उपपत्ति ।
यथोक्तं तत्पाद्मं प्रकाशमध्य यत्तः ।
तपश्चिन्ता यावत्पूर्वं यथा याति परन्तप ।
मतिविदुषिता देवी परमिदुरदर्शिनी मुक्तिः ।
यो नारदवचनं भगवाचीतम् ॥
देवी भगवत्याभिव यतप्रत्य निवृत्त् ।
यथे विशेषेऽप्यवति भावाभावनायुता ।
मर्त्यवत् पार्थिवं वर्षं त्रिविधेन भवावधि ।
प्रकाश भवरागवर्तं यथा मुक्त्वात्मपरम् ।
पश्चिमस्वयमेवैतं यर्तं मायाविवर्तितः ।
पारात्ममनाश्रयो मोक्षमानो ये विविक्तो यत ।
ईश्वरात् कीर्तयन्तेन यथीश्वरात्मभावनम्" ।
भवतः परिपूर्णत्वे मनोऽप्यासत्तोऽपि प्रकाश
विशाममभक्तियोगभावेन विमति मैत्रेयिति
तमोमनस्तमाभवन्तु परिविदं भावनाम वै
यदनिर्वृतिः । यथा भागवते । ७ । ८ । ३३–३५ ।

"यदा यदुपतिर्विज्ञो नाम्ना भक्तेन निर्मुक्तः ।
प्रकाश प्रथमं मोक्षो यत्तमवप्रथमत ।
श्रीभगवानुवाच ।
प्रश्नान् यत्र यत्रं ये मोहोऽर्थं वेदहरोत्तम ।
यदं तथोम्यानिमयं वामपूर्वोऽध्यायं यथाम् ।
भावमोक्षम प्रथमं दर्शन सुषम हि मे ।
हृदा मां न मुनयस्तु रागायणं समस्वति ।
मोक्षणि यत्र मां मोक्षं वनमात्रेण तत्परा ।
ध्रेयपाशा भवाभाव सर्वसत्त्वमाहितां मतिम् ।
यदं यथोक्तमाणोऽपि यदेवोत्तमयोगमवी ।
ज्ञानाश्रित्य भगवति वैष्णवात्मयोऽन्ता" ।
तत्रैव ७ । १ । १–५ ।
नारद उवाच ।
"भक्तियोगस्य यत् कर्मभव्यरागनवार्षिता ।
मध्यमानो हरीर्वेव कामनाय उवाच च ।
मा मां प्रलोभयोत्पत्त्या सक्तं कामेषु तद्वरैः ।
तत्सङ्गभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः ।
भवतस्यभिगायस्य भवन्तं वामेयतोऽस्तु ।
स्वामन् संसारवीजेषु हृदयग्रन्थिषु प्रभो ।
नान्यथा तेऽखिलगुरो । घटेत करुणात्मनः ।
यस्त आशिष आशास्ते न स भृत्यः स वै वणिक् ।
आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः ।
अहं त्वकामस्त्वद्भक्तस्त्वञ्च स्वाम्यनपाश्रयः ।
नान्यथेहावयोरर्थो राजसेवकयोरिव" ।
अत्र तत्र निर्गुणमादि विष्णु तत्त्वार्थं यावी-
दिति चेद् न यथा यतनिष्ठामेव तत्त्वाभ्यासया
निर्हृतया भक्तिसत्यं मदर्थिर्थं । यथा भागवत
७ । ५ । २४ विष्णुभक्तिः नवि प्रकारोक्ता ।
"न तत्र यात्रा यदपि भक्ति
दुरत्ययासमतो विचक्षते ।
पुनन्ति यत्कर्म वेदवादिनो
भगवतो योगं मितमिव से मतिम्" ।
किञ्च तत्रैव ११ ।
"न ते विदुः स्वार्थगतिं हि विष्णुं
दुराशया ये बहिरर्थमानिनः ।
अन्धा यथान्धैरुपनीयमाना
वाचीशतन्त्र्यामुरुदाम्नि बद्धाः" ।
सार्थकमितिधि । कथञ्चन् यथार्थो वेदा वे सा-
त्त्विकानामभियोग्यं भक्तियोगपथमर्थं । यदि-
दर्शमाविना इति । यदिवादिनस्तु यर्थो वेदा
मात् सुकृत् इति मन्यते ये इति । ननु यदि
दर्शितिमयापि भवति यदा यदा मनुष्यार्थं
निष्फलमिति चेत् । यदा कर्मणा स्वाश्रयतत्त्व
योऽपूर्वो इति मदर्थम् निर्दिष्टा यर्थान्त
तत्राश्रमा सदैव भगवानपि प्रतीप इत्येतेन
निर्दिष्टा भवान्तराश्रया । यथा "स्वर्ग-
कामो यजेत" "यावज्जीवमग्निहोत्रम्" "यावत्
वै पशवस्तिष्ठ" इत्यादि वचनानां निष्फलं
स्यात् । इत्येवं यथाश्रयतत्त्वानामा पूर्वोक्त-
विधादित्वं यद् यद् यर्थं इदानीं तत्तदधि-
कारिणां कर्मतीर्थं भवतत्त्वं यदि दर्शितामा
समाप्तेति । यथा, श्रवणादरात्मवतो ।

"ज्ञानस्य यावत् यदि प्रत्यक्षवोधयो भवत्यो विदि
ध्यासितव्यः" । अर्थात् भावमेव आत्मन् कर्मक
तत्कालादि यथावतात् श्रवणं मननं निदिध्या-
सनञ्च विधिवत् यथावादि इति विज्ञातव्यं तत्र ।
यथा । "अयं नाम सर्वविद्यविद्भिः श्रेयोपाय्य-
मार्गदर्शीये तस्मिन् आस्थाय विचारम् । विद्वांसि
तु । उपासनोपर्यायारम्भादप्यूर्ध्वमावप्यता
योपभागमसानि । तत्र श्रवणमनिदिध्यासनार्थ
तदात्मप्रयोजनार्थं उपासनोपर्यायादौ । यथा,
वाक्यार्थे पदमात्रे श्रवणमननिदिध्यासनाभि-
व्यक्त्या इत्येवमादिरीतिमिश्रसी "श्रेयस्कामिनं
सत्यम्" । इत्यन्ते च प्रतिपादनम् ।
प्रश्नश्रवणविचारस्य पश्चात् इदानीं पौनःपुन्येन
प्रतिपादनं कर्तव्यम् । यथा वर्णादित्रितय-
यो मध्ये "तत्त्वमसीति" वाक्यस्य प्रतिपादनम् ।
श्रवणमननविचारस्य पश्चात् प्रमाणान्तरेषा-
विरोधोत्कर्षं कर्तव्यम् । यथा वर्णादित्रि-
यथा अयमोऽपि प्रत्यक्षप्रमाणादिभि
उपनिषद्वाक्यैरप्रत्यक्षप्रमाणात् । मायामपि-
विपरीतत्वं पश्चात् श्रवणमननविचारानन्त-
रमपि तदनुमानस्य या यत्र यत्र भूयस्त्वे प्रयो-
जनं यथा तत्रैव "आत्मार्थानन्दयतो वेद वज्र
तावदेव चिरं यावत् विमोक्ष्ये अथ सम्पत्स्ये" ।
इत्यादिश्रुतिसम्भावनया तथाविधमनोदर्शनं भूयते ।
प्रश्नश्रवणविचारस्य तत्र तत्र प्रयत्नं कर्तव्यम् ।
यथा, तत्रैव अयमात्मेत्यमपातो वेदानुवचनं
ब्रह्मचर्यं मननमिच्छा विद्यार्थमित्यादिविलक्षण
प्रयोजनम् ।
प्रश्नश्रवणविचारावसाने तत्र तत्र भूयसा
यदि उपलब्धिः" । यथा, तत्र "चौर्येण यद्
विशेषेण कर्मैव यत्नं विचार्य तत् यथावत्
विचारो भ्रमोऽसौ प्रतिबोधो यत्नम्" । इत्या-
वदिदीतितत्त्वावधे विचारस्य यथायथमन्ते
मुक्ति भूयते" । अन्यत्तु । "मुमुक्षोर्विचारत्वो
वेदान्ताध्ययनमविचारत्वमुक्तिरम्" ।
"विचारितवेदान्तविचारात् प्रतीतिरुपा-
योपमप्रकारा निदिध्यासनम्" । इति वेदा
न्तसारे ।
उपासनाद्यु द्विविधा । अभिध्यानो निदिध्यासना-
स्येति । तत्र अभिध्यानो नाम शास्त्रमानादि
विषयतत्त्वावधेयरूपविधिस्मृतयोः इत्यादि-
कारिकामात्मविषयवेदान्तवाक्यम् । यदा पश्च-
समाधिवादेऽपि मनसाऽऽत्मनः वेदान्तैरुपदेशेन तत्र
भावये ।
निर्विकल्पकन्तु शास्त्रज्ञानादिसेवनादेवनादृते
वीतरागत्वे तदाकारतापत्तिताऽपि प्रतिबन्धेयो-
दराविशेषाद्यावच्चक्रम् । यदा तु यथाकारा-
कारितकालाप्रकारेणावधीयतस्माद्यभेदावभा-
सते । इति वेदान्ते उपादेयं दृश्यमिति ।
यतो भावनयापि मनसाऽऽत्मा । ११ । ७–११ ।
"[illegible]
[illegible]"

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥
असक्तिरनभिष्वङ्गः पुत्त्रदारगृहादिषु ।
नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा" ॥
अतो ज्ञेयं वस्तु तत्रैवाध्याये । १२-१७ ॥
"ज्ञेयं यत्तत् प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते ॥
सर्व्वतः पाणिपादन्तत् सर्व्वतोऽक्षिशिरोमुखम् ।
सर्व्वतः श्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति ॥
सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्ज्जितम् ।
असक्तं सर्व्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥
वहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थञ्चान्तिके च तत् ॥
अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्व्वस्य विष्ठितम्" ॥
तथा च श्वेताश्वतरश्रुतौ आत्मज्ञानेनैव मुक्ति-
रिति स्फुटं दर्शयामास । यथा,—
"सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्ज्जितम् ।
सर्व्वस्य प्रभुमीशानं सर्व्वस्य शरणं वृहत्" ॥
"आत्मा गुहायां निहितोऽस्य जन्तो-
रणोरणीयान् महतो महीयान् ।
तमक्रतुः पश्यति वीतशोको
धातुः प्रसादान्महिमानमीशम्" ॥
महानिर्व्वाणतन्त्रे च । ५ । ११ ।
"परे ब्रह्मणि विज्ञाते समस्तैर्नियमैरलम् ।
तालवृन्तेन किं कार्य्यं लब्धे मलयमारुते" ॥
ननु किमिदानीं वाग्भङ्ग्याऽद्वैतवादं संस्थाप-
यितुं प्रयतते इति चेत् दर्शयाम ।
तथा च श्रीविष्णुधर्म्मे,—
"परात्मनो मनुष्येन्द्र विभागो हि न कल्पितः ।
द्वये तस्यात्मपरयोर्विभागाभाव एव हि ॥
आत्मा क्षेत्रज्ञसंज्ञोऽयं संयुक्तः प्राकृतैर्गुणैः ।
तैरेव विगतः शुद्धः परमात्मा निगद्यते ॥
अनादिसम्बन्धवत्या क्षेत्रज्ञोऽयमविद्यया ।
युक्तः पश्यति भेदेन ब्रह्मतत्त्वात्मनि संस्थितम्" ॥
तथापि श्वेताश्वतरश्रुतिभाष्यधृतवशिष्ठवचन
प्रश्नपूर्व्वकं दर्शितम् । यथा,—
"यद्यात्मा निर्गुणः शुद्धः सदानन्दोऽजरोऽमरः ।
संसृतिः कस्य तात ! स्यात् मोचो वाऽविद्यया विभो ॥
केनचाथ कथं तस्य जायते भगवान् यत ।
यथावत् सर्व्वमेतं मे वक्तुमर्हसि साम्प्रतम् ॥
तस्यैव नित्यशुद्धस्य सदानन्दमयात्मनः ।
अवच्छिन्नस्य जीवस्य संसृतिः कीर्त्त्यते बुधैः ॥
एकएव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥
आत्माज्ञानवशादात्मा जीवसंज्ञः सदा भवेत् ॥"

तथा च मुक्तिशिष्यो गौड़पादाचार्य्यः ॥
"यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते ।
न सर्व्वे सम्प्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः" ॥
तस्माददितीये परमात्मन्युपाधितो जीवेश्वरयो-
र्जीवानाञ्च परस्परं भेदव्यवस्थाया सिद्धत्वान्न
विशुद्धसत्त्वोपाधेरीश्वरस्याविशुद्धोपाधिजीवगता
सुखदुःखमोहाज्ञानादयः । तथा च भगवान्
पराशरः ।
ज्ञानात्मकस्यामलसत्त्वराशे-
रपेतदोषस्य सदा स्फुटस्य ।
किं वा जगत्यस्ति समस्तपुंसा-
मज्ञातमस्यास्ति हृदि स्थितस्य" ॥
कथं तर्ह्युपाधिकभेदेन बन्धमुक्त्यादिव्यवस्था सोपा-
धिकानां तेषां वा सोपाधिकेश्वरस्य वा लक्षण-
मेति इत्याशङ्क्य दृष्टान्तपूर्व्वकं व्यवस्था दर्शयति ॥
"एकस्तु सूर्य्यो बहुधा जलाधारेषु दृश्यते ।
आभाति परमात्मा च सर्व्वोपाधिषु संस्थितः" ॥
"ब्रह्म सर्व्वशरीरेषु वाह्ये चाभ्यन्तरे स्थितम् ।
आकाशमिव भूतेषु बुद्ध्यावात्मा न चान्यथा" ॥
एवं सति यथा बुद्ध्या देहोऽहमिति मन्यते ।
'अनात्मन्यात्मता भ्रान्त्या सा स्यात्संसारबन्धिनी' ॥
सर्व्वैर्विकल्पैर्हीनस्तु शुद्धो बुद्धोऽजरोऽमरः ।
प्रशान्तो व्योमवद्व्यापी चैतन्यात्मा सकृत्प्रभुः ॥
धूमाभ्रधूलिभिर्व्योम यथा न मलिनीयते ।
प्राकृतैरपरामृष्टो विकारैः पुरुषस्तथा ॥
यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते ।
नान्ये मलिनतां यान्ति दूरस्थाः कुत्रचित् क्वचित् ॥
यथा द्वन्द्वैरनेकैस्तु जीवे च मलिनीकृते ।
एतस्मिन्नापरे जीवा मलिना सन्ति कुत्रचित्" ॥
परं ननु केवलं प्रकृतेः पृथग्रूपचैतन्यज्ञान-
मात्रेण ब्रह्मज्ञानं सम्भवितुमर्हति । यदि चैके
पण्डिताः पृथग्ज्ञानेनैव सिद्धिः स्यादिति मन्यन्ते
किन्तु नैव श्रुतय एवं परिचक्षते । यथा, श्वेताश्व-
तरोपनिषदि "ज्ञाज्ञौ द्वावजावीशानीशावजा
ह्येका भोक्तृभोगार्थयुक्ता अनन्तश्चात्मा विश्व-
रूपो ह्यकर्त्ता त्रयं यदा विन्दते ब्रह्ममेतत्" ॥
अतएव ब्रह्मजिज्ञासोर्योगिनः श्रुत्युपदिष्टब्रह्म-
तत्त्वविज्ञानेनैव मुक्तिः स्यात् अन्यथा श्रमएव ।
यथा, तत्रैव "क्षरं प्रधानममृताक्षरं हरः
क्षरात्मानावीशते देवएकः । तस्याभिधानात्
योजनात् तत्त्वभावात् भूयश्चान्ते विश्वमाया-
निवृत्तिः ॥ ज्ञात्वा देवं सर्व्वपाशापहानिः क्षीणैः
क्लेशैर्जन्ममृत्युप्रहाणिः । तस्याभिध्यानात्तृतीयं देह-
भेदे विश्वैश्वर्य्यं केवल आप्तकामः" ॥ परं योगा-
भ्यासावृते नैव कदाचित् तत्त्वज्ञानस्योत्पत्ति-
रिति श्रुतिस्मृत्यादीनां ज्ञानप्रतिपादकशास्त्रा-
णामुपदेशो दृश्यते यदि च पूर्व्वपूर्व्वप्रकरणे पुराण-
प्रभृतिविहितयोगादिमतं प्रदर्शितं तथापि तत्
दृढ़ीकरणाय वैदिकमतमिदानीं प्रदर्शयाम । यथा
यजुर्व्वेदोक्तश्वेताश्वतरीययोगप्रकरणम् । ॐ "युञ्जा-
नः प्रथमं मनस्तत्त्वाय सविता धियः ॥ अग्नि
ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ १ ॥

युक्तेन मनसा वयं देवस्य सवितुः सवे सुवर्गेयाय
शक्त्यै ॥ २ ॥
युक्ताय मनसा देवान् सुवर्य्यतो धिया दिवं ।
वृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥ ३
युञ्जते मन उत युञ्जते धियो
विप्रा विप्रस्य वृहतो विपश्चितः ॥
विहोत्रा दधे वयुना विदेक इत् ।
मही देवस्य सवितुः परिष्टुतिः ॥ ४ ॥
युजे वां ब्रह्म पूर्व्यं नमोभि
र्विश्लोका यन्ति पथ्येव सूराः" ॥ ५ ॥
परन्तु आत्मज्ञानविशदीकरणाय दत्तस्मृतिरेव
श्रेयसी जीवानामिति प्रदर्शयितुं भूयोऽप्यनुस-
रामः । यथा,
"ऊरुस्थोत्तानचरणः सव्ये न्यस्येतरं करम् ।
उत्तानं किञ्चिदुन्नाम्य मुखं विष्टभ्य चोरसा ॥
निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन् ।
तालुस्थाचलजिह्वश्च संवृतास्यः सुनिश्चलः ।
सन्निरुध्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः ।
द्विगुणं त्रिगुणं वापि प्राणायाममुपक्रमेत्" ॥
किन्तुएवमा मन्यध्वं यत् स्वेच्छान्निःसृत्य अरण्यवा-
सादौ योगाभ्यासतत्त्वज्ञानादेः सुगमो भवेत्
इत्यत्र यथाह दत्तः सप्तमाध्याये ।
"लोको वशीकृतो येन येन चात्मा वशीकृतः ।
इन्द्रियार्थो जितो येन तं योगं प्रब्रवीम्यहं ॥
प्राणायामस्तथा ध्यानं प्रत्याहारस्तु धारणा ।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥
नारण्यसेवनाद्योगो नानेकग्रन्थचिन्तनात् ।
व्रतैर्यज्ञैस्तपोभिश्च न योगः कस्यचित् भवेत् ॥
न च पद्मासनात् योगो न नासाग्रनिरीक्षणात् ।
न च शास्त्रातिरिक्तेन शौचेन स भवेत् क्वचित् ॥
न मौनमन्त्रकुहकैरनेकैः सुकृतैस्तथा ।
लोकयात्रावियुक्तस्य योगो भवति कस्यचित् ॥
अभियोगात् तथाभ्यासात् तस्मिन्नेव तु निश्चयात् ।
पुनः पुनश्च निर्व्वेदाद् योगः सिध्यति नान्यथा" ॥
अतएव निर्म्मलहृते केवलं तपःस्वाध्यायादिभिर्न
योगसिद्धिः शास्त्रकृद्भिरनुमोदनीया । किन्तु
आदरनैरन्तर्य्येण आत्मचिन्तादयएव ब्रह्मलब्धौ
सदुपाया इति बोध्यम् यथा तत्रैव ।
"आत्मचिन्ताविनोदेन शौचक्रीड़नकेन च ।
सर्व्वभूतसमत्वेन योगः सिध्यति नान्यथा ॥
यश्चात्मनि रतो नित्यमात्मक्रीड़स्तथैव च ।
आत्मनिष्ठः सततमात्मन्येव स्वभावतः ॥
रतश्चैव स्वयं तुष्टः सन्तुष्टो नान्यमानसः ।
आत्मन्येव सुतृप्तोऽसौ योगस्तस्य प्रसिध्यति ॥
सुप्तोऽपि योगयुक्तः स्याज्जाग्रच्चापि विशेषतः ।
ईदृक्चेष्टः स्मृतः श्रेष्ठो गरिष्ठो ब्रह्मवादिनाम्" ॥
परन्तु विषयासक्तिवर्ज्जनं विना क्वापि कस्य-
चिदपि आत्मसिद्धिर्न प्रजायते । यथा तत्रैव,—
"य आत्मव्यतिरेकेण द्वितीयं नैव पश्यति ।
ब्रह्मीभूय स एव हि दत्तपक्ष उदाहृतः ॥
विषयासक्तचित्तो हि यतिर्मोक्षं न विन्दति ।
यत्नेन विषयासक्तिं तस्माद् योगी विवर्ज्जयेत्" ॥

यदि च केचित् विमर्शविमर्शयोर्भेदं विवक्षेयुः इति वदन्ति तत्र तथा भासितैव वा भवेत्, "विमर्शविमर्शयोर्भेदं केचित् भेदं वदन्ति हि । वाक्यार्थं श्रमवशेन [illegible]" । इति । यदि भावेऽत्ययमानमेव [illegible] भीतत्वाद्विवक्षितया [illegible] किन्तु एतेभ्यः सम्प्रदायविशारदैः यथार्थं विवक्षितार्थ [illegible] वर्हिर्गतिकमित्यर्थः । ।)

उपाहित, त्रि, (उप+आ+धा+क्त ।) आरोपितः । सन्निधीकृतः । परिहितम् २ परिरक्षितम् ३ उपचरितम् ४ । इत्यमरः ।

उपास्ति, स्त्री (उप+आस+क्तिन् ।) सेवा । इति हेमचन्द्रः । (यथा, कुमारसम्भवे ५म सर्गे ।
"पुनर्नवीकृतापास्ति धूर्त्तं भूतमपि प्रभो" ।)

उपासङ्ग, पुं (उप आसज्यते आसिज्य पर्व यत्र ।) धनुर्गुणः । न तु शस्त्रावकाशः । इत्यमरः ।

तत्र यम न दामवे वधाय दत्तवाति ।
"धितम धनिकं कर्म महमापीय कारयेत् ।
शौविकार्थं मावयत्र दासनीय यथो यके ।
याज्ञवल्क्यः,—
"हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत् ।
ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम् ।
यथोदयं यथा धनोर्धविशिम्यर्थः । * । आचार
दाता न ब्राह्मणस्य कर्मोपगमाय आचारः ।
"कर्मणा कालविद्धमात् समदीनांश दापयेत्"।
अयाचयेवमान लिखितं कर्म धारयितुरसमान
एवमाय आचारता ।
"यदि ब्राह्मणादिमस्तुतं कर्म कारयेत् ।
ब्राह्मणात् दाययं पूर्वमयाप्यनेन वर्णिता । * ।
यदि दत्तमविभागं धनकिनो दातुं न शक्नोति
तदा धनकस्य वेश्मना दापयेत् । यथा दत्तवाति ।
"पूर्णेयो ब्राह्मणानमनुप्रमाणयेवमी ।
दापयेता यथी देव दत्तविमक्तथा" ।
तथा च दत्तवाति ।
"विरचये दिनवीद्वेषे मवे मवेऽधमर्णिके ।
सर्वं धनीयं संगृह्य विभीषीय यथाविधम् ।
एकोऽपि बालसूनानु एतार्दं वर्णवति ।
अथायुक्तं ददो धनिमावयु दर्शेत् ।
धनस्य विविधेय धनकप्रपीपेरे ।
बहुगुणादिविविधं प्रमाणमपाद्युदम्" ।*।
दत्तापितय धर्मीरीत् धनदारोदायम् यस्सो

न राज्ञा निवर्त्तनीय इत्याह मनुः ।
"यः स्वयं साधयेदर्थमुत्तमर्णोऽधमर्णिकात् ।
स राज्ञा नाभियोक्तव्यः स्वकं संसाधयन् धनम्" ॥ ०॥
धनवता ऋणिकेनादत्ते ऋणे राज्ञा स्वयं विंशति-तमभागं गृहीत्वा उत्तमर्णाय दापयेत् इत्याह नारदः ॥
"ऋणिकः सधनो यस्तु दौरात्म्यान्न प्रयच्छति ।
राज्ञा दापयितव्यः स्याद्गृहीत्वांशन्तु विंशकम्" ॥ ०॥
यदा चाधमर्णिकः सकलमृणं दातुमसमर्थः शक्त्यनु-सारेण दत्त्वा पूर्व्वकृतस्य लेख्यस्य पृष्ठेऽभिलिखेत् एतावद्दत्तं उत्तमर्णेन उपगतं प्राप्तमिति धनी तस्यैव लेख्यस्य पृष्ठे दद्यादभिलिखेत् इत्याह याज्ञवल्क्यः ।
"लेख्यस्य पृष्ठेऽभिलिखेत् दत्त्वा दत्त्वाधनं ऋणी ।
धनी चोपगतं दद्यात् स्वहस्तपरिचिह्नितम्" ॥
इति विवादार्णवसेतुः ॥

ऋत, गत्याम् । स्पर्द्धने । ऐश्वर्य्ये । घृणायाम् । इति कविकल्पद्रुमः ॥ (भ्वादि-पर-ईयङ्पक्षे चात्म गत्यर्थे सक, अन्यार्थे अक सेट् ।) घृणा दया । ऋतीयते जनः स्पर्द्धते ईश्वरो भवति । किञ्चि-द्यते गच्छति वेत्यर्थः । अरे तु ईयङोऽप्राप्तिपक्षे परस्मैपदमेव । आर्त्तीत् आनर्त्त इत्यादि । इति दुर्गादासः ॥

ऋत, क्ली, (ऋ + क्त ।) उञ्छशिलम् । (यथा, मनुः । ४ । ४—५ ॥
"ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम्" ॥)
जलम् । (यथा, ऋग्वेदे । ७ । १०१ । ६ । "तन्म ऋतं पातु शतशारदाय" । "ऋतमुदकम्" । इति भाष्यम् ॥) सत्यं इति मेदिनी ॥ (यथा, मनुः । ८ । ८२ ।
"साक्ष्येऽनृतं वदन् पाशैर्बध्यते वारुणैर्भृशम् ।
"विवशः शतमाजातीस्तस्मात् साक्ष्यं वदेदृतम्" ॥
कर्म्मफलम् । यथा, "ऋतं पिबन्तौ सुकृतस्य लोके" । इति श्रुतिः ॥ विष्णुः ॥ यथा, महाभारते । १ । १ । २५३ ।
"भगवान् वासुदेवश्च कीर्त्त्यतेऽत्र सनातनः ।
स हि सत्यमृतञ्चैव पवित्रं पुण्यमेव च ।
शाश्वतं ब्रह्म परमं ध्रुवं ज्योतिः सनातनम्" ॥
पुं, सूर्य्यः । यथा, शतपथब्राह्मणे । "ब्रह्म वा ऋतं ब्रह्म हि मित्रो ब्रह्म ऋतं ब्रह्म एवायुः" ॥
परब्रह्म । यथा, श्रुतिः । "ऋतमेकाक्षरं ब्रह्म" ॥
सत्याचारः । यथा, ऋग्वेदे । १ । १३७ । २ ।
"सुतो मित्राय वरुणाय पीतये चारुर्ऋताय पीतये" ॥ "ऋताय सत्याचाराय" । इति दया-नन्दभाष्यम् ॥ यज्ञः । यथा, सामगानां सन्ध्यामन्त्रे यमोपस्थाने । "ऋतमित्यस्य कालाग्नी रुद्र ऋषि-रनुष्टुप्छन्दो यमो देवता यमोपस्थाने विनि-योगः" ॥ देवभेदः । यथा, ऋग्वेदे । ४ । २३ । ८ ।
"ऋतस्य हि शुरुधः सन्ति पूर्व्वीर्ऋतस्य धीति-र्वृजिनानि हन्ति" । "ऋतस्य ऋतदेवस्य" । इति भाष्यम् ॥ यज्ञः । यथा, ऋग्वेदे । १ । १४५ । ५ ।
"ऋतचिद्धि सत्यम्" । "ऋतस्य यज्ञस्य जलस्य वा चित् ज्ञाता" । इति भाष्यम् ॥ अग्नेर्ऋषि-भेदः । यथा, यजुषि । १७ । ८२ । "ऋतश्च सत्यश्च" । इति ॥)

ऋत, त्रि, (ऋ + क्त ।) दीप्तः । पूजितः । इति मेदिनी ॥

ऋतजित्, पुं, (ऋतं जयति ऋत + जि + क्विप् ।) यक्षविशेषः । यथा,—
"त्वष्टा च जमदग्निश्च कम्बलोऽथ तिलोत्तमा ।
ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रश्च सप्तमः ॥
माघमासे वसन्त्येते सप्त मैत्रेय भास्करे ।
श्रूयतां चापरे सूर्य्ये फाल्गुने निवसन्ति ये" ॥
इति श्रीविष्णुपुराणे २ । १० । १५—१६ । "त्वष्टा सूर्य्यः । कम्बलः सर्पः । ब्रह्मापेतो राक्षसः । ऋत-जिद्यक्षः । धृतराष्ट्रो गन्धर्व्वः । इति तट्टीकायां श्रीधरस्वामी ॥ (त्रि, यज्ञजेता । यथा, यजुषि १७ । ८३ । "ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च" ॥)

ऋतधामा, [न्] पुं, (ऋतं सत्यं धाम भवनं यस्य ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (यथा, यजुर्व्वेदे ५ । ३२ । "हव्यसूदन ऋतधामासि स्वर्ज्योतिः" ॥ इन्द्रभेदः । स तु रुद्रसावर्णिके मनौ भविता । यथा,— भागवते । ८ । १३ । २८ ।
"भविता रुद्रसावर्णी राजन् । द्वादशमो मनुः ।
ऋतधामा च देवेन्द्रो देवाश्च हरितादयः" ॥
यदुवंशीयो नृपतिभेदः । यथा, भागवते ।
"कङ्कस्य कर्णिकायां वै ऋतधामाजयावपि" ॥
अविनश्वरस्थानवति, त्रि । यथा यजुर्व्वेदे । १८ । ३८ ।
"ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयः" ॥)

ऋति, स्त्री, (ऋ + कारणे + क्तिन् ।) कल्याणम् । वर्त्म । जुगुप्सा । स्पर्द्धा । इति मेदिनी ॥ (भावे + क्तिन् ।) गमनम् । असुखम् । इति धरणी ॥ (पुरुषमेध-यज्ञीयदेवभेदः । यथा, यजुर्व्वेदे । ३० । १३ । "ऋतये स्तेन हृदयम्" । शक्तौ पुं, इति निरुक्तिः ।)

ऋतीया, स्त्री, (ऋत + ईयङ + टाप् ।) घृणार्थकः । जुगुप्सा । तत्पर्य्यायः । अर्त्तनम् २ ऋतीया ३ । इत्यमरः ॥

ऋतु, पुं, (ऋ + "अर्त्तेश्च तुः" । इति उणादिसूत्रेण १ । ७२ । तुः चकारात् कित् च ।) कालविशेषः । स तु षड्विधः यथा । मार्गपौषौ हिमः १ माघ-फाल्गुनौ शिशिरः २ चैत्रवैशाखौ वसन्तः ३ ज्यैष्ठाषाढौ ग्रीष्मः ४ श्रावणभाद्रौ वर्षा ५ आ-श्विनकार्त्तिकौ शरत् ६ । इत्यमरः ॥ स त्रिविधो-ऽपि । कार्त्तिकाग्रहायणपौषमाघाः शीतः १ फाल्गुनचैत्रवैशाखज्यैष्ठाः ग्रीष्मः २ आषाढश्रावण-भाद्राश्विनाः वर्षाः ३ । द्विविधोऽपि । कार्त्तिका-दिषण्मासाः शीतः १ वैशाखादिषण्मासा ग्रीष्मः २ ॥ इति स्मृतिः ॥ * ॥
(यदुक्तम् ।
"मासद्वयात्मकः कालः ऋतुः प्रोक्तो विचक्षणैः" ।
यत्र तु "द्वादश मासाः पञ्चर्त्तवः" इति श्रुतं तत्र हेमन्तशिशिरयोरैक्यं कृत्वा विवक्षितम् ॥
"चयकोपशमा यस्मिन् दोषाणां सम्भवन्ति हि ।
ऋतुषट्कं तदाख्यातं रवेः राशिषु सङ्क्रमात् ॥
ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृड्मिथुनकर्कटौ ।
सिंहकन्ये स्मृता वर्षा तुलावृश्चिकयोः शरत् ॥
धनुर्ग्राहौ च हेमन्तो वसन्तः कुम्भमीनयोः" ।
मेषवृषौ रविणा सङ्क्रान्तौ । एवं मिथुनकर्कटा-वित्यादि । अन्ये तु ।
"शिशिरः पुष्पसमयो ग्रीष्मो वर्षाशरद्धिमाः ।
माघादिमासयुग्मैः स्युर्ऋतवः षट् क्रमादमी" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ।
"वर्षाः शरच्च हेमन्तः शिशिरश्च वसन्तकः ।
ग्रीष्मश्चेति क्रमादेते ऋतवः षट् प्रकीर्त्तिताः ॥
पृथक् पृथक् प्रवक्ष्यामि रवेर्गतिविशेषतः" ।
इति प्रथमस्थाने चतुर्थेऽध्याये हारीतेनोक्तम् ॥
"मासैर्द्विसंख्यैर्माघाद्यैः क्रमात् षडृतवः स्मृताः ।
शिशिरोऽथ वसन्तश्च ग्रीष्मवर्षाशरद्धिमाः" ॥
इति सूत्रस्थाने तृतीयेऽध्याये वाग्भटेनोक्तम् ॥
"इह खलु संवत्सरं षडङ्गमृतुविभागेन विद्यात्" ।
इति सूत्रस्थाने षष्ठोऽध्यायः ।
"तत्र खलु तावत् षोढा प्रविभज्य कार्य्यमुपदेक्ष्यते । हेमन्तो ग्रीष्मो वर्षाश्चेति शीतोष्णवर्षलक्षणास्त्रयः ऋतवो भवन्ति । तेषामन्तरेष्वितरे साधारण-लक्षणास्त्रय ऋतवः प्रावृट्शरद्वसन्ता इति । प्रावृडिति प्रथमः प्रवृष्टेः कालस्तस्यानुबन्धो वर्षाः । एवमेते संशोधनमधिकृत्य षड् विभज्यन्ते ऋतवः" ।
इति च विमानस्थानेऽष्टमेऽध्याये चरकेणोक्तम् ।
"तत्र माघादयो द्वादशमासाः द्विमासिकमृतु कृत्वा षडृतवो भवन्ति । ते शिशिर-वसन्त-ग्रीष्म-वर्षा-शरद्धेमन्ताः । तेषां तपस्तपस्यौ शिशिरः । मधुमाधवौ वसन्तः । शुचिशुक्रौ ग्रीष्मः । नभो-नभस्यौ वर्षाः । इषोर्जौ शरत् । सहःसहस्यौ हेमन्त इति ॥ तत्र ते शीतोष्णवर्षलक्षणाश्च-न्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो-दक्षिणमुत्तरञ्च" ।
"इह तु वर्षाः शरद्धेमन्तः वसन्त-ग्रीष्म-प्रावृषः षडृ-तवो भवन्ति दोषोपचय-प्रकोपोपशम-निमित्तम् । ते तु भाद्रपदाद्येन द्विमासिकेन व्याख्याताः । तद्-यथा । भाद्रपदाश्वयुजौ वर्षाः । कार्त्तिकमार्गशीर्षौ शरत् । पौषमाघौ हेमन्तः । फाल्गुन-चैत्रौ वसन्तः । वैशाख-ज्यैष्ठौ ग्रीष्मः । आषाढ़-श्रावणौ प्रावृडिति" । इति सूत्रस्थाने ६ अध्याये सुश्रुते-नोक्तम् ॥)
स्त्रीकुसुमम् । इति विश्वमेदिन्यौ ॥ तत्पर्य्यायः । रजः १ पुष्पम् २ आर्त्तवम् ३ । इत्यमरः ॥
यथाह मनुः । ३ । ४५-४९ ।
"ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा ।
पर्व्ववर्ज्जं व्रजेच्चैनां तद्व्रतो रतिकाम्यया ॥
ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः ।
चतुर्भिरितरैः सार्द्धमहोभिः सद्विगर्हितैः ॥
तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या ।

ऋक्षोदरी च वेगाल् मध्यमा रक्तलोचना।
कुम्भाख्य यथा मायर्ले स्त्रियोऽकुम्भाख्य रात्रिषु।
तस्मात् कस्मात् प्रभावं तीव्रवेगाच स्त्रियम्।
युग्मात् पुत्रोऽयथेये युग्मे स्त्री चायुग्मेषु स्त्रियः।
वर्जेऽयमाद् पण्डो वा दीर्घेऽन्ये च विवर्जयेत्" ॥
"इत्य कार्त्तिवं यावत् ऋतुच भिवत्सा वर" ।
इति शारीरस्थाने प्रथमेऽध्याये शारीरेणोक्तम्।
"ऋतुन स्वास्थ्य भवति सुलक्षणम्।
"नियतं दिवस ऋतौ तु स्मृतं यथा।
ऋतौ व्यतीते मार्गान् योनिः संवियते यथा।
मासेनोपचितं काले धमनीभ्यां तदार्त्तवम्।
ईषद् कृष्णं विगन्धञ्च वायुर्योनिमुखं नयेत्।
तदवोदरमध्याख्ये चतुर्मासमत्र द्रुम।
बराख्यशरीरावो माति सप्ताहका क्षयम्" ।
इति शारीरस्थाने तृतीयेऽध्याये सुश्रुतेनोक्तम्।
"स्वास्थ्यार्त्तवपूर्वं मासमात्र यथा स्त्रियः।
माति मासि गर्भाशयं प्राप्यार्त्तवं च्यवेत्।
कालैकार्त्तवदिवसात् ऋतुः षोडशरात्रयः।
गर्भधारणायोग्य न चव समाः स्मृताः" ।
"कर्माणामेव ऋतुकालीनं गर्भधारिणमतः।
पूर्वाह्नामत मध्याह्नेषु विषया। तत्पुनः।
कालविशेषात्पूर्वे तदावधारणावधि प्रावृष्यायाः। तत्र
रावावधि रुक्तिवाया। यथवारावधि निषेकाः।
मक्षुयावधि गमनाः गर्भकारणं पुंसः" ।
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे।
"यथं पद्मोऽम्भसाचापि दिनद्वीके यथा यथा।
ऋतावतीते योनिः वा सुत्र नाल वमीस्यति।
मासेनोपचितं रक्तं धमनीभ्यामृतौ पुनः।
ईषत्कृष्णं विगन्धञ्च वायुर्योनिमुखान्नयेत्" ।
"ऋतुस्तु द्वादशनिशाः पूर्वास्तिस्रश्च निन्दिताः"।
इति शारीरस्थाने प्रथमेऽध्याये वाग्भटेनोक्तम्।
विष्णुः। यथा महाभारते १३। महादेववचन
माहात्म्ये १७। २६८।
"ऋतुः कल्पादो मासः पक्षः संवत्सरमावहः" ।
विष्णुः। यथा, महाभारते १३ विष्णुसहस्रनाम-
कथने १४९। ६७।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः" ।)
दीप्तिः। इति मेदिनी। कान्तिः। सुदीप्तिः। इति विश्वः।
ऋतुपाक, त्रि (ऋतुः पाकोऽस्य।) कालपाकि।
कालपाकादि। इति शब्दचन्द्रिका।
ऋतुमती स्त्री, (ऋतुरस्त्या अस्तीति। ऋतु + मतुप्
+ ङीप्।) ऋतुयुक्ता स्त्री। तत्पर्य्यायः। रज-
स्वला २ स्त्रीधर्मिणी ३ अवी ४ आत्रेयी ५
मलिनी ६ पुष्पवती ७ उदक्या च। इत्यमरः
(यथा, महाभारते १।९। ७०। "उपाध्यायानी
ते ऋतुमती उपाध्यायश्च प्रोषितोऽस्या यथाय-
मृतुर्वन्थ्यो न भवति तथा क्रियताम्" ।
ऋतुमतीधर्म्मश्च।
"कार्त्तवधारदिवसम् वाच वा नक्षत्रादिवी
स्वीय दवाख्यामां पश्येदपि पति न च।
काले स्नात्वा च सर्वे वा पतिन चन्द्रमाचरेत्।
ऋतुस्नात्वं मङ्गल्येरम्बरमङ्गलेपनम्।
देवतोपस्थं चार्यं विप्रांश्च प्रणमेत्तम्।
वसनस्त्रावसन्नं वसनं वस्त्रमादत्।
चाचार्यं भूमिसमय पूयतां विसर्जयेत्।
स्नातपूर्वे दिवसे माला सदश्यावर्दिनि।
भूषिता सुमनाः भजेत् भर्त्तारं समचकुत्सम्।
दृष्ट्वा पश्येत् ऋतुस्नाता सदृशं जनमङ्गना।
तादृशं जनयेत् पुत्रं तदा वाच्यम् पति प्रियम्" ।
तदवस्थेव प्रथमावस्था।
"प्रथमायाम् वा प्रमोदया शीताका देवस्य वा।
वा पिन् कुर्य्यात् चिकित्सापि गर्भदोषात्कराभुवात्।
वक्ष्या रोदनात् गर्भः खे विकृतलोचनः।
नखच्छेदेन कुनखी कुष्ठी अभ्यङ्गतो भवेत्।
अनुलेपात् तथा स्नानात् दुःखशीलोऽप्रमादकः।
मानवीया दिवास्वापात् चवव खात् प्रमादवान्।
चवणात्मद्यपात् बधिरः खञ्जः भाषते।
वायुतर्कोऽचिरात् प्राणो पुनः भवेत्।
प्रयासी भूमिखननात् उन्मत्तः परिश्रमात्।
अभ्यञ्जनस्नानात् उन्मत्तो रात्रिचरात्" ।
इति।
"प्रथमचतुर्थदिवसं स्नुः भोक्तियमोक्षाम्।
वन्यादिकृषि देवानां विवाहमूर्ध्नि स्त्रियम्।
इति शारीरस्थाने प्रथमेऽध्याये वाग्भटेनोक्तम्।
"यत्र प्रथमे दिवसे यत्र वायस्थित द्रुमा द्रुम
वासा स्त्रियमनाभ्यासौ नियतोऽस्य प्रभावात्
भविभावयन्ते" ।
इति शारीरस्थाने चतुर्थेऽध्याये चरकेणोक्तम्।
"शीतप्रथमदिवसानां भवितमामनुमतिदिवाम्।
करकामा मिश्नची वक्षःकुम्भ्युत्पृष्ठेषाम्।
प्रदत्तपुत्राः सोऽयिवाधूर्ध्वजन्मिनम्।
धर्मोदिष्टपुराणानि विधानुमतिर्भिर्भवि" ।
इति शारीरस्थाने तृतीयेऽध्याये —
"तत्र ऋतुकाले चतुर्थेऽहन्यवसायानगतजहूना
ऋतुमदहनविधानेन भर्त्तार दर्शयेत्। यत्
सम्य केवो।
पूर्वं पश्येदृतुस्नाता यादृशं नरमङ्गना।
तादृशं जनयेत् पुत्रं भर्त्तारं दर्शयेत्ततः।
ततो विधानं पुत्रीयमुपाध्यायः समाचरेत्।
कर्मान्ते च क्रमं ह्येवमाचरेत विचक्षणः" ।
"तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनम-
नायुष्यं पुंसां भवति। यश्च तत्राधीयते गर्भः स
प्रसवमानो विमुच्यते। द्वितीयेऽप्येवं सूतिकागृहे
वा। तृतीयेऽप्येवमसम्पूर्णाङ्गोऽल्पायुर्वा भवति।
चतुर्थे तु सम्पूर्णाङ्गो दीर्घायुश्च भवति। न च
प्रवर्त्तमाने रक्ते बीजं प्रविष्टं गुणकरं भवति यथा
नद्यां प्रतिस्रोतः प्लावि द्रव्यं प्रक्षिप्तं प्रतिनिव-
र्त्तते नोर्द्ध्वं गच्छति तद्वदेव द्रष्टव्यम्। तस्मान्नि-
यमवती त्रिरात्रं परिहरेत्। अतः परं मासा-
दुपेयात्" । इति च शारीरस्थाने द्वितीयेऽध्याये
सुश्रुतेनोक्तम्।)
ऋतुराज, पुं, (ऋतूनां राजा। "राजाहःसखिभ्य-
ष्टच्" । ५।४।९१। इति टच्।) वसन्तकालः।
इति राजनिर्घण्टः।
ऋतुपर्ण, पुं (ऋतुः पर्णमिव यस्य।) नृपः।
इति त्रिकाण्डशेषः।
ऋतुवृत्ति,पुं, (ऋतोः वृत्तिर्यस्मात्।) ऋतुपरावर्त्त-
नकालः। स च ऋतोरन्यर्त्तुसञ्चारः। यथा
माघके।
"ऋतोरन्यारिंसङ्क्रमादृतुवृत्तिरिति स्मृता।
तत्र सर्वा विविधव्याप्ता संसर्गस्तु ततो विधि।
ऋतुस्नान, क्ली, (ऋतौ स्नानम्।) रजस्वलानां
चतुर्थदिवसस्नानम्। इति स्मृतिः। तस्य-
माहात्म्यं यस्य स्नान्या गर्भं धारयति वत्सरे तत्र
भर्त्तारं भवति ब्रह्मा पूर्वं विनोदयेत्। इति
काशीखण्डम्।
("यथा हर्म्यवासेव सम्भोगभागिनी भवेत्।
प्रभाचन्द्रार्कसदृशा रम्यकमलालोचनी।
घोरैर्न वायसं कोर्म कोकिलोलूककर्दमम्।
सर्वं स्पृशेत् स्नाने वा मुक्तिक्षेत्रचारिणी।
चतुर्थेऽह्नि यदा स्नाता सुस्नाता सम्भवा शुचिः।
दृष्टवती भर्त्तृमुखं तत्र पश्येत् पुरः पतिम्"।
इति शारीरस्थाने प्रथमेऽध्याये वाग्भटेनोक्तम्।)
ऋते व (ऋत + ए।) विना। वर्जनम्। यथा,
("ऋतेऽपि मां मीलय ते तुरङ्गमात्"।
इति रघुवंशे। ३। ४२। तथा, कुमारे ३।६।
"कोशात् विभिद्य मीनकेतुविशेषा" ।)
ऋत्विक्, [ज्] पुं, (ऋतौ यजतीति। ऋतु + यज +
ऋत्विगादिना क्विन्निपात्यते निपातितः।) पुरोहितः।
यथा,—
"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान्मखान्।
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते।"
इति मनुः २। १४३। तत्पर्य्यायः। याजकः २।
इत्यमरः। यजमः ३ कुरकः ४ सम्पत्ता ५ यज्ञ-
मन्त्रिणः ६ याजकः ७ यष्टा च यज्ञकः ८ दैव-
कः ९। इत्यथर्वाभिधानशास्त्रम्। इति शब्दर-
त्नावली २ आचारः।
यथं हि मानवस्य कर्मकारः। चतुर्थं यति-
मरणे। २। ११। "ऋत्विक्पुरोहिता कुर्वत
विरजापरपावनो वर्णे" ।)
ऋद्धं, क्ली, (ऋध् + क्त।) सम्पन्नधान्यम्। इति है
मनी। परिपक्वमर्द्दितधान्यम्। इत्यमरटीकायां
भरतः। मर्द्दितधान्यम्। इति स्वामी। तत्-
र्य्यायः। आवसितम् २। इत्यमरः। मर्द्दितम् ३।
इति जटाधरः। सिद्धान्तः। इति शब्दरत्ना।
(पुं, विष्णुः। यथा, महाभारते विष्णुसहस्रनाम-
कीर्त्तने १३। १४९। ३१।
"ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः"।)
ऋद्ध, त्रि, (ऋध + क्त।) समृद्धः। सम्पन्नः। इति
मेदिनीकरहेमचन्द्रौ। (यथा, मीमांसायाम्। २।
"अथाप्य युमामचमगर्भं
राज्यं सुरासामपि चाधिपत्यम्"।)
ऋद्धि, स्त्री, (ऋध् + क्तिन्।) अष्टवर्गान्तर्गतौषध-
विशेषः। तत्पर्य्यायः। योग्यम् २ सिद्धिः ३ लक्ष्मी
४। इत्यमरः। प्राणपदा ५ जया ६। इति रत्न-
मालाः। सम्पदा ७ जीवदात्री ८ सिद्धा ९ योग्या

१० चेतनीया ११ रथाङ्गी १२ मङ्गल्या १३ लोककान्ता १४ जीवश्रेष्ठा १५ यशस्या १६। अस्या गुणाः। मधुरत्वम्। सुस्निग्धत्वम्। अतितिक्तत्वम्। शीतलत्वम्। रुचिमेधाकारित्वम्। श्लेष्मकुष्ठकृमिनाशित्वञ्च। इति राजनिर्घण्टः॥ अस्या रूपं यथा,—

"ऋद्धिर्वृद्धिश्च कन्दौ द्वौ भवतः कोशयामले।
श्वेतलोमान्वितः कन्दो लताजालः सरन्ध्रकः॥
स एव ऋद्धिर्वृद्धिश्च भेदमप्येतयोर्ब्रवे।
तूलग्रन्थिसमा ऋद्धिर्वामावर्त्तफला च सा॥
वृद्धिस्तु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः"।
औषधकार्य्ये ऋद्धिवृद्धिस्थाने वाराहीकन्द यथवा वला देया। इति परिभाषा॥ * ॥ समृद्धिः। इति मेदिनी॥ (यथा, कुमारे २। ५८॥
"परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना"।)
पार्व्वती। इति शब्दरत्नावली॥ (लक्ष्मी॥)

ऋध, उ य न इर वृद्धौ। इति कविकल्पद्रुमः॥ (दिवा, स्वा-पर-सकं-सेट्।) य ऋध्यति। उ आर्द्धिता ऋद्धा। न ऋध्नोति। इर आर्धत् आर्धीत्। क्वचित्तु तौ चायम्। सोऽह प्राग्भवतैव भूतजनमोऽनृध्नोमीति भवभूतिः॥ अन्तर्भूतण्यर्थत्वादिदं सिद्धमिति केचित्। इति दुर्गादासः॥

ऋफ, श दाने। श्लाघायाम्। हिंसायाम्। निन्दायाम्। युद्धे। इति कविकल्पद्रुमः॥ (तुदा-पर-सक,श्लक च-सेट्।) श ऋफति जनो ददाति श्लाघते छिनत्ति निन्दति युध्यते वेत्यर्थः। श्लानर्पः। हिंसायामप्ययमित्यन्ये। इति दुर्गादासः॥

ऋभुः, पु, (ऋभ स्वर्गे देवमातुरदितेर्व्वा भवति य। ऋ+भू+डु।) देवता। इत्यमरः॥ (यथा, ऋग्वेदे। ९। २१। ६।
"ऋभुर्न रथ्यं नवं दधतो केतुमादिशे"।
देवानामपि देवः। यथा, महाभारते वनपर्व्वणि।
"ऋभवो नाम तत्रान्ये देवानामपि देवताः।
तेषां लोकाः परतरे यान्यजन्तीह देवताः"॥)
चाक्षुषमन्वन्तरे देवगणभेदः। यथा,—
"आद्याः प्रभूता ऋभवः पृथुकाश्च दिवौकसः"।
इति हरिवंशे। ७। ३२।)

ऋभुक्षः, पु, (ऋभवो देवा क्षियन्ति वसन्ति यत्र। ऋभु+क्षि+ड।) स्वर्गः। वज्रम्। इन्द्रः। इति रायमुकुटः॥ (देवमात्रे। यथा ऋग्वेदे। ४। ३७। १। "उपनो राजा अध्वरमृभुक्षा"।
"ऋभुक्षाः ऋभवः"। इति भाष्यम्॥)

ऋभुक्षा, [न्] पुं, (ऋभुक्ष स्वर्गः वज्रं वा अस्यास्तीति इनि। "पथिमथ्यृभुक्षामात्"। ७।१।८५। "इतोऽत्सर्व्वनामस्थाने"। ७।१।८६। इत्यादिना सिद्धम्। यद्वा ऋभुक्षति इति अर्त्तेर्मुच्चिनक्प्रत्ययः।) इन्द्रः। इत्यमरः॥ (यथा, ऋग्वेदे। ७। ४०। ३। "इन्द्रो विभ्वा ऋभुक्षा वाजो अर्य्य"। इति॥)

ऋम्फ, श वधे। (मुचादि तुदा पर सक-सेट्।) इति रिम्फधातोष्टीकायां दुर्गादासः॥

ऋश, गतिस्तुत्योः। सौत्रधातुरयम्। (पर सक-सेट्।) ऋश्यः। इति दुर्गादासः॥

ऋश्य, पु स्त्री, (ऋश्+क्यप्।) मृगविशेषः। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ८। ४। १०।
"ऋश्यो न तृष्यन्नवपानमागहि"॥)

ऋष, ई श गतौ। इति कविकल्पद्रुमः॥ (तुदा-पर-सक-सेट्।) ऋश्वादिः। ई ऋष्टः। श ऋषति। इति दुर्गादासः॥

ऋषभ, पु, (ऋष्+"ऋषिवृषिभ्यां कित्"। इति उणादिसूत्रेण ३।१२३। अभच्। किच।) वृषः। (यथा, ऋग्वेदे ६। २८। ८। "उप ऋषभस्य रेतस्युपेन्द्र तव वीर्य्ये"॥) कर्णरन्ध्रम्। कुम्भीरपुच्छः। उत्तरपदे श्रेष्ठः। इति मेदिनी॥
("स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः"॥
इत्यमरवाक्यात्। यथा पुरुषर्षभ पुरुषश्रेष्ठ इत्यर्थः। अयमर्षभोऽप्ययं श्रेष्ठार्थवाचकः। यथा, भागवते २। ४। २२॥
"स्वलक्षया प्रादुरभूत् किलास्यतः
स मे ऋषीणामृषभः प्रसीदताम्"॥
"ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः"। इति तट्टीका॥ गणविशेषः। व्याकृतिगणोऽयम्। यथा पाणिनि तत्पुरुषसमासप्रकरणे २। १। ५६॥
"उपमितं व्याघ्रादिभिः सामान्याप्रयोगे"॥ व्याघ्रादिराकृतिगणः। "व्याघ्र सिंह-ऋक्ष ऋषभ-चन्दन वृक वृष-वराह-हस्तिन्-तरु-कुञ्जर-रुरु-पृषत्-पुण्डरीक-पलाश-कितवाः"। इत्येते व्याघ्रादयः॥) पर्व्वतविशेषः। इति धरणी॥ वराहपुच्छः। आदिजिनः। इति हेमचन्द्रः॥ भगवदवतारविशेषः। (यथा, भागवते ५।६।७। "तस्य ह वा एव मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन सङ्क्रममाणः"॥) स तु सत्ययुगे आग्नीध्रसुतनाभिराजपुत्त्रत्वेन जातः। तस्य पुत्त्रः जड़भरतः। इति श्रीभागवतम्।
(तथा, मार्कण्डेये ५३। ३८।
"आग्नीध्रसूनोर्नाभेस्तु ऋषभोऽभूत् सुतो द्विज।
ऋषभाद्भरतो जज्ञे वीरः पुत्त्रशताद्वरः"॥
स्वारोचिषे मन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये ६७। ४।
"ऊर्जस्तम्भस्तथा प्राणो दत्तोलिर्ऋषभस्तथा"॥
ऋषभसहस्रदक्षिण एकाहनिष्पाद्यो यागभेदः। यथाह गर्गः "पूर्व्वं ऋषभसहस्रो राज्ञः"॥ स्वनामख्यातः यक्षपुरुषो स्पष्टभेदः। यथा, शतपथब्राह्मणे १३। ५। ४। १५। "एकविंशस्तोमेन ऋषभो याज्ञतुर ईजे शिक्नानां राजा तदेतद्गाथयाऽभिगीतम्"॥) अष्टवर्गान्तर्गतौषधविशेषः। तत्पर्य्यायः। वृषः१ ऋषभकः २ वीरः ३। इति रत्नमाला॥ गोपतिः ४ धीरः ५ विषाणी ६ दुर्द्धरः ७ ककुद्मान् पुङ्गवः ८ वोढ़ा १० शृङ्गी ११ धूर्य्यः १२ भूपतिः १३ कामी १४ रूक्षप्रियः १५ उक्षा १६ लाङ्गूली १७ गौः १८ वन्धुरः १९ गोरक्षः २० वनवासी २१। अस्य गुणाः। मधुरत्वम्। शीतलत्वम्। रक्तपित्तविरेकनाशित्वम्। शुक्रश्लेष्मकारित्वम्। दाहक्षयज्वरहरत्वञ्च। इति राजनिर्घण्टः॥ *॥

('जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ।
रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ"॥
"ऋषभो व... ...दृक्कवत्"॥
"ऋषभो वृषभो धीरो विषाणी द्राक्ष इत्यपि"॥
अनयोर्गुणा यथा॥
"जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ।
मधुरौ पित्तदाहास्रकार्श्यवातक्षयापहौ"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) सप्तस्वरान्तर्गतद्वितीयस्वरः। (अस्य स्वरः पिञ्जरः।) अस्य तिस्रः श्रुतयो यथा, (१) दयावती, (२) रञ्जनी, (३) रतिका। तिसृष्व श्रुतिजातयो यथा, (१) करुणा, (२) मध्या, (३) मृदुः। अयञ्च ऋषिवंशीय, क्षत्त्रियजाति, पिङ्गवर्णश्च। अस्योत्पत्तिः शाकद्वीपे। अस्य ऋषिः देवता च ब्रह्मा, छन्दो गायत्री। यथा सङ्गीतरत्नाकरे,—
"ऋषभस्थस्त्रिश्रुतिस्तत । ।
दयावती रञ्जनी च रतिका चर्षभे स्थिता॥
दीप्तायता मृदुर्मध्या षड्जे स्यात् ऋषभे पुनः।
सस्थिता करुणा मध्या मृदु .. ॥
पञ्चमः पित्र्यवंशश्च ऋषभाद्यिकुलोद्भवौ।
ऋषौ तु क्षत्त्रियौ ज्ञेयौ वैश्यजाती निगौ मतौ"॥
रि धौ ऋषभधैवतौ इत्यर्थः। इत्यादि।)
स तु गोस्वरतुल्यस्वरः। चातकस्वरतुल्यस्वर इति केचित्। नारदमते गाव ऋषभस्वरं वदन्ति यथा,—
"षड्जं रौति मयूरो हि गावो नर्दन्ति चर्षभम्"।
इति नारदसंहितायाम्। दर्पणरत्नाकरादिमते तु चातक ऋषभं वदति। यथा सङ्गीतदर्पणे,—
"स्वरमृषभं चातको ब्रूते"।) अस्योत्पत्तिः।
"नाभिमूलाद्यदा वायु उत्थित कुरुते ध्वनिम्।
वृषभस्येव निर्याति हेलया ऋषभं स्मृतः"॥
इति सङ्गीतदामोदरः॥
("नाभेः समुदितो वायुः कण्ठशीर्षसमाहतः।
ऋषभस्येव नादं यत् तस्मादृषभ ईरितः"॥
इति च सङ्गीतसमयसारे। अस्योत्पत्तिः ऋग्वेदात्। यथा रत्नावल्या,—
"ऋग्वेदात् षड्ज ऋषभौ यजुषो मध्यधैवतौ।
सामवेदात् समुद्भूतौ तथा गान्धारपञ्चमौ"॥
इति॥)

ऋषभध्वज, पु, (ऋषभः ध्वजःचिह्नमस्य ध्वजेऽस्य वा।) शिवः। अर्हद्विशेषः। इति मेदिनी॥

ऋषभी, स्त्री, (ऋषभ+जातौ ङीष्।) नराकारस्त्री। शूकशिम्बी। शिरालाः। विधवा। इति मेदिनी॥
(शूकशिम्ब्यर्थे व्यवहारो यथा॥
"ऐन्द्र्यृषभ्यतिरसेत्यादिषु"।
इति चरके सूत्रे चतुर्थेऽध्याये॥ अत्र हि ऋषभी शूकशिम्बी इत्यस्य शिवदासीयटीका॥ *॥)

ऋषि, पु, (ऋषति प्राप्नोति सर्व्वान् मन्त्रान् ज्ञानेन पश्यति संसारपारं वा इति। ऋष्+"इगुपधात् कित्" ४।११९। इति उणादिसूत्रेण इन्। किच।) ज्ञानसंसारयोः पारगन्ता। शास्त्रकृदाचार्य्यः। (यथा, ऋग्वेदे १। १। २। "अग्नि

पूर्व्वैर्महर्षिभिर्धीरैर्यो पूर्व्वैरेव स देवा यत्र सन्ति")) दिविदर्शनाद्दिव। "विद्याविद्यमहिमतो दिव्या ऋषिकाः"। इति मनोक्तात्। इति भरतः॥ तत्पर्य्यायः। सत्यवचाः २ शापास्त्र ३। स तु सप्तविधो यथा। व्यासाद्या महर्षिः १ भेलाद्याः परमर्षिः २ कण्वादयो देवर्षिः ३ वसिष्ठाद्या ब्रह्मर्षिः ४ सुश्रुताद्याः श्रुतर्षिः ५ ऋतुपर्णादयो राजर्षिः ६ जैमिन्याद्याः काण्डर्षयः। इति शि वामनरेकः। यथा च रत्नकोषे।

"सप्त ब्रह्मर्षि-देवर्षि-महर्षि-परमर्षयः।
काण्डर्षिश्च श्रुतर्षिश्च राजर्षिश्च क्रमावराः॥"
मन्वन्तरभेदे सप्तर्षिनामानि यथा।

१। स्वायम्भुवमन्वन्तरे मरीचिः। अत्रिः। अङ्गिराः। पुलस्त्यः। पुलहः। क्रतुः। वसिष्ठः। (यथा हरिवंशे। ७। ८।
"मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः।
पुलस्त्यश्च वसिष्ठश्च सप्तैते ब्रह्मणः सुताः"॥)

२। स्वारोचिषे ऊर्ज्जस्तम्भादयः।
(यथा, मार्कण्डेये ६७। ४।
"ऊर्ज्जस्तम्भस्तथा प्राणो दत्तोलिऋषभस्तथा।
निश्चरश्चार्व्वरीवांश्च तत्र सप्तर्षयोऽभवन्॥")

३। उत्तमे वसिष्ठसुताः प्रमदादयः।
(यथा मार्कण्डेये ७३। १९।
"वसिष्ठतनया ह्येते वसिष्ठस्य महात्मनः।
उत्तमस्यान्तरे ह्यासन् सप्त सप्तर्षयोऽभवन्॥")

४। तामसे ज्योतिर्धामादयः।
(यथा मार्कण्डेये ७४। ६४।
"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वनकस्तथा।
पीवरश्च तथा ह्यासन् सप्त सप्तर्षयोऽभवन्॥")

५। रैवते हिरण्यरोमा वेदश्रीरा ऊर्द्ध्वबाहुरित्यादयः। (यथा मार्कण्डेये ७५। ७१-७३।
"हिरण्यरोमा वेदश्रीरूर्द्ध्वबाहुस्तथापरः।
वेदबाहुः सुधामा च पर्ज्जन्यश्च महामुनिः॥
वसिष्ठश्च महाभागो वेदवेदान्तपारगः।
एते सप्तर्षयश्चासन् रैवतस्यान्तरे मनोः॥")

६। चाक्षुषे सुमेधःप्रभृतयः।
(मार्कण्डेयमहापुराणे उक्तञ्च तत्रैव ।७६।५४।
"सुमेधा विरजाश्चैव हविष्मानुन्नतो मधुः।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः"॥)

७। वैवस्वतमन्वन्तरे कश्यपः। अत्रिः। वसिष्ठः। विश्वामित्रः। गौतमः। जमदग्निः। भरद्वाजः। (यथा मार्कण्डेये ७९। ८-१०।
"अत्रिश्चैव वसिष्ठश्च काश्यपश्च महानृषिः।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः।
तथैव पुत्रो भगवानृचीकस्य महात्मनः।
जमदग्निश्च सप्तैते मुनयोऽत्र तथान्तरे॥")

८। सावर्णिके गालवः। दीप्तिमान्। परशुरामः। अश्वत्थामा। कृपः। ऋष्यशृङ्गः। व्यासः।
(यथा, मार्कण्डेये ८० । ४।
"रामो व्यासो गालवश्च दीप्तिमान् कृप एव च।
ऋष्यशृङ्गस्तथा द्रौणिस्तत्र सप्तर्षयोऽभवन्"।
द्रौणिः अश्वत्थामा। द्रौणिरश्वत्थामा॥)

९। दक्षसावर्णिके द्युतिमदादयः।
(यथा मार्कण्डेये ९४। ७।
"मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा।
सप्तर्षयोऽन्यः सवनस्तथान्यो हव्यवाहनः"॥)

१०। ब्रह्मसावर्णिके हविष्मत्प्रभृतयः ...... सभृद्यास्ताः। (यथा मार्कण्डेये ९४। १ १२, १४।
"मनोस्तु दशमस्याथ वक्ष्यामि शृणु मन्वन्तरं द्विज।
सप्तर्षीन् ब्राह्मणो भाव्य तथा वक्ष्ये भविष्यत्ति वै यदा।
आपो मूर्त्तिर्हविष्मांश्च सुकृती सत्य एव च।
नाभागोऽप्रतिमश्चैव वासिष्ठश्चैव सप्तमः"॥)

११। धर्म्मसावर्णिके हविष्मदादयः।
(यथा मार्कण्डेये ९४। १८-२०।
"हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणिः।
निश्चरश्चानघश्चैव विष्टिश्चान्यो महामुनिः।
सप्तर्षयोऽन्तरे तस्मिन्नग्निदेवाश्च तावताः"॥)

१२। रुद्रसावर्णिके तपोमूर्त्त्यादयः।
(यथा मार्कण्डेये ९४। २३।
"तपस्वी सुतपाश्चैव तपोमूर्त्तिस्तपोरतिः।
तपोधृतिर्द्युतिश्चान्यः सप्तमस्तु तपोधनः"॥)

१३। देवसावर्णिके निर्म्मोहतत्त्वदर्शिप्रभृतयः। (मार्कण्डेयपुराणमते सर्व्व मनोरन्तरमत्र रौच्यमन्वन्तरे स्थिताः। यथा तत्रैव ९४। ३०-३२।
"त्रयोदशस्य पर्य्याये रौच्याख्यस्य मनोः सुतान्।
सप्तर्षींश्च प्रवक्ष्यामि मत्तो वै निबोधत।
धृतिमान् अव्ययश्च तत्त्वदर्शी निरुत्सुकः।
निर्म्मोहः सुतपाश्चैव निष्प्रकम्पश्च सप्तमः॥
महावीर्यो महावीर्य्यो ... रिपुजित्।
अग्निबाहुश्च सप्तर्षीन् मत्तो वै निबोधत।
शुचिरग्नीध्रश्चैव सप्तर्षीन् निबोधत।
निर्म्मोह सुतपाश्चैव निष्प्रकम्पश्च सप्तमः"॥)

१४। इन्द्रसावर्णिके अग्नीध्रप्रभृतयः। अग्नीध्राख्या अत्र्याद्यास्ताः सप्तर्षयः। (मार्कण्डेयपुराणमतेऽत्र भौत्याख्यमन्वन्तरे स्थिताः। यथा तत्रैव ९९। १।
"भव्य परस्तु भौत्यस्य समुत्पत्तिं निबोधत।
देवानृषींश्च ये च तत्पुत्राश्च महाभिधाः"।
तथा सर्व्वं भौत्यमन्वन्तराख्यानम्। अथवा कश्चिन् मन्वन्तरे सप्तर्षिनामान्यत्र तत्रैव १। ११।
"अग्नीध्रश्चाग्निबाहुश्च शुचिर्मुक्तोऽथ माधवः।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः"।
पुराणान्तरे मतभेदात् मन्वन्तराद्यर्षीणां नामभेदोऽपि दृश्यते। हरिवंशे ७ अध्याये तथा विष्णुपुराणे ३ अंशे च विस्तारितं द्रष्टव्यम्॥)

।*। जीविताकालमते वसिष्ठादयः सप्तर्षयः यथा ... ऋषिशब्दे द्रष्टव्यम्। अस्मिन् वाक्ये ... ऋषिपत्न्यश्च पूर्व्वादिम् यथा देवी ... ।*। देवः। पितरः। इति वैदिकी। अस्यादि सप्तर्षिमण्डलम्। यथा।

"अत्रुमेरीचिरत्रिश्च पुलस्त्यः पुलहः क्रतुः।
सप्तर्षयो वसिष्ठश्च प्रत्यक्षेण वै चराः।
इत्यत्र पाञ्चभौ ... हेमन्तपरिचराः।
नक्षत्रश्रेणिरूपेण सदा सप्तर्षिमण्डलम्।
तैस्मरन्ति ... समुद्भवाः।
ऋषयो नक्षत्रस्थाने ... तेषामासन्नपूर्व्वकम्।
ये द्युलोके स्थिताः सर्व्वे ... परस्परम्।
इत्येते ऋषयः प्रोक्ताः ... ऋषिकाः स्मृताः।
धर्म्मो हि विचारार्थे सप्तर्षिस्थाननिरूपणाय।
ईश्वराख्यो ... प्रयुक्ताः।
शक्तिः ज्ञानमेधा ... वसिष्ठस्तथा।
... ऋषिपरि ...।
... प्रविष्टस्तपः सौरियाः।
इति मनसा ... अध्यायः।

ईश्वराख्या सुतास्तेषामप्यस्यसकात् निबोधत।
काव्यो दमनविशेषैर् मनस्यायसवधा।
ज्ञानो ... धर्मसङ्घौ विभक्तयः"।
सौतिमहात्मे सौतिक इति वा पाठः।
"सर्वेऽभी गतिविज्ञानात् विद्याः ऋषिसर्ग्गकाः।
इत्येते ऋषयः प्रोक्ताः ऋषिकाः सुताः।
इति। तथा सुत ... या।
"ऋषि विद्यानां वासुविभावनलक्षणाः।
एष ऋषित्वो महान् ब्राह्मण्य ... मति।
विरक्तिसमाप्यस्तु मुख्या ऋषिमतिरिक्तम्।
आयत्वे परमं तस्मात् परमर्षिस्तु सुतः।
अवधीत्यपि ... विधायकम्।
... ऋषिधा मताः"।
इति मत्स्यपुराणे ११ अध्यायः।

ऋषिक, } पुं, (ऋषे पुत्रः। ऋषि+कन्।) ऋषीक, } ऋषिपुत्रः। यथा।
"ऋषिपुत्राः ऋषीकास्ते मैथुनाद्गर्भसम्भवाः।
परामर्शकाः नृणां ... ऋषीकास्ता।
ऋषीकास्ता सुता ये वै विवेका ऋषिसत्तमाः।
इत्येते ऋषयः प्रोक्ताः ऋषिकाः सुताः।
ये च ... प्रोक्ताः।
... ... वीर्य्यात्।
ऋषिर्दीर्घतमाश्चैव ... परमाः।
वामदेवः ... प्रोक्तश्च ... ।
मही च ... राजा वैवस्वता।
इत्येते ऋषिकाः सर्व्वे सप्तैव ऋषिकाः स्मृताः"।
इति मत्स्ये १२ अध्यायः।

ऋषिकुल्या, स्त्री, (ऋषीणां कुल्या सरिदिव पवित्रत्वात्) नदी। इति हेमचन्द्रः।
("ऋषिकुल्यां समासाद्य नरः स्नात्वा विकल्मषः।
देवान् पितॄन् चार्च्चयित्वा ऋषिलोकं प्रपद्यते"।
इति महाभारते। तीर्थयात्रापर्व्वणि ८। ७०। ५८।)

ऋषिकुल्या तदिदम्। ऋषिकुल्+अण्। ऋषिकुल्यादेशे त्रि। यथा, भागवते ३। २१। ३१।
"तत्र वसन्तो देवर्षिकुल्याः सरस्वतीम्।
मातामहं नमस्कृत्य देवाश्च ..."।)

ऋषिप्रोक्ता, स्त्री, (ऋषिभिः प्रोक्ता उक्ता) मासपर्णी। इति राजनिघण्टुः। ऋषिप्रोक्त इति ख्याता। (अस्याः पर्य्यायो यथा विशेषो ज्ञेयः)

ऋषिमोदा, स्त्री (ऋषीणां मोदः प्रीतिर्यस्याम्) माषपर्णिका। इति राजनिघण्टुः। (माषपर्णीशब्देऽस्या गुणादिकं ज्ञेयम्।)

ऋष्टि, स्त्री, (ऋष् हिंसायां + क्तिन्।) खड्गः। इति अमरः। (यथा, ऋग्वेदे। १। १०। २।
"वाशीमन्त ऋष्टिमन्तो मनीषिणः।
सुधन्वान इषुमन्तो निषङ्गिणः"।
आयुधविशेषम्। यथा ऋग्वेदे १। १६६। ४।
"अस्मिन् विश्वानि भुवनानि युयुधे।
विश्वो वो यामन् भयते वनस्पतिः"।
"ऋष्टिं युध्यन्तोऽविथ"। इति भाष्यम्।
तथा तत्रैव। १। ११। ६।
"आ ययोरायुधं वर आ ... "।

"ऋष्टीरायुधविशेषान्"। इति भाष्यम्।
तथा मनुः ३। १३३।
"यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्।
तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्ट्ययोगुडान्"॥
"ज्वलितशूलर्ष्ट्याख्यायुधलोहपिण्डान्"। इति तट्टीका॥ दीप्तिः। यथा, ऋग्वेदे ३। ५४। १३।

"विद्युद्रथा मरुत ऋष्टिमन्तो
दिवो मर्या ऋतजाता अयासः"।

"ऋष्टिमन्तो दीप्तिमन्तः"। इति भाष्यम्॥ गमनागमनशील। यथा, ऋग्वेदे १। ६४। ४॥ "अंसेष्वेषां निमिमृक्षुर्ऋष्टयः साकं जज्ञिरे स्वधया दिवो नरः"। "ऋष्टयः गमनागमनशीलाः"। इति दयानन्दभाष्यम्॥ पुः धर्म्मसावर्णिके मन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये। ९४। १९।
"हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणिः"॥)

ऋष्य, पुः स्त्री, (ऋष् + यत्। निपातनात् सिद्धम्।) मृगविशेषः। इत्यमरः॥ (यथा महाभारते ऋष्यशृङ्गोपाख्याने। ३। ११०। २७।
"ऋष्यशृङ्गः कथं मृग्यामुत्पन्नः काश्यपात्मजः"। ऋष्यस्य मृगविशेषस्य शृङ्गमिव शृङ्गं यस्य स ऋष्यशृङ्गः।
"ऋष्यो नीलाङ्गको लोके सरोहश्च इति कीर्त्तितः"॥
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥) स्वनामख्यातः कुरुवंशीयो देवातिथिपुत्त्रः। यथा, भागवते। ९। २२। ११।
"ततश्च क्रोधनस्तस्माद् देवातिथिरमुष्य च।
ऋष्यस्तस्य दिलीपोऽभूत् प्रतीपस्तस्य चात्मजः"॥

ऋष्यकेतुः, पुः, (ऋष्यः केतौ यस्य।) अनिरुद्धः। इति त्रिकाण्डशेषः॥ अस्य रूपान्तराणि। ऋश्यकेतुः। ऋष्यकेतनः। रिष्यकेतुः। विश्वकेतुः॥

ऋष्यगता, स्त्री, (ऋष्येण ऋषिसमूहेन गता ज्ञाता।) ऋष्यप्रोक्तावृक्षः। इति शब्दरत्नावली॥

ऋष्यगन्धा, स्त्री, (ऋष्यस्य मृगविशेषस्य गन्ध इव गन्धो यस्याः।) वृक्षविशेषः। ऋषिशाकुल इति ख्यातः। तत्पर्य्यायः। वृद्धगन्धा २ ऋषिशाकुलिकी ३। इति रत्नमाला॥
("महासहा-ऋद्धि ऋष्यगन्धाश्वगन्धेत्यादिषु"॥
इति चरके विमानस्थाने अष्टमेऽध्याये॥)

ऋष्यप्रोक्ता, स्त्री, (ऋष्येण ऋषिसमूहेन प्रोक्ता।) शतमूली। शूकशिम्बी। अतिबला। इति मेदिनी॥ (अस्याः पर्य्यायो यथा॥
"अतिबला महाशतावरी कपिकच्छुश्च"।
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥
व्यवहारो यथा॥
"ऐन्दृषभ्यतिरसर्ष्यप्रोक्तापयस्येत्यादिषु"।
इति चरके सूत्रस्थाने चतुर्थेऽध्याये॥ अत्र तु ऋष्यप्रोक्ता माषपर्णी इति शिवदासीयटीका॥ • ॥
"कुक्कुटी सर्पगन्धा च तथा काणविषाणिके।
ऋष्यप्रोक्ता वयस्था च रुदन्ती मोहनवल्लिका"॥
इति उत्तरतन्त्रे षष्टितमेऽध्याये सुश्रुतेनोक्तम्॥)

ऋष्यमूकः, पुः, (ऋष्यो मृगो मूको यत्र।) पर्व्वतविशेषः। इति जटाधरः॥ स तु दक्षिणदेशे पम्पासरोवरकूले स्थितः। यत्र वालिभयात् सुग्रीवादयः पञ्च वानराः स्थिताः॥ इति रामायणम्॥
("तावृष्यमूकस्य समीपचारी
चरन् ददर्शाद्भुतदर्शनीयौ"।
इति रामायणे। ४। २। १२८॥)

ऋष्यशृङ्गः, पुः, (ऋष्यस्य मृगस्य शृङ्गमिव शृङ्गमस्य।) मुनिविशेषः। स तु विभाण्डकसुतः। तस्य भार्य्या लोमपादराजकन्या शान्ता। इति रामायणम्॥ ("मान्यो मुनिः स्वां पुरमृष्यशृङ्गः"। इति भट्टिः। १। १०॥ अस्य जन्मप्रभृति विवरणमुच्यते।

आसीत्पुरा महातेजास्तपस्विसत्तमः काश्यपो विभाण्डको नाम ऋषिः। स च महाह्रदं समासाद्य दीर्घकालं तपसि स्थितः। एकदाप्सरसमुर्व्वशीं दृष्ट्वा चलितचित्तस्यास्य रेतः अप्सु प्रचस्कन्द। ततः काचित् मृगी तृषिता तोयेन सह तत्पीत्वा गर्भिणी अभवत्। इयं हि मृगी पुरा काचित् देवकन्यासीत् शापवशात् मृगरूपधारिणी वने विचरन्ती स्थिता। अथामोघत्वात् ब्रह्मरेतसस्तस्या मृग्यामेकः पुत्त्रः समभवत्। मृगीगर्भजातत्वादस्य शिरसि शृङ्गमजायत तेनास्य ऋष्यशृङ्ग इति नाम समभवत्। अनेन हि पितुरन्यः कोऽपि मानुषो न दृष्टपूर्व्वस्तस्मादनन्यविषयं अस्य मनः सदा ब्रह्मचर्य्ये एवाभवत्। एतस्मिन्नेव काले दशरथस्य बन्धुर्लोमपाद इति ख्यातोऽङ्गानामीश्वरः समभवत्। तेन कामात् ब्राह्मणस्य मिथ्याकृतम्। अस्मात् सर्व्वे ब्राह्मणास्तं परितत्यजुः। प्रणष्टयज्ञस्यास्य राज्ये न ववर्ष शतक्रतुः। अतः क्लिष्टचित्तः स राजा ब्राह्मणान् सन्तोषयित्वा कञ्चिदुपायं पर्य्यपृच्छत्। तेन पृष्टास्ते ब्राह्मणा यज्ञार्थं ऋष्यशृङ्गमानेतुं उपदिदिशुः। अथ स राजा दुष्करत्वादस्य कार्य्यस्य ऋष्यशृङ्गमानेतुं शापाद्भीतो वाराङ्गनामियन्त्रणमकरोत्। अथ रूपयौवनसम्पन्ना काचित् वाराङ्गना बहूनि उपायनद्रव्याणि गृहीत्वा जलपथेन तं तपोधनं लोभयित्वानेतुं प्रतस्थिरे। अथ ता काश्यपस्याश्रमं समासाद्य व्याजकृताश्रमा नावमदूरे निबध्य तत्रोत्तस्थुः। अथ कदाचित् तासां काचित् कुशला ऋषेः सुतं तं दृष्ट्वा वाग्भङ्ग्या मोहयित्वा विचित्राणि माल्यानि वासांसि च दत्त्वा पेयानि च पाययित्वा तेन सह चिक्रीड़ प्रजहास च। एवावृशेन विविधोपायेन तं प्रापयित्वा कामवशगं अग्निहोत्रस्योपदेशं कृत्वा च स्वस्थानमाजगाम। गतायाञ्च तस्यां मदनेन मत्तो विचेतनश्चाभवदृष्यशृङ्गः। अथ विभाण्डकस्तपसः प्रतिनिवृत्य स्वसुतं तथाविधं दृष्ट्वा प्रबोधयामास। प्रबोध्य तपस्यार्थं प्रस्थिते च तस्मिन् पुनः सा ऋषिरूपधारिणी वेश्या तं विभाण्डकसुतं प्रलोभ्य नाव्याश्रममानीय द्रुततरं लोमपादराज्यमानयता। अथ स राजा तं प्राप्य विभाण्डकसुतं प्रहृष्टमना अन्तःपुरे निवेशयामास। प्रविष्टे च तस्मिन् तपोधने समस्तराज्यं प्रहृष्टं जलेनापूर्य्यमाणमभवत्। एवं स लोमपादः परिपूर्णकामः तपोधनाग्रगण्यात् विभाण्डकात् शापमुक्तिमिच्छन् स्वमित्रस्य दशरथस्य सुतां शान्तां ऋष्यशृङ्गाय प्रददौ। अथ विभाण्डको मुनिः तपसः प्रतिनिवृत्तः सुतमनवलोक्य ध्यानधिया सर्व्वमवगम्य क्रुधा ज्वलन्निव लोमपादराज्यं आजगाम। आगते च तस्मिन् विनीतैः सर्व्वैः ऋष्यशृङ्गस्य राज्यमिदमिति आचख्ये। पूजितश्च तेन राजर्षिणा दिवि इन्द्रमिव पुत्त्रं शचीमिव शान्तां स्नुषाञ्चावलोक्य ग्रामांश्च घोषांश्च सुतस्य इत्यवगम्य शान्तकोपः स्वाश्रमं प्रति प्रययौ। अथ स ऋष्यशृङ्गः शान्तया सह तस्मिन् राज्ये सुखमतिचिरमवसत्॥

अथ गच्छति काले सूर्य्यवंशावतंसो राजा दशरथः अनपत्यतया क्लिश्यमानहृदयो निजगुरु वशिष्ठदेवं पुत्त्रलाभोपायं प्रपच्छ। एवमुक्तस्तेन ऋषिप्रवरो वशिष्ठः लोमपादराज्यात् ऋष्यशृङ्गं तपोधनं समानीय पुत्त्रेष्टिं कर्त्तुं समादिशत्। अथासौ राजा एवमभिहितः स्वजामातरममुं ऋष्यशृङ्गमानेतुं यत्नमकरोत्। ततः आगतेन तेन क्रियमाणे यज्ञे देवश्चरुवह्निमध्यादुदतिष्ठत्। एतच्चरुभक्षणात् नारायणावताररूपा रामादयश्चत्वारो दशरथस्य तनया जाताः। अथ विभाण्डकसुतस्तु महाप्रतापवान् यज्ञनिष्ठश्चेति प्रसिद्धः। एतत्कथा च महाभारते। ३। ११ अध्यायस्तथा रामायणे। १। ९ अध्यायश्चारभ्य द्रष्टव्या॥ * ॥ सावर्णिके मन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये ८०। ४।
"रामो व्यासो गालवश्च दीप्तिमान् कृप एव च।
ऋष्यशृङ्गस्तथा द्रौणिस्तत्र सप्तर्षयोऽभवन्"॥)

ॠ

ॠ दीर्घऋकारः। स तु अष्टमस्वरवर्णः। अस्योच्चारणस्थानं मूर्द्धा। (यथा, सिद्धान्तकौमुद्यां "ऋटुरषाणाम्मूर्द्धा"। पाणिनीयशिक्षायामपि।
"स्युर्मूर्द्धण्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः"।)
स प्लुतश्च भवति॥ इति व्याकरणम्॥
(स च उदात्तानुदात्तस्वरितभेदात् त्रिधापि पुनः प्रत्येकमनुनासिकाननुनासिकभेदेन द्विधेति षड्विधः।)
"ॠकारं परमेशानि स्वयं परमकुण्डली।
पीतविद्युल्लताकारं पञ्चदेवमयं सदा॥
चतुर्ज्ञानमयं वर्णं पञ्चप्राणयुतं सदा।
त्रिशक्तिसहितं वर्णं प्रणमामि सदा प्रिये"।
इति कामधेनुतन्त्रम्॥
(वङ्गीयभाषायाम्।) तस्य लेखनप्रकारो यथा,—
"तद्रूपाधोगता दक्षा वामतः कुञ्चिता त्वधः।
पुनर्दक्षगता रेखा तासु ब्रह्मेशविष्णवः॥
मात्रा शक्तिः परा ज्ञेया ध्यानमस्य प्रवक्ष्यते"।
इति वर्णोद्धारतन्त्रम्॥ * ॥ तस्य नामानि यथा।
"ॠ क्रोधोऽतिथिशो वाणी वामनो गोऽयञ्चोर्द्ध्वंतिः।
ऊर्द्धमुखी निशानाथ पद्मनाभा विनष्टधीः॥
शशिनी मोचिका श्रेष्ठा दैत्यमाता प्रतिष्ठिता।

स्वरसन्तानको माता धनिता शिवमोदिका ।
कौमकमालया मेधा प्रतिष्ठा पाशिरक्षिणी ।
मध्यकर्णमिव शीघ्रपे पावनो मन्मथविदी" ।
इति वर्णाभिधानम् । वामगण्डिका । इति वीज वर्णाभिधानम् । (मातृकान्यासेऽस्य वामगण्डिकाया न्यसनीयत्वात् तथात्वम् । अस्योच्चारणं मातृकान्यासमन्त्रे । "ऌं नमो दक्षिणगण्डे लृं नमो वामगण्डे" । इति । अनुस्वारविशिष्टत्वेन मन्त्रत्वं वा स्यात् । अस्यार्थ कविकल्पलतायाम् । "प्रयुज्यतेऽपि भावो न स्वरूपाभिधेय वा विधि" । (अनेन [illegible] [illegible] [illegible] [illegible] [illegible] इति स्यात् ।)

ऌ कि गतौ । इति कविकल्पद्रुमः । (पाठि-मध्यादि पर-सकं-सट् ।) कि [illegible] । [illegible] [illegible] इति दुर्गादासः ।

ऌ, पुं, (ऌ + क्विप् ।) [illegible] । [illegible] । इति मेदिनी । शिवः । मत्स्यम् । इति शब्दरत्नावली ।

ऌ, स्त्री (ऌ + क्विप् ।) माता । इति मेदिनी ।

ऌः, स्त्री, देवमाता । दानवमाता । (ऌ + क्विप् ।) [illegible] । [illegible] । इति मेदिनी ।

ऌः, पुं, (स्थापयति मात्रादि [illegible] । ऌ + क्विप् ।) भैरवः । (यथा "[illegible] । [illegible]" [illegible] ।) वासुदेवः । इति मेदिनी ।

ॡ

ॡ ऌकारः । स तु दीर्घस्वरवर्णः । अस्योच्चारणस्थानं दन्तः । (अनुयोगं शिक्षायाम् "ऌतु लसानां दन्ताः" । शिक्षायामपि यथा,—
"अर्द्धमात्रा मधुरस्वा दन्ता दन्तुरका स्मृता ।) स प्लुतो दीर्घः प्लुतश्च भवति । इति व्याकरणम् । (अयन्तु उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि प्रत्येकं ह्रस्वप्लुतानुनासिकाननुनासिकभेदेन द्विधाऽपि यद्विभवेत ।)
"ऌकारं चञ्चलापाङ्गि कुण्डली परदैवतम्
तथा [illegible] वर्णं विलसन्ति सदा शिवे ।
पञ्चदेवमयं वर्णं चतुर्ज्ञानमयं तथा ।
पञ्चप्राणमयं वर्णं तथा गुणत्रयात्मकम् ।
बिन्दुत्रयात्मकं वर्णं पीतविद्युल्लता तथा" ।
इति कामधेनुतन्त्रम् । (वर्णोद्धारतन्त्रे) अस्य ध्यानप्रकारो यथा,—
"ऐकारकुण्डली चैव पञ्चप्राणमयो तथा ।
[illegible] दिव्यं वपुः च [illegible] ।"
इति वर्णोद्धारतन्त्रम् । । अस्य नामानि यथा —
"ऌ आत्मा बीजदा दुर्गा देवमाया विरत् ।
देवयोनिः स्थूलो मतोत्पत्ति कोपकरो ।
[illegible] दीर्घिका भगमो वामकि यथा ।
अर्धिका माधवी धूमा विश्वद्वारा भगवती ।
मुखिनीशिरा च परमो वाणिवाकालकेवरा ।
विश्वकिकी पावक दर्शस्तुणमयी" ।
इति वर्णाभिधानम् । (मातृकान्यासे दक्षिणगण्डे न्यसनीयत्वात् दक्षिणगण्डस्याभिधायकम् । यथा मातृ

कान्यासमन्त्रे । "लृं नमः दक्षिणगण्डे ॡं नमो वामगण्डे" । अनुस्वारविशिष्टत्वे । अनेन भुवि भवेत् स्यात् । अस्यार्थं कविकल्पलतायाम् ।
"प्रयुज्यतेऽपि भावो स्वरूपाभिधेय वा विधि" ।
अनेन ॡम् न भौ गतौ इत्यस्य भुवि वक्तव्य विधि [illegible] ।)

ॡ, पुं, देवमाता । इति मेदिनी शब्दरत्नावली च । भूमिः । कुम्भः । मत्स्यः । इति मेदिनी ।

ए

ए दीर्घ स्वरः । स तु एकमात्रस्वरः, अस्योच्चारणस्थानं कण्ठतालु । (यथा मुग्धबोधे । "कण्ठे एदैतः कण्ठतालु स्याताम् ।) स प्लुतश्च भवति । इति व्याकरणम् । (उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि प्रत्येकं पुनरनुनासिकाननुनासिकभेदात् षड्विधः ।)
"एकारं परमेशानि पूर्णचन्द्रसमप्रभम् ।
पञ्चदेवमयं वर्ण पञ्चप्राणमयं सदा ।
ब्रह्मविष्णुमयं वर्णं तथा त्रिगुणसंयुतम् ।
चतुर्ज्ञानमयं देवि वर्णं परमकुण्डली" ।
इति कामधेनुतन्त्रम् । (वर्णोद्धारतन्त्रे) अस्य ध्यानप्रकारो यथा,—
"चतुर्भुजवरदा च देवी वा देवो दक्षाः ।
रक्त पद्मा सुशोभिनी पुष्पी नानी वरदा" ।
इति वर्णोद्धारतन्त्रम् । ॰ । अस्य नामानि यथा —
"एकार एकपत्रा पर्णा भगिनीको ज्ञानदः ।
अनन्ता याम्यवक्त्रा च वामोरु इति ।
अर्धिशस्य अधिष्ठाता आदो मातादी बोधनो विभुः ।
भ्रामरी भूत्कृतो माता पीतपीठो यज्ञवान् ।
काशिनी विश्वा काकी विश्वा सद्य यशि थली ।
दर्शो वैश्वानरी च दक्षाधी वृषभध्वजः" ।
इति वर्णाभिधानम् । (मातृकान्यासे दक्षोष्ठे न्यसनीयत्वात् अधरोष्ठाभिधायकम् । मातृकान्यास मन्त्रो यथा । "एं नमो दक्षिणगण्डे ऐं नमो वामगण्डे" । मुग्धबोधमते प्लुतमते च कचित्स्य दीर्घस्वापि व्याकरणमते तु नास्ति । अपरे तु अस्य कण्ठस्य दीर्घमात्रपि "यदि भक्ताः" इति वाचस्पत्योक्तं एकार एव च विधेयः । तेन पौत्रस्थाय स्वरेणेति ऐकारस्य स्वरत्वम् । मुग्धबोधेऽपि एकस्वरत्वेन एकमात्रादिमात्रविभाग-भावेन "एकस्वम्" इत्यनेन न विरोधः ।)

ए, पुं, देववानी । मार्जारः । माता । इति मेदिनी ।

ए, स्त्री, देवकी । इति शब्दरत्नावली । धनुर्माता । कामधेनुमाता । इति शब्दरत्नावली ।

एः, पुं, वर्णः ।। मकरदेवः । इति शब्दरत्नावली ।

ए एकारः । स तु पञ्चदशस्वरवर्णः । अस्योच्चारण स्थानं कण्ठतालु च । (यथा शिक्षायामुद्धृतम्

"एदैतोः कण्ठतालु" । शिक्षायां शिक्षायाम् । "ए ऐ तु कण्ठताल्वास्थौ ये कण्ठस्थौ स्मृतौ" ।) स दीर्घः प्लुतश्च भवति । इति व्याकरणम् । (उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि प्रत्येकं पुनः अनुनासिकाननुनासिकभेदात् षड्विधः ।)
"एकारं परम शिवे ब्रह्मविष्णुशिवात्मकम् ।
ब्रह्मविष्णुमयं वर्णं पञ्चदेवमयं सदा ।
पञ्चप्राणमयं वर्णं तथा विन्दुत्रयात्मकम् ।
चतुर्ज्ञानमयं देवि वर्णं परमकुण्डली" ।
इति कामधेनुतन्त्रम् । (वर्णोद्धारतन्त्रे) अस्य ध्यानप्रकारो यथा ।
"पूर्णचन्द्रा प्रभा देवी रक्तवर्णा समा सदा ।
कुम्भामयमा चैव पाति प्रतिपादकम्" ।
इति वर्णोद्धारतन्त्रम् । ॰ । अस्य नामानि यथा ।
"एकारो वामजा वह्निर्भीष्मो बोधको बर्व भवत् ।
यस्या भद्रोऽर्धकेशो च औदृषा भद्रा स्मरम् ।
वर्भ वाम द्वरा पीता मदा सर्वमङ्गला ।
अर्धिशिवगुह्मयी कुण्डली मोहिनी परा ।
कौमिदा वाचस्पतिविरा भिक्षिका दिर्घजघा ।
वह्निर्वैश्वानरी मदा अधनाम कुचघट" ।
इति वर्णाभिधानम् । ॰ । अन्यच ।
"एकारो वासवाख्या वह्निभिको स्थानवा ।
मातृकीविश्व विस्मा बोधक ह्यक्षरधर" ।
इति वीजवर्णाभिधानम् । (मातृकान्यासेऽस्य कोष्ठाने न्यसनीय बोधकमेतदभिधायकम् । मातृकान्यासमन्त्रो यथा,—
"एं नम ओष्ठे ऐं नमोऽधरे" । इति । अनुस्वारविशिष्टत्वे । तेन यदि विधि भवति स्यात् । यथाह कविकल्पलतायाम् ।

"कारकत्वाभिधाय वा विधि ।
पदादिष्ठ देवेऽपि स्यात्" ।

अनेन सर्वे मन्त्रकोशेऽपि कदापि चन्द्रबिन्दु स्यात् ।)

ए, अ, व्यय । स्मृतिः । असूया । अनुकम्पा । आमन्त्रणम् । आह्वानम् । इति मेदिनी ।

ए, पुं, (एति प्राप्नोति सर्वं विश्वमिति । इण् + अच् । सर्वे विष्णुमयं जगत्" इति वाक्येन तत्र प्रमाणम् ।) विष्णुः । इत्येकाक्षरकोषः ।

एधं चि (एधते । एध वृद्धौ । "एधोदकस्य दण्डविहितमिथस्य । १ । ११ । इत्यादिसूत्रेण अच् ।) इन्धनम् । काष्ठम् । सम्पत् । इन्धनः । ("अनेको दृष्ट वर्ग्रस्य विधानम् वनानुक" । इति मनौ ३ । ९ । "जगतेन्धो बोधिकादुधारम्" इति श्रुतिः । "एकाकाले नवात प्रश्नम्" इति रघुः ३ । १ । ५ । सभाव वाचिकर्षे मम विरत्" इति कुमारे ९।१५ ।) अग्निसंज्ञा । इति मेदिनी । अग्नेर्नामान्तराणि । अग्नयः । पुत्रः ३, शिवः ३ त्रिधा १ ब्रह्मरक्षः ३ पुष्पकः १ । इति अभिधान वारः । अधिपः ६ पुष्कः ॰ देवतां ५ अष्टा ८ । इति महाभारते २२६ । (अग्नेर्नामान्तरेऽपि यथा च विश्वप्रकाशे "यमारकः एषधि ३१ इत्याह "अह बद-बप समर इत्यादि

एक-द्वि-युष्मद् अस्मद् भवत्-किम्” इत्युक्तवान् । यथा शाकुन्तले २ अङ्के । “विश्रान्तेन भवता ममाप्येकस्मिन् कर्म्मणि सहायेन भवितव्यम्” । पु, स्वनामख्यात ऐलवंशीयो नृपतिभेद । यथा, भागवते ९।१५।२।

‘श्रुतायोर्वसुमान् पुत्त्रः सत्यायोश्च श्रुत जय ।
रयस्य सुतएकश्च जयस्य तनयोऽमित’ ॥

परमेश्वर । विष्णु । यथा विष्णुसंहितायाम् । “एको नैक सव क किम्” । “परमार्थत सजातीयविजातीयस्वगतभेदराहित्यादेक” । इति भाष्यम् । घटे घटान्तरात् भेद सजातीयभेद । घटे पटात् भेद विजातीयभेद । घटे कपालादेर्भेद स्वगतभेद ॥)

एकक त्रि, (“एकादाकिनिच्चासहाये” । ५।३।५२। इत्यत्र चकारात् पक्षे कन् ।) असहाय । एकला इति भाषा । तत्पर्य्याय । एक २ एकाकी ३ । इत्यमरः ॥ (“महानप्येकको वृक्ष सर्व्वत सुप्रतिष्ठितः । प्रसह्यैव हि वातेन शक्यो धर्षयितु यत” ॥ इति पञ्चतन्त्रे ३।५२ ॥ तथा नैषधे । २ । ३६ ।

“विधिरेककचक्रचारिणम्
किमु निर्म्मितसति मान्मथ रथम्” ॥)

एककुण्डल पु, (एक कुण्डल यस्य ।) बलराम । कुवेर । इति मेदिनी ॥

एकगुरु, पु, (एको गुरुर्यस्य ।) सतीर्थ । इत्यमर ॥ एकगुरुर शिष्य इति भाषा ॥

एकचक्र, स्त्री, (एक चक्र यस्य ।) पुरीविशेष । तत्पर्य्याय । हरिगृहम्२ शुम्भपुरी३ । इति त्रिकाण्डशेष ॥ सूर्य्यरथ । त्रि, असहायचारी । यथा, ऋग्वेदे १।१६४।२ ।

“सप्त युञ्जन्ति रथमेकचक्र-
मेकोऽश्वो वहति सप्तनामा ।
त्रिनाभिचक्रमजरमनर्व्वं
यत्रेमा विश्वा भुवनाधितस्थु” ॥

अत्र भाष्यकृता यद्व्याख्यातन्तदाह ।

“एकचक्रमेकरथाङ्गोपेतम् । यद्यपि श्रोणि चक्राणि तथापि तेषामेकरूपत्वादेकचक्रमित्युच्यते रथ रहणस्वभाव - ग्र्यस्य सम्बन्धिन सप्ततत्सङ्ख्याका अश्वा युञ्जन्ति अनुबध्नन्ति वहन्त्य-होरात्रनिर्वाहाय । किं वस्तुत सप्त नेत्याह । एकोऽश्व सप्तनामा । एक एव सप्ताभिधान सप्तधा नमनप्रकारो वा एक एव वायु सप्तरूपं कृत्वा वहतीत्यर्थं । वाय्वधीनत्वादन्तरीक्षसञ्चारस्य एकचक्रमित्युक्तम् । कीदृशन्तदित्यत आह । त्रिनाभि वलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्र-त्रयोपेतम् । अजरमजरणधर्म्मकम् । अनर्व्वमशिथिल पुनस्तदेव विशेष्यते । यत्र यस्मिश्चक्रे इमा विश्वा भुवना इमानि प्रसिद्धानि सर्व्वाणि भूतजातान्यधि आश्रित्य तस्थुस्तिष्ठन्ति । यद्वा एकचक्रमेकधारिणमसाहाय्येन सञ्चरन्त रथमादित्यं सप्त युञ्जन्ति सर्पणस्वभावा सप्तसङ्ख्या वा रश्मय सप्तप्रकारकार्य्या असाधारणा परस्परविलक्षणाः षडृतव एक साधारण इत्येवरूपा । यद्वा मासद्वयात्मका षट् अपरोऽधिमासात्मक एक इत्येव सप्तर्त्तवो युञ्जन्ति एतस्य कार्य्यं निर्व्वहन्तीत्यर्थ । स चैकोऽसहायोऽश्वो व्यापनशील आदित्यः सप्तनामा सप्तरसाना सन्नमयितारो रश्मयो यस्य तादृश । सप्तर्षिभि स्तूयमानो वादित्यो वहति धारयति भ्रमतीत्यर्थः । किं भूतम् । त्रिनाभि चक्रम् । त्रयो नाभिस्थानीया सन्ध्यात्मका वा एव ऋतवो यस्य तत्तादृशम् । के ते ग्रीष्मवर्षाहिमन्ताख्या यद्वा भूतभविष्यद्वर्त्तमानाख्यास्त्रय कालाश्चिनाभय । तद्विशिष्ट चक्र चक्रवत् पुन पुन परिभ्रममाण सवत्सराख्यचक्रमजरममरणम् । न हि कदाचिदपि कालो म्रियते अनादिनिधन काल इति स्मृते । अनर्व्वमप्रतिहतम् । ईदृश सवत्सराख्य चक्र नानाकालावयवोपेतमयमादित्य पुन पुनरावर्त्तयति सवत्सरादवधीनाना तत्रै वान्तर्भावात् युगादीना तदावृत्तिसाध्यात् सवत्सरस्य चक्रत्वेन रूपणम् । पुन कीदृश तत् । यत्र यस्मिश्चक्रे इमा विश्वा भुवना इमानि सर्व्वाणि भूतान्यधितस्थु आश्रित्य तिष्ठन्ति कालाधीनत्वात् सर्व्वस्या स्थिते । ईदृशस्य कालस्य कारणभूतपरमेश्वरपरिज्ञानेन मोक्षसद्भावात् ज्ञानमोक्षाक्षरप्रशसा च” ॥ नृपाद्यविशिष्टम् । एक राजविशिष्टम् । यथा, भागवते ।३।१।२०।

“इत्थ व्रजन् भारतमेव वर्ष
कालेन यावत् गतवान् प्रभासम् ।
तावच्छशास क्षितिमेकचक्रा-
मेकातपत्रामजितेन पार्थः” ॥

पु, असुरभेद । यथा, हरिवंशे ३।८४ ।

“एकचक्रो महाबाहुस्तारकस्य महाबल” ।

अय हि प्रतिविन्ध्य इति नाम्ना प्रसिद्ध । यथा । महाभारते १ । सम्भवपर्व्वण्यशावतरणे ६७।२२ ।

“एकचक्र इति ख्यात आसीद्यस्तु महासुरः ।
प्रतिविन्ध्य इति ख्यातो बभूव प्रथितः क्षितौ” ॥

स्त्री, स्वनामख्याता पुरी । अत्रस्थो भीमसेनो महाबल वकनामानमसुर हतवान् ॥ यथा,— महाभारते । १ । अंशावतारपर्व्वणि भारतसूत्रे । ६१ । २६-२८ ।

“ते तत्र नियता कालम् कञ्चिदूषुर्नरर्षभा ।
मात्रा सहैकचक्राया ब्राह्मणस्य निवेशने ॥
तत्रासवाद क्षुधित पुरुषाद वृकोदर ।
भीमसेनो महाबाहुर्व्वक नाम महाबलम् ॥
तत्रापि पुरुषव्याघ्रो बाहुवीर्य्येण पाण्डव ।
निहत्य तरसा वीरो नागरान् पर्य्यसान्त्वयत्” ॥)

एकचर, पु., (एकश्चरति य । चर + पचाद्यच् ।) हिंस्रपशुविशेष । गण्डार इति भाषा । तत्पर्य्याय । वार्द्धीनस २ गणोत्साह ३ गण्डक” ४ । इति त्रिकाण्डशेष ॥ (सर्पादि । यथा, मनु ।५।१७।

“न भक्षयेदेकचरानज्ञाताश्च मृगद्विजान्” ।

“ये एकाकिनः प्रायेण चरन्ति सर्पादयस्तानेकचरान्” । इति तट्टीकाया कुल्लूकभट्टः ॥ (त्रि, एकाकिचारी । यूथभ्रष्टः । यथा, “अयमेकचरोऽभिवर्त्तते माम्” । इति किराते । १३।३। “एकचरो यूथादपेत” । इति तट्टीका ॥)

एकचारी, [न्] पु, (एक सन् चरतीति । चर् + णिनि ।) बुद्धसहचारी । इति त्रिकाण्डशेषः ॥ (एकचारिणि, त्रि ॥)

एकजटा, स्त्री, (एका जटा यस्या ।

“एषैवैकजटा ख्याता यस्मात्तस्या जटाधिका” ।

इति श्रवणात् । यद्वा एका मुख्या जटा यस्या ।

“ख लिखन्ती जटामेका बिभ्रती शिरसा स्वयम्” ।

इति च श्रवणात्तथात्वम् ।) उग्रतारा । तस्या आविर्भावो यथा,—

सर्व्वे सुरगणा सेन्द्रास्ततो गत्वा हिमाचलम्
गङ्गावतारनिकटे महामाया प्रतुष्टुवु ॥
अनेकसस्तुता देवी तदा सर्व्वामरोत्करैः ।
मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत ॥
युष्माभिरमरैरत्र स्तूयते का च भाविनी ।
किमर्थमागता यूय मातङ्गस्याश्रम प्रति ॥
एव ब्रुवन्त्या मातङ्ग्यास्तस्यास्तु कायकोषत ।
समुद्भूताब्रवीद्देवी मा स्तुवन्ति सुरा इति ॥
शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान् ।
तस्मात्तयोर्व्वधायाह स्तूयेऽद्य सवासै सुरैः ॥
विनि सृताया देव्यान्तु मातङ्ग्या कायतस्तदा ।
भिन्नाञ्जननिभा कृष्णा साभूत् गौरी क्षणादपि ॥
कालिकाख्याभवत् सापि हिमाचलकृताश्रया ।
तामुग्रताराम्मृषयो वदन्तीह मनीषिण ॥
उग्रादपि भयात् त्राति यस्माद्भक्तान् सदाम्बिका ।
एतस्या प्रथम वीज कथित तन्त्रमेव च ।
एषैवैकजटा ख्याता यस्मात्तस्या जटाधिका ।
हृदयेन चिन्तन चास्या सम्यक् वेतालभैरवौ ॥
यया ध्यात्वा महादेवीं भक्त प्राप्नोत्यमीप्सितम् ।
चतुर्भुजा कृष्णवर्णा मुण्डमालाविभूषिताम् ॥
खड्ग दक्षिणपाणिभ्या बिभ्रतीन्दीवर त्वध ।
कर्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम् ॥
खं लिखन्ती जटामेका बिभ्रती शिरसा स्वयम् ।
मुण्डमालाधरा शीर्षे ग्रीवायामपि सर्व्वदा ॥
वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम् ।
कृष्णवस्त्रधरा कट्या व्याघ्राजिनसमन्विताम् ।
वामपाद शवहृदि सस्थाप्य दक्षिण पदम् ।
विन्यस्य सिंहपृष्ठे तु लेलिहानासव स्वयम् ॥
साट्टहासमहाघोरा रावयुक्तातिभीषणा ।
चिन्त्योग्रतारा सतत भक्तिमद्भि सुखेप्सुभि ॥ • ॥
एतस्या सम्प्रवक्ष्यामि या अष्टौ योगिनीस्तु ता ।
महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च ॥
घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी ।
भैरवी चाष्टमी प्रोक्ता योगिनीस्ता प्रपूजयेत्” ॥
इति कालिकापुराणे ६१ अध्याय ॥

एकजन्मा, [न्] पु, (एक मुख्य जन्म यस्य । दिक्पालांशसम्भूतत्वादस्य तथात्वम् ।) राजा । इति त्रिकाण्डशेष ॥ (एक न द्वितीय जन्म यस्य इत्यर्थे । शूद्र । तस्य अद्विजत्वात् तथात्वम् ।)

एकतम, त्रि, (एक+"एकाच्च प्राचाम्"। ५।३।९४। इति डतमच्।) बहूनां मध्ये एकः। इति व्याकरणम्। (यथा महाभारते शान्तिपर्व्वणि।
"वस्त्राणि वा शरीरं वा यस्यैकतमं त्यज"॥)

एकतर, त्रि (एक+"एकाच्च प्राचाम्"। ५।३।९४। इति डतरच्।) द्वयोर्मध्ये एकः। इति व्याकरणम्। भिन्नः। इत्यमरटीकायां भरतः।
(यथाह कात्यायनः।
"यदि क्षेत्रस्ते क्षेत्रं क्षीयते तस्मादेकतरम्"॥)

एकता स्त्री, (एकस्य भावः। एक+तल्+टाप्।) ऐक्यम्। ऐक्यम्। इति व्याकरणम्।
(यथा, रामायणे ६६।१९।
"मत्यीरपि सर्व्वेषां मनसो मन्दिरं त्विदं।
एकतामेव भाषन्ते न मनो नगमस्य धर्म्मतः॥)

एकतान, त्रि (एकेन तानेन प्रबन्धेन विस्तीर्य्यते इति। तन इत्र विस्तारे। कर्म्मणि घञ्।) एकाग्रः। अनन्यवृत्तिः। इत्यमरः॥ (यथा माघे ७।६०।
"मधुकरैरपवादकरैरिव
स्मृतिभुवः पथिका हरिणा इव।
कलतया वचसः परिवादिनीं
स्वरजितां न विदुर्विजितां ध्वनिम्" ॥
एकतानो विरलविलम्बेऽपि।) एकतालः पुं। इत्यमरटीकायां स्वामी।

एकताल पुं (एकस्तालो यस्य।) सम्मितम्। नृत्यगीतवाद्यानां साम्यम्। एकताल इति भाषा। इत्यमरभरतौ। (नृत्यगीतवाद्यानां साम्यमित्यर्थः। त्रि एकताल-युक्तमात्रिकः। यथा रघौ १९।३६।
"एकताल इवोत्पातपवनप्रेरितो गिरिः"॥)

एकतीर्थी [न्] पुं (एकं समं तीर्थमाश्रमो यस्य।) सतीर्थः। गुरुभाइ इति भाषा। ("एकतीर्थी सहाध्यायी" इति मिताक्षरा।)

एकत्र, अ, (एक+त्रल्।) एकस्मिन्। इति व्याकरणम्। एकखाने इति भाषा। (एकत्र निर्द्दिष्टं व्याख्यातं कार्य्यं विनापि प्रयुज्यते"। इति दुर्गादासः। यथा मनुः। ५।१२९।
"एकत्र चिते गुरौ निवसन्वैवमव्रते रतः।
उभयोः वाह यावता भवेत् सुखिताभविष्यता"॥)

एकदंष्ट्र, पुं, (एका दंष्ट्रा यस्य। परशुरामेणैकदन्तस्य उत्पाटनात् तथात्वम्।) गणेशः। इति शब्दरत्नावली। (अस्य परशुरामकृतदन्तोत्पाटनकथा ब्रह्मवैवर्त्ते द्रष्टव्या।)

एकदन्त पुं, (एको दन्तो यस्य।) गणेशः। इत्यमरः। (परशुरामगणेशयोर्युद्धे दन्तोत्पाटनकथा ब्रह्मवैवर्त्ते द्रष्टव्या। एकदा शम्भुं निद्रितो दिवा शिवयोर्द्दर्शनकामनाथ ब्रह्मवैवर्त्ते गणपतिखण्डोक्तेन। एकस्मिन् काले परशुरामः शिवं सुषुप्तमवगत्य। शिव दर्शनकामुकस्तत्र निवारितोऽभूद् गणेशेन। अतः क्रुद्धेन तेन स्वपरशुना तस्य दन्तमेकं चकर्त्त। परशुरामविक्षेपेण परशुना च गणेशस्य एको दन्तो भग्नः। तदा प्रभृत्येव एकदन्तोऽयमित्युच्यते॥)

एकदा, अ, (एक+"सर्व्वैकान्यकिंयत्तदः काले दा"। ५।३।१५। इति दा।) एकस्मिन् काले। तत्काले। युगपत् २। इत्यमरः।
(यथा भागवते ६।१।२८।
"भिक्षां न यति मङ्गलदेवतानां
नैव च स्मरति भगवतोऽचिन्त्यम्।
श्रीशाय यो भवति वर्त्तिर भगवति
नानाविधभक्तोऽह्यतिविचक्षणाम्"॥)

एकदृश् [क्] पुं, (एकं चक्षुःमिति पश्यति वा। एकाक्षम्+क्विप्।) महादेवः। (एका दृक् यस्य। रामायणोक्तेन यद्वे एकचक्षुर्यस्य काकस्य प्रसिद्धम्।) काकः। काणे त्रि। इति हेमचन्द्रः। (एकमेव चक्षुः प्रकाशेन पश्यति वा इति व्युत्पत्त्या एकदर्शनः। शुक्राचार्य्यः। अनयोरेव सर्व्वं चक्षुषीकार्य्ये एकदृकत्वम्॥)

एकदेश, पुं, (एकः सुस्थो देशो यस्य। एकेन सौम्यभावेन गमनम्।) पुण्यदेशः। इति त्रिकाण्डशेषः। (एको मेरुप्रभृतीनां मध्यात् पुण्यो देशः शरीरे वा। अंशः। खण्डः।
यथा हरिवंशे ३६ अध्याये।
"मन्त्रेऽपि विप्र सोमादि पुरीनां चाधिकारकम्।
एकदेशादपि विद्वद्भिः विमलानि शिवा पथाः"।
शम्भौ। "अखिलनिराकीर्णस्त्रानिर्गतानि सर्वा सर्वमिति बाधे"। यथा,—
"सतोऽपराणां सर्वान् भारा एकदेशस्य सर्वाः"।
इति सामान्येन नानाव्याख्योऽभिधेयम्"॥)

एकधा, अ, (एक+"एकाद्धो ध्यमुञन्यतरस्याम्"। ५।३।४४। इति धा।) एकप्रकारम्। इति व्याकरणम्।
(यथा महाभारते अनुशासनपर्व्वणि १०।७२६।
"कदाचित् वाक्यभूतेन विप्रवरेण प्रसादयन्ति।
एकधा भक्त्या चैव विशुद्धीतमनसावता"॥)

एकधुर, त्रि, (एका धूः। "ऋक्पूरब्धूःपथामानक्षे"। ५।४।७४। इति अ समासान्तः।) एकभार-वाहकवृषादि। एकाधिक भर इति भाषा। अस्य अर्थ। एकधुरीणः २ एकधुरावहः ३। इत्यमरः।
(यथा, सिद्धान्ते। ४।४।७७। "एकधुराधुर"।)

एकधुरावह, त्रि, (एकधुरं वहति। वह्+अच्। एकधुराया वहः।) एकधुरी। इत्यमरः।

एकधुरीण त्रि (एकधुरं वहति यः। "एकधुराल्लुक् च"। ४।४।७९। इत्यनेन धुराद्युपसर्ज्जनात् ख्ञ् पक्षे अस्य लुक्।) एकधुरः। एकधुरावहः। इत्यमरः। एकस्य एकस्य धुरावहनशीलः पुरुषः वहति यः। इत्यमरटीकायां भरतः।

एकनट, पुं, (एको मुख्यो नटः।) सूत्रधारः। नान्दीपाठः। नायकः २। इति त्रिकाण्डशेषः। यथा माघः ३। इति शब्दरत्नावली।

एकनयन, त्रि, (एकं नयनं यस्य।) काणः। इति त्रिकाण्डशेषः। (एकं नयनं इति विग्रहे। वाचस्पतिः नयनः। यथा, रघौ १०।३०।
"एकेनासामलातविकासात्
चापकः न दोषान्चविषयतया"॥)

एकपत्नी, स्त्री, (अन्योऽभिलषितो पतिर्यस्या इति विग्रहे नित्यं समासोत्तमि" इति एकपतिकाख्या व्याख्याकारैः "न्मेकः" इति ङीप्।) पतिव्रता। इति त्रिकाण्डशेषः। (यथा,वैषधे ८।
"चापायबन्धे विरोधवरकदीप्तेकपत्नीम्"।
एका समाना पतिर्यस्याः इति विग्रहे। सपत्नी। यथा मनुः। ९।१८३।
"सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत्।
सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः॥)

एकपर्णिका, स्त्री, (एक पर्णमात्रम् भेदं यस्य यस्याः) मलयजनक्षत्रम्। इति राजनिर्घण्टः।

एकपदी स्त्री (एकं पदं यस्मात्पादे यावत्पादो यस्मिन्) पन्थाः। इति मेदिनी। (पन्थाः। राजपथम् इति शिक्षा। यथा, रघौ ७।१७। "कपोलमार्ग्ग विराजते गमनागमनसिद्धं न अक्ष्णे"। "एकपदी सम्भवे। तथा यवाक्षे एकपदमिति शिक्षा। इति मल्लिनाथ। एकं प्रमत्तपदं स्थानम्। "एकं करिणि मां समयमपाशिनीकम्" इत्यमरोक्तेः व्यवसन्। रेफणम्। तद्विप्लवमपरम्। यथा माघे ९।८६।
"निजकान्तिमेकदेवे न ज्वालया जगतीम्"।
एकं पदं पदं योगपूर्वपदन्यासम्। शब्दगत-कर्णेयोपगम्यमानम्। यथा,राज्ययक्षात् दैवीपुराणम्।
"एकपदेनायात्योऽनेकचरक्रियाकौ"॥)

एकपद, पुं, (एकं पदं यस्य विस्तारो यस्मिन्।) प्रहार विशेषः। यत्र वचनम्।
शास्त्रेषु यदि लाभ द्वितीयं वायसं विभ्रम्।।
क्रमो यथा रवीन् चामी पदलोकनया श्रुतम्"।
इति रतिमञ्जरी। (वाक्यानामकर्थेकमोऽद्भुत-वीयो वेदाः। यथा वाक्यायन्तः दैवी पुराणवचनम्। "प्रभुचेतसो वेदः"। इति। एकं पद चरणं यस्य इति विग्रहे वाच्यलिङ्गः। एकपदस्थितः। यथा भागवते १।१६।२।
"पादैर्न्यूनं शोचसि मैकपाद-
मात्मानं वा वृषलैर्भोक्ष्यमाणम्"।
एकेन पदा चरन् वृषरूपधर्म्मो गोरूपधरां भूमीं पप्रच्छ कुशलं। हे भद्रे। पादैर्न्यूनमेकपादं मां वृषं भूमिर्वृषलैर्भोक्ष्यमाणमात्मानं वा शोचसि किम्। इति श्रीधरः॥)

एकपदी, स्त्री, (एकः पादो यस्याम्। कुम्भपदीषु पाठात् निपातनः। यद्वा संख्याया वर्ज्जितस्य पादस्य-लोपः। पादोऽन्यतरस्यामिति ङीप्। पाद-स्यान्त्यलोपः वा। पादः पत्।) पन्थाः। इत्यमरः।

एकपर्णिका, स्त्री, (एकपर्णी+कन्। टाप्। अत्र-इत्त्वम्।) दुर्गा। देवीपुराणे देवीपर्णानां नाम ५१ अध्याये।
"अपर्णाया विराजाया एकपर्णैकपाटला।
पाटला पाटलावत्या देवी लोकेषु गीयते"।

